The Asiatic Society Of Bombay
THIS MANUSCRIPT HAS BEEN ADOPTED FOR
MICROFILMING BY :-
SHREE. P.H. KARANI
Date 17-10-2008

ZZ. a. 20.

1938

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

3/1938

Panchadashi

अथपंचदशीतत्वविवेकप्रारंभः प्रक०१

140757

5/1958

33a20

श्रीगणेशायनमः   नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ प्रत्यक्तत्वविवेकस्याक्रियतेपददीपका १ प्रारिप्सितस्यग्रंथ
स्याविघ्नेनपरिसमाप्तिप्रचयगमनाभ्यांशिष्टाचारपरिप्राप्तमिष्टदेवतागुरुनमस्कारलक्षणंमंगलाचरणंस्वेनानुष्ठितंशिष्यशि
क्षार्थंश्लोकेनोपनिबध्नाति अर्थाद्विषयप्रयोजनेचसूचयति नमइति शंसुखंकरोतीति शंकरः सकलजगदानंदकरः परमात्मा
एषह्येवानंदयातीतिश्रुतेः आनंदः निरतिशयप्रेमास्पदत्वेनपरमानंदस्वरूपः प्रत्यगात्मा शंकरश्चासावानंदश्चेतिशंकरानंदः प्र
त्यगभिन्नः परमात्मासएवगुरुः परिपक्वमलोपेतानुग्रहणहेतुत्वात्क्रियापातेनयोजयतिपरितत्त्वेसदीक्षयाचार्यमूर्तिः स्थइत्यागमा
त् श्रीमांश्चासौशंकरानंदगुरुश्चेतिगंधद्विपइत्यादिवत्समासः अनेनश्रीगुरोरणिमाद्यैश्वर्यसंपन्नत्वंसूचितं यद्वाश्रियासहत्वा
शंकरोतीतिश्रीशंकरः शांतदांतुः परायणमितिश्रुतेः अनेनश्रीगुरोर्भक्तेष्टसंपादनेसामर्थ्यंसूचितंभवति तस्यगुरोः पादावेवांबु
जन्मकमलंतस्मैनमः प्रह्वीभावोस्तु किंविधाय सविलासमहामोहग्राहग्रासैककर्मणेविलासः कार्यवर्गस्तेनसहवर्ततइतिस

नमःश्रीशंकरानंदगुरुपादांबुजन्मने सविलासमहामोहग्राहग्रासैककर्मणे १ तत्पादांबुरुहद्वंद्वसेवानिर्मलचेतसां
सुखबोधायतत्त्वस्यविवेकोयंविधीयते २

विलासः महामोहोमूलाज्ञानसएवग्राहः मकरादिवत्स्ववशंप्राप्तस्यातीवदुःखहेतुत्वात्तस्यग्रासोग्रसनंनिवर्तनंसएवैकंमुख्यं
कर्मव्यापारोयस्यतत्तथा तस्माइत्यर्थः अत्रचशंकरानंदपदद्वयसामानाधिकरण्येनजीवब्रह्मणोरेकत्वलक्षणोविषयः सू
चितः जीवस्यभूमब्रह्मरूपतयाअपरिछिन्नसुखाविर्भावलक्षणंप्रयोजनंचसूचितं सविलासेत्यादिनानिःशेषानर्थनिवृत्ति
लक्षणंप्रयोजनंमुखतएवाभिहितं १ इदानीमवांतरप्रयोजनकथनपुरःसरंग्रंथारंभंप्रतिजानीते तत्पादेति तस्यगुरोः पादा
वेवांबुरुहेमकलेतयोर्द्वंद्वंतस्यसेवयापरिचर्ययास्तुतिनमस्कारादिलक्षणयानिर्मलंरागादिरहितंचेतोंतःकरणंयेषांतेतथो
क्तास्तेषांसुखबोधायानायासेनतत्त्वज्ञानोत्पादनाय तत्त्वस्यानारोपितस्वरूपस्य अयं अखंडसच्चिदानंदंमहावाक्येन
लक्ष्यतइति वक्ष्यमाणः यः विवेक आरोपितात्पंचकोशादिलक्षणाज्जगतोविवेचनं विधीयतेक्रियतइत्यर्थः २   १

जीवब्रह्मणोरेकत्वलक्षणविषयसंभावनायजीवस्यत्वज्ञानादिरूपाधिपुरोदोज्ञानस्याभेदप्रतिपादनेननित्यत्वंसाधयति शब्दस्प
र्शादयइत्यादिना तत्रतावद्बहिस्पष्टव्यवहारवतिजागरेज्ञानस्याभेदंसाधयति शब्देतिजागरेइंद्रियैरर्थोपलब्धिर्जागरीतमित्य
क्तलक्षणेवस्थाविशेषवेद्याः संविद्विषयभूताः शब्दस्पर्शादयआकाशादिगुणत्वेनप्रसिद्धास्तदाधारत्वेनप्रसिद्धाआकाशादय
श्चवैचित्र्यात्परस्परंगवाश्वादिवद्विलक्षण्यापन्नत्वात्पृथक्परस्परंभिद्यंते ततस्तेभ्योविभक्ताबुध्याविवेचितातत्संविच्छब्दादिविषयाशब्दा
दीनांसंविज्ञानंएकरूप्यात्संवित्संविदित्येकाकारेणावभासमानत्वाद्गगनमिवनभिद्यते अत्रायंप्रयोगः विवादाध्यासितासं
वित्स्वाभाविकभेदशून्या उपाधिपरामर्शमंतरेणाविभाव्यमानभेदत्वाद्गगनवत् शब्दसंवित्स्पर्शसंविदोनभिद्यतेसंवित्त्वात्॥
स्पर्शसंविद्वदिति एकस्याएवसंविदोगगनस्येवौपाधिकभेदेनापिभिन्नव्यवहारोपपत्तौवास्तवभेदकल्पनायांगौरवंबाधक

शब्दस्पर्शादयोवेद्यावैचित्र्याज्जागरेपृथक् ततोविभक्तातत्संविदैकरूप्यान्नभिद्यते ३
तथास्वप्नेत्रवेद्यंतुनस्थिरंजागरेस्थिरं तद्भेदोऽतस्तयोःसंविदेकरूपानभिद्यते ४   ७

स्यमुन्नेयं ३ उक्तंन्यायंस्वप्नेप्यतिदिशति तथेति यथाजागरेवैचित्र्याद्विषयाणांभेदः ऐकरूप्यात्संविदोऽभेदश्च तथातेनैव
प्रकारेणस्वप्नेकरणेषुजागरितसंस्कारजः प्रत्ययः सविषयः स्वप्नइत्युक्तलक्षणायांस्वप्नावस्थायामपिविषयाएवभिन्नाः नसं
विदिति ननुयदिस्वप्नजागरयोरेकाकारताविषयतत्संविदोर्भेदाभेदाभ्यांतर्हिस्वप्नोजागरइतिभेदव्यवहारः किंनिमित्तकइ
त्याशंक्याह अत्रवेद्यत्विति अत्रस्वप्नेवेद्यंपरिदृश्यमानेवस्तुजातंनस्थिरंनस्थायिप्रतीतिमात्रशरीरत्वात् जागरेतुपरिदृ
श्यमानंवस्तुजातंस्थिरंस्थायिकालांतरेपिदृष्टुंयोग्यत्वादतः स्थिरास्थिरविषयत्वलक्षणवैलक्षण्यात्तद्भेदस्तयोः स्वप्नजा
गरयोर्भेदइत्यर्थः ननुस्वप्नजागरयोर्भेदश्चेत्तत्संविदोरपिभेदःस्यादित्याशंक्याह तयोरिति एकरूपेतिहेतुगर्भंवि
शेषणं ४

1/1438

एवमवस्थाद्वयेज्ञानस्यैकत्वंप्रसाध्यसुषुप्तिकालीनस्यापितस्यतेनैक्यप्रसाधनायतत्रतावत्ज्ञानंसाधयति सुप्तेति पूर्वंस
मःपश्चादुत्थितःसुप्तंसुषुप्तिःतस्मादुत्थितइतिवानस्यसोषुप्तमोबोधःसुषुप्तिकालीनस्यतमसोऽज्ञानस्ययोबोधोज्ञानमासी
नांकिंचिदवेदिषमितिसास्मृतिरेवभवेन्नानुभवस्तत्कारणस्येंद्रियसन्निकर्षव्याप्तिलिंगादेरभावादितिभावःततःकिंतत्र आह
साचेति साचस्मृतिरवबुद्धविषयावबुद्धोऽनुभूतोविषयोयस्याःसातथोक्तायास्मृतिःसानुभवपूर्विकेतिव्याप्तिर्लोकेदृष्टेतिभावः
ततोपिकिंतत्राह अवबुद्धमिति ततस्तस्मात्कारणात्तत्सोषुप्तंतमस्तदासुषुप्तोअवबुद्धमनुभूतमित्यवगंतव्यं अत्रायंप्रयोगः
विमतंनाकिंचिदवेदिषमितिज्ञानंअनुभवपूर्वकंभवतुमर्हतिस्मृतित्वात्सामिमातेतिस्मृतिवदिति ५ तस्यानुभवस्यस्वविषयादज्ञा
नाद्भिदंबोधांतरादभेदंचाह द्वाभ्यांसबोधइति सबोधःसोषुप्ताज्ञानानुभवःविषयादज्ञानाद्भिन्नःपृथक्भवितुमर्हतिबोधत्वात्घ

सुप्तोत्थितस्यसौषुप्ततमोबोधोभवेत्स्मृतिः साचावबुद्धविषया
वबुद्धंततदातमः ५ सबोधोविषयाद्भिन्नोनबोधात्स्वप्नबोधव
त् एवंस्थानत्रयेप्येकासंवित्तद्वद्दिनांतरे ६

टबोधवत्बोधांतरान्नभिद्यतेबोधत्वात्स्वप्नबोधवत् फलितंकथयन्नुक्तन्यायमन्यत्राप्यतिदिशति एवमित्यादिना स्थानत्रये
पि एकदिनवर्तिज्याग्रदाद्यवस्थात्रयेपिसंविदेकैवसर्वंवाक्यंसावधारणमितिन्यायात्तद्वद्दिनांतरेइति ६ ७ ७ २

9
1938

यथैकस्मिन्दिवसे अवस्थात्रयेपिज्ञानस्याभेदएवमन्यस्मिन्अपिदिवसेअनेकधाऽनेकप्रकारेणगतागाम्येष्वतीतागामिषु
मासेषुचैत्रादिषुअब्देषुप्रभवादिषुयुगेषुकृतादिषुकल्पेषुब्राह्मादिषुज्ञानस्याभेदएवेत्यर्थःसंविदएकत्वसमर्थनेफलमा
ह नोदेतीति यतःसंविदेकाऽतोनोदेतिनोत्पद्यतेनास्तमेतिनविनश्यतिच असाक्षिकयोरुत्पत्तिविनाशयोरसिद्धेःसो
त्पत्तिविनाशयोस्तयैवसंविदाग्रहीतुमशक्यत्वात्संविदंतराभावाच्चेतिभावःननुसंविदंतराभावेग्राहका

मासाब्दयुगकल्पेषुगतागाम्येष्वनेकधा नोदेतिनास्तमेत्ये
कासंविदेषास्वयंप्रभा ७

भावादस्या अप्यभानेजगदांध्यंप्रसज्येतेत्यत आह एषेति अत्रायंप्रयोगः संवित्स्वयंप्रकाशाअवेद्यत्वेसत्यपरोक्षत्वा
द्व्यतिरेकेणघटवन्नचायंविशेषणासिद्धोहेतुःसंविदस्ववेद्यत्वेकर्मकर्तृत्वविरोधात्परवेद्यत्वेऽनवस्थानादतःस्वप्रकाश
त्वेनभासमानायाःसंविदःसर्वावभासकत्वसंभवान्नजगदांध्यप्रसंगइतिभावः ७

भवत्वेवसंविदोनित्यत्वंस्वप्रकाशत्वंचततःकिमित्यत आह इयमिति अत्रायंप्रयोगः इयंसंविदात्माभवितुमर्हतिनित्यत्वे सतिस्वप्रकाशत्वात्‌यन्नैवंतन्नैवंयथाघटइतिआत्मनोनित्यसंविद्रूपत्वप्रसाधनेनसत्यत्वमपिसाधितंभवतिनित्यत्वातिरिक्त सत्यत्वाभावान्नित्यत्वंसत्यत्वंतद्यस्यास्तितन्नित्यंसत्यमितिवाचस्पतिमिश्रोक्तत्वादितिभावः आत्मनः आनंदरूपत्वंसाधय ति परानंदइति आत्मेत्यनुषज्यतेपरश्चासावानंदश्चपरानंदःनिरतिशयसुखस्वरूपइत्यर्थः अत्रहेतुमाह परेति यतो यस्मात्‌कारणात्‌परस्यनिरुपाधिकत्वेननिरतिशयस्यप्रेम्णःस्नेहस्यआस्पदंविषयस्तस्मादत्रेदमनुमानमात्मापरमानंदो

इयमात्मापरानंदःपरप्रेमास्पदंयतः मानभूवंहिभूयासमितिप्रेमात्मनीक्ष्यते ८

रूपः परप्रेमास्पदत्वाद्यःपरमानंदरूपोनभवतीतिनासौपरप्रेमास्पदमपियथाघटःनचोतेचायंपरप्रेमास्पदंनभवतीतिनतस्मा त्परमानंदरूपोनभवतीतिन अपितुभवत्येवेतिशेषःनचात्मनिधिङ्मामितिद्वेषस्योपलभ्यमानत्वात्प्रेमास्पदत्वमेवासिद्धंकु तः परप्रेमास्पदत्वमित्याशंक्यतस्यदुःखसंबंधनिमित्तकत्वेनान्यथासिद्धत्वात्‌प्रेम्णश्चात्मन्यनुभवसिद्धत्वात्‌मैवमिति परिह रति मानभूवमिति हियस्मात्कारणादात्मनिविषयेमानभूवमहंमाभूवमितिनमसत्वंकदापिमाभूत्‌किंतुभूयासमेवसदासत्वमेव ममभूयादित्येवंविधंप्रेमेक्ष्यतेसर्वैरनुभूयते अतोनासिद्धिरित्यर्थः ८

माभूत्स्वरूपासिद्धिः प्रेम्णःपरत्वेप्रमाणाभावाद्विशेषणासिद्धिर्हेतोरित्याशंक्याह तत्प्रेमेति अन्यत्रस्वातिरिक्तेपुत्रादौयत्प्रे मतदात्मार्थंतेषामात्मशेषत्वनिमित्तकमेवनस्वाभाविकमेवंआत्मनिविद्यमानेप्रेमान्यार्थंनात्मनोऽन्यशेषत्वनिमित्तकंनस वतिकिंत्वात्मत्वनिमित्तकमेव अतोनिरुपाधिकत्वात्तत्परमंनिरतिशयं फलितमाह तेननिरतिशयप्रेमास्पदत्वेनात्मनः परमानंदतानिरतिशयसुखरूपत्वंसिद्धं ९ एतैःसप्तभिःश्लोकैःप्रतिपादितमर्थंसंक्षिप्यदर्शयति इत्थमिति शब्दस्पर्शाद यइत्यादिनाज्ञानस्यनित्यत्वंप्रसाध्यतस्यैवयमात्मेत्यात्मत्वप्रसाधनेनात्मनःसच्चिद्रूपत्वंसाधितंपरानंदइत्यादिनाचपरमानंदरूप त्वंसमर्थितमतआत्मामहावाक्येत्वंपदार्थःसच्चिदानंदरूपःसिद्धःनन्वुक्तलक्षणस्यात्मनोयुक्त्यैवावगतत्वादुपनिषदांनिर्विषय त्वेनाप्रामाण्यप्रसंगइत्याशंक्याह तथाविधमिति तथातादृशी विधाप्रकारोयस्यतत्तथाविधंसच्चिदानंदरूपंपरंब्रह्मतत्सदा

तत्प्रेमात्मार्थमन्यत्रनैवमन्यार्थमात्मनि अतस्तत्परमंतेनपरमानंदतात्मनः ९ इत्थं
सच्चित्परानंदआत्मायुक्त्यातथाविधं परंब्रह्मतयोश्चैक्यंश्रुत्यंतेषूपदिश्यते १० अभाने
नपरंप्रेमभानेनविषयेस्पृहा अतोभानेप्यभातासौपरमानंदतात्मनः ११ ❁ ❁ ❁

र्थस्तयोस्तत्त्वंपदार्थयोरैक्यमखंडैकरसत्वंचश्रुत्यंतेषुनामवेदांतेषूपदिश्यतेप्रतिपाद्यते अतोनवेदांतानांनिर्विषयत्वमित्य र्थः १० आत्मनःपरमानंदरूपत्वमाक्षिपति अभानइति परमानंदरूपत्वंनभासतेभासतेवा अभानेअप्रतीतौनपरंप्रेमात्मनि निरतिशयःस्नेहोनस्याद्विषयसौंदर्यज्ञानजन्यत्वात्स्नेहस्य भानेप्रतीतौतुविषयेसुखसाधनेस्रगादौतज्जन्येसुखेवास्पृह छाचनस्यात्फलप्राप्तौसत्यांसाधनेछानुपपत्तेःनित्यनिरतिशयानंदलाभेसतिक्षणिकेसाधनपारतंत्र्यादिदोषदूषितेवैष यिकेसुखेस्पृहाऽयोगाच्चतस्मान्नानंदरूपतात्मनउपपन्नेति प्रकारांतस्यात्रसंभवात्‌मैवमितिपरिहरति अतइति॥ यतोभानाभानपक्षयोरुभयोरपिदोषोस्त्यतःकारणादात्मनोसौपरानंदताभानेपिप्रतीतौसत्यामपिअभाताप्रतीताभवति

11
1938

नन्वेकस्य युगपद्भानाभानेन युज्येते इत्याशंक्य किमिदमयुक्तत्वमदृष्टचरत्वमुपपत्तिरहितत्वं वानाद्य इत्याह अध्येतृवर्गेति अध्येतॄणां वेदपाठकानां वर्गः समूहस्तस्य मध्ये तिष्ठतीति अध्येतृवर्गमध्यस्थः स चासौ पुत्रश्चेति तथा तस्याध्ययनं तत्कर्तृकं पठनं तस्य शब्दः ध्वनिर्यथा बहिःस्थस्य पितुर्भासमानोऽपि सामान्यतो न भासते विशेषतः अयं मत्पुत्रध्वनिरिति तथानंदस्यापि भानेऽप्यभानं भवतीत्यर्थः द्वितीयं प्रत्याह भानस्येति भानेऽप्यभिन्नेत्यत्राप्यनुषंजनीयं भानस्य स्फुरणस्य प्रतिबंधेन वक्ष्यमाणलक्षणेन भानेऽप्यभानं सामान्यतः प्रतीतावपि विशेषाकारेणाप्रतीतिर्युज्यते उपपद्यत इत्यर्थः १२ कोऽसौ प्रतिबंध इत्यत आह प्रतिबंध इति अस्ति भातीति व्यवहारार्हवस्तुनि अस्ति विद्यते भाति प्रकाशत इत्येवं प्रकारं व्यवहारमर्हतीत्यस्ति भातीति व्यवहारार्हं तच्च तद्वस्तु चेति तथा तस्मिन् तं पूर्वोक्तं व्यवहारं निरस्य निराकृत्य विरुद्धस्य नास्ति न

अध्येतृवर्गमध्यस्थपुत्राध्ययनशब्दवत् भानेऽप्यभानं भानस्य प्रतिबंधेन युज्यते १२ प्रतिबंधोऽस्ति भातीति व्यवहारार्हवस्तुनि तं निरस्य विरुद्धस्य तस्योत्पादनमुच्यते १३ तस्य हेतुः समानाभिहारः पुत्रध्वनिश्रुतौ इहानादिरविद्यैव व्यामोहैकनिबंधनं १४ चिदानंदमयब्रह्मप्रतिबिंबसमन्विता तमोरजःसत्वगुणा प्रकृतिर्द्वि

भातीत्येवं रूपस्य तस्य व्यवहारस्योत्पादनं जननं प्रतिबंध इत्युच्यते १३ उक्तलक्षणस्य प्रतिबंधस्य कारणं दृष्टांतदार्ष्टांतिकयोः क्रमेण दर्शयति तस्य हेतुरिति पुत्रध्वनिश्रुतौ पुत्रध्वनिश्रवणलक्षणे दृष्टांते तस्य प्रतिबंधस्य हेतुः कारणं समानाभिहारो बहुभिः सह पठनं इह दार्ष्टांतिके व्यामोहैकनिबंधनं व्यामोहनं विपरीतज्ञानं तन्नाम एकनिबंधनं मुख्यं कारणमनादिरुत्पत्तिरहिताऽविद्या वक्ष्यमाणलक्षणा प्रतिबंधस्य हेतुरित्यर्थः १४ इदानीं प्रतिबंधहेतुमविद्यां व्युत्पादयितुं तन्मूलभूतां प्रकृतिं व्युत्पादयति चिदानंदेति यच्चिदानंदरूपं ब्रह्म तस्य प्रतिबिंबेन प्रतिच्छायया समन्विता युक्ता तमोरजःसत्वगुणा सत्वरजस्तमोगुणानां साम्यावस्था या सा प्रकृतिरुच्यते सा च द्विविधा द्विप्रकारा भवति चकाराद्वक्ष्यमाणं प्रकारांतरं सूचयति १५

४

सहेतुकं द्वैविध्यमेव दर्शयति सत्वेति सत्वप्रकाशात्मकस्य गुणस्य शुद्धिर्गुणांतरेणाकलुषीकृतता अविशुद्धिः गुणांतरेण कलुषीतत्वं ताभ्यां सत्वशुद्ध्यविशुद्धिभ्यां ते च द्विविधे माया विद्ये मायेत्यविद्येति च मते संमते विशुद्धसत्वप्रधाना माया मलिनसत्वप्रधानाऽविद्येत्यर्थः यदर्थं मायाविद्ययोर्भेद उक्तस्तदिदानीं दर्शयति मायेति मायाबिंबः मायायां प्रतिफलितः चिदात्मा तां मायां वशीकृत्य स्वाधीनीकृत्य वर्तमानः सर्वज्ञः सर्वज्ञत्वादिगुणक ईश्वरः स्यात् १६ अविद्येति अविद्यावशगः अविद्यायां प्रतिबिंबत्वेन तत्परतंत्रस्तु चिदात्माऽन्यो जीवः स्यात् स च तद्वैचित्र्यात्तस्या अविद्याया उपाधिभूताया वैचित्र्याद्विशुद्धितारतम्यादनेकधाऽनेकप्रकारो देवतीर्यगादिभेदेन विविधो भवतीत्यर्थः यथा मुंजादिषीकेवमात्मा युक्त्या समुद्धृतः शरीरत्रितयाद्धीरैः परं ब्रह्मैव जायत इत्युक्तत्वच्छरीरत्रितयाद्विवेचितस्य जीवस्य परं ब्रह्मत्वं वक्ष्यति तत्र तानि कानि त्रीणि शरीराणि तदु

तत्रशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते मायाबिंबो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः १६ अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा सा कारणशरीरं स्यात्प्राज्ञस्तत्राभिमानवान् १७ तमःप्रधानप्रकृतेस्तद्भोगायेश्वराज्ञया वियत्पवनतेजोंबुभूतानि जज्ञिरे १८

पाधिको वा जीवः किंरूपो भवतीत्याकांक्षायां तत्सर्वं क्रमेण व्युत्पादयति सा कारणशरीरमित्यादिना सा अविद्या कारणशरीरं स्थूलसूक्ष्मशरीरादिकारणत्वात् प्रकृत्यवस्थाविशेषत्वात्कारणमुपचारात् शीर्यते तत्त्वज्ञानेन नश्यति चेति शरीरं स्यात्तत्र कारणशरीरेऽभिमानवान् तादात्म्याध्यासेनाहमित्यभिमानवान् जीवः प्राज्ञः प्रज्ञा अविनाशिस्वरूपा यस्य स प्रज्ञः प्रज्ञ एव प्राज्ञः एतन्नामकः स्यादित्यर्थः १७ क्रमप्राप्तं सूक्ष्मशरीरं तदुपाधिकं जीवं च व्युत्पादयितुं तत्कारणाकाशादिसृष्टिमाह तम इति तद्भोगाय तेषां प्राज्ञानां भोगाय सुखदुःखसाक्षात्कारसिद्धये तमःप्रधानप्रकृतेस्तमोगुणप्रधानायाः प्रकृतेः पूर्वोक्ताया उपादानकारणभूताया सकाशादीश्वराज्ञया ईशनादिशक्तियुक्तस्य जगदधिष्ठातुराज्ञया ईक्षापूर्वकसर्जनेच्छारूपया निमित्तकारणभूतया वियदादीनि पृथिव्यंतानि पंचभूतानि जज्ञिरे प्रादुर्भूतानि उत्पन्नानीत्यर्थः १८

13/1938

मूतसृष्टिमभिधायभौतिकसृष्टिमभिदधान आदौज्ञानेंद्रियसृष्टिमाह सत्वांशैरिति तेषांवियदादीनांपंचभिः सत्वांशैः सत्व
गुणभागैरुपादानभूतैः श्रोत्रत्वगक्षिरसनघ्राणाख्यंधींद्रियपंचकंधींद्रियाणिज्ञानेंद्रियाणितेषांपंचकंक्रमादुपजायतेएकैक
भूतसत्वांशादेकैकमिंद्रियंजायतइत्यर्थः १९ सत्वांशानांप्रत्येकमसाधारणकार्याण्यभिधायसर्वेषांसाधारणंकार्यमाह तैरं
तरिति तैःसहसत्वांशैः सर्वैः संभूयवर्तमानैरंतःकरणंमनोबुध्युपादानभूतंद्रव्यमुपजायते इत्यनुषंगस्तस्यावांतरभेदंसनि
मित्तमाह वृत्तिभेदेनेति तदंतःकरणंवृत्तिभेदेनपरिणामभेदेनद्विधाद्विःप्रकारंभवतिवृत्तिभेदमेवदर्शयति॥ मनइति विम
र्शरूपंविमर्शः संशयात्मिकावृत्तिः सास्वरूपंयस्यतत्तथातन्मनःस्यान्निश्चयात्मिकानिश्चयोध्यवसायः सआत्मास्वरूपंयस्याः

सत्वांशैः पंचभिस्तेषांक्रमाद्धींद्रियपंचकं श्रोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते १९ तैरंतःकरणंसर्वैर्वृत्तिभेदेन
तद्द्विधा मनोविमर्शरूपंस्यात्बुद्धिःस्यान्निश्चयात्मिका २० रजोंशैः पंचभिस्तेषांक्रमात्कर्मेंद्रियाणितु वाक्पाणि
पादपायूपस्थाभिधानानिजज्ञिरे २१ तैः सर्वैः सहितैः प्राणोवृत्तिभेदात्सपंचधा प्राणोपानः समानश्चोदानव्यानौ
चतेपुनः २२

सानिश्चयात्मिकासावृत्तिर्बुद्धिःस्यात् २० क्रमप्राप्तानांरजोंशानां प्रत्येकमसाधारणकार्याण्याह रजोंशैरिति तेषांवियदादी
नामेवपंचभिः रजोंशैरजोभागैरुपादानभूतैर्वाक्पाणिपादपायूपस्थाभिधानानिएतन्नामकानिकर्मेंद्रियाणिक्रियाजनका
निकर्मेंद्रियाणिजज्ञिरे २१ रजोंशानांप्रत्येकमसाधारणंकार्याण्यभिधायरजोंशानांसर्वेषामेकंसाधारणंकार्यमाह तैरिति॥
सहितैः संभूयकारणतांगतैः प्राणोजायतइतिशेषः मस्यावांतरभेदमाह वृत्तिभेदादिति सप्राणोवृत्तिभेदात् प्राणनादिव्यापा
रभेदात्पंचधापंचप्रकारोभवति वृत्तिभेदानेवदर्शयति प्राणइति तेपुनस्तेतुभेदाः प्राणाशब्दवाच्याइत्यर्थः २२ ७ ७

५

15
1938

परमेमाकाशादि प्राणांतानांसृष्टिरुक्तातदिदानींदर्शयतिबुद्धीति बुद्धयोज्ञानानिकर्माणिव्यापाराः तज्जनकानींद्रियाणिबुद्धि
कर्मेंद्रियाणिबुद्धींद्रियाणिकर्मेंद्रियाणिचेत्यर्थः बुद्धिकर्मेंद्रियाणिचप्राणाश्च बुद्धिकर्मेंद्रियप्राणास्तेषांपंचकानितैर्मनसाविम
र्शात्मकेनधियानिश्चयरूपयाबुध्याचसहसप्तदशभिः सप्तदशसंख्याकैः सूक्ष्मंशरीरंभवति तस्यैवसंज्ञांतरमाह तल्लिंग
मिति उच्यतेवेदांतेष्वित्यर्थः २३ एवंसूक्ष्मशरीरमभिधायातदभिमानित्वप्रयुक्तंप्राज्ञेश्वरयोरवस्थांतरंदर्शयति प्राज्ञइति प्रा
ज्ञोमलिनसत्वप्रधानाऽविद्योपाधिकोजीवस्तत्रतैजसः शब्दवाच्यांतःकरणोपाधिलक्षितालिंगशरीरेभिमानेनतादात्म्याभि

बुद्धिकर्मेंद्रियप्राणपंचकैर्मनसाधिया शरीरंसप्तदशभिःसूक्ष्मंतल्लिंगमुच्यते २३
प्राज्ञस्तत्राभिमानेनतैजसत्वंप्रपद्यते हिरण्यगर्भतामीशस्तयोर्व्यष्टिसमष्टिता २४
समष्टिरीशः सर्वेषांस्वात्मतादात्म्यवेदनात् तदभावात्ततोन्येतुकथ्यंतेव्यष्टिसंज्ञया २५

मानेनतैजसंत्वंतैजसनामकत्वंप्रपद्यतेप्राप्नोति ईशः विशुद्धसत्वप्रधानमायोपाधिकाः परमेश्वरः तत्रशरीरेअहमित्यभिमा
नेनहिरण्यगर्भतांहिरण्यगर्भसंज्ञकत्वंप्रपद्यतइत्यनुषंगः तैजसहिरण्यगर्भयोर्लिंगशरीराभिमानित्वेसमानेसतितयोः पर
स्परंभेदः किंनिबंधनइत्यत आह तयोरिति तयोस्तैजसहिरण्यगर्भयोर्व्यष्टित्वंसमष्टित्वंचभवतिअतएवभेदइत्यर्थः २४ ई
श्वरस्यसमष्टिरूपत्वेजीवानांव्यष्टिरूपत्वेचकारणमाह समष्टिरिति ईशः ईश्वरोहिरण्यगर्भः सर्वेषांलिंगशरीरोपाधिका
नांतैजसानांस्वात्मतादात्म्यवेदनात्स्वात्मनातादात्म्यप्रत्येकत्वस्यवेदनाद्ज्ञानात्समष्टिर्भवति ततईश्वरादन्येजीवास्तत
दभावात्तस्यतादात्म्यवेदनस्याभावाद्व्यष्टिसंज्ञयाव्यष्टिशब्देनकथ्यंते २५

एवंलिंगशरीरंतदुपाधिकोंनजसहिरण्यगर्भोंचदर्शयित्वास्थूलशरीराद्युत्पत्तिसिद्धयेपंचीकरणंनिरूपयितुमाह तद्भोगायेति भगवानैश्वर्यादिगुणषट्कसंपन्नः परमेश्वरः पुनःपुनरपितद्भोगायतेषांजीवानांभोगायैवभोग्यभोगायतनजन्मनेभोग्यस्यान्नपानादेर्भोगायतनस्यजरायुजादिचतुर्विधशरीरजातस्यचजन्मनेउत्पत्तयेवियदादिकंआकाशादिभूतपंचकंप्रत्येकमेकैकंपंचीकरोति अपंचात्मकंपंचात्मकंसंपद्यमानंकरोति २६ कथमेकैकस्यपंचपंचात्मकत्वमित्यतआह द्विधेति॥ वियदादिकमेकैकंद्विधाद्विधातंत्रेणोच्चारितोद्विधाशब्दः विधायकृत्वाभागद्वयोपेतंकृत्वेत्यर्थः पुनश्चपुनरपिप्रथमंप्रथमंभागंचतुर्धाभागचतुष्टयोपेतंविधायेत्यनुषज्यते स्वस्वेतरद्वितीयांशैः स्वस्मात्स्वस्मादितरेषांचतुर्णांचतुर्णांभूतानांयोयो

तद्भोगायपुनर्भोग्यभोगायतनजन्मने पंचीकरोतिभगवान्प्रत्येकंवियदादिकं २६ द्विधावि
धायचैकैकंचतुर्धाप्रथमंपुनः स्वस्वेतरद्वितीयांशैर्योजनात्पंचपंचते तैरंडस्तत्रभुवनंभोग्यभो
गाश्रयोद्भवः २७ हिरण्यगर्भःस्थूलेस्मिन्देहेवैश्वानरोभवेत् तैजसाविश्वतांयातादेवतिर्यङ्नरादयः २८

द्वितीयः स्थूलोभागस्तेनतेनसहप्रथमप्रथमभागांशानांचतुर्णांचतुर्णांमध्येएकैकस्ययोजनात्तेवियदादयःप्रत्येकंपंचपंचात्मकानिभवंतिएवंपंचीकरणमभिधायतैर्भूतैरुत्पाद्यंकार्यवर्गंदर्शयति तैरिति तैःपंचीकृतैर्भूतैरुपादानत्वेनकारणभूतैरंडोब्रह्मांडउत्पद्यतेतत्रब्रह्मांडांतर्भुवनानिउपरिभागेवर्तमानाभूरादयः सप्तलोकाः सत्यलोकांताः भूमेरधस्थितान्यतलादीनिसप्तपातालांतानितेषुचभुवनेषुतैस्तैः प्राणिभिर्भोग्यानिभोक्तुंयोग्यान्यन्नादीनितत्तल्लोकोचितशरीराणिचतैरेवपंचीकृतैर्भूतैरीश्वराज्ञयाजायंते २७ एवंस्थूलशरीरोत्पत्तिमभिधायतेषुस्थूलशरीरेष्वभिमानवतोहिरण्यगर्भस्यसमष्टिरूपस्यवैश्वानरसंज्ञकत्वं एकैकस्थूलशरीराभिमानवतांव्यष्टिरूपाणांतैजसानांविश्वसंज्ञकत्वंचभवतीत्याह हिरण्यगर्भइति अस्मिन्स्थूलेदेहेवर्तमानोहिरण्यगर्भोवैश्वानरोभवेत् तत्रैववर्तमानास्तैजसाविश्वाभवंति तेषामवांतरभेदमाह देवतिर्यङ्नरादयइति २८

६

17/1038

इदानींतेषांविश्वसंज्ञानांजीवानांतत्त्वज्ञानरहितत्वेनसंसारापत्तिप्रकारंसदृष्टांतंश्लोकद्वयेनाह तेपरागिति तेदेवादयःपराक्दर्शिनः बाह्यानेवशब्दादीन्पश्यंतिनतुप्रत्यगात्मानं पराञ्चिखानिव्यतृणत्स्वयंभूः तस्मात्पराङ्पश्यतिनांतरात्मन्नितिश्रुतेः ननुतार्किकादयोदेहव्यतिरिक्तमात्मानंजानंतीत्याशंक्ययद्यप्यात्मानंतेजानंतितथापिश्रुतिसिद्धंतत्त्वंनजानंतीत्याशयेनोक्तमित्याह प्रत्यगिति अतएवभोगायसुखाद्यनुभवायमनुष्यादिशरीराण्यधिष्ठायकर्मतच्छरीरोचितानिकर्माणिकुर्वंते जाताविकवचनं पुनश्चकर्मकर्तुंदेवादिशरीरैस्तत्तत्फलंभुंजतेच फलानुभवाभावेनतत्सजातीयेच्छानुपपत्त्यातत्तत्साधनानुष्ठानानुपपत्तेः २९ किंच एवंवर्तमानास्तेजीवाः नदीप्रवाहपतिताःकीटाश्चावर्तादावर्तांतरमाशुव्रजंतोयथानिर्वृत्तिंसुखंनलभंतेएवमाशुजन्मनोजन्मव्रजंतःसुखंनैवलभंतइति ३० एवं

तेपरागदर्शिनःप्रत्यक्तत्त्वबोधविवर्जिताः कुर्वतेकर्मभोगायकर्मकर्तुंचभुंजते २९ न
द्यांकीटाइवावर्तादावर्तांतरमाशुते व्रजंतोजन्मनोजन्मलभंतेनैवनिर्वृतिं ३० सत्कर्मपरि
पाकात्तेकरुणानिधिनोद्धृताः प्राप्यतीरतरुच्छायांविश्राम्यंतियथासुखं ३१ उपदेशमवाप्यै
माचार्यात्तत्त्वदर्शिनः पंचकोशविवेकेनलभंतेनिर्वृतिंपरां ३२

संसारापत्तिमभिधायतन्निवृत्त्युपायंदर्शयितुंदृष्टांतेनावदाह सदिति तेकीटाः सत्कर्मपरिपाकात्पूर्वोपार्जितपुण्यकर्मपरिपाकात्कृपालुनाकेनचित्पुरुषविशेषेणोद्धृताः नदीप्रवाहाद्बहिर्निःसारिताः संतस्ततस्तीरतरुच्छायांप्राप्यसुखंयथाभवतितथायद्वद्विश्राम्यंति ३१ इदानींदृष्टांतसिद्धमर्थंदार्ष्टांतिकेयोजयति उपदेशमिति एवमुक्तेनप्रकारेणपूर्वोपार्जितपुण्यकर्मपरिपाकवशादेवतत्त्वदर्शिनःप्रत्यगभिन्नब्रह्मसाक्षात्कारवतआचार्याद्गुरोःसकाशादुपदेशंतत्त्वमस्यादिवाक्यार्थज्ञानसाधनंश्रवणंवक्ष्यमाणमवाप्यसंपाद्यपंचकोशविवेकेनअन्नादीनांपंचानांकोशानांविवेकेनवक्ष्यमाणविवेचनेनपरांनिर्वृतिंमोक्षसुखंलभंतेप्राप्नुवंति ३२

केनान्नादयः पंचकोशाइत्याकांक्षायांतानुद्दिशति अन्नमिति अन्नंप्राणोमनोबुद्धिरानंदश्चेत्येतेपंचकोशाः बुद्धिर्विज्ञानंतेष
मन्नादीनांकोशशब्दाभिधेयत्वेकारणमाहतैरितितैःकोशैरावृतआच्छादितः आत्मास्वस्वरूपमृत आत्माविस्मृत्यास्वस्वरूपवि
स्मरणेनसंसृतिंजननादिप्राप्तिरूपंसंसारंव्रजेत्प्राप्नुयात् कोशोयथाकोशकारकृमेरावरकत्वेन क्लेशहेतुरेवमन्नादयोप्यद्वयानंदत्वा
यावरकत्वेनात्मनः क्लेशहेतुत्वात्कोशाइत्युच्यंतइत्यर्थः ३३ तेषांकोशानांस्वरूपाणिक्रमेणव्युत्पादयति स्यात्पंचीकृतेत्या
दि नामादाद्यिवृत्तिभिरित्यंतेनसार्धश्लोकद्वयेन पंचीकृतेभ्योभूतेभ्यउत्पन्नःस्थूलोदेहोन्नसंज्ञकोन्नमयशब्दितःकोशः

अन्नंप्राणोमनोबुद्धिरानंदश्चेतिपंचते कोशास्तैरावृतःस्वात्माविस्मृत्यासंसृतिंव्रजेत् ३३
स्यात्पंचीकृतभूतोत्थोदेहःस्थूलोऽन्नसंज्ञकः लिंगेतुराजसैःप्राणैःप्राणःकर्मेंद्रियैःसह ३४
सात्विकैर्धीद्रियैःसाकंविमर्शात्मामनोमयः तैरेवसाकंविज्ञानमयोधीर्निश्चयात्मिका ३५

स्यात् प्राणस्तुप्राणमयकोशस्तुलिंगेलिंगशरीरेवर्तमानैःराजसैःरजोगुणकार्यभूतैःप्राणैःप्राणापानादिभिर्वायुभिः
पंचभिर्वागादिभिःकर्मेंद्रियैःसहदशभिःस्यात् ३४ सात्विकैरिति विमर्शात्मासंशयात्मकंपंचभूतसत्वकार्यंयन्मन
उक्तंतत्सात्विकैःप्रत्येकंभूतसत्वकार्यभूतैःधींद्रियैःश्रोत्रादिभिःपंचभिर्ज्ञानेंद्रियैःसाकंसहितंमनोमयःकोशःस्या
दितिपूर्वेणसंबंधः निश्चयात्मिकाधीःतेषामेवसत्वकार्यरूपाबुद्धिःतैरेवपूर्वोक्तैर्ज्ञानेंद्रियैरेवसाकंसहितासतीवि
ज्ञानमयोविज्ञानमयाख्यःकोशःस्यात् ३५ ७

19
1958

कारणेकारणशरीरभूतायामविद्यायांयन्मलिनसत्वमस्तितन्मोदादिवृत्तिभिःप्रियमोदप्रमोदाख्याभिरिष्टदर्शनलाभभोगज
न्यैःसुखविशेषैःसहितमानंदमयःआनंदमयाख्यःकोशःस्यादिति ननुस्थूलशरीरादीनामन्नमयादिशब्दवाच्यत्वे एषपु
रुषोन्नरसमयइत्युपक्रम्यतस्माद्वाएतस्मादन्नरसमयादन्योंतरआत्माप्राणमयअन्योंतरआत्मामनोमयइत्यादिश्रुतत्वा
दात्मनोन्नमयादिशब्दवाच्यत्वंकथमुच्यतइत्याशंक्यदेहादीनामन्नादिविकारत्वेनान्नमयादिशब्दवाच्यत्वंआत्मनस्तु
तेनकोशेनतादात्म्याभिमानादित्याह तत्तदादिति आत्माप्रत्यगात्मातत्तत्कोशैःतेनतेनकोशेनसहतादात्म्यात्तादात्म्या
भिमानात्तन्मयस्तत्तत्कोशमयःस्याद्व्यवहारकालेन्नमयादिकोशप्राधान्यादन्नमयादिकोशशब्दवाच्यइत्यर्थः तुशब्द
आत्मनःकोशेभ्योवैलक्षण्यद्योतनार्थः ३६ कथंतर्ह्येवंविधस्यात्मनोब्रह्मत्वंभवतीत्याशंक्यकोशेभ्योविवेकाद्भवतीत्या

कारणेसत्वमानंदमयोमोदादिवृत्तिभिः तत्तत्कोशैस्तुतादात्म्यादात्मातत्तन्मयोभवेत् ३६ अन्वयव्यतिरेकाभ्यां
पंचकोशविवेकतः स्वात्मानंततउद्धृत्यपरंब्रह्मप्रपद्यते ३७ अभानेस्थूलदेहस्यस्वप्नेयद्भानमात्मनः सोन्व
योव्यतिरेकस्तद्भानेन्यानवभासनं ३८ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७

ह अन्वयेति अन्वयव्यतिरेकाभ्यांवक्ष्यमाणाभ्यांपंचकोशविवेकतः पंचानांकोशानांअन्नमयादीनांविवेकतःप्रत्य
गात्मनोविवेचनेनपृथक्करणेनयद्वापंचकोशेभ्योन्नमयादिभ्यआत्मनःपृथक्करणेनस्वात्मानंप्रत्यगात्मानंततस्ते
भ्यःकोशेभ्यउद्धृत्यबुध्यानिःकृष्यचिदानंदरूपंनिश्चित्यपरंब्रह्मपूर्वोक्तलक्षणंप्रपद्यतेप्राप्नोतिब्रह्मैवभवतीत्यर्थः ३७
इदानींविवक्षितावन्वयव्यतिरेकौदर्शयति अभानेइति स्वप्नेस्वप्नावस्थायांस्थूलदेहस्यान्नमयकोशस्याभानेऽप्रतीतौ
सत्यामात्मनःप्रतीचोयद्भानंस्वप्नसाक्षित्वेनयत्स्फुरणमस्तिसआत्मनोन्वयः तस्यामेवस्वप्नावस्थायांतद्भानेतस्यात्म
नःस्फुरणेसतिअन्यानवभासनमन्यस्यस्थूलदेहस्येतिशेषः अस्मिन्प्रकरणेन्वयव्यतिरेकशब्दाभ्यामनुवृत्तिव्या
वृत्तीउच्येते ३८॥

पं·द·त·वि·
८

लिंगाभानइति
एवंस्थूलदेहस्यानात्मत्वावबोधकान्वयव्यतिरेकौदर्शयित्वालिंगदेहस्यतथात्वावगमकौतौदर्शयति लिंगाभानइति
एवंस्थूलदेहस्यानात्मत्वावबोधकान्वयव्यतिरेकौदर्शयित्वालिंगदेहस्यतथात्वावगमकौतौदर्शयति लिंगाभानइति स्वप्नेलिंगस्यसूक्ष्मदेहस्याभानेऽप्रतीतौआत्मनोभानंतदवस्थासाक्षित्वेनस्फुरणंआत्म
सुषुप्तौसुषुप्त्यवस्थायांलिंगाभानेलिंगस्यसूक्ष्मदेहस्याभानेऽप्रतीतौआत्मनोभानंतदवस्थासाक्षित्वेनस्फुरणंआत्म
नोन्वयःस्यात्तद्भानेआत्मनोभानेलिंगस्याभानंलिंगदेहस्यास्फुरणंव्यतिरेकइत्युच्यते ३९ ननुपंचकोशविवेचनमुप
क्रम्यलिंगदेहविवेचनेप्रकृतासंगतमित्याशंक्यप्राणमयादिकोशत्रितयस्यतत्रैवांतर्भावान्नप्रकृतासंगतिरित्याह तद्वि
ति तस्यलिंगशरीरस्यविवेकाद्विवेचनात् प्राणमनोधियःएतन्नामकाःकोशाविविक्ताःआत्मनःपृथक्कृताःस्युःकुतइ
त्यतआह तेहीति हियस्मात्कारणात्तेप्राणमयादयः तत्रतस्मिन्लिंगशरीरेगुणावस्थाभेदमात्राद्गुणयोःसत्वरज

लिंगाभानेसुषुप्तौस्यादात्मनोभानमन्वयः व्यतिरेकस्तुतद्भानेलिंगस्याभानमुच्यते ३९ तद्विवेका
द्विविक्ताःस्युःकोशाःप्राणमनोधियः तेहितत्रगुणावस्थाभेदमात्रात्पृथक्कृताः ४० सुषुप्त्यभानेमा
नंतुसमाधावात्मनोन्वयः व्यतिरेकस्त्वात्मभानेसुषुप्त्यनवभासनं ४१

सोरवस्थाभेदमात्राद्गुणप्रधानभावेनावस्थाविशेषादेवपृथक्कृताःभेदेननिर्दिष्टाइत्यर्थः ४० इदानीमानंदमयको
शात्तेनविवक्षितस्यकारणशरीरस्यविवेचनोपायमाह सुषुप्तीति समाधौवक्ष्यमाणलक्षणायांसमाध्यवस्थायांसुषु
प्त्यभानेसुषुप्तिशब्दोपलक्षितस्यकारणदेहरूपस्याज्ञानस्याप्रतीतौआत्मनस्तुशब्दोवधारणेआत्मनएवभानंस्फुर
णंयदस्तिसआत्मनोऽन्वयः आत्मभानेआत्मस्फूर्तौसत्यांसुषुप्त्यनवभासनंसुषुप्त्युपलक्षितस्याज्ञानस्याप्रतीतिरेवव्य
तिरेकस्तस्येति अत्रायंप्रयोगः प्रत्यगात्माअन्नमयादिभ्योभिद्यते तेषुपरस्परंव्यावर्तमानेष्वपिस्वयमव्यावृत्तत्वाद्यद्येषु
व्यावर्तमानेष्वपिनव्यावर्ततेतत्तेभ्योभिद्यतेयथाकुसुमेभ्यःसूत्रंयथावाखंडादिव्यक्तिभ्योगोत्वमिति ४१॥ ॥७ ७ ८

21/1938

एवंअन्वयव्यतिरेकाभ्यांकोशपंचकाद्विविक्तस्याऽत्मनोब्रह्मप्राप्तिर्भवतीत्युक्तंतत्प्रतिपादिकामंगुष्ठमात्रःपुरुषोंत
रात्मेत्यादिकांतेविद्याच्छुक्रममृतमित्यंतांकठश्रुतिमर्थतःपठति यथेति यथायेनप्रकारेणमुंजादेस्तन्नामकात्तृणवि
शेषादिषीकागर्भस्थकोमलंतृणंयुक्त्याबहिरावरकत्वेनस्थितानांस्थूलपत्राणांविभजनलक्षणेनोपायेनसमुध्रियते॥
एवमात्मापियुक्त्यान्वयव्यतिरेकलक्षणोपायेनशरीरत्रितयात्पूर्वोक्ताच्छरीरत्रयाद्धीरैर्ब्रह्मचर्यादिसाधनसंपन्नैर
धिकारिभिःसमुद्धृतःपृथक्कृतश्चेत्तत्परंब्रह्मैवजायते चिदानंदरूपत्वस्यलक्षणस्योभयोरविशिष्टत्वादित्यभिप्रा
यः ४२ एतावताग्रंथसंदर्भेणसफलस्यतत्वज्ञानस्यनिरूपितत्वादुत्तरग्रंथभागस्यानारंभप्रसंगइत्याशंक्यतदारंभ

यथामुंजादिषीकैवमात्मायुक्त्यासमुद्धृतः शरीरत्रितयाद्धीरैःपरंब्रह्मैवजायते ४२ परापरात्मनोरेवंयु
क्त्यासंभावितैकता तत्वमस्यादिवाक्यैःसाभागत्यागेनलक्ष्यते ४३ जगतोयदुपादानंमायामादायतामसीं
निमित्तंशुद्धसत्वांतामुच्यतेब्रह्मतद्गिरा ४४

सिद्धयेवृत्तानुकीर्तनपूर्वकमुत्तरग्रंथस्यतात्पर्यमाह परापरेति एवमुक्तेनप्रकारेणपरापरात्मनोस्तत्वंपदार्थयोःपर
मात्मजीवात्मनोरेकताअभिन्नतायुक्त्यालक्षणसाम्यप्रदर्शनाद्युपायेनसंभावितांगीकारिता साएकतातत्वमस्या
दिवाक्यैःस्पष्टंभागत्यागेनविरुद्धांशपरित्यागेनलक्ष्यतेलक्षणावृत्त्याबोध्यते ४३ तत्वमसीतिवाक्यार्थज्ञानस्यतदा
दिपदार्थज्ञानपूर्वकत्वात् तत्पदस्यवाच्यमर्थंतावदाह जगतइति यत्सच्चिदानंदलक्षणंब्रह्मतामसीतमोगुणप्रधा
नांतामुपाधित्वेनस्वीकृत्यजगतश्चराचरात्मकस्यकार्यवर्गस्योपादानंअध्यासाधिष्ठानं शुद्धसत्वांविशुद्धसत्वप्रधानांतामु
पाधित्वेनस्वीकृत्यनिमित्तंउपादानाद्यभिज्ञंकर्तृभवतितन्निमित्तोपादानोभयरूपंब्रह्मतद्गिरातत्वमसिइतिवाक्यस्थेनतत्

पं·द·त·वि·
७

त्वंपदवाच्यार्थमाह॥ यदेति तदेवब्रह्मयदायस्यामवस्थायांमलिनसत्त्वामीषद्रजस्तमोमिश्रणेनमलिनसत्त्वप्रधानांअतएवका
मकर्मादिदूषितांअविद्याशब्दवाच्यांमायामादत्ते उपाधित्वेनस्वीकरोतितदात्वंपदेनोच्यते ४५ एवंतत्वंपदार्थावभिधायवाक्य
र्थमाह त्रितयीमिति त्रितयीमपित्रिप्रकारामपितमःप्रधानविशुद्धसत्त्वप्रधानमलिनसत्त्वप्रधानत्वभेदेनोक्तामतएवपरस्प
विरोधिनींतांमायांमुक्त्वापरित्यज्यअखंडंभेदरहितंसच्चिदानंदंब्रह्ममहावाक्येनलक्ष्यतइत्युक्तं ४६ नन्वेवंलक्षणावृत्त्यावा
क्यार्थबोधनंक्वदृष्टमित्याशंक्याह सोयमिति सोयंदेवदत्तइत्यादिवाक्येषुतदिदंतयोःतद्देशकालवैशिष्ट्यलक्षणयोर्ध
र्मयोःविरोधादैक्यानुपपत्तेर्भागयोर्विरुद्धांशयोस्त्यागेनैकाश्रयोदेवदत्तस्वरूपमेवयथालक्ष्यते ४७ एवंदृष्टांतमभिधाय

यदामलिनसत्त्वांतांकामकर्मादिदूषितां आदत्तेतत्परंब्रह्मत्वंपदेनतदोच्यते ४५ त्रितयी
मपितांमुक्त्वापरस्परविरोधिनीं अखंडंसच्चिदानंदंमहावाक्येनलक्ष्यते ४६ सोयमित्यादि
वाक्येषुविरोधात्तदिदंतयोः त्यागेनभागयोरेकआश्रयोलक्ष्यतेयथा ४७ मायाविद्येविहायैव
मुपाधीपरजीवयोः अखंडंसच्चिदानंदंपरंब्रह्मैवलक्ष्यते ४८ सविकल्पस्यलक्ष्यत्वेलक्ष्यस्य
स्यादवस्तुता निर्विकल्पस्यलक्ष्यत्वंनदृष्टंनचसंभवि ४९

दार्ष्टांतिकमाह मायेति एवंसोयंदेवदत्तइत्यादिवाक्ययथातद्वत्परजीवयोरुपाधिउपाधिभूतेमायाविद्येपूर्वोक्तेविहायाऽखं
डंभेदरहितंसच्चिदानंदंपरंब्रह्मैवमहावाक्येनलक्ष्यते ४८ ननुमहावाक्येनलक्ष्यंसविकल्पमुतनिर्विकल्पकमितिवि
कल्प्यप्रथमेपक्षेदोषमाह पूर्ववादी सविकल्पस्येति सविकल्पस्यविकल्पेनविपरीतत्वेनाविकल्पितेननामजात्यादि
रूपेणसहवर्तनइतिसविकल्पंतस्यलक्ष्यत्वेवाक्येनबोध्यत्वेलक्ष्यस्यवाक्यार्थतयालक्ष्यस्याऽवस्तुतास्यात्मिथ्यात्वंस्या
त् द्वितीयेदोषमाह निर्विकल्पस्येति निर्विकल्पस्यनामजात्यादिरहितस्यलक्ष्यत्वंलोकेनक्वापिदृष्टंनचसंभविउप
पद्यमानमपिनभवति लक्ष्यत्वधर्मवतोनिर्विकल्पत्वव्याघातादितियावत् ४९ ७

28/1938

सिद्धांतीआत्मकत्तरत्वान्निदंचोद्यमितिविकल्पपूर्वकंदोषमाहविकल्पइति सविकल्पस्यवानिर्विकल्पस्यवालक्ष्यत्वमिति
योविकल्पस्त्वयाकृतःसकिंनिर्विकल्पस्यउतसविकल्पस्यभवेत् आद्येप्रथमेपक्षेव्याहतिस्त्वयोक्तोव्याघातएव अन्य
त्रद्वितीयपक्षेअनवस्थादयः तथाहिसविकल्पस्यविकल्पइत्यत्रप्रथमांतविकल्पपदेनविकल्पेनसहवर्तनइत्यत्रतृती
यांतविकल्पपदेनचैकएवविकल्पोविधीयतेद्वौवा एकएवचेत् तदास्वयमेकएवविकल्पाश्रयविशेषणतयाऽश्रयस्तदा
श्रितोविकल्पश्चेत्यात्माश्रयता द्वौचेत्तदातृतीयांतशब्दनिर्दिष्टस्यापिविकल्पस्यविकल्परूपत्वात्तदाश्रयस्यासविकल्प
त्वात्तद्विशेषणभूतोविकल्पः किंप्रथमांतशब्दनिर्दिष्टएवविकल्पःउततताभ्यामन्यः आद्येअन्योन्याश्रयताद्वितीयेपिधर्मि

विकल्पोनिर्विकल्पस्यसविकल्पस्यवाभवेत् आद्येव्याहतिरन्यत्रानवस्था
त्माश्रयादयः ५० इदंगुणक्रियाजातिद्रव्यसंबंधवस्तुषु समंतेनस्वरूपस्य
सर्वमेतदितीष्यतां ५१

विशेषणीभूतोविकल्पःकिंप्रथमांतशब्दनिर्दिष्टउतस्तोभ्योन्यः आद्येचक्रकापत्तिद्वितीयेतस्याप्यन्यस्तस्याप्यन्यइत्यन
वस्थापातइति ५० नकेवलमत्रैवेदंदूषणंअपितुसर्वत्रैवंविधविकल्पपूर्वकंदूषणंप्रसरतीत्याह इदमिति इदंविकल्पदूषण
जातंगुणक्रियाजातिद्रव्यसंबंधवस्तुषुगुणादिसंबंधांतेषुपंचसुवस्तुषुसमं तथाहि गुणःकिंनिर्गुणेवर्तते अथवागु
णवतिक्रियापिक्रियारहितेवर्ततेक्रियावतिवा आद्येव्याघातः अन्यत्रात्माश्रयादयइतिसर्वत्रचेवमस्त्वयंनन्विदमसदुत्तरंचेत्
किंसदुत्तरमित्याशंक्याह तेनेतितेनैवंविकल्पस्यासंगतत्वेनैतद्गुणादिकंसर्वंस्वरूपस्यैतीष्यतांगुणादयःसर्वेवस्तुस्वरूपे
वर्ततइत्यभिप्रायः ५१

भवत्येवमन्यत्रग्रहणे तेकिमायातमित्यत आह विकल्पेति विकल्पतदभावाभ्यांविकल्पेनविकल्पाभावेन वाऽसंसृष्टात्मवस्तूनि
संसृष्टारहितपरमात्मवस्तूनिविकल्पिततत्त्वलक्ष्यत्वसंबंधाद्याः तत्रविकल्पितत्वंनामसविकल्पस्यवानिर्विकल्पस्यवेतिपू
र्वोक्तेनाविषयीकृतं लक्ष्यत्वंलक्षणाहृत्याज्ञाप्यत्वं संबंधःसंयोगादिः आदिशब्देनद्रव्यादयोगृह्यंते तुशब्दोऽवधारणे तत्र
द्रव्यंनामगुणानामाश्रयोद्रव्यंसमवायिकारणंद्रव्यमिति वातार्किकैर्लक्षितं कर्मव्यतिरिक्तत्वेसतिजातिमात्राश्रयोगु
णः नित्यमेकमनेकवृत्तिसामान्यमिति लक्षिताजातिः संयोगवियोगयोरसमवायिकारणजातीयंकर्मेतिलक्षिताक्रिया॥
एतेसर्वेस्वरूपेविकल्पितारेवेत्यर्थः ५२ एतावताग्रंथसंदर्भेणकिमुक्तंभवतीत्याकांक्षायांफलितमाह इत्थमिति इत्थंज
गतोयदुपादानमित्यादिग्रंथजातोक्तप्रकारेण वाक्यैस्तत्त्वमस्यादिवाक्यैस्तदर्थानुसंधानंतेषांवाक्यानामर्थस्यजीवब्रह्म

विकल्पतदभावाभ्यामसंसृष्टात्मवस्तूनि विकल्पिततत्त्वलक्ष्यत्वसंबंधाद्यास्तकल्पिताः ५२ इत्थंवास्तेवैस्तदर्थानुसं
धानंश्रवणंभवेत युक्त्यासंभावितत्वानुसंधानंमननंतुतत ५३ ताभ्यांनिर्विचिकित्सेर्थेचेतसःस्थापितस्ययत एकता
नत्वमेतद्धिनिदिध्यासनमुच्यते ५४

णोरेकत्वलक्षणस्याऽनुसंधानेश्रवणंभवेत युक्त्येति शब्दस्पर्शादयोवेद्याइत्यादिना परापरात्मनोरेवंयुक्त्यासंभावितैकत्वे त्यंत
नग्रंथसंदर्भेणोक्तप्रकारयासंभावितत्वानुसंधानंश्रुतस्यार्थस्योपपद्यमानत्वज्ञानंयदस्तितत्तुमननमित्युच्यते ५३ इदानीं
निदध्यासनमाह ताभ्यामिति ताभ्यांश्रवणमननाभ्यां निर्विचिकित्सेर्थेनिर्गताविचिकित्सासंशयोयस्मात् असौनिर्विचिकित्स
स्तस्मिन्नर्थेविषये स्थापितस्यधारणावतश्चेतसोदेशसंबंधश्चित्तस्यधारणेति पतंजलिनोक्तत्वाद्यदेकतानत्वमेकाकारवृ
त्तिप्रवाहत्वमेतन्निदिध्यासनंउच्यते हिप्रसिद्धंयोगशास्त्रेतत्रप्रत्ययैकताननताध्यानमिति ५४ ॥ ॥ १०

25/1938

नस्यैवनिदिध्यासनस्यपरिपाकदशारूपंसमाधिमाह ध्यातृध्यानइति निदिध्यासनेतावध्याताध्यानंध्येयंचेतित्रितयंभासते॥
तत्रयदाचित्तमभ्यासवशेनध्यातृध्यानेध्यातारंध्यानंचक्रमात्परित्यज्यध्येयैकगोचरंध्येयमेकमेवगोचरोविषयोयस्यतत्तथा
विधंभवतितदासमाधिरित्युच्यते तत्रदृष्टांतः निवातदीपवदिति वायुरहितेप्रदेशेवर्तमानोदीपोयथानिश्चलोभवति तद्वदि
त्यर्थः ५५ ननुसमाधौवृत्तीनामनुपलब्धौध्येयैकगोचरत्वमपिनिश्चेतुंनशक्यतइत्याशंक्यवृत्तिसद्भावस्यानुमानगम्यत्वा
न्मैवमित्याह वृत्तयइति आत्मगोचराआत्मागोचरोविषयोयासांताः वृत्तयस्तुतदानींसमाधिकालेअज्ञाताअपिव्युत्थि
तस्यसमाधेरुत्थितस्यसमुत्थितादुत्पन्नात्स्मरणादेतावंतंकालंसमाहितोऽभूवमित्येवंरूपादनुमीयंते यद्यत्स्मर्यतेतत्तदनु

ध्यातृध्यानेपरित्यज्यक्रमाद्ध्येयैकगोचरं निवातदीपवच्चित्तंसमाधिरभिधीयते ५५ वृ
त्तयस्तुतदानीमज्ञाता अप्यात्मगोचराः स्मरणादनुमीयंतेव्युत्थितस्यसमुत्थितात ५६
वृत्तीनामनुवृत्तिस्तुप्रयत्नात्प्रथमादपि अदृष्टासकृदभ्याससंस्कारसचिवात्भवेत ५७

भूतमितिव्याप्तेर्लोकसिद्धत्वादित्यर्थः ५६ ननुतदानींवृत्त्युत्पादकप्रयत्नाभावात्कथंवृत्तिरित्याशंक्यतात्कालिकप्रयत्ना
भावेपिप्राथमिकादेवप्रयत्नाददृष्टादिसहकारिसहिताद्भवतीत्याहवृत्तीनामिति ध्येयैकगोचराणांवृत्तीनामनुवृत्तिस्तुप्रवा
हरूपेणानुगतिस्तु प्रथमादपिप्रयत्नात्समाधिपूर्वकालीनादपि अदृष्टमशुक्लकृष्णकर्माख्योयःपुण्यविशेषः कर्माशुक्लकृष्ण
म्योगिनस्त्रिविधमितरेषामिति पतंजलिनासूत्रितत्वात् यश्चासकृदभ्याससंस्कारःपुनःपुनःसमाध्यभ्यासेन
जनिताभावनाख्यःसंस्कारविशेषस्ताभ्यांसहकारिकारणाभ्यांसहवर्तमानाद्भवति ५७ ॥ ॥

प्र·त·वि·
११

नन्वयं समाधिः पूर्वाचार्यैर्न निरूपितो दृष्टइत्याशंक्य सर्वगुणाश्रीपुरुषोत्तमेनानिरूपितत्वान्नैवमित्याह यथेति यथादीपोनिवात
स्थोनेंगंनसोपमास्मृतेत्यादिभिः श्लोकैरनेकधानानाप्रकारेणभगवान्ज्ञानैश्वर्यादिसंपन्नइममेवनिर्विकल्पकसमाधिरूपमर्थ
मर्जुनायशिष्यायन्यरूपयन्निरूपितवान् ५८ अस्यसमाधेरवांतरफलमाह अनादाविति अनादौस्पष्टं इहअस्मिन्संसारेसंचि
ताः कर्मणांपुण्यापुण्यलक्षणानांकोटयइत्यपलक्षणं अपरिमितानिकर्माणीत्यर्थः अनेनसमाधिनाविलयंयांतिविनश्यंति क्षीयंते
चास्यकर्माणितस्मिन्दृष्टेपरावरइतिश्रुतेः ज्ञानाग्निः सर्वकर्माणीतिस्मृतेश्च शुद्धोधर्मः सविलासाविद्यानिवर्तकतत्वसाक्षात्का
रसाधनभूतोधर्मोविवर्धतेस्पष्टं ५९ तत्रकिंप्रमाणमित्याह धर्मेति योगवित्तमा अतिशयेनयोगज्ञाः ब्रह्मसाक्षात्कारवंतइति यावत्
इमंनिर्विकल्पकसमाधिंधर्ममेघंप्राहुःस्पष्टं एतदुपपादयति यतःकारणादेषसमाधिः धर्मामृतधाराः धर्मलक्षणाअमृतधाराःस

यथादीपोनिवातस्थइत्यादिभिरनेकधा भगवानिममेवार्थमर्जुनायन्यरूपयत् ५८ अनादाविहसंसारे संचिताः कर्मकोटयः
अनेनविलयंयांतिशुद्धोधर्मोविवर्धते ५९ धर्ममेघमिमंप्राहुःसमाधिंयोगवित्तमाः वर्षत्येषयतोधर्मामृतधाराःसहस्रशः ६०
अमुनावासनाजालेनिःशेषंप्रविलापिते समूलोन्मूलितेपुण्यपापाख्येकर्मसंचये ६१ वाक्यमप्रतिबद्धंसत्प्राक्परोक्षावभा
सिते करामलकवद्बोधमपरोक्षंप्रसूयते ६२ परोक्षंब्रह्मविज्ञानंशाब्दंदेशिकपूर्वकं बुद्धिपूर्वकृतंपापंकृत्स्नंदहतिवह्निवत् ६३

हस्रशोवर्षति सप्तमेकंऋतुशतस्यापीतिश्रुतेः अतोधर्ममेघंप्राहुरितिपूर्वेणान्वयः ६० इदानींसमाधेःपरमप्रयोजनमाह अमुने
ति अमुनासमाधिनावासनाजालेअहंकारममकारकर्तृत्वाद्यभिमानहेतुभूतेज्ञानविरुद्धेसंस्कारसमूहेनिःशेषंयथाभवतितथा
प्रविलापितेविनाशितेपुण्यपापाख्येकर्मसंचयेसमूलोन्मूलितेसमूलंयथाभवतितथोन्मूलितेउद्धृतेविनाशितइतियावत् ६१
फलितमाह वाक्यमिति वाक्यंतत्वमस्यादिवाक्यं अप्रतिबद्धंसत्कर्मवासनाभ्योप्रतिबंधरहितंसत्प्राक्परोक्षावभासितेपूर्वंप
रोक्षतयाप्रकाशिते तत्वेकरामलकवत्करस्थितामलकगोचरमिव अपरोक्षतयातत्वावभासनसमर्थंबोधंज्ञानंप्रसूयतेजनय
ति ६२ इदानींपरोक्षज्ञानस्यफलमाह परोक्षमिति देशिकपूर्वकंगुरुमुखाल्लब्धंशब्दंतत्वमस्याद्यागमजन्यंपरोक्षंब्रह्मविज्ञानं
बुद्धिपूर्वकंयथाभवतितथाकृतंभूतंकृत्स्नंसमस्तंपापंवह्निवद्दहतीति ६३॥ ॥ ११

27/1938

प्र·त·वि·
१२

अपरोक्षज्ञानफलमाह अपरोक्षेति शाब्दंदेशिकपूर्वकं व्याख्यातं अपरोक्षात्मविज्ञानं अपरोक्षस्यात्मनोविज्ञानंसंशयविपर्य
यरहितंयज्ज्ञानंतत्संसारकारणाज्ञानतमसः संसारकारणंयदज्ञानमस्तितदेवतमस्तस्यचंडभास्करोमध्याह्नकालीनःसूर्यःअ
ज्ञानतमसश्चंडभास्करइवाज्ञानतमसोनिवर्तकमित्यर्थः ६४ ग्रंथाभ्यासफलमाह इत्थमिति नरइत्थमुक्तेनप्रकारेणतत्ववि

अपरोक्षात्मविज्ञानंशाब्दंदेशिकपूर्वकं संसारकारणाज्ञानतम
सश्चंडभास्करः ६४ इत्थंतत्वविवेकंविधायविधिवन्मनःसमा
धाय विगलितसंसृतिबंधः प्राप्नोतिपरंपदंनरोनचिरात् ६५॥
इतिप्रत्यक्तत्वविवेकाध्यायः ॐ: श्रीः ॐ: श्रीः

वेकंतत्वस्यब्रह्मात्मैकत्वलक्षणस्यविवेकः कोशपंचकादिविवेचनविधायकृत्वातस्मिंस्तत्वेविधिवच्छास्त्रोक्तप्रकारेणमनःसमा
धायस्थिरीकृत्यविगलितसंसृतिबंधः अपरोक्षज्ञानेनविनिवृत्तसंसारबंधःसन्परंपदंनिरतिशयानंदरूपंमोक्षंनाचिराद
विलंबेनप्राप्नोतिसत्यज्ञानानंदलक्षणंब्रह्मैवभवतीत्यर्थः ६५ इतिश्रीरामकृष्णाख्येनविरचिताप्रत्यक्तत्वविवेकव्या
ख्यासमाप्ताः॥ ॥ श्रीः ॐ: ॐ: श्रीः ॐ: ॐ: श्रीः ॐ: ॐ: श्रीः ॐ: १२

THE ASIATIC SOCIETY OF BOMBAY

29/1938

श्रीगणेशायनमः नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ पंचतत्त्वविवेकस्यव्याख्यानंक्रियतेमया सदेवसोम्येदमग्रआ
सीदेकमेवाद्वितीयमितिश्रुत्याजगदुत्पत्तेःपुरायज्जगत्कारणंसद्रूपमद्वितीयंब्रह्मश्रुतंतस्यावाङ्मनसगोचरत्वेनस्वतो
वगंतुमशक्यत्वात्तत्कार्यत्वेनतदुपाधिभूतस्यभूतपंचकस्यविवेकद्वारातद्बोधनायोपोद्घातत्वेनभूतपंचकविवेकंप्रति
जानीते सदद्वैतमिति १ तत्रतावदाकाशादीनांपंचानांभूतानांगुणतोभेदज्ञानायतद्गुणानाह शब्देति नन्वेतेगुणाःकिं
सर्वेसर्वेषामुतएकैकस्यैकैकोगुणइतिविमर्शेयन्नोभयथापिकिंतुप्रकारांतरमस्तीत्यभिप्रायेणमाह एकेति २ तदेवप्र
कारांतरंविशदयति प्रतिध्वनिरिति आकाशेतावच्छब्दएकएवगुणः सचप्रतिध्वनिरूपः वायौशब्दस्पर्शौ तत्रवायुश

> सदद्वैतंश्रुतंयत्तत्पंचभूतविवेकतः बोद्धुंशक्यंततोभूतपंचकंप्रविविच्यते १ शब्दस्पर्शौरूपरसौगंधोभू
> तगुणाइमे एकद्वित्रिचतुःपंचगुणाव्योमादिषुक्रमात् २ प्रतिध्वनिर्वियच्छब्दोवायुबीसीतिशब्दनं अनु
> ष्णाशीतसंस्पर्शोवह्नौभुगुभुगुध्वनिः ३ उष्णःस्पर्शःप्रभारूपंजलेबुलुबुलुध्वनिः शीतस्पर्शःशुक्लरूपंरसो
> माधुर्यमीरितं ४ भूमौकडकडाशब्दःकाठिण्यंस्पर्शइष्यते नीलादिकंचित्ररूपंमधुराम्लादिकोरसः ५ सु
> रभीतरगंधौद्वौगुणाःसम्यग्विवेचिताः श्रोत्रंत्वकचक्षुषीजिह्वाघ्राणंचेंद्रियपंचकं ६ ॥ ॥

ब्दमनुकारणदर्शयति बीसीति शब्दनमिति एवमुत्तरत्राप्यनुकरणशब्दनंद्रष्टव्यं तस्यस्पर्शमाह अनुष्णाशीतसंस्पर्श
इति वह्नौशब्दस्पर्शरूपाणीतित्रयोगुणाःतेचक्रमेणाभिधीयंते वह्नौभुगुभुगुध्वनिः ३ उष्णःस्पर्शःप्रभारूपमिति जलेशब्दाद
योरसांताश्चत्वारोगुणास्तानाह जलेबुलुबुलुध्वनिरिति शीतस्पर्शःशुक्लरूपंरसोमाधुर्यमिति ४ भूमौशब्दादिगंधांताःपंचगु
णास्ताननुदाहरति भूमाविति भूमौकडकडाशब्दइत्यादिना ५ सुरभीतरगंधौद्वावित्यंतेनउक्तमर्थमुपसंहरतिगुणाःसम्य
ग्विवेचिताइति एवंगुणतोभेदमभिधायकार्यतोभेदज्ञानायतत्कार्याणिज्ञानेंद्रियाणितावदाह श्रोत्रमिति ६ ॥ ॥

पं॰र॰न॰वि॰
१

नैषांस्थानानि व्यापारांश्च दर्शयति कर्णादीति इंद्रियसद्भावे किं प्रमाणमित्याकांक्षायां कार्यलिंगकानुमानमित्याह सोक्ष्म्यादिति त
त्र रूपोपलब्धिः करणजन्या क्रियात्वात् छिदिक्रियावदित्यादि द्रष्टव्यं सौम्यादपंचीकृतभूतकार्यत्वेन दुर्लक्ष्यत्वादित्यर्थः एतेषां स्वभाव
माह प्रायेति परांचि खानि व्यतृणत् स्वयंभूरिति श्रुतेरित्यर्थः ७ प्रायः शब्देन सूचितं कचित्करणानामांतरविषयग्राहकत्वं दर्शयति
कदाचिदिति कदाचित्कर्णस्यपिधाने कृते सति प्राणवायो जाठराग्नेर्वा विद्यमान आंतरः शब्दः श्रूयते ८ व्यज्यंत इति जलपानेन्नभक्ष
णे च आंतरस्य स्पर्शा अपि व्यज्यंते अभिव्यक्ता भवंति नेत्रनिमीलने कृते आंतरं तम उपलभ्यते उद्गारे जातरसगंधो गृह्येते इत्यनेन प्रका
रेण घ्राणामांतरग्रहोऽघ्राणामिति कर्त्तरि षष्ठी आंतरस्य विषयस्य ग्रहो ग्रहणं इंद्रियकर्तृकमांतरविषयग्रहणं भवतीत्यर्थः ९ एवं

कर्णादिगोलकस्थं तच्छब्दादिग्राहकं क्रमात् सौक्ष्म्यात्कार्यानुमेयं तत्प्रायो धावेद्बहिर्मुखं ७ कदाचित्पिहिते कर्णे श्रूय
ते शब्द आंतरः प्राणवायो जठराग्नेर्जलपानेन्नभक्षणे ८ व्यज्यंते ह्यांतरस्पर्शा मीलने चांतरं तमः उद्गारे रसगंधौ चे
त्यक्षाणामांतरग्रहः ९ पंचोक्त्यादानगमनविसर्गानंदकाः क्रियाः कृषिवाणिज्यसेवाद्याः पंचस्वंतर्भवंति हि १० वाक्पा
णिपादपायूपस्थैरक्षैस्तत्क्रियाजनिः मुखादिगोलकेष्वस्ते तत्कर्मेंद्रियपंचकं ११ मनो दशेंद्रियाध्यक्षं हृत्पद्मगोलके
स्थितं तच्चांतःकरणं बाह्येष्वस्वातंत्र्याद्विनेंद्रियैः १२

ज्ञानेंद्रियव्यापारानभिधाय कर्मेंद्रियासत्ववादिनं प्रति तत्सद्भावसमर्थनाय तत्तल्लिंगभूतांस्तत्तद्व्यापारानाह पंचोक्त्येति उक्तिश्च
आदानं च गमनं च विसर्गश्च आनंदश्चेति द्वंद्वः समासः उक्त्यादानगमनविसर्गानंदाख्याः पंच क्रियाः प्रसिद्धा इति शेषः ननु कृष्या
दीनां क्रियांतराणामपि सत्वात् कथं पंचत्वमुक्तमित्याशंक्याह कृषीति १० कानि तानि क्रियाजनकानींद्रियाणीत्यत आह वागिति॥
वागादिभिरक्षैस्तत्क्रियाजनिस्तासां क्रियाणामुत्पत्तिर्भवतीति शेषः अत्रापि उक्तिः करणपूर्विका क्रियात्वादित्यादि कार्यलिंगकम
नुमानं द्रष्टव्यं तस्य कर्मेंद्रियपंचकस्य स्थानान्याह मुखादिगोलकेष्विति आदिशब्देन करचरणौ गुदशिश्नौ च गृह्यंते ११ १
इदानीमुक्तदशेंद्रियप्रेरकत्वेन प्रस्तुतस्य मनसः कृत्यं स्थानं च दर्शयति मन इति तस्यांतरिंद्रियत्वे सनिमित्तकमाह तच्चेति १२

दशेंद्रियाध्यक्षत्वमेव विशदयति अक्षेष्विति अक्षेषु इंद्रियेषु अर्थार्पितेषु विषयेषु स्थापितेषु सत्सु एतन्मनो गुणदोषविचारकमिदं समी
चीनमिदमसमीचीनमित्यादिविचारकारीत्यर्थः अयं भावः आत्मनः प्रमातृत्वेन सर्वज्ञानसाधारण्याच्चक्षुरादीनां च रूपादिज्ञान
जननमात्रे चरितार्थत्वात् तद्गुणदोषविचारस्योपलभ्यमानस्यान्यथानुपपत्त्या तत्कारणत्वेन मनोभ्युपगंतव्यमिति मनसो वैराग्य
कामाद्यनेकविधवृत्तिमत्वप्रदर्शनाय सत्वादिगुणवत्त्वं दर्शयति सत्वमिति तेषां तद्गुणत्वे कारणमाह विक्रियइति हि यतस्तैर्गु
णैर्विक्रियते विकारं प्राप्नोतीत्यर्थः १३ गुणैस्तस्य विक्रियमाणत्वमेव प्रपंचयति वैराग्यमिति १४ आलस्येति स्पष्टत्वान्न व्याख्या
यते वैराग्यादीनां कार्याणि विभज्य दर्शयति सात्विकैरिति १५ तामसैरिति एतेषां बुद्धिस्थत्वादंतःकरणादीनां सर्वेषां स्वामिन

अक्षेष्वर्थार्पितेष्वेतद्गुणदोषविचारकं सत्वं रजस्तमश्चास्य गुणा विक्रियते हि तैः १३ वैराग्यं शांतिरौदार्यमि
त्याद्याः सत्वसंभवाः कामक्रोधौ लोभयत्नाविल्याद्या रजसोत्थिताः १४ आलस्यभ्रांतितंद्राद्या विकारास्तम
सोत्थिताः सात्विकैः पुण्यनिष्पत्तिः पापोत्पत्तिश्च राजसैः १५ तामसैर्नोभयं किंतु वृथायुःक्षपणं भवेत् अत्रा
हं प्रत्ययी कर्तेत्येवं लोके व्यवस्थितिः १६ स्पष्टशब्दादियुक्तेषु भौतिकत्वमतिस्फुटं अक्षादावपि तच्छास्त्रयुक्ति

माह अत्रेति अत्राहमिति प्रत्ययवान् कर्ता प्रभुरित्यर्थः लोकेपि कार्यकर्ता प्रभुरित्येवं व्यपदिश्यते १६ एवं जगतः स्थितिमभिधा
य इदानीं तस्य भौतिकत्वज्ञानोपायमाह स्पष्टशब्दादियुक्तेष्विति स्पष्टशब्दादियुक्तेषु स्पष्टैः शब्दस्पर्शादिगुणैः सहितेषु घटादि
षु वस्तुषु भूतकार्यत्वं स्पष्टमेवावगम्यते इंद्रियादिषु कथं भूतकार्यत्वनिश्चय इत्याशंक्यागमानुमानाभ्यामित्याह अक्षादावि
ति अन्नमयं हि सोम्य मनः आपोमयः प्राणस्तेजोमयी वागित्यादि शास्त्रं अनुमानं च विमतानि श्रोत्रादीनि भूतकार्याणि भवितु
मर्हंति भूतान्वयव्यतिरेकानुविधायित्वात् यद्यदन्वयव्यतिरेकानुविधायी तत्तत्कार्यं दृष्टं यथा मृदन्वयव्यतिरेकानुविधायी घटो
मृत्कार्यो दृष्टस्तथा चैमानि तस्मात्तथेति तदन्वयव्यतिरेकानुविधायित्वं च षोडशकमलः सोम्य पुरुष इत्यादिना छांदोग्यश्रुतौ म
नसः श्रुतं तद्वदन्यत्रापि द्रष्टव्यं १७ ॥ ॥

31/1938

पं·द·भू·वि·
२

एवंभूतानि भौतिकानि च विविच्य दर्शयित्वा प्रकृतां सदेव सोम्येदमग्र आसीदित्याद्यद्वितीयब्रह्मप्रतिपादिकां श्रुतिं व्याचक्षाणस्त द्वाक्यस्थेदंपदस्यार्थमाह एकादशेति प्रत्यक्षादिभिः सर्वैः प्रमाणैरपि शब्दान् अर्थापत्त्यादिप्रमाणज्ञानैश्च यावत्किंचिज्जगद वगम्यते तत्सर्वं सदेवेत्यादिवाक्यस्थेनेदंपदेनाभिहितमित्यर्थः १८ एवमिदंशब्दस्यार्थमभिधायेदानीं तां श्रुतिं स्वयमेवार्थतः पठति श्लोकेन इदमिति अरुणस्यापत्यमारुणिरुद्दालकस्तस्य वचनमित्यर्थः १९ एकमेवाद्वितीयमिति पदत्रयेण सद्वस्तुनि स्वगता दिभेदत्रयं प्रसक्तं निवारयितुं लोके स्वगतादिभेदत्रयं तावद्दर्शयति वृक्षस्येति स्फुटार्थं २० एवमनात्मनि भेदभेदत्रयं प्रदर्श्य सद्व स्तुन्यपि प्रसक्तं तद्भेदत्रयं श्रुतिः पदत्रयेण निवारयतीत्याह तथेति वस्तुत्वसामान्यादनात्मनीव सद्रूपात्मन्यपि प्रसक्तं स्वग

एकादशेन्द्रियैर्युक्त्या शास्त्रेणाप्यवगम्यते यावत्किंचिद्भवेदेतदिदंशब्दोदितं जगत् १८ इदं सर्वं पुरा सृष्टेरे कमेवाद्वितीयकं सदेवासीन्नामरूपे नास्तामित्यारुणेर्वचः १९ वृक्षस्य स्वगतो भेदः पत्रपुष्पफलादिभिः वृक्षान्तरात्सजातीयो विजातीयः शिलादितः २० तथा सद्वस्तुनो भेदत्रयं प्राप्तं निवार्यते ऐक्यावधारणद्वैत प्रतिषेधैस्त्रिभिः क्रमात् २१ सतो नावयवाः शंक्यास्तदंशस्यानिरूपणात् नामरूपे न तस्यांशौ तयो रद्याप्यनुद्भवात् २२ नामरूपोद्भवस्यैव सृष्टित्वात्सृष्टितः पुरा न तयोरुद्भवस्तस्मान्निरंशं सद्यथा वियत् २३

तादिभेदत्रयमैक्यावधारणद्वैतप्रतिषेधाभिधायकैरेकमेवाद्वितीयमिति त्रिभिः पदैः क्रमेण निवार्यत इत्यर्थः २१ सद्वस्तु नस्तावन्न स्वगतभेदः शंकितुं शक्यते ऽस्य निरवयवत्वादित्याह सत इति नामरूपयोः सदवयवत्वं किं न स्यादित्याशंक्य सृ ष्टेः पुरा तयोरभावान्न सदंशत्वमित्याह नामेति २२ कुतो नामरूपयोरभाव इत्याशंक्याह नामरूपेति फलितमाह तस्मा दिति अत्रायं प्रयोगः सद्वस्तु स्वगतभेदशून्यं भवितुमर्हति निरवयवत्वात् गगनवदिति २३ ॥ छः छः छः ॥ २

33/1938

नाप्यस्य स्वगतभेदः सजातीयभेदः किं न स्यादित्याशंक्य न तत्सजातीयं सदन्तरमिति वक्तव्यं न तन्निरूपयितुं शक्यते सतो वैलक्ष ण्याभावादित्याह सदन्तरमिति ननु घटसत्ता पटसत्तेति सतो भेदः प्रतिभासत इत्याशंक्य घटाकाशमठाकाशवदौपाधिकोऽसौ भेदो न स्वतोऽभानीत्याह नामरूपेति अत्रायं प्रयोगः सद्वस्तु सजातीयभेदरहितं भवितुमर्हति उपाधिपरामर्शमन्तरेणाविभाव्य मानभेदत्वात् गगनवदिति २४ भवतु तर्हि विजातीयाद्भेद इत्याशंक्य सतो विजातीयमसत् तस्यासत्त्वेनैव प्रतियोगित्वासंभ वेन तत्प्रतियोगिकोऽपि भेदो नास्तीत्याह विजातीयमिति २५ फलितमाह एकमिति इदानीं स्थूणानिखनन न्यायेन स

सदन्तरं सजातीयं न वैलक्षण्यवर्जनात् नामरूपोपाधिभेदं विना नैव सतो भिदा २४ विजातीयमसत्तत्तु न खल्वस्ती तिगम्यते नास्यातः प्रतियोगित्वं विजातीयाद्भिदा कुतः २५ एकमेवाद्वितीयं सत्सिद्धमत्र तु केचन विह्वला असदेवे दं पुरासीदिति वर्णयन् २६ मग्नस्याब्धौ यथाक्षाणि विह्वलानि तथाऽस्य धीः अखण्डैकरसं श्रुत्वा निःप्रचारा बिभेत्यतः २७ गौडाचार्या निर्विकल्पे समाधावन्ययोगिनां साकारब्रह्मनिष्ठानामत्यन्तं भयमूचिरे २८ अस्पर्शयोगो नामैष दुर्द र्शः सर्वयोगिभिः योगिनो बिभ्यति ह्यस्मादभये भयदर्शिनः २९

द्वैतमेव द्रढयितुं पूर्वपक्षमाह अत्र तु केचनेति २६ विह्वलत्वे दृष्टान्तमाह मग्नस्येति दार्ष्टान्तिके योजयति तथास्य धीरिति अस्या सद्वादिनः आत्मविषयवचनं धीरन्तःकरणमखण्डैकरसं वस्तु श्रुत्वा निष्प्रचारा साकारवस्तुनीवाखण्डैकरसे वस्तुनि प्रचाररहिता स त्यतोऽस्मात्सद्वस्तुनो बिभेति २७ उक्तार्थे आचार्यसंमतिं दर्शयति गौडाचार्येति २८ केन वाक्येनोक्तवन्त इत्याकांक्षायां तदीयं वार्तिक मेव पठति अस्पर्शेति योयमस्पर्शयोगाख्यो निर्विकल्पः समाधिः एष सर्वयोगिभिः साकारध्याननिष्ठैः दुर्दर्शः दुःखेन द्रष्टुं योग्यः दुष्प्राप इत्यर्थः तत्रोपपत्तिमाह योगिन इति हि यस्मात्कारणाद्योगिनः पूर्वोक्तद्वैतदर्शिनः अभये भयशून्ये समाधौ निर्जने दे शे बाला इव भयदर्शिनो भयहेतुत्वं कल्पयन्तः तस्माद्योगाद्भीतिं प्राप्नुवन्ति २९ ॥ ॥

पं.द.भ.वि.
३

श्रीमदाचार्यैरप्येतदभिहितमित्याह भगवदिति ३० तद्वार्तिकं पठति अनादृत्येति ३१ इदानीमसद्वादं विकल्प्य दूषयति शून्यमिति।
शून्यमासीदित्यनेन वा केन शून्यस्य सत्ताजातियोगित्वं वा सद्रूपता वा ब्रूषे इति विकल्पार्थः तदुभयं सत्तासंबंधसद्रूपसत्त्वलक्षणं
शून्यस्य व्याहतत्वान्न युज्यत इत्यर्थः ३२ व्याहतत्वमेव दृष्टांतपूर्वकं द्रढयति नयुक्त इति ३३ ननु भवन्मतेपि वियदादीनां निर्विकल्पे
ब्रह्मणि सत्त्वं व्याहमित्याशंक्याह वियदादेरिति तर्हि शून्यस्यापि नामरूपे सद्वस्तुनीव कल्पिते इति वदतो बौद्धस्यापसिद्धांत इत्यभि
प्रायेणाह शून्यस्येति ३४ ननु तर्हि शून्यस्येव सद्वस्तुनोपि नामरूपे द्वे कल्पिते एवांगीकर्तव्ये भवन्मते वास्तवयोर्नामरूपयोरभावा
दिति शंकते सतोपीति विकल्पासहत्वादयं पक्षएवानुपपन्न इत्याभिप्रायेण परिहरति तदेति अयमभिप्रायः सतो नामरूपे किं स

भगवत्पूज्यपादाश्च शुष्कतर्के तत्परान्। आहुर्माध्यमिकान्भ्रांतानचिंत्येस्मिन्सदात्मनि ३० अनादृत्य श्रुतिं मौर्ख्या
दिमे बौद्धास्तमस्विनः। आपेदिरे निरात्मत्वमनुमानैकचक्षुषः ३१ शून्यमासीदिति ब्रूषे सद्योगं वा सदात्मतां। शून्यस्य
न तु तद्युक्तमुभयं व्याहतत्वतः ३२ न युक्तस्तमसा सूर्यो नापि चासौ तमोमयः सच्छून्ययोर्विरोधित्वाच्छून्यमासीत्कथं
वद ३३ वियदादेर्नामरूपे मायया सुविकल्पिते शून्यस्य नामरूपे च तथा चेज्जीव्यतां चिरं ३४ सतोपि नामरूपे द्वे
कल्पिते चेत्तदा वद कुत्रेति निरधिष्ठानो न भ्रमः क्वचिदीक्ष्यते ३५ सदासीदिति शब्दार्थभेदे वैगुण्यमापतेत् अभेदे पुन
रुक्तिः स्यान्मैवं लोके तथेक्षणात् ३६॥

ति कल्पिते उतासति अथवा जगति नाद्यः अन्यस्य रजतादेर्नामरूपयोरन्यत्र शुक्तिकादावारोपदर्शनात्सतो नामरूपयोः सत्येव क
ल्पनायोगात् न द्वितीयः असतो निरात्मकस्य चाधिष्ठानत्वायोगात् न तृतीयः सत उत्पन्नस्य जगतः सन्नामरूपकल्पनाधिष्ठा
नत्वानुपपत्तेरिति माभूत्तदधिष्ठानं अनयोः कल्पना किं न स्यादित्याशंक्याह निरधिष्ठान इति ३५ नन्वसदेवेदमग्र आसीदित्यत्र
यथा व्याघात उक्तस्तथा सदेव सोम्येदमग्र आसीदित्यत्रापि दोषोस्तीति शंकते सदासीदिति तथाहि सदासीदिति शब्दयोरर्थभेदोस्ति
न वा अस्ति चेद्द्वैतहानिः नास्ति चेत्पुनरुक्तिः स्यादतः सदासीदित्यनुपपन्नमिति द्वितीयं पक्षमादाय परिहरति मैवमिति॥ ३
पुनरुक्तिदोषस्य कः परिहार इत्याशंक्याह लोक इति ३६ ॥

लोके एवंविधप्रयोगेषु पुनरुक्त्यभावः कुत्र दृष्ट इत्याशंक्याह कर्तव्यमिति भवत्वेवं लोके श्रुतौ किमायातमित्यत आह इत्यादिति
॥३७ नन्वद्वितीयवस्तुनि भूतकालाभावादग्र आसीदित्युक्तिरनुपपन्नेत्याशंक्याह कालाभाव इति ननु जगदुत्पत्तेः पुरा जगद
भावेन सद्वितीयत्वं ब्रह्मण इत्याशंक्य श्रुतिप्रवृत्तेर्द्वैतवासनाविष्टश्रोतृप्रतिबोधनार्थत्वान्नातिशंकनीयमित्याह तेनेति ३८ इ
दानीं सिद्धांतरहस्यमाह चोद्यमिति व्यवहारदशायां चोद्यादि कर्तव्यं परमार्थतस्त्वद्वैतमेव तत्त्वमित्यर्थः ३९ परमार्थतो द्वैतासा
विस्मृतिं प्रमाणयति तदेति स्तिमितं निश्चलं गंभीरं दुरवगाहं मनसा विषयीकर्तुमशक्यं न तेजः तेजस्त्वानधिकरणं न तमः
तमोविलक्षणमनावरणस्वभावं ततं व्याप्तमनाख्यमाख्यातुमशक्यमनभिव्यक्तं चक्षुरादिभिरप्यविषयीकृतं सद्भूत्यविल

कर्तव्यं कुरुते वाक्यं ब्रूते धार्यस्य धारणं इत्यादिवासनाविष्टं प्रत्यासीत्सदितीरणं ३७ कालाभावे पुरेत्युक्तिः
कालवासनया युतं शिष्यं प्रत्येव तेनात्र द्वितीयं न हि शंक्यतां ३८ चोद्यं वा परिहारो वा क्रियतां द्वैतभाषया॥
अद्वैतभाषया चोद्यं नास्ति नापि तदुत्तरं ३९ तदा स्तिमितगंभीरं न तेजो न तमस्ततं अनाख्यमनभिव्यक्तं सत्
किंचिदवशिष्यते ४० ननु भूम्यादिके मा भूत्परमाण्वंतनाशतः कथं ते वियतोऽसत्त्वं बुद्धिमारोहतीति चेत् ४१
अत्यंतं निर्जगद्व्योम यथा ते बुद्धिमाश्रितं तथैव सन्निराकाशं कुतो नाश्रयते मतिं ४२ निर्जगद्व्योम दृष्टं चेत्प्रका
शतमसी विना क्व दृष्टं किंच ते पक्षेन प्रत्यक्षं वियत्खलु ४३

क्षणमनन्यत्किंचिदर्दतया निर्देष्टुमशक्यमवशिष्यते द्वैतनिषेधावधित्वेनावतिष्ठत इत्यर्थः ४० ननु जनिमत्त्वेनानित्यस्य पृ
थ्व्यादेरसत्त्वमस्तु नित्याकाशस्यासत्त्वं कथं अंगीक्रियत इति शंकते ननु भूम्यादिकमिति ४१ दृष्टांतावष्टंभेन परिहरति अत्यंत
मिति अत्यंतं निर्जगज्जगन्मात्ररहितमित्यर्थः ४२ न हि दृष्टेऽनुपपन्नमिति न्यायमाश्रित्य चोदयति निर्जगदिति दर्शनमे
वासिद्धमिति परिहरति प्रकाशेति अप्रसिद्धांतोपीत्याह किंच त इति ४३ ॥ ॥

35/1958

पं·द·म·वि·
४

ननुदर्शनाभावः सद्वस्तुन्यपि समानइत्याशंक्यतस्यसर्वानुभवसिद्धत्वान्मैवमित्याह सद्वस्त्विति ननुतूष्णींभावेशून्यमेवइत
रस्यकस्यापिप्रतीत्यभावादित्याशंक्यशून्यंप्रतीत्यभावाच्छून्यमपिनसंभवतीत्याहशून्यत्वमिति ४४ ननुतर्हिसतबुध्यभावात्
सत्वमपिनघटतइतिशंकते सबुद्धिरिति तस्यस्वप्रकाशत्वान्नतद्बुध्यभावोनिष्टइतिपरिहरति मास्त्वस्येति ननुस्वगोचरबु
ध्यभावेकथंसद्वस्तु अवगं तुंशक्यतइत्यतआह निर्मनस्कत्वेति ४५ एवंनिःप्रपंचस्यसाक्षिणस्तूष्णींस्थितोभानंप्रदर्श्यतद्द
ष्टांतबलेनसृष्टेःपुरापिसद्वस्तुतथावगंतुंशक्यतइत्याह मनोजृंभणेति ४६ मायायाःकिंलक्षणमित्यतआह निस्तत्वेति॥

सद्वस्तुशुद्धंत्वस्माभिर्निश्चित्यैरनुभूयते तूष्णींस्थितौनशून्यत्वंशुन्यबुद्धेश्चवर्जनात् ४४ सबुद्धिरपिचेन्नास्ति
मास्त्वस्यस्वप्रभत्वतः निर्मनस्कत्वसाक्षित्वात्सन्मात्रंस्फुगमंन्दणां ४५ मनोजृंभणराहित्येयथासाक्षीनिरा
कुलः मायाजृंभणतःपूर्वंसत्तथैवनिराकुलं ४६ निस्तत्वाकार्यगम्यास्यशक्तिर्मायाग्निशक्तिवत् नहिशक्तिः
कचित्केश्चिद्बुध्यतेकार्यतःपुरा ४७ नसद्वस्तुसतःशक्तिर्नहिवन्हेःस्वशक्तिता सद्विलक्षणतायांतुशक्तेःकिं
तत्वमुच्यतां ४८॥शून्यत्वमितिचेच्छून्यंमायाकार्यमितीरितं नशून्यंनापिसद्यादृक्तादृक्तत्वमिहेष्यतां ४९॥

निस्तत्वाजगत्कारणभूताद्वस्तुनःपृथकसत्वरहिताकार्यगम्याविषदादिकार्यलिंगगम्याअस्यसद्वस्तुनःशक्तिर्वियदादिकार्यज
ननसामर्थ्यंमायेत्युच्यते वस्तुस्वरूपातिरिक्तशक्तिसद्भावेदृष्टांतमाह अग्निशक्तिवदिति यथाग्न्यादिस्वरूपातिरिक्तं स्फोटा
दिकार्यलिंगगम्यंन्याग्न्यादिकारणनिष्ठंसामर्थ्यमस्तितद्वदित्यर्थः शक्तिःकार्यलिंगगम्यत्वेव्यतिरेकमुखेनदृढयति नहीति ४७
एवंशक्तेःकार्यलिंगगम्यत्वमुपपाद्यनिस्तत्वरूपतामुपपादयति नसद्वस्त्विति अयमभिप्रायः सद्वस्तुनःशक्तिःकिंसतिउतासती
नतावत्सतीतथात्वेसतोभिन्नत्वेनतच्छक्तित्वायोगात् उक्तार्थेदृष्टांतमाह नहीति द्वितीयेपिकिंनरविषाणतुल्याउतसद्विलक्ष
णेतिविकल्पाभिप्रायेणएकतिसद्विलक्षणतायांत्विति ४८ तत्राद्यपक्षमनूद्यदूषयति शून्यत्वमितीति शून्यस्यनामरूपेच
तथाचउज्जीव्यतांचिरमित्यंत्रत्यर्थः तस्माद्द्वितीयःपक्षःपरिशिष्यतइत्याह नशून्यमिति मायास्वरूपंसत्वासत्वाभ्यांनिर्वचनान
र्हमित्यभिप्रायः ४९॥ ४

अस्मिन्नर्थेश्रुतिंप्रमाणयति नासदासीदिति तमआसीत्तमसागूढमग्रइत्यादिश्रुतिःप्रमाणमित्यर्थः तर्हितमआसीदिति
कथंसत्वमुच्यतइत्यतआह सद्योगादिति कुतइत्यतआह तन्निषेधनादिति ५० फलितमाह अतइति यतःसतःसत्वंमाया
यानास्ति अतएवशून्यस्येवमायायाअपिद्वितीयत्वंनगण्यंतेहिंनेवाङ्गियतइत्यर्थः अन्नतस्याद्वितीयत्वानंगीकारेदृष्टंतमा
ह नलोकेति ५१ ननुशक्त्याधिक्येजीविताधिक्यंदृश्यते अतःशक्तेरपिपृथकजीवितत्वमस्तीतिशंकते शक्त्येति नशक्ति
र्जीवितवर्धनेकारणमपितुतत्कार्यंत्कदूरुष्यादीतिपरिहरति नशक्तिरिति ५२ दार्ष्टांतिकेयोजयतितथासर्वथेति ५३
माभूच्छक्त्यासद्वितीयत्वंसतअपितु तत्कार्येणततभवत्वेवेत्याशंक्यतस्यतदानीमसत्वात्तेनापिनसद्वितीयत्वमित्याह शक्ति

नासदासीन्नोसदासीत्तदानींकिंत्वभूत्तमः सद्योगात्तमसःसत्वंनस्वतस्तन्निषेधनात् ५० अतएवद्वितीयत्वं
शून्यवन्नाहिगण्यंते नलोकेचैत्रतच्छक्त्योजीवितंलिख्यतेपृथक् ५१ शक्त्याधिक्येजीवितंचेद्वर्द्धेतेतत्रवृद्धिकृ
त् नशक्तिःकिंतुतत्कार्ययुद्धकृष्यादिकंतथा ५२ सर्वथाशक्तिमात्रस्यनपृथक्गणनाक्वचित् शक्तिकार्यंतु
नैवास्तिद्वितीयंशंक्यतेकथं ५३ नकृत्स्नब्रह्मवृत्तिःसाशक्तिःकिंत्वेकदेशभाक् घटशक्तिर्यथाभूमौस्निग्ध
मृद्येववर्तते ५४ पादोस्यसर्वभूतानित्रिपादस्तिस्वयंप्रभे इत्येकदेशवृत्तित्वंमायायावदतिश्रुतिः ५५॥
सभूमिंविश्वतोवृत्वात्यत्यतिष्ठद्दशांगुलं विकारावर्तिचात्रास्तिश्रुतिसूत्रकृतोर्वचः ५७
कार्यमिति ननुसच्छक्तिःसतिसर्वत्रवर्ततेउतैकदेशेनाद्यःमुक्तेःप्राप्यब्रह्माभावप्रसंगान्नद्वितीयःनिरंशत्वविरोधादित्याशं
क्याद्यानंगीकाराद्द्वितीयेपरिहारोवक्ष्यतइत्यभिप्रायेणाहनकृत्स्नेति ५४ एकदेशवृत्तौदृष्टांतमाह घटशक्तीरिति ५४ शक्ते
रेकदेशवृत्तित्वेप्रमाणमाह पादोस्येति ५५ नकेवलंश्रुतिरेवस्मृतिरप्यस्तीत्याह विष्टभ्येति ५६ इदानींनिर्मायस्वरूपस
द्भावेप्रमाणमाह सभूमिमिति विकारावर्तिचेति विकारावर्तिचतथाहिस्थितिमाहेतिसूत्रकारवचनमित्यर्थः ५७॥ ॥
+विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगत् इतिकृष्णोर्जुनायाहजगतस्त्वेकदेशतां ५६॥ शोधः६

37
1938

तर्हिनिरंशत्वविरोधइत्यकस्यकः परिहारइत्याशंक्यवास्तवनिरंशत्वाभ्युपगमान्नविरोधइत्यभिप्रायेणोदाहतश्रुत्यभिप्रायमाह ॥निरंशइति ५८ यदर्थंब्रह्मणिमायासमर्थितानदिदानीमाहसत्त्वमिति विक्रियाः विविधत्वेनक्रियंतइतिविक्रियाः कार्यविशेषाइत्यर्थः तत्रदृष्टांतमाहवर्णेति वर्णारक्तपीतादयोधातुविशेषाः ५९ तत्रप्रथमंकार्यविशेषंदर्शयति आद्यइति तत्स्वरूपमाह सोवकाशेति आकाशस्यब्रह्मकार्यत्वेहेतुमाह आकाशेति ६० ततःकिमित्यतआह एकस्वभावमिति उक्तमर्थंविशदयति नावकाशइति सतिसद्वस्तुन्यवकाशोनास्तिकिंतुसत्स्वभावएकएव आकाशेतुसच्चसत्स्वभावश्चएषोप्यवकाशस्वभावोपीतिद्वयंस्थितंवियतइत्यर्थः ६१सदाकाशयोरेकद्विस्वभावत्वंप्रकारांतरेणव्युत्पादयति यद्वेति प्रतिध्वनिर्व्योम्नोगुणइ

निरंशोप्यंशमारोप्यकृत्स्नांशेवेतिपृच्छतः तद्भाषयोत्तरंब्रूतेश्रुतिःश्रोतृहितैषिणी ५८ सत्त्वमाश्रिताशक्तिः कल्पयेत्सतिविक्रियाः वर्णाभित्तिगताभित्तौचित्रंनानाविधंयथा ५९ आद्योविकारआकाशःसोवकाशस्वरूपवान् आकाशोस्तीतिसत्त्वमाकाशेप्यनुगच्छति ६० एकस्वभावंसत्तत्त्वमाकाशोद्विस्वभावकः नावकाशःसतिव्योम्निसचैषोपिद्वयंस्थितं ६१ यद्वाप्रतिध्वनिर्व्योम्नोगुणोनासौसतीष्यते व्योम्निद्वौसद्ध्वनीतेनसदेकंद्विगुणंवियत् ६२ याशक्तिःकल्पयेद्व्योमसासद्व्योम्नोरभिन्नतां आपाद्यधर्मधर्मित्वंव्यत्ययेनावकल्पयेत् ६३॥ ॥

त्युपादितधम स्तात् असौप्रतिध्वनिःसतिसद्वस्तुनिनेष्यते नोपलभ्यतेव्योम्नितुसौध्वनीसच्छब्दावुभावप्युपलभ्येतेतेनकारणेनसदेकमेकस्वभावंवियद्द्विगुणंद्विःस्वभावकमित्यर्थः ६२ नन्वाकाशस्यसद्ब्रह्मकार्यत्वेआकाशस्यसत्तेतिसतआकाशधर्मताकुतःप्रतिभातीत्याहशंक्याह याशक्तिरिति यामायासद्वस्तुन्याकाशंकल्पयतिसाप्रथमतःसद्व्योम्नोरभेदंकल्पयतिपश्चात् धर्मधर्मिभावंवैपरीत्येनकल्पयति अतआकाशस्यसत्तेतिभानमुपपद्यतइत्यर्थः ६३॥ ७ः ७ः ७ः ७ः ॥ ५

मायायांवैपरीत्यंकथंकृतमित्याशंक्याह सतइति वस्तुतत्त्वविचारेक्रियमाणेमृदोघटरूपत्वमिवसतोव्योमत्वमापन्नंसद्वस्तुन आकाशरूपत्वंप्राप्तं लौकिकाः प्राणिनः शास्त्रेषुमध्येतार्किकाश्चतद्वैपरीत्येनव्योम्नोगगनस्यधर्मिणःसत्तांसद्रूपत्वंधर्मंजातिंवावगच्छंतिजानंति ननुअन्यस्यान्यथाप्रतीतिरनुपपन्नेत्याशंक्याह मायायाइति तद्विपरीतदर्शनहेतुत्वंमायायायुक्तमित्यर्थः ६४ मायाया विपरीतप्रतीतिहेतुत्वंलौकिकन्यायप्रदर्शनेनस्पष्टीकरोति यद्यथेति यच्छुक्त्यादियथायेनशुक्तिकादिरूपेणवर्ततेतस्यतथात्वंशुक्त्यादिरूपत्वंप्रमाणतःस्फुरति अन्यथात्वंरजतादिरूपत्वंतद्भ्रमेणभ्रांत्याप्रतिभातीत्ययंन्यायः सर्वलोकप्रसिद्धइत्यर्थः ६५ एवंभ्रांत्याविपरीतप्रतिभानंदर्शयित्वातन्निवृत्त्युपायमाह एवमिति एवमुक्तेनप्रकारेणश्रुति

सतोव्योमत्वमापन्नंव्योम्नःसत्तांतुलौकिकाः तार्किकाश्चावगच्छंतिमायायाउचितंहितत् ६४ यद्यथावर्ततेतस्यतथात्वंभातिमानतः अन्यथात्वंभ्रमेणेतिन्यायोयंसार्वलौकिकः ६५ एवंश्रुतिविचारात्प्राग्यथायद्वस्तुभासते विचारेणविपर्येतितत्तस्त्वच्चिंत्यतांवियत् ६६ भिन्नेवियत्सतीशब्दभेदाद्बुद्धेश्चभेदतः वाय्वादिष्वनुवृत्तंसन्नतुव्योमेतिभेदधीः ६७ सद्वस्त्वधिकवृत्तित्वाद्धर्मिव्योम्नस्तुधर्मता धियासतःपृथक्कारेब्रूहिव्योमकिमा

विचारात्प्राक्श्रुत्यर्थविचारात्पूर्वंयद्वस्तुयत्सद्रूपंब्रह्मभ्रांत्यायथायेनगगनादिरूपेणवर्ततेतत्श्रुत्यर्थपर्यालोचनेनविपर्येति गगनादिभावंपरित्यज्यसद्रूपंब्रह्मैवभवतिततःश्रुतिविचारेणवस्तुयाथात्म्यदर्शनसंभवात्तद्वियच्चिंत्यतांविचार्यतामित्यर्थः ६६ विचारस्वरूपंमेवदर्शयति भिन्नइति भिन्नइतिप्रतिज्ञातार्थहेतुमाह शब्देति वियत्सत्शब्दयोरपर्यायत्वादित्यर्थः हेत्वंतरमाह बुद्धेरिति तमेवहेतुंविशदयति वाय्विति सद्वाय्वादिषुभूतेषुसन्वायुःसत्तेजइत्येवंप्रकारेणानुवृत्तंभासंनव्योमतुनैवंभासतइतियत्ज्ञानंसाभेदधीर्भेदबुद्धिरित्यर्थः ६७ एवंसदाकाशयोर्भेदंप्रसाध्यव्योम्नःसत्तेतिभ्रांत्याप्रतीतस्यधर्मिधर्मभावस्यविचारेणव्यत्ययंदर्शयति सद्वस्त्विति रूपरसादिष्वनुवृत्तस्यद्रव्यस्येवाकाशवाय्वादिष्वनुवृत्तस्यसतोधर्मित्वंरसादिभ्योव्यावृत्तस्यरूपस्येववाय्वादिभ्योव्यावृत्तस्यनभसोधर्मत्वमित्यर्थः ननुतर्हिघटाद्भिन्नस्यरूपस्ययथावास्तवत्वंतथासतोभिन्नस्यन

दुर्निरूपत्वमसिद्धमितिशंकते अवकाशेति नहिसतोविलक्षणत्वादसदेवस्यादितिपरिहरति असदिति सतोविलक्षणास्या
सत्वंनास्तीतिवदतोशेषमाहभिन्नमिति ६९ असत्वेभानंनस्यादित्याशंक्यतुछविलक्षणत्वाड्डानं नविरुध्यतइत्याहभातीति
अविरोधंदर्शयितुंमिथ्यावस्तुनोलक्षणंसदृष्टांतमाह यद्दसङ्गासमानमिति यद्वस्तुस्वरूपेणाविद्यमानमपिभासतेतत्स्वप्न
जादिवन्मिथ्येत्यर्थः ७० ननुनियमेनसहोपलभ्यमानयोर्भेदोनदृष्टचरइत्याशंक्याह जातीति ७१ भेदोयद्यपिबुध्यतेतथापि
निश्चितोनभवतीतिशंकतेबुद्धइति तस्यपरिहारंवक्तुंनिश्चयाभावेकारणंपृछति अनेकेति ७२ आद्यपरिहारमाह अप्रमत्त
इति आद्यप्रथमेविकल्पेध्यानात्तत्रप्रत्ययैकतानताध्यानमित्युक्तलक्षणादप्रमत्तोभवसावधानमनाभवेतियावत्द्वितीये

अवकाशात्मकंतत्त्वेदसत्तदितिचिंत्यतो भिन्नंसतोऽसत्त्वंनेतिवस्तिचेद्ध्याहतिस्तव ६९ भातीतिचेद्भानुनामभू
पणंमायिकस्यतत् यद्दसङ्गासमानंतन्मिथ्यास्वप्नगजादिवत् ७० जातिव्यक्तीदेहिदेहोगुणद्रव्येयथापृथक् वि
यत्सतेस्तथैवास्तुपार्थक्यंकोत्रविस्मयः ७१ बुद्धापिभेदोनोचित्तेनिरूढिंयातिचेत्तदा अनेकाग्र्यात्संशयाद्वा
रूढ्यभावोस्यतेवद ७२ अप्रमत्तोभवध्यानादाद्येन्यस्मिन्विवेचनं कुरुप्रमाणयुक्तिभ्यांततोरूढतमोभवेत् ७३
ध्यानान्मानाद्युक्तितोपिरूढेभेदेवियत्सतोः नकदाचिद्वियत्सत्यंसद्वस्तुछिद्रवन्नच ७४ ज्ञस्यभातिसदाव्यो
मनिस्तत्वोल्लेखपूर्वकं सद्वस्त्वपिविभात्यस्यनिःछिद्रत्वपुरःसरं ७५॥ ॥

परिहारमाह अन्यस्मिन्निति ततःकिमित्यतआह ततइति ७३ ततोपिकिमित्यतआह ध्यानादिति ध्यानंपूर्वोक्तलक्षणं
मानंभिन्नेवियत्सतिशब्दभेदात् बुद्धश्चभेदतइत्यत्रोक्तं युक्तिस्तुसद्वस्त्वधिकवृत्तित्वादित्यादावुक्ताएतैर्ध्यानादिभिर्वियत्सतो
र्भेदेचित्तेनिरूढिंयातेसतिवियत्कादाचित्कसत्यंकिंतुसर्वदामिथ्येवावभासते सद्वस्त्वपिछिद्रवदाकाशवन्नचनेवभवती ६
तिशेषः ७४ वियत्सत्वविवेचनेफलमाह ज्ञस्येति ७५॥ ॥

41/1938

वियन्मिथ्यात्वंसतोवस्तुत्वंचसदाचिंतयतःकिंभवतीत्यतआह वासनेति बुधःवियत्सतोस्तत्ववेत्तागगनस्यसत्यत्वंब्रुवा
णंनिरवकाशसद्वस्त्ववबोधरहितेचदृष्ट्वाविस्मयंप्राप्नोतीत्यर्थः ७६ उक्तन्यायमन्यत्राप्यतिदिशति एवमिति ७७ नन्वा
काशकार्यस्यवायोरकारणभूतेनसद्वस्तुनातादात्म्यप्रतित्ययोगात्सतोविवेचनमप्रयोजकमित्याशंक्यसाक्षात्संबंधाभा
वेपिपरंपरयासंबंधोस्तीत्याह सद्वस्त्विति ७८ एवंसद्वाय्वोःसंबंधंप्रदर्श्यतयोर्धर्मतोभेदज्ञानायवायोप्रतीयमानान्धर्मा
नाह शेषइति एवंप्रातिस्विकान्धर्माननभिधायकारणतःप्राप्तांस्तानाह त्रयइति सन्मायाव्योम्नांयेत्रयःस्वभावाः शी
लविशेषाधर्मास्तेपिवायुगाः वायौविद्यंतइत्यर्थः ७९ केतेधर्माइत्यतआह॥ वायुरिति वायुरस्तीतिव्यवहारहेतुःसद्रूप
त्वंसद्वस्तुनोधर्मएकः वायोसद्वस्तुनोविवेचितेसतियंनिस्तत्वरूपत्वंसमायाधर्मोद्वितीयः शब्दोव्योम्नःसकाशादाग
तो

वासनायांप्रवृद्धायांवियत्सत्यत्ववादिनं सन्मात्राबोधयुक्तंचदृष्ट्वाविस्मयतेबुधः ७६ एवमाकाशमिथ्या
त्वेसत्सत्यत्वेचवासिते न्यायेनानेनवाय्वादेःसद्वस्तुप्रविविच्यतां ७७ सद्वस्त्वन्येकदेशस्थामायातत्रैकदे
शगं वियत्तत्राप्येकदेशगतोवायुःप्रकल्पितः ७८ शोषस्पर्शौगतिर्वेगोवायुधर्माइमेमताः त्रयःस्वभावाःस
न्मायाव्योम्नांयेतेपिवायुगाः ७९ वायुरस्तीतिसद्भावःसतोवायोपृथक्कृते निस्तत्वरूपतामायास्वभावोव्यो
मगोध्वनिः ८० सतोनुवृत्तिःसर्वत्रव्योम्नोनेतिपुरेरितं व्योमानुवृत्तिरधुनाकथंनव्याहतंवचः ८१॥

नोधर्मस्तृतीयइत्यर्थः ८० ननुव्योमविवेचनप्रस्तावेवाय्वादिष्वनुवृत्तंसत्तुव्योमतिभेदधीरित्यत्रवाय्वादावाकाशानु
वृत्तिर्निवारितेदानींव्योमानुवृत्तिरभिधीयते अतःपूर्वोत्तरविरोधइतिशंकते सतोनुवृत्तिरिति कथंव्योमानुवृत्तिरधुनो
च्यतइतिशेषः ८१

पूर्वमवकाशलक्षणस्वरूपानुवृत्तिर्निर्वारिता इदानीं धर्मानुवृत्तिरेवाभिधीयते न स्वरूपानुवृत्तिरतो न व्याहतिरितिपरिह
रति छिद्रेति ८२ ननु वायोः सद्वस्तुविलक्षणत्वादसत्त्वलक्षणं मायामयत्वं यद्युच्यते तर्ह्यव्यक्तस्वरूपमायावैलक्षण्याद्मा
यामयत्वमपि किन्न स्यादिति चोदयति नन्विति ८३ नाव्यक्तत्वं मायामयत्वे प्रयोजकं किंतु स्तत्त्वरूपत्वं तच्च मायायामिव वायौ
दावप्यस्तीति न मायामयत्वहानिरिति परिहरति निस्तत्त्वरूपेति ८४ ननु शक्तिकार्ययोरुभयोरपि निस्तत्त्वरूपतायामविशि
ष्टायां व्यक्ताव्यक्तत्वलक्षणो भेदः कुत इत्याशंक्य तद्विचारः प्रकृतानुपयुक्त इति परिहरति सदसत्त्वेति असतो मायात-
त्कार्यरूपस्यावांतरभेदो व्यक्ताव्यक्तत्वरूप इत्यर्थः ८५ फलितमाह सद्वस्त्विति वायौ यः सदंशः तद्ब्रह्मरूपं शिष्टोंऽशो नि

छिद्रानुवृत्तिर्नेतीति पूर्वोक्तिरधुनात्वियं शब्दानुवृत्तिरेवोक्ता वचसो व्याहतिः कुतः ८२ ननु सद्वस्तुपार्थक्याद
सत्त्वं चेत्तदा कथं अव्यक्तमायावैषम्यादमायामयतापि नो ८३ निस्तत्त्वरूपतैवात्र मायात्वस्य प्रयोजिका साशक्ति
कार्ययोस्तुल्या व्यक्ताव्यक्तत्वभेदिनोः ८४ सदसत्त्वविवेकस्य प्रकृतत्वात्स चिंत्यतां असतो वांतरो भेद आस्तां
तच्चिंतया न किं ८५ सत्त्वं वस्तु ब्रह्मशिष्टोंऽशो वायुर्मिथ्या यथा वियत् वासयित्वा चिरं वायौ मिथ्यात्वं मरुतं त्यजेत् ८६
चिंतयेद्वह्निमप्येवं मरुतो न्यूनवर्तिनं ब्रह्मांडावरणेष्वेषा न्यूनाधिकविचारणा ८७॥ वायोर्दशांशतो न्यूनो वह्निर्वा
योऽत्र कल्पितः पुराणोक्तं तारतम्यं दशांशैर्भूतपंचके ८८॥ ॥

फलितमाह सद्वस्त्विति वायौ यः सदंशः तद्ब्रह्मरूपं शिष्टोंऽशो निस्तत्त्वरूपादिर्वायोः स्वरूपं स च वायुर्निस्तत्त्वरूपत्वाद्वियदा का
शवन्मिथ्या इत्थं वायोर्मिथ्यात्वं चिरं वासयित्वा मरुतं त्यजेत् मरुत्सत्य इति बुद्धिं त्यजेदित्यर्थः ८६ वायावुक्तविचारं तेजस्य
प्यतिदिशति चिंतयेदिति ननु सद्वस्त्वेकदेशस्था मायात इत्यादिना वियदादीनां न्यूनाधिकभाव उक्तः स लोकेन क्वापि दृ
श्यत इत्याशंक्याह ब्रह्मांडेति ८७॥ वायोः कियतांऽशेन न्यूनो वह्निरित्यत आह वायोरिति तस्य वास्तवत्वशंकां वारयति वाया
विति नन्वयं न्यूनाधिकभावः स्वकपोलकल्पित इत्याशंक्याह पुराणेति ८८॥ ॥ ७

43
1938

वह्नेः स्वरूपमाह वह्निरिति अत्रापि वायाविव कारणधर्मा अनुगता इत्याह पूर्वेति के ते धर्मा इत्याकांक्षायामाह अस्तीति ८९
एवमग्नौ कारणधर्मानुगत्यनुवादपूर्वकं स्वकीयं धर्मं दर्शयति सन्मायेति इत्थं सविशेषणं वह्निस्वरूपं व्युत्पाद्य इदानीं सद्वस्तुनो
वह्निं विविनक्ति तत्रेति तत्र तेषु मध्ये सतः सद्वस्तुनोऽन्यत्सर्वं धमजातं मिथ्येति बुध्या विविच्यतां पृथक्क्रियतामित्यर्थः ९०
एवं वह्नेः मिथ्यात्वनिश्चयानंतरमपां मिथ्यात्वं चिंतयेदित्याह सत इति ९१ अप्स्वपि कारणधर्मान् स्वधर्मांश्च विभज्य दर्शयति
संत्याप इति शब्देन सह वर्तत इति सशब्दः सशब्दश्चासौ स्पर्शश्च सशब्दस्पर्शः तेन युक्ता इत्यर्थः ९२ विवेकध्यानाभ्यामपां

वह्निरुष्णप्रकाशात्मा पूर्वानुगतिरत्र च अस्ति वह्निः स निस्तत्त्वः शब्दवान्स्पर्शवानपि ८९ सन्मायाव्योमवाय्वं
शैर्युक्तस्याग्नेर्निजो गुणः रूपं तत्र सतः सर्वमन्यत् बुध्या विविच्यतां ९० सतो विवेचिते वह्नौ मिथ्यात्वे सति
वासिते आपो दशांशतो न्यूनाः कल्पिता इति चिंतयेत् ९१ संत्यापोऽम्भः शून्यतत्वाः सशब्दस्पर्शसंयुताः रूपव
त्यान्यधर्मानुवृत्त्या स्वीयो रसो गुणः ९२ सतो विवेचितास्वप्सु तन्मिथ्यात्वे च वासिते भूमिर्दशांशतो न्यूना कल्पि
ताप्स्विति चिंतयेत् ९३ अस्ति भूस्तत्त्वशून्यास्यां शब्दस्पर्शौ सरूपकौ रसश्च परतो गंधो नैजः सत्ता विविच्यतां
९४ पृथक्कृतायां सत्तायां भूमिमिथ्यावशिष्यते ९५ भूमेर्दशांशतो न्यूनं ब्रह्मांडं भूमिमध्यगं ब्रह्मांडमध्ये
तिष्ठंति भुवनानि चतुर्दश ९५ भुवनेषु वसंत्येषु प्राणिदेहा यथायथं ब्रह्मांडलोकदेहेषु सद्वस्तु निःपृथक्कृते ९६॥॥

मिथ्यात्वं निश्चित्यानंतरं भूमेर्मिथ्यात्वं चिंतनीयमित्याह सतो विवेचितास्विति ९३ तस्या मिथ्यात्वचिंतनाय तद्धर्मानपि विभ
ज्यते अस्तीति तेभ्यः सत्तामात्रं पृथक्कर्तव्यमित्याह सतेति ९४ सत्तापृथक्करणे फलमाह पृथगिति ९४ इदानीं भौति
केभ्यो ब्रह्मांडादिभ्यः सतो विवेचनाय तदवस्थानप्रकारं दर्शयति भूमेरिति ९५ विवेचनानंतरं विवेचनफलमाह इत्याह ब्रह्मांडादिति ९५
तेषु सद्विवेचने फलमाह ब्रह्मांडलोकदेहेष्विति ९६॥ ॥

तद्धानेकाप्सतिरित्यक्तमेवार्थंस्पष्टीकरोति भूतेति भूतानामाकाशादीनांभौतिकानांब्रह्मांडादीनांमायायाश्वतत्कारणस्य
तायामिथ्यात्वविवेकध्यानाभ्यांचिरंदृढंवासितेसति सद्वस्तुनोऽद्वैतबुद्धिः कदाचिन्नविहन्यतइत्यर्थः ९७ ननुभूम्यादीनाम
सत्वेविदुषांव्यवहारलोपः प्रसज्येतेत्याशंक्यविवेकेनमिथ्यात्वनिश्चयेपिभूम्यादेः स्वरूपोपमर्दनाभावान्नव्यवहारोलुप्य
तेइत्याह सदिति ९८ ननुसत्वस्याद्वैतरूपत्वेसांख्यादिभिरभिधीयमानस्यभेदस्यकुतोनानिरासः क्रियतइत्याशंक्यव्या
वहारिकभेदस्यास्माभिरभ्युपगतत्वान्नतन्निरासायप्रयत्यतइति॥ आह सांख्यकाणादेति ९९ ननुप्रमाणसिद्धस्यसत्व

असंतोऽद्रादयोभांतुतद्धानेपीहकाक्षतिः भूतभौतिकमायानामसत्वेत्यंतवासिते ९७ सदद्वैतात्पृथक्भूतेद्वैतेभू
म्यादिरूपिणि तत्तदर्थक्रियारूपेयथादृष्टातथैवसा ९८ सांख्यकाणादबौद्धाद्यैर्जगद्भेदोयथायथा उत्प्रेक्ष्यतेनै
कयुक्त्याभवत्वेषतथातथा ९९ अवज्ञातंसदद्वैतंनिःशंकैरन्यवादिभिः एवंकाक्षतिरस्माकंतद्वैतमवजानतां १००
द्वैतावज्ञासुस्थितांचेतद्वैतेधीःस्थिरासवेत् स्थैर्येतस्याःपुमानेषजीवन्मुक्तइतीर्यते १०१ एषाब्राह्मीस्थितिः
पार्थनैनांप्राप्यविमुह्यति स्थित्वास्यामंतकालेपिब्रह्मनिर्वाणमृच्छति १०२ सदद्वैतेनृतंद्वैतेयदन्योन्यैक्यवी
क्षणं तस्यांतकालस्तद्भेदबुद्धिरेवनचेतरः १०३ यद्वांतकालःप्राणस्यवियोगोस्तुप्रसिद्धितः तस्मिन्कालेपि
नभ्रांतेर्गतायाःपुनरागमः १०४

भेदस्यावज्ञानुपपन्नेत्याशंक्याह अवज्ञातमिति यथान्यवादिभिःसांख्यादिभिर्निःशंकैःश्रुत्यादिसिद्धस्यापिसदद्वैतस्या
वज्ञाक्रियते श्रुतियुक्त्यनुभवावष्टंभेअस्माभिःतदीयद्वैतानानादरणेकिंहीयतइत्यर्थः १०० ननुनिःप्रयोजनेयंद्वैतावज्ञेत्या
शंक्यजीवन्मुक्तिलक्षणप्रयोजनसद्भावान्नैवमित्याह द्वैतावज्ञास्त्विति १०१ नकेवलंजीवन्मुक्तिरेवप्रयोजनमपितुवि
देहमुक्तिरपीत्यभिप्रायेणकृष्णवाक्यमप्युदाहरति एषेति १०२ अंतकालशब्देनवर्तमानदेहपातोभिधीयतइत्याशंकांवार
यितुंविवक्षितमर्थमाह सदद्वैतइति सद्रूपेऽद्वैतेअनृतेरूपेद्वैतेचयदन्योन्याध्यासलक्षणमैक्यज्ञानमस्तितस्यैक्यभ्रमस्यांतकालो ८
नामतयोर्द्वैताद्वैतयोःसत्यानृतरूपेणभेदबुद्धिरेवनापरोवर्तमानदेहपातइत्यर्थः १०३ इदानींलोकप्रसिद्धार्थस्वीकारेपिनदोषइत्य

मिप्रायेणाह॥ यद्वांतेति १०४

उक्तमर्थंप्रपंचयति नीरोगेति १०५ ननुप्राणवियोगकालेमूर्छादिनाज्ञाननाशेभ्रांतिःस्यादेवेत्याशंक्यज्ञाननाशाभा
वेदृष्टांतमाह दिनेदिनइति यथाप्रत्यहमधीतेवेदेस्वप्नसुषुप्त्याद्यवस्थायांविस्मृतेपिपरेद्युःस्वधीतवेदत्वंनास्तितथामृ

नीरोगउपविष्टोवारुग्णोवाविलुठन्भुवि मूर्छितोवात्यजत्वेषप्राणान्भ्रांतिर्नसर्वथा १०५
दिनेदिनेस्वप्नसुप्त्योरधीतेविस्मृतेप्ययं परेद्युर्नानधीतःस्यात्तद्वद्विद्यानन्नश्यति १०६
प्रमाणोत्पादिताविद्याप्रमाणंप्रबलंविना ननश्यतिनवेदांतोत्प्रबलंमानमीक्ष्यते १०७
तस्माद्वेदांतसंसिद्धंसदद्वैतंनबाध्यते अंतकालेप्यतोभूतविवेकान्निर्वृतिःस्थिता १०८
इति॰भू॰वि॰

तिकालेपितत्वानुसंधानाभावेपिज्ञाननाशाभावइत्यर्थः १०६ ज्ञाननाशाभावमेवोपपादयति प्रमाणेति १०७ उपपा
दितमर्थमुपसंहरति तस्मादिति १०८॥ ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनी
श्वरशिष्येणरामकृष्णाख्यविदुषाविरचितापंचदशीयमहाभूतविवेकव्याख्यासमाप्तः॥ ॥ श्रीकृष्णार्पणमस्तु॥छ॥

47
1938

इतिभूतविवेकसमाप्तः प्रक॰२

49/1938

॥अथपंचकोशविवेकप्रारंभः॥ प्रक॰३

57/1938

श्रीगणेशायनमः॥नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥पंचकोशविवेकस्यकुर्वेव्याख्यांसमासतः॥१॥तैत्तिरीयोपनिषत्तात्पर्यव्याख्यानरूपं
पंचकोशविवेकाख्यंप्रकरणमारभमाणआचार्यस्तत्रश्रोतृप्रवृत्तिसिद्धये सप्रयोजनमभिधेयंसूचयन्मुखतश्चिकीर्षितंग्रंथंप्रतिजानीते॥गुहा
हितमिति॥योवेदनिहितंगुहायांपरमेव्योमन्इतिश्रुत्यागुहाहितत्वेनाभिहितंयद्ब्रह्मास्तितद्गुहाशब्दवाच्यादन्नमयादिकोशपंचकविवेकेनज्ञातुंश
क्यतेयतस्तेषांकोशानांपंचकंप्रकर्षेणप्रत्यगात्मनःसकाशाद्विभज्यप्रदर्श्यतइत्यर्थः॥१॥ननुकेयंगुहायस्यांनिहितं॥ब्रह्मकोशपंचकविवे
केनावबुध्यतइत्याशंक्यश्रुत्यागुहाशब्देनविवक्षितमर्थमाह॥देहादिति॥देहादन्नमयात्प्राणःप्राणमयः॥अभ्यंतरआंतरःप्राणात्प्राणमया
न्मनोमयःअभ्यंतरआंतरं॥ततोमनोमयात्कर्ताविज्ञानमयआंतरइत्यनुषज्यते॥ततोविज्ञानमयाद्भोक्ताआनंदमयःसोपिपूर्ववदांतर
दांतरइत्यर्थः॥सेयमन्नमयाद्यानंदमयांतानांपरंपरागुहाशब्देनोच्यतइत्यर्थः॥२॥इदानीमन्नमयस्यस्वरूपंतदनात्मत्वंचदर्शयति॥पित

गुहाहितंब्रह्मयत्तत्पंचकोशविवेकतः॥बोद्धुंशक्यंततःकोशपंचकंप्रविविच्यते॥१॥देहादभ्यंतरःप्राणःप्राणाद
भ्यंतरंमनः॥ततःकर्ताततोभोक्तागुहासेयंपरंपरा॥२॥पितृभुक्तान्नजाद्वीर्याज्जातोन्नेनैववर्धते॥देहःसोन्नम
योनात्माप्राक्चोर्ध्वंतदभावतः॥३॥पूर्वजन्मन्यसत्त्वेतज्जन्मसंपादयेत्कथं॥भाविजन्मन्यसत्कर्मनभुंजीतेहसंचितं॥४॥

भुक्तान्नजान्मातापितृभ्यांभुक्तायदन्नंतस्माज्जातादित्यादिलक्षणाज्जायमानंयद्वीर्यमस्ति॥तस्माद्वीर्याद्योदेहोजातःपश्चाज्जननानंतरंभक्षितादन्नेनैव
वर्धते॥सदेहोन्नमयोन्नस्यविकारःसआत्मानभवति॥कुतइत्यतआह॥प्राक्चोर्ध्वमिति॥जन्मनःप्राक्मरणादूर्ध्वंचतदभावत्तस्यदेह
स्याभावादित्यर्थः॥विवादाध्यासितोदेहआत्मानभवतिकार्यत्वाद्घटादिवदितिभावः॥३॥हेतुरस्तुसाध्यंमास्तुइतिपक्षेबाधकाभा
वादप्रयोजकोयंहेतुरित्याशंक्याकृताभ्यागमकृतविनाशाख्यबाधकसद्भावान्नैवमितिपरिहरति॥पूर्वजन्मनीति॥एतद्देहरूपस्यात्मनः
पूर्वस्मिञ्जन्मन्यसत्त्वादेतज्जन्मदेवत्वादृशंमभवेप्यस्यजन्मनोप्यंगीक्रियमाणत्वादकृताभ्यागमःप्रसज्येत॥तथाभाविजन्मन्यप्यस्यदे
हरूपस्यात्मनोऽसत्त्वादभावादिहानुष्ठितयोःपुण्यपापयोःफलभोक्तुरभावेनभोगमंतरेणापिकर्मक्षयःप्रसज्येत॥अयंकृतवि
प्रनाशः॥एवंकृतनाशाकृताभ्यागमरूपबाधकसद्भावादात्मनःकार्यत्वंनांगीकर्तव्यमितिभावः॥४॥ ५ ॥ ५ ॥

एवमन्नमयकोशस्यानात्मत्वंप्रदर्श्यप्राणमयकोशस्वरूपंदर्शयन्तदनात्मत्वंदर्शयति॥पूर्णइति॥योवायुर्देहेपूर्णःपादादिमस्तकपर्यंतंव्याप्तः
सन्बलंयच्छन्व्यानरूपेणसामर्थ्यंप्रयच्छन्नक्षाणांचक्षुरादीनांइंद्रियाणांप्रवर्तकःप्रेरकोवर्ततेसवायुःप्राणमयइत्युच्यतेऽसावप्यात्मानभवति
॥नत्वहेतुमाह॥चैतन्यवर्जनादिति॥विवादाध्यासितःप्राणआत्मानभवति॥जडत्वाद्घटादिवदितिभावः॥५॥इदानींमनोमयस्वरूपप्रदर्शनपू
र्वकंतस्याप्यनात्मत्वमाह॥अहंतांममतामहंभावंगृहादौममतांमदीयत्वाभिमानंचयःकरोत्यसौमनोमयइतिसआत्मानभवति॥कुतइत्यत
आहकामाद्यवस्थयाभ्रांतइति॥हेतुगर्भितंविशेषणं॥कामक्रोधादिहनिमित्तेनानियतस्वभावत्वादित्यर्थः॥तथाचमनोमयआत्मानभ
वति॥विकारवत्त्वाद्देहवदितिभावः॥६॥अनंतरंकर्तृशब्दवाच्यस्यविज्ञानमयस्यस्वरूपंप्रदर्शयन्तदनात्मत्वंदर्शयति॥लीनेति॥याचिच्छा
यापन्नाधीश्चिदाभाससहिताबुद्धिः॥सुप्तौसुप्तिकालेलीनासतीबोधेजागरणकालेआनखाग्रमानखाग्रपर्यंतंवर्तमानासतीवपुःशरीरंव्याप्य

पूर्णोदेहेबलंयच्छन्नक्षाणांयःप्रवर्तकः॥वायुःप्राणमयोनासावात्माचैतन्यवर्जनात्॥५॥अहंतांममतांदेहेगृहादौचकरोति
यः॥कामाद्यवस्थयाभ्रांतोनासावात्मामनोमयः॥६॥लीनासुप्तौवपुर्बोधेव्याप्नुयादानखाग्रगा॥चिच्छायोपेतधीर्नात्माविज्ञानमय
शब्दभाक्॥७॥कर्तृत्वकरणत्वाभ्यांविक्रियेतांतरिंद्रियं॥विज्ञानमनसीअंतर्बहिश्चैतेपरस्परं॥८॥काचिदंतर्मुखावृत्तिरानंदप्रतिबिं
बभाक्॥पुण्यभोगेभोगशांतौनिद्रारूपेणलीयते॥९॥

मितिदेहेहंतां

यात्संव्याप्यवर्ततेसाविज्ञानमयशब्दभाग्विज्ञानमयशब्देनोच्यमानानात्माऽसावप्यात्मानभवतिविलयाद्यवस्थावत्त्वाद्घटादिवदित्यर्थः॥
ननुमनोबुद्ध्योरंतःकरणत्वाविशेषान्मनोमयविज्ञानमयरूपेणकोशद्वयकल्पनानुपपन्नेत्याशंक्यकर्तृत्वकरणत्वाभ्यांभेदसद्भावाद्
तएवमनोमयत्वादिभेदइत्याह॥कर्तृत्वेति॥अंतरिंद्रियमंतःकरणंकर्तृत्वकरणाभ्यांलौकिकर्तृरूपेणकरणरूपेणचविक्रियेतपरिणमतइत्य
र्थः॥एतेकर्तृकरणेविज्ञानमनसीविज्ञानमनःशब्दवाच्येभवतः॥एतेचपरस्परमंतर्बहिर्भावेनवर्तेतेऽतश्चकोशद्वयत्वमुपपद्यतइत्यर्थः
॥८॥इदानींभोक्तृशब्दवाच्यस्यानंदमयस्यानात्मत्वंदर्शयितुंतस्यस्वरूपमाह॥काचिदिति॥पुण्यभोगेपुण्यकर्मफलानुभवकालेकाचि
द्वृत्तिरंतर्मुखासतीआनंदप्रतिबिंबभाक्आत्मरूपस्यानंदस्यप्रतिबिंबंभजतेसैवभोगशांतौपुण्यकर्मफलभोगोपरमेसतिनिद्रा
रूपेणलीयते॥लीनाभवति॥सावृत्तिरानंदमयइत्यभिप्रायः॥९ १

53/1938

तस्यानात्मत्वमाह॥कदाचित्कत्वतइति॥अयमानंदमयोपिकदाचित्कत्वात्कदाचिद्भवःकदाचित्कःकदाचित्कस्वभावःकादाचित्क
त्वंकादाचित्कत्वादितिकादाचित्कत्वतःआत्मानस्याद्घटादिपदार्थवदित्यर्थः॥ननुविद्यमानानामानंदमयादीनांसर्वेषामात्मत्वनिरा
सेनैरात्म्यंप्रसज्येतेत्याशंक्याह॥बिंबभूतइति॥बुद्ध्यादौप्रतिबिंबतयावस्थितस्यप्रियादिशब्दवाच्यस्यानंदमयस्यबिंबभूतःकारणभू
तोयआनंदोऽसावेवात्माभवति॥कुतइत्यतआह॥सर्वदेति॥नित्यत्वादित्यर्थः॥विवादाध्यासितआनंदआत्माभवितुमर्हति॥नित्यत्वा
द्यआत्मानभवतिनासौनित्योयथादेहादिर्दृष्टांतःगगनादेरुत्पत्तिमत्त्वेनानित्यत्वान्नानैकांतिकतेतिभावः॥१०॥चोदयति॥नन्विति॥
अन्नमयाद्यानंदमयांतानांकोशानांयुक्तैर्हेतुभिरात्मत्वंनघटतेचेन्माघटिष्ट अन्यस्त्वात्मानुपलभ्यमानत्वान्नैवसंभवतीति॥११॥
परिहरति॥बाढमिति॥अत्रनिद्राशब्देननिद्रानंदोलक्ष्यते॥निद्रादयोदेहांताउपलभ्यंते॥अन्योनानुभूयतइतियदुक्तंतत्सत्यं॥कथंत

कादाचित्कत्वतोनात्मास्यादानंदमयोप्ययं॥बिंबभूतोयआनंदआत्मासौसर्वदास्थितेः॥१०॥
ननुदेहमुपक्रम्यनिद्रानंदांतवस्तुषु॥माभूदात्मत्वमन्यस्तुनकश्चिदनुभूयते॥११॥बाढंनिद्रादयः
सर्वेनुभूयंतेनचेतरः॥तथाप्येतेनुभूयंतेयेनतंकोनिवारयेत्॥१२॥स्वयमेवानुभूतित्वाद्विद्यतेना
नुभाव्यता॥ज्ञातृज्ञानांतराभावादज्ञेयोनत्वसत्तया॥१३॥माधुर्यादिस्वभावानामन्यत्रस्वगुणा
र्पिणां॥स्वस्मिंस्तदर्पणापेक्षानोनचास्त्यन्यदर्पकं॥१४॥

कथंतर्हि॥तदतिरिक्तस्यात्मनोंगीकारइत्यतआह॥तथेति॥अन्यस्यानुपलभ्यमानत्वेपियद्बलादेतेषामानंदमयादीनामुपलभ्यमानताभ
वतिसोनुभवःकथंनांगीक्रियतइत्यर्थः॥१२॥नन्वुक्तेभ्योन्यआत्मायदिविद्येततर्ह्युपलभ्येतनचोपलभ्यतेऽतोनास्तीत्याशंक्याह॥स्वय
मिति॥आनंदमयादीनांसाक्षिणोनुभवस्वरूपत्वादेवानुभाव्यत्वंनास्तीति॥ननुअनुभवरूपत्वेप्यनुभाव्यत्वंकुतोनस्यादित्याशंक्याह॥ज्ञा
त्रिति॥ज्ञाताचज्ञानंचज्ञातृज्ञानेअन्येज्ञातृज्ञानेज्ञातृज्ञानांतरेतयोरभावःतस्मादज्ञेयोज्ञानविषयोनभवतीति॥ज्ञात्राद्यभावाद्ज्ञानज्ञायते
स्वस्यैवासत्त्वाद्वाकिमत्रविनिगमनेकारणमित्यतआह॥नत्वसत्तयेति॥निद्रानंदादिसाक्षित्वेनासतस्त्वस्यएवमेवनिराकृतत्वादितिभावः॥१३॥
अनुभवरूपस्यात्मनोनुभाव्यत्वाभावेदृष्टांतमाह॥माधुर्यादीति॥आदिशब्देनाम्लादयोगृह्यंते॥माधुर्यादयःस्वभावाःसहजाधर्मविशे
षायेषांते॥माधुर्यादिस्वभावाःगुडादयस्तेषामन्यत्रस्वसंसर्गपदार्थेषुचणकादिषुस्वगुणार्पिणांस्वगुणान्माधुर्यादीनर्पयंतीतिस्वगुणार्पिण
स्तेषां॥स्वस्मिन्स्वस्वरूपेगुडादिलक्षणे॥तदर्पणापेक्षातेषांमाधुर्यादीनामर्पणेसंपादनेऽपेक्षाआकांक्षा॥माधुर्यादिकंकेनचित्संपादनीयमित्येवं

दृष्टांतं फलितमाह ॥ अर्प्यकेति ॥ माधुर्यादिसमर्पकत्वस्यांतराभावेपि ॥ एषांगुडादीनां माधुर्यादिस्वभावतायथाविद्यते ॥ एवमात्मनोप्यनुभवविषयत्वंमाभूदनुभवरूपतानुभवत्वेनेवेत्यर्थः ॥ १५ ॥ उक्तार्थेप्रमाणमाह ॥ स्वयंज्योतिरित्यादिश्रुतय आत्मनः स्वप्रकाशत्वंबोधयंनीत्यर्थः ॥ १६ ॥ येनेदंसर्वंविजानातितंकेनविजानीयाद्विज्ञातारमरेकेनविजानीयादितिवाक्यद्वयमर्थतः पठति ॥ येनेदमिति ॥ येनसाक्षिचैतन्यरूपेणात्मनेदंसर्वंदृश्यजातंजानंतेप्राणिनस्तंसाक्षिणमात्मानमन्येनकेनसाध्यभूतेनजडेनजानतामवगच्छेयुःपुमांसइतिशेषः ॥ अस्यैववाक्यस्यतात्पर्यमाह ॥ विज्ञातारमितिदृश्यजातस्यज्ञातारंकेनदृश्यभूतेनविद्याद्विजानीयात्नकेनापिजानातीत्यर्थः ॥ ननुमनसाज्ञास्यतीत्याशंक्याह ॥ शक्तमिति ॥ साधनंतुज्ञानसाधनंतुमनोवेद्येज्ञातव्येविषयेशक्तंसमर्थनतुज्ञातर्यात्मनि ॥ नैववाचानमनसेत्यादिश्रुतेः ॥ तस्यापिज्ञेयत्वेकर्मकर्तृत्वविरोधाच्चेतिभावः ॥ १७ ॥ आत्मनःस्वप्रकाशत्वएवसंवेत्तिवेद्यंनत्वतस्यास्तिवेत्ता ॥

अर्पकांतरराहित्येप्यस्त्येषांतत्स्वभावता ॥ माभूत्तथानुभाव्यत्वंबोधात्मातुनहीयते ॥ १५ ॥ स्वयंज्योतिर्भवत्येषपुरोस्माद्भासतेखिलात् ॥ तमेवभांतमन्वेतितद्भासाभास्यतेजगत् ॥ १६ ॥ येनेदंजानतेसर्वंतत्केनान्येनजानताम् ॥ विज्ञातारंकेनविद्याच्छक्तंवेद्येतुसाधनम् ॥ १७ ॥ सवेत्तिवेद्यंतत्सर्वंनान्यस्तस्यास्तिवेदिता ॥ विदिताविदिताभ्यांतत्पृथग्बोधस्वरूपकः ॥ १८ ॥ बोधेप्यनुभवोयस्यनकथंचनजायते ॥ तंकथंबोधयेच्छास्त्रंलोष्ठंनरसमाकृतिम् ॥ १९ ॥

अन्यदेवतद्विदितादथोअविदितादधीति ॥ वाक्यद्वयमपिप्रमाणमितिमन्वानस्तद्वाक्यद्वयमर्थतः पठति ॥ सवेत्तीति ॥ सआत्मायद्वेद्यंतत्सर्वंवेत्ति तस्यात्मनोवेदिताज्ञातान्योनास्ति ॥ तद्बोधस्वरूपकंब्रह्मविदिताविदिताभ्यांविदितंज्ञातंज्ञातंज्ञानेनविषयीकृतमविदितंज्ञानेनाज्ञातंताभ्यांपृथक्विलक्षणंबोधस्वरूपत्वादेवेत्यर्थः ॥ १८ ॥ ननुविदिताविदितारीतिकोबोधोनानुभूयतइत्याशंक्याविदितविशेषणस्यवेदनस्यैवबोधरूपत्वान्तदनुभवाभावेविदितस्याप्यनुभवाभावप्रसंगाद्बोधानुभवोअवश्यमंगीकर्तव्यइतिसोपहासमाह ॥ बोधेपीति ॥ यस्यमंदस्यबोधेपिघटादिस्फुरणरूपेप्यनुभवःसाक्षात्कारःकथंचनकथमपिनजायतेनोत्पद्यतेतंनरसमाकृतिंनरसमानाकारंलोष्ठंलोष्ठवज्जडंमनुष्यंशास्त्रंकथंबोधयेत्नकथमपिबोधयेदित्यर्थः ॥ १९ ॥ श्रीगजाननायनमः २

बोधोनवुध्यतइत्युक्तिरेवव्याहतेतिसदृष्टांतमाह ॥ जिह्वेति ॥ मेजिह्वास्तिनवेत्युक्तिर्भाषणंयथालज्जायैकेवलंलज्जाजननायैवभवति ॥ नवुद्धिमत्वज्ञापनाय ॥ जिह्वयाविनाभाषणानुपपत्तेः ॥ एवंमयाबोधोनबुध्यतइतःपरंबोद्धव्यइत्युक्तिरपितादृशीलज्जाहेतुरेव ॥ बोधेनैवव्यवहारासिद्धेरित्यर्थः ॥ २० ॥ पचत्वेवंविधःसबोधस्तथापिप्रकृतेब्रह्मात्मवबोधेकिमायातमित्याशंक्याहयस्मिन्निति ॥ लोकेजगति विना यस्मिन्घटादिलक्षणेविषयबोधोज्ञानमस्तितन्नदुपेक्षणेतस्यतस्यघटादिविषयस्योपेक्षणेनादरणेकृतेसतियद्बोधमात्रंघटादिषुसर्वत्रानुस्यूतंयत्स्फुरणमस्तितदेवब्रह्मेत्येवंरूपाधिबुद्धिर्ब्रह्मनिश्चयोब्रह्मावगतिरित्यर्थः ॥ २१ ॥ ननुघटादिविषयोपेक्षयातदर्थानुभवरूपंब्रह्मावगम्यतेचेन्नर्हिकोशपंचकविवेकोयंनिःप्रयोजनःस्यादित्याशंक्यब्रह्मणःप्रत्यग्रूपताज्ञानेनविनासंसारानिवृत्तेस्तथात्वावबोधोपयोगित्वान्नतस्यापिवैयर्थ्यमित्याह ॥ पंचकोशेतिपंचानांकोशानामन्नमयादीनांपरित्यागेबुध्या

जिह्वामेस्तिनवेत्युक्तिर्लज्जायैकेवलंयथा ॥ नबुध्यतेमयाबोधोबोद्धव्यइतितादृशी ॥ २० ॥ यस्मिन्यस्मिन्नस्तिलोकेबोधस्तत्तदुपेक्षणे ॥ यद्बोधमात्रंतद्ब्रह्मेत्येवंधीर्ब्रह्मनिश्चयः ॥ २१ ॥ पंचकोशपरित्यागेसाक्षिबोधावशेषतः ॥ स्वस्वरूपंसएवस्याच्छून्यत्वंतस्यदुर्घटम् ॥ २२ ॥ अस्तितावत्स्वयंनामविवादाविषयत्वतः ॥ स्वस्मिन्नपिविवादश्चेत्प्रतिवाद्यत्रकोभवेत् ॥ २३ ॥ स्वासत्वंतुनकस्मैचिद्रोचतेविभ्रमंविना ॥ अतएवश्रुतिर्बाधंब्रूतेचासत्ववादिनः ॥ २४ ॥ ॥

नात्मत्वनिश्चयेकृतेनसाक्षिरूपस्यबोधस्यावशेषणात्ससाक्षिरूपोबोधएवस्वस्वरूपंस्वंनिजंरूपंब्रह्मैवस्यात् ॥ नन्वन्नमयादीनांअनुभवसिद्धानांत्यागेशून्यपरिशेषःस्यादित्याशंक्याह ॥ शून्यत्वमिति ॥ तस्यसाक्षिबोधस्यशून्यत्वंदुर्घटंदुःसंपादमित्यर्थः ॥ २२ ॥ दुर्घटत्वमेवोपपादयति ॥ अस्तितावदितिस्वयंशब्दवाच्यंस्वस्वरूपं ॥ लौकिकानांवैदिकानांचमतेतावदस्त्येव ॥ कुतइत्यतआह ॥ विवादेति ॥ स्वस्वरूपस्यविप्रतिपत्तिविषयत्वाभावादित्यर्थः विपक्षेबाधकमाह ॥ स्वस्मिन्निति ॥ स्वात्मन्यपिविप्रतिपत्तौसत्यामत्रास्यांविप्रतिपत्तौकःप्रतिवादीस्यान्नकोपीत्यर्थः ॥ २३ ॥ ननुस्वासत्ववादेवप्रतिवादीभविष्यतीत्याशंक्यतथाविधःकोपिनास्तीत्याह ॥ स्वासत्वमिति ॥ भ्रांतिमेकांविहायान्यस्यांदशायांस्वस्याभावःकेनापिनांगीक्रियतइत्यर्थः ॥ कुतएवंनिश्चीयतइत्याशंक्याह ॥ अतइति ॥ यतःकस्मैचिन्नरोचतेअतएवश्रुतिरप्यसत्ववादिनोबाधंब्रूते ॥ २४ ॥

55/1938

कियं श्रुतिरित्याकांक्षायां असन्नेवेत्यादिकां तां श्रुतिमर्थतः पठति॥ असद्ब्रह्मेति॥ यदि ब्रह्मासदिति जानीयात्तर्हि स्वयमेव ब्रह्मणोऽसत्वज्ञानी असदिव तस्यैव ब्रह्मरूपत्वादित्यर्थः॥ फलितमाह॥ अतोस्येति॥२५॥ इदानीमात्मनः स्वप्रकाशत्वं वक्तुकामस्तस्य वेद्यत्वाभावे कीदृक्स्वरूपमिति प्रश्नमुत्थापयति॥ कीदृगिति॥ अयमभिप्रायः॥ आत्मनः इदंकारादिना केनचिद्रूपेण वेदितव्यांगीकारे तेनैव रूपेणावेद्यत्वं स्यात् इदंतांगीकारे शून्यत्वमिति॥ सत्यमीदृक्त्वांगीकारे तथैव वेद्यत्वं न त्वनंगीक्रियत इत्याह॥ ईदृगिति॥ उपलक्षणमेतन्नाहंकत्वस्यापि॥ उभयाभावमेवाह॥ यदि नीदृगिति न हि प्रतिज्ञामात्रेणार्थसिद्धिरित्याशंक्याईदृक्तानादृक्शब्दयोरर्थमभिदधानस्तदवाच्यत्वमुपपादयति॥ अक्षाणामिति॥ प्रत्यक्षस्यैव घटादेरीदृक्शब्दवाच्यत्वं दृष्टं॥ परोक्षस्यैव धर्माधर्मादेस्तादृक्शब्दवाच्यत्वं॥ द्रष्टुरात्मनस्त्विंद्रिय

असद्ब्रह्मेति चेद्वेद स्वयमेव भवेदसत्॥ अतोस्य मा भूद्वेद्यत्वं स्वसत्वं त्वभ्युपेयतां॥२५॥
कीदृक्तर्हीति चेत्पृच्छे नेदृक्ता नास्ति तत्र हि॥ यदनीदृगतादृक्च तत्स्वरूपं विनिश्चिनु॥
२६॥ अक्षाणां विषयस्त्वीदृक् परोक्षस्तादृगुच्यते॥ विषयी नाक्षविषयः स्वत्वान्नास्य परोक्ष
ता॥२७॥ अवेद्योप्यपरोक्षोतः स्वप्रकाशो भवत्ययं॥ सत्यं ज्ञानमनंतं चेत्यस्तीह ब्रह्मलक्षणं॥२८॥

जन्यज्ञानविषयत्वाभावान्नेदृक्त्वं॥ स्वत्वेनैव परोक्षत्वाभावान्न तादृक्त्वमित्यर्थः॥२७॥ नहिं भूत्यमिति द्वितीयं पक्षं फलप्रदर्शनव्याजेन परिहरति॥ अवेद्य इति॥ इंद्रियजन्यज्ञानविषयत्वाभावेप्यपरोक्षत्वात् स्वप्रकाश इत्यर्थः॥ अत्रायं प्रयोगः॥ आत्मा स्वप्रकाशः संविकर्मतामंतरेणापरोक्षत्वात् संवेदनवदिति॥ न च विशेषणासिद्धो हेतुः॥ आत्मनः संवित्कर्मत्वे कर्मकर्तृभावविरोधप्रसंगात् स्वस्वरूपेण कर्तृत्वं विशिष्टरूपेण कर्मत्वमित्यविरोध इति चेन्न॥ गमनक्रियायामप्येकस्यैव स्वरूपेण कर्तृत्वं विशिष्टरूपेण कर्मत्वमित्यतिप्रसंगात्॥ न च साधनविकलो दृष्टांतः संवेदनस्य संवेदनांतरापेक्षायामनवस्थानादिति॥ ननु तर्कमते घटो घटज्ञानेनावभासते॥ घटज्ञानं अनुव्यवसायेन निसंवेदनवत्स्वप्रकाशो दृष्टांत इति विकल इति चेन्न॥ ज्ञानस्य ज्ञानांतरेणाभासनाभावान्न साधनविकलः॥ नन्वात्मनः स्वप्रकाशत्वसिद्धेपि ब्रह्मणो लक्षणाभावान्न ब्रह्मत्वसिद्धिरित्याशंक्य तल्लक्षणं तत्र योजयति॥ सत्यमिति॥ सत्यं ज्ञानमनंतं ब्रह्मेति श्रुत्या यद्ब्रह्मणो लक्षणमुक्तं तदिहात्मनि विद्यत इत्यर्थः॥२८ 3

57/1938

आत्मनः सत्यत्वोपपादनाय तावत्सत्यत्वस्य लक्षणमाह॥ सत्यत्वमिति॥ बाधशून्यत्वं सत्यत्वं॥ अबाध्यं सत्यं बाध्यं मिथ्येति न हि वेदकुशलैर्वा वार्यते॥ तत्र॥ अस्तु प्रकृते किमायातमित्यत आह॥ जगद्बाध इति॥ जगतः स्थूलसूक्ष्मशरीरादिलक्षणस्य यो बाधः सुषुप्तिमूर्छासमाधिषु अविद्यमानतानस्माक्षित्वेनैव वर्तमानस्यात्मनो बाधः किं साक्षिकः कः साक्षी यस्य बाधस्य सोकिं साक्षिकः न कोपि साक्षी विद्यत इत्यर्थः॥ असाक्षिकोप्यात्मबाधः किं न स्यादित्याशंक्याह॥ नत्वसाक्षिक इति॥ साक्षिरहितो बाधो नाभ्युपगंतव्योन्यथातिप्रसंगादिति भावः॥२९॥ उक्तमर्थं दृष्टांतेन स्पष्टयति॥ अपनीतेष्विति॥ मूर्तेषु गृहादिगतेषु घटादिष्वपनीतेषु गृहादिष्योतिः साक्षिष्वसत्सु॥ यथापनेतुमशक्यं नभ एवावशिष्यते॥ एवं सत्यनिर्भिन्नेषु मूर्तामूर्तेषु देहेंद्रियादिषु निराकर्तुं अशक्ये पुनेतीनतीति श्रुत्या निराकृतेषु सत्सु॥ अंते च मानमनं निराकरणसाक्षित्वेन यो बाधो वशिष्यते॥ स एव बाधरहित आत्मेत्यर्थः॥३०॥ ननु प्रतीयमानस्य सर्वस्यापि निषेधे

सत्यत्वं बाधराहित्यं जगद्बाधैकसाक्षिणः॥ बाधः किंसाक्षिको ब्रूहि नत्वसाक्षिक इष्यते॥२९॥ अपनीतेषु मूर्तेष्वप्यमूर्तं शिष्यते वियत्॥ शक्येषु बाधितेष्वंते शिष्यते यत्तदेव तत्॥३०॥ सर्वबाधे न किंचिच्चेद्यत्किंचिन्नदेव तत्॥ भाषा एवात्र भिद्यंते निर्बाधं तावदस्ति हि॥३१॥ अत एव श्रुतिर्बाध्यं बाधित्वाशेषयत्परं॥ स एष नेति नेत्यात्मेत्यतद्व्यावृत्तिरूपतः॥३२॥ ॥

किंचिन्नावशिष्यते॥ ननु कथं शिष्यते यन्न देवतादित्यवशिष्यस्यात्मत्वमुच्यत इति शंकते॥ सर्वबाध इति॥ न किंचिदवशिष्यत इति वदतापि तथाप्रयोगसिद्धये सर्वाभावविषयं ज्ञानमवश्यमभ्युपेतव्यं॥ अतस्तदेवास्मदभिमतात्मस्वरूपमित्यभिप्रायेण परिहरति॥ यन्न किंचिदिति॥ न किंचिदिति शब्देन यच्चैतन्यमुच्यते॥ तदेव तद्ब्रह्मेत्यर्थः॥ ननु न किंचिदित्यभाववाचकेन न किंचिच्छब्देन कथं चैतन्यमुच्यत इत्याशंक्य बाधसाक्षिणोऽवश्यमभ्युपेयत्वाद भिधायकशब्दे विवादस्तु न नोपाधेय इति परिहरति॥ भाषेति॥ अत्र बाधसाक्षिणि प्रत्यगात्मनि भाषा एव तु किंचिन्नास्तीत्यादिशब्दा एव भिद्यंते न निर्बाधं बाधरहितं साक्षिचैतन्यं तु विद्यत इत्यर्थः॥३१॥ उक्तमर्थं श्रुत्या दृढं करोति॥ अत इति॥ यतः साक्षिचैतन्यमबाध्यं अत एव नेति नेतीत्यात्मेति श्रुतिरतद्व्यावृत्तिरूपतो नात्मपदार्थनिराकरणद्वारेण बाध्यं निराकरणयोग्यं सर्वमनात्मवस्तुजातं बाधित्वा निराकृत्य॥ अतो निराकर्तुमशक्यं प्रत्यकस्वरूपं शेषयत्यवशेषयति॥३२॥ ॥

नेतिनेति॥ निःश्रुतिर्बाधयोग्यं बाधित्वा बाधितुमशक्यमवशेषयतीत्युक्तं॥ तत्र कीदृशं बाधितुं शक्यं कीदृशमशक्यमिति विवक्षायां तदुभयं वि
भज्य दर्शयति॥ इदंरूपंत्विति॥ इदमित्येवंरूपं दृश्यत्वेनानुभूयमानं रूपं स्वरूपं यस्य देहादेस्तदिदंरूपं तुशब्दो ऽवधारणे॥ यद्यावदिति॥
यद्यावदिति पदद्वयं सर्वदृश्योपसंग्रहार्थं॥ एवं च समियदृश्यं तदखिलं त्यक्तुं शक्यमेवेत्यर्थः॥ संपद्यते अनिदंरूपः प्रत्यक्त्वेनेदंतया अ
वगंतुमयोग्यः साक्षी अशक्यस्त्यक्तुमित्यर्थः॥ हीति निपातेन प्रसिद्धिर्द्योत्यते न ह्यनेन त्यक्तुः स्वरूपत्वेन त्यागायोग्यतां सूचयति॥ फलितमाह॥
स आत्मेति॥ यो बाधरहितः साक्षी स एवात्मा॥ नाहंकारादिदृश्य इत्यर्थः॥३३॥ भवत्वात्मनोऽबाध्यत्वं प्रकृते किमायातमित्यत आह॥ सिद्धं
ब्रह्मणीति॥ ब्रह्मणि ब्रह्मलक्षणे यत्सत्यत्वमभिहितं तदात्मनि सिद्धं॥ भवतु सत्यत्वं॥ ज्ञानत्वं कथमित्याकांक्षायां तत्पूर्वमेवोपपादित
मित्याह॥ ज्ञानत्वंत्विति॥ स्वयमेवानुभूतित्वादित्यत्र नानुभाव्यतेत्यादिवचनैः ज्ञानरूपत्वं पूर्वमेव सम्यगभिहितमित्यर्थः॥३४॥ ननु स

इदंरूपं तु यद्यावत्तत्त्यक्तुं शक्यतेऽखिलं॥ अशक्यो ह्यनिदंरूपः स आत्मा बाधवर्जितः॥३३॥ सिद्धं ब्रह्मणि सत्यत्वं ज्ञानत्वं तु पु
रोदितं॥ स्वयमेवानुभूतित्वादित्यादिवचनैः स्फुटं॥३४॥ न व्यापित्वाद्देशतोंऽतो नित्यत्वान्नापि कालतः॥ न वस्तुतोऽपि
सर्वात्म्यादानंत्यं ब्रह्मणि त्रिधा॥३५॥ देशकालान्यवस्तूनां कल्पितत्वाच्च मायया॥ न देशादिकृतोंऽतोऽस्ति ब्रह्मानंत्यं स्फुटं ततः॥३६॥

त्यत्वज्ञानत्वयोरात्मनि सिद्धत्वेप्यानंत्यं न घटते॥ ब्रह्मण्यपि तस्यासिद्धेरित्याशंक्य ब्रह्मणि तावत्तत्साधयति॥ न व्यापीति॥ नित्यं विभुं सर्वग
तं सुसूक्ष्मं॥ आकाशवत्सर्वगतश्च नित्यः॥ नित्यो नित्यानां चेतनश्चेतनानां॥ इदं सर्वं यदयमात्मा सर्वं त्येनद्धृत्स॥ ब्रह्मैवेदं सर्वं॥ इत्यादिश्रु
तिषु व्यापित्वनित्यत्वसर्वात्मत्वप्रतिपादनात्॥ ब्रह्मणस्त्रिविधमप्यानंत्यं देशकालवस्तुकृतपरिच्छेदराहित्यमभ्युपेतव्यमित्यर्थः॥३५॥
न केवलं श्रुतिः किंतु युक्तिरपीत्याह॥ देशकालेति॥ परिच्छेदहेतूनां देशकालान्यवस्तूनां मायया कल्पितत्वाद्गंधर्वनगरादिभिः॥ गगनस्ये
व न देशादिभिः कृतः पारमार्थिकः परिच्छेदो ब्रह्मणि संभवति यतः॥ अतो ब्रह्मण्यानंत्यं ताद्वस्तुकमेव॥ तदेतत्सत्यं आत्मा ब्रह्मैव ब्रह्मात्मैवात्र ह्येव
न निर्विचिकित्स्यमित्यासस्मात्मैवतत्सिंदो देवा ब्रह्मणेति॥ अयमात्मा ब्रह्मेत्यादिश्रुतिभिरात्मनो ब्रह्माभेदप्रतिपादनात्तस्याप्यानंत्यं सिद्धमि
तितात्पर्यार्थः॥३६॥ ४

ननु जडस्य जगतो ब्रह्मण्यारोपितत्वेन ब्रह्मणः परिच्छेदकत्वाभावेपि चेतनयोर्जीवेश्वरयोस्तदसंभवात्तत्कृतपरिच्छेदवत्त्वेनानंत्यं ब्रह्मणो
न संगच्छत इत्याशंक्य तयोरप्यौपाधिकरूपत्वेन पारमार्थिकत्वाभावात्तयोरपि वास्तवपरिच्छेदहेतुत्वमित्यभिप्रायेणाह॥ सत्यं ज्ञानमि
ति॥ यत्सत्यादिरूपं ब्रह्म तद्वस्तु तद्वपारमार्थिकं॥ तस्य ब्रह्मणो यज्जीवप्रसिद्धमीश्वरत्वं तद्वक्ष्यमाणोपाधिद्वयेन कल्पितं अतः कल्पितत्वा
देव जडवज्जीवेश्वरयोरपि तत्परिच्छेदकत्वाभाव इति भावः॥३७॥ किं तदुपाधिद्वयमित्याकांक्षायां तदुभयं क्रमेणादिदर्शयिषुरादावी
श्वरोपाधिभूतां शक्तिं निरूपयति॥ शक्तिरिति॥ ऐश्वरी ईश्वरोपाधितया ईश्वरसंबंधिनी काचित्सदसत्त्वादिभिरूपैर्निर्वक्तुमशक्यास
र्ववस्तुनियामिका सर्वेषामंतर्यामिब्राह्मणोक्तानां पृथिव्यादीनां नियम्यवस्तूनां नियमकर्त्री शक्तिरस्ति॥ सा कुत्र तिष्ठति कुतो वा

सत्यं ज्ञानमनंतं यद्ब्रह्म तद्वस्तु तस्य तत्॥ ईश्वरत्वं च जीवत्वमुपाधिद्वयकल्पितं॥३७॥
शक्तिरस्त्यैश्वरी काचित्सर्ववस्तुनियामिका॥ आनंदमयमारभ्य गूढा सर्वेषु वस्तुषु॥३८॥
वस्तुधर्मा नियम्येरन् शक्त्या नैव यदा तदा॥ अन्योन्यधर्मसांकर्यात् विप्लवेत जगत्खलु॥३९॥
चिच्छायावेशतः शक्तिश्चेतनेव विभाति सा॥ तच्छक्त्युपाधिसंयोगाद्ब्रह्मैवेश्वरतां व्रजेत्॥४०॥

नोपलभ्यत इत्याशंक्याह॥ आनंदमयमिति॥ आनंदमयादिषु ब्रह्मांडांतेषु सर्वेषु वस्तुषु गूढा वर्तते॥ अतो नोपलभ्यत इत्यर्थः॥३८॥
नियमेनानुपलभ्यमानायास्तस्या असत्त्वमेव किं न स्यादित्याशंक्य जगन्नियमनान्यथानुपपत्त्या साऽवश्यमभ्युपेयेत्याह॥ वस्तुधर्मेति
॥ वस्तूनां पृथिव्यादीनां काठिन्यद्रवत्वादयो यदा शक्त्या न व्यवस्थाप्यंते तदा तेषां धर्माणां सांकर्याद्विमिश्रणेनैकत्रावस्थानाज्जगद्विप्लवेत॥ अ
नियतव्यवहारविषयतां प्राप्नुयादित्यर्थः॥ खल्विति प्रसिद्धिर्द्योत्यते॥३९॥ ननु जडाया अस्या जगन्नियामकत्वं न युज्यत इत्याशंक्याह॥
चिच्छायेति॥ सा शक्तिश्चिच्छायावेशतश्चिदाभासप्रवेशनाच्चेतनेव चेतनवत्समापन्नेव विभाति प्रतीयते॥ अतोऽस्या नियामकत्वं घटत इति भावः॥
अस्तु तस्तु तेन किमायातमित्यत आह॥ तच्छक्तीति॥ सा चासौ शक्तिश्चेति कर्मधारयः॥ सैवोपाधिस्तेन संयोगः संबंधः॥ तस्माद्ब्रह्मैव सत्यादि
लक्षणमीश्वरतां सर्वज्ञत्वादिधर्मयोगितां व्रजेत्प्राप्नुयात्॥४०॥

59/1938

जीवत्वोपाधिभूतानां कोशानां प्रागेवाभिहितत्वात्तन्निमित्तकं जीवत्वमिदानीमाह ॥ कोशेति ॥ कोशएवोपाधिः कोशोपाधिस्तद्विवक्षायां प्र
योक्तोच्यमानायां क्रियमाणायां ब्रह्मैव सत्यादिलक्षणमेव जीवतां जीवव्यवहारविषयतां गच्छति ॥ नन्वेकस्यैव विरुद्धधर्मद्वययोगित्वं युगप
त्क्वापि दृष्टचरमित्याशंक्याह ॥ पितेति यथैक एव देवदत्ताख्यो देवपुत्रं प्रति पिता भवति पौत्रं प्रति तु पितामहः ॥ एवं ब्रह्मापि कोशो
पाधिविवक्षायां जीवो भवति ॥ ईशत्वोपाधिविवक्षायां ईश्वरश्च भवतीत्यर्थः ॥४१॥ वस्तुतस्तु जीवत्वमीश्वरत्वं वा ब्रह्मणो नास्तीत्येतत्स
दृष्टांतमाह ॥ पुत्रादेरिति ॥४२॥ इदानीमुक्तज्ञानस्य फलमाह ॥ य एवमिति ॥ यः साधनचतुष्टयसंपन्न एवमुक्तेन प्रकारेण पंच

कोशोपाधिविवक्षायां याति ब्रह्मैव जीवताम् ॥ पिता पितामहश्चैकः पुत्रपौत्रौ यथा प्रति ॥४१॥
पुत्रादेरविवक्षायां न पिता न पितामहः ॥ तद्वन्नेशो नापि जीवस्तत्कोशाविवक्षया ॥४२॥ य ए
वं ब्रह्म वेदैष ब्रह्मैव भवति स्वयं ॥ ब्रह्मणो नास्ति जन्मातः पुनरेष न जायते ॥४३॥ इति पंचको॰ स:

कोशविवेकपुरःसरं ब्रह्म प्रत्यगभिन्नं सत्यादिलक्षणं वेद साक्षात्करोति ॥ एष स्वयं ब्रह्मैव भवति ॥ स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मै
व भवति ॥ ब्रह्मविदाप्नोति परमित्यादिश्रुतिभ्यः ॥ ततोपि किमित्यत आह ॥ ब्रह्मण इति ॥ न जायते म्रियते वा विपश्चिदित्यादिश्रुतेः
ब्रह्मणस्तावज्जन्म नास्ति ॥ अत एव विद्वानपि स्वात्मनस्तद्रूपत्वावगमान्नैव जायते ॥ न स पुनरावर्तत इति श्रुतेरिति ॥४३॥
इति पंचकोशविवेकव्याख्या समाप्तः ॥ ॥७॥ ॥७॥ ॥श्रीकृष्णार्पणमस्तु॥ ७॥ ॥ ५

41/1938

॥ अथ द्वैतविवेकप्रारंभः ॥ प्रक॰ ४

श्रीगणेशायनमः॥नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥मयाद्वैतविवेकस्यक्रियतेपदयोजना॥१॥चिकीर्षितस्यग्रंथस्यनिःप्रत्यूहपरिपूरणाय।अभिलषितदेवतानत्वानुस्मरणलक्षणंमंगलमाचरन् अस्यवेदांतप्रकरणत्वाच्छास्त्रीयमेवानुबंधचतुष्टयंसिद्धवत्कृत्यग्रंथारंभंप्रतिजानीते॥ईश्वरेणेति॥ईश्वरेणकारणोपाधिकेनांतर्यामिणाजीवेनाविकार्योपाधिकेनाहंप्रत्ययिनान्वसृष्टमुत्पादितंद्वैतंजगद्विविच्यते विभज्यप्रदर्श्यते॥अस्यद्वैतविवेचनस्यकाकदंतपरीक्षावन्निःप्रयोजनत्वंवारयति विवेकेसतीति॥विवेकेजीवेश्वरसृष्टयोर्द्वैतयोर्विवेचनेकृतेसतितज्जीवेनपूर्वोक्तेनहेयःपरित्याज्योबंधहेतुर्द्वैतंस्फुटीभवेत्स्पष्टतांगच्छेदेतावज्जीवेनहेयमितिनिश्चीयतइत्यर्थः॥१॥ननुसृष्टद्वाराजीवानामेवजगद्धेतुत्वंवादिनोवर्णयंति॥अतःकथमीश्वरसृष्टत्वमुच्यतेजगतइत्याशंक्यबह्वृक्श्रुतिविरोधान्नेदंवाद्यमुत्थाप

ईश्वरेणापिजीवेनसृष्टंद्वैतंविविच्यते॥विवेकेसतिजीवेनहेयोबंधःस्फुटीभवेत्॥१॥मायांतुप्रकृतिंविद्यान्मायि
नंतुमहेश्वरं॥समायीसृजतीत्याहुःश्वेताश्वतरशाखिनः॥२॥आत्मावाइदमग्रेऽभूत्सईक्षतसृजाइति॥संकल्पेना
सृजल्लोकान्सएतानितिबह्वृचाः॥३॥खंवाय्वग्निजलोर्व्योषध्यन्नदेहाःक्रमादमी॥संभूताब्रह्मणस्तस्मादेतस्मा
दात्मनोऽखिलाः॥४॥बहुस्यामहमेवातःप्रजायेयेतिकामतः॥तपस्तप्त्वाऽसृजत्सर्वंजगदित्याहतित्तिरिः॥५॥

यितुमहेतिस्यभिप्रेत्यश्वेताश्वतरवाक्यंतावदर्थतःपठति॥माययेति॥मायोपाधिकमीश्वरंप्रस्तुत्यास्मान्मायीसृजतेविश्वमेतदितितस्ये श्वरस्यजगत्स्रष्टृत्वंश्वेताश्वतरशाखिनोवर्णयंतीत्यर्थः॥२॥ऐतरेयोपनिषद्वाक्यमर्थतोनुसंक्रामति॥आत्मेति॥आत्मावाइदमेकएवाग्र आसीन्नान्यत्किंचनमिषत्सईक्षतलोकान्नुसृजाइति॥सइमाँल्लोकानसृजतेत्यनेनवाक्येनाद्वितीयस्यपरमात्मनएवजगत्स्रष्टृत्वंबह्वृ चाऋक्शाखाध्यायिनआहुरित्यर्थः॥३॥ईश्वरस्यजगत्कारणत्वेतैत्तिरीयश्रुतिरपि प्रमाणमित्यभिप्रेत्यतद्वाक्यमर्थतःपठति॥खंवाय्वि ति॥४॥बहुस्यामितिसत्यंज्ञानमनंतंब्रह्मेत्युपक्रम्यतस्माद्वाएतस्मादात्मनआकाशःसंभूतइत्यादिनाऽन्नात्पुरुषइत्यंतेनवाक्येनगुहाहि तत्वेनप्रत्यगभिन्नात्ब्रह्मणआकाशादिदेहपर्यंतंजगदुत्पन्नमित्यभिधायोपरिष्टादपिसोकामयतबहुस्यांप्रजायेयेति सतपोतप्यतसतपस्तप्त्वाइदंसर्वमसृजतयदिदंकिंचेतिवाक्येनतस्यैवब्रह्मणोजगत्स्रष्टृत्वंतैत्तिरीयशाखाध्यायिनोवदंतीत्यर्थः १

ग्रं॰५

63/1938

छंदोग्येपिब्रह्मणएवजगत्स्रष्टृत्वंश्रुतमित्याह॥इदमग्रइतिसदेवसोम्येदमग्रआसीदेकमेवाद्वितीयमितिसद्रूपेणाद्वितीयंब्रह्मोपक्र म्य॥तदैक्षतबहुस्यांप्रजायेयेति॥तत्तेजोसृजतेत्यादिनातस्यैवेक्षणपूर्वकंतेजोबन्नस्रष्टृत्वमभिधायतेषांखल्वेषांभूतानांत्री ण्येवबीजानिभवंत्यंडजंजीवजमुद्भिज्जमित्यादिनाअंडजादिशरीरनिर्मातृत्वंचसामगावर्णयंतीत्यर्थः॥६॥मुंडकोपनिषद्यपित द्वेतत्सत्यंयथासुदीप्तात्पावकाद्विस्फुलिंगाःसहस्रशःप्रभवंतेसरूपाःतथाक्षराद्विविधाःसोम्यभावाःप्रजायंतेतत्रचैवापियंतीति अक्षरशब्दवाच्यात्ब्रह्मणोजगदुत्पत्तिःश्रूयतइत्याह॥विस्फुलिंगेति॥७॥एवंबृहदारण्यकेप्यव्याकृतशब्दवाच्यात्ब्रह्मणोना मरूपात्मकंजगदुत्पन्नमितिश्रुतमित्याह॥जगदव्याकृतमितितद्धेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेवव्याक्रियतासौनामा

इदमग्रेसदेवासीद्बहुत्वायतदैक्षत॥तेजोबन्नांडजादीनिससर्जेतिचसामगाः॥६॥विस्फुलिंगायथावह्नेर्जायंते
क्षरतस्तथा॥विविधाश्चिज्जडाभावाइत्याथर्वणिकीश्रुतिः॥७॥जगदव्याकृतंपूर्वमासीद्व्याक्रियताधुना॥दृश्या
भ्यांनामरूपाभ्यांविराडादिषुतेस्फुटे॥८॥विराण्मनुर्नरागावःखराश्वाजावयस्तथा॥पिपीलिकावधिद्वंद्वमिति
वाजसनेयिनः॥९॥कृत्वारूपांतरंजैवंदेहेप्राविशदीश्वरः॥इतिताःश्रुतयःप्राहुर्जीवत्वंप्राणधारणात्॥१०॥

यमिदंरूपमितिवाक्येनसृष्टेःपुराऽस्पष्टनामरूपत्वेनाव्याकृतशब्दवाच्यमायोपाधिकात्ब्रह्मणोनामरूपस्पष्टीकरणलक्षणासृष्टि रुक्तातयोर्नामरूपयोर्विराडादिषुस्थूलकार्येषुस्पष्टताच॥८॥तदिदमप्येतर्हिनामरूपाभ्यामेवव्याक्रियतेअसौनामायमिदंरूपमिति वाक्येनाभिहिताःतेचविराडादयःआत्मैवेदमग्रआसीत्पुरुषविधइत्यादिना॥एवमेवयदिदंकिंचमिथुनमापिपीलिकाभ्यस्तत्सर्वम सृजतेत्यंतेनदर्शिताइत्यर्थः॥९॥उदाहृताभिःश्रुतिभिर्द्वैतस्रष्टत्वमभिधानानंतरंब्रह्मणोजीवरूपेणतत्रप्रवेशोप्यभिहितइत्याह॥कृत्वेति॥ श्रुतयःजैवंजीवसंबंधिरूपांतरंआविष्क्रियाद्ब्रह्मणोविलक्षणंविकारिरूपमित्यर्थः॥देहेदेहजातेजीवत्वंकुतइत्यत आह॥जीवत्वमितिप्राणाद नांस्वामित्वेनप्रेरकत्वंप्राणधारणंतस्मात् १०

जैवं रूपं कृत्वा प्राविशदित्युक्तं॥ किं तदित्यपेक्षायामाह॥ चैतन्यमिति॥ अधिष्ठानं लिंगदेहकल्पनाधारभूतं यच्चैतन्यमस्ति यश्च तत्र कल्पितो लिंगदेहो या पुनः चिच्छाया लिंगदेहस्था यश्च तस्मिन्‌ लिंगदेहे विद्यमानश्चिदाभासस्तत्संघातस्तेषां त्रयाणां समूहो जीवशब्देनोच्यत इत्यर्थः॥११॥ नन्वीश्वरस्य जीवरूपेण प्रविष्टत्वेतस्याज्ञत्वदुःखित्वादिविरोधिधर्मवत्त्वं कुत इत्याशंक्याह॥ माहेश्वरीति॥ माहेश्वरी मायिनं तु महेश्वरमिति श्रुत्युक्ता महेश्वरसंबंधिनी महेश्वरमाया यास्ति॥ तस्या निर्माणशक्तिवज्जगत्सर्जनसामर्थ्यवन्मोहशक्तिश्च मोहनसामर्थ्यमप्यस्ति॥ तदेतज्जडं मोहात्मकमिति श्रुतेः॥ ततः किमित्यत आह॥ तं जीवमिति॥ असौ मोहनशक्तिस्तं पूर्वोक्तं जीवं मोहयति॥ चिदानंदादिस्वरूपज्ञानरहितं करोति॥१२॥ ततोऽपि किमित्यत आह॥ मोहादिति॥ मोहात्पूर्वोक्तात्‌ अनीशतामिष्टानि

चैतन्यं यदधिष्ठानं लिंगदेहश्च यः पुनः॥ चिच्छाया लिंगदेहस्था तत्संघो जीव उच्यते॥११॥ माहेश्वरी तु या माया तस्या निर्माणशक्तिवत्॥ विद्यते मोहशक्तिश्च तं जीवं मोहयत्यसौ॥१२॥ मोहादनीशतां प्राप्य मग्नो वपुषि शोचति॥ ईशसृष्टमिदं द्वैतं सर्वमुक्तं समासतः॥१३॥ सप्तान्नब्राह्मणे द्वैतं जीवसृष्टं प्रपंचितं॥ अन्नानि सप्त ज्ञानेन कर्मणाजनयत्पिता॥१४॥ मर्त्यान्नमेकं देवान्ने द्वे पश्वन्नं चतुर्थकं॥ अन्नत्रितयमात्मार्थमन्नानां विनियोजनं॥१५॥

ष्टप्राप्तिपरिहारयोरसमर्थत्वं प्राप्य वपुषि मग्नः शरीरे तादात्म्याभिमानं गतः शोचति दुःखित्वाद्यभिमानं करोति॥ समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमान इति श्रुतेरित्यर्थः॥ वक्ष्यमाणसांकर्यपरिहाराय वृत्तं निगमयति॥ ईशसृष्टमिति॥ समासतः संक्षेपेणेत्यर्थः॥१३॥ ननु जीवस्य द्वैतस्रष्टृत्वे किं मानमित्याशंक्याह॥ सप्तान्नेति॥ कथं तत्र प्रपंचितमित्याशंक्य सप्तान्नशब्दवाच्यद्वैतस्रष्टृत्वप्रतिपादकं यत्सप्तान्नानि मेधया तपसाजनयत्पितेति वाक्यमर्थतः संगृह्णाति॥ अन्नानीति॥ पिता स्वाहरण्हहाराज्जगदुत्पादनेन सर्वलोकपालको जीव इत्यर्थः॥१४॥ नन्वन्नसप्तकसर्जनं किमर्थमित्याशंक्य तद्विनियोगोऽप्येकमस्य साधारणं द्वे देवानभाजयत्त्रीण्यात्मनेऽकुरुत पशुभ्य एकं प्रायच्छदिति वाक्येनोक्त इत्याह॥ मर्त्यान्नमिति॥ विनियोजनमुक्तमिति शेषः॥१५॥

65/1938

तानि च सप्तान्नान्येकमस्य साधारणमितीदमेवास्यान्नसाधारणमन्नं यदिदमद्यत इत्यादिना अयमात्मा वाङ्मयो मनोमयः प्राणमय इत्यंतेन वाक्यसंदर्भेण षड्न्नकंडिकाद्वयरूपेण दर्शितानीत्याह॥ व्रीह्यादिकमिति॥१६॥ ननूक्तसप्तान्नानां जगदंतःपातित्वेनेश्वरनिर्मितत्वाभिधानमेव युक्तं न जीवनिर्मितत्वाभिधानं युक्तमित्याशंक्य तत्स्वरूपस्येश्वरनिर्मितत्वेऽपि भोग्यत्वाकारस्य जीवनिर्मितत्वान्मैवमित्याह॥ ईशेनेति॥ ज्ञानकर्मभ्यां॥ ज्ञानं विहितं प्रतिषिद्धं च देवतापरयोषिदादिविषयं ध्यानं॥ कर्म च विहितं यज्ञादिरूपं॥ प्रतिषिद्धं हिंसादिरूपं ताभ्यामित्यर्थः॥ तदन्नतां तेषां व्रीह्यादिसप्तानां स्वभोगोपकरणत्वमित्यर्थः॥१७॥ किं तु कं भवतीति तत्राह॥ ईशकार्यमिति॥ जगत्सप्तान्नत्वेनोक्तं व्रीह्यादिरूपमीशकार्यत्वेन जीवभोग्यत्वेन च द्वाभ्यां संबद्धमित्यर्थः॥ एकस्योभयसंबंधे दृष्टांतमाह॥ पितृजन्येति॥

व्रीह्यादिकं दर्शपूर्णमासौ क्षीरं तथा मनः॥ वाक्प्राणश्चेति सप्तत्वमन्नानामवगम्यतां॥१६॥ ईशेन यद्यप्येतानि निर्मितानि स्वरूपतः॥ तथापि ज्ञानकर्मभ्यां जीवोऽकार्षीत्तदन्नतां॥१७॥ ईशकार्यं जीवभोग्यं जगद्द्वाभ्यां समन्वितं॥ पितृजन्या भर्तृभोग्या यथा योषित्तथेष्यतां॥१८॥ मायावृत्त्यात्मको हीशसंकल्पः साधनं जनौ॥ मनोवृत्त्यात्मको जीवसंकल्पो भोगसाधनं॥१९॥ ईशनिर्मितमण्यादौ वस्तुन्येकविधे स्थिते॥ भोक्तृधीवृत्तिनानात्वात्तद्भोगो बहुधेष्यते॥२०॥ हृष्यत्येको मणिं लब्ध्वा क्रुद्ध्यत्यन्योऽप्यलाभतः॥ पश्यत्येव विरक्तोऽत्र न हृष्यति न कुप्यति॥२१॥ प्रियोऽप्रिय उपेक्ष्यश्चेत्याकारा मणिगास्त्रयः॥ सृष्टा जीवैरीशसृष्टं रूपं साधारणं त्रिषु॥२२॥

१८॥ ईशजीवयोर्जगत्सर्जने किं साधनमित्यत आह मायेति॥१९॥ नन्वीश्वरसृष्टवस्तुस्वरूपव्यतिरिक्तो भोग्यत्वाकार एव नास्ति को जीवेन सृज्यत इत्याशंक्याह॥ ईशनिर्मितमिति॥ एकस्मिन्नेव विषये बहुविधभोगउपलभ्यमानस्तत्प्रयोजकं भोग्याकारभेदं गमयतीत्यर्थः॥२०॥ ननु भातिभोगभेदे भोग्यभेदः कल्प्यत स एव नास्तीत्याशंक्य दृश्यमानत्वान्नैवमित्याह॥ हृष्यतीति॥ एको मण्यर्थी तं लब्ध्वा हृष्यति॥ अन्यस्तथाविधस्तदलाभात्कुप्यति॥ अत्र मणौ विषये विरक्तस्तु तं मणिं पश्यत्येव लाभालाभनिमित्तकौ हर्षक्रोधौ न प्राप्नोतीत्यर्थः॥२१॥ के ते भोगभेदापरका जीवसृष्टा आकारभेदा इत्यत आह॥ प्रियोऽप्रिय इति॥ मणिनिष्ठाः प्रियत्वाप्रियत्वोपेक्ष्यत्वलक्षणा आकारभेदा जीवैः सृष्टास्त्रिष्वपि साधारणमनुस्यूतं यन्मणिरूपं तदीश्वरनिर्मितमित्यर्थः॥२२॥५॥

इत्कंतीव्यस्पाकारभेदमुदाहरणांतरेणस्पष्टयति॥भार्येति॥ननांदाभर्तृभगिनीयातादेवरपत्नीप्रतियोगिधियाभर्तृश्वशुरादिलक्षणंप्रति योगिगोचरयाबुध्यातत्तद्रूपत्वयेत्यर्थः॥२३॥ननुयोषिद्विषयाणिभार्यास्नुषेत्यादिज्ञानान्येवभिन्नान्युपलभ्यंतेनतुतद्विषयभूतायायो षितःस्वरूपभेदोदृश्यतेअतःप्रतियोगिधियायोषिद्भिद्यतइत्युक्तमयुक्तमितिशंकते॥ननुज्ञानानीति॥२४॥ज्ञानवैलक्षण्यस्यज्ञेयवैलक्ष ण्याविनाभूतत्वात्ज्ञेयाकारभेदोंगीकर्तव्यइत्येवाशयेनपरिहरति॥मैवंमांसमयीति॥२५॥ननुज्ञात्यादित्वेबात्यविषयाभावात्ज्ञत्वंव स्तुमनोमयमस्तुप्रमितित्वेनतुतदनुपपन्नंबात्यवस्तुनःसत्त्वादितिशंकते॥भ्रांतित्वमेति॥मानेनप्रत्यक्षादिप्रमाणेनमेयस्येत्यर्थः॥ २६॥प्रमितित्वेबात्यविषयत्वंसंमंगीकरोति॥बाढमिति॥कथंतर्हितद्विषयस्यमनोमयत्वमुच्यतइत्यतआह॥मानेत्विति॥मानेविष

भार्यास्नुषाननंदायातामातेत्यनेकधा॥प्रतियोगिधियायोषिद्भिद्यतेनस्वरूपतः॥२३॥ननुज्ञानानिभिद्यंतामाकारस्तुन भिद्यते॥योषिद्वपुष्यतिशयोनदृष्टोजीवनिर्मितः॥२४॥मैवंमांसमयीयोषित्काचिदन्यामनोमयी॥मांसमय्याअभेदेपिभिद्य तेहिमनोमयी॥२५॥भ्रांतिस्वप्नमनोराज्यस्मृतिष्वस्तुमनोमयं॥जाग्रन्मानेनमेयस्यनमनोमयतेतिचेत्॥२६॥बाढमानेतुमे येनयोगात्स्याद्विषयाकृतिः॥भाष्यवार्तिककाराभ्यामयमर्थउदीरितः॥२७॥मूषासिक्तंयथाताम्रंतन्निभंजायतेतथा॥रूपादीन् व्याप्नुवच्चित्तंतन्निभंदृश्यतेध्रुवं॥२८॥व्यंजकोवायथालोकोव्यंजस्याकारतामियात्॥सर्वार्थव्यंजकत्वाद्धीरर्थाकाराप्रदृश्यते॥२९॥

याकृतिस्तुतस्यमेयेनयोगात्संबंधात्स्यात्॥नन्विदंस्वकपोलकल्पितमित्याशंक्याह भाष्यवार्तिककाराभ्यामिति॥२७॥तत्रतावद्भाष्यकार वचनमुदाहरति॥मूषेति॥यथाद्रुतंताम्रंमूषायांसिक्तंसत्तन्निभंजायतेतत्समानाकारंभवति॥तथारूपादीन्विषयान्व्याप्नुवद्विषयी कुर्वच्चित्तंध्रुवमवश्यंतन्निभंदृश्यतउपलभ्यतइत्यर्थः॥२८॥ननुताम्रादेरग्निसंपर्कात्द्रुतस्यमूषानिषिक्तस्यकठिनमूषाभिघा तेनशैत्यापत्तौमूषाकारापत्तावपि॥बुद्धेरमूर्तायास्ताम्रादिविलक्षणायाविषयव्याप्तावपिकुतस्तदाकारापत्तिरित्याशंक्यदृष्टांतां तरमाह॥व्यंजकइति॥यथावाव्यंजकःप्रकाशकआलोकआतपादिर्व्यंज्यस्यप्रकाश्यस्यघटादेराकारतामाकारवत्तामियात्॥प्राप्नुयादेवं धीरपिसर्वार्थस्यव्यंजकत्वात्सकलपदार्थप्रकाशकत्वात्सर्वार्थाकारार्थस्याकारइवाकारोयस्याःसातथाप्रदृश्यतेप्रकर्षेणोपलभ्यतइत्यर्थः॥२९॥ ३

67/1938

इदानींवार्तिककारवचनमाह॥मातुरिति॥मातुःसाधिष्ठानबुद्धिस्थचिदाभासरूपात्प्रमातुर्नाभितिष्पत्तिर्मानस्यसाभासांतःकरणवृत्ति रूपस्याभिनिष्पत्तिरुत्पत्तिर्भवतीतिशेषः॥निष्पन्नमुत्पन्नंतत्मानंमेयंप्रमेयंघटादिरूपमेतिप्राप्नोति॥किंचतन्मानंमेयाभिसंगतंप्रमे येनसंबद्धंसन्मेयाभत्वंमेयस्याभेवाभायस्यतन्मेयाभंतस्यभावस्तत्त्वंमेयसमानाकारतांप्रपद्यतेप्राप्नोतीत्यर्थः॥३०॥भवत्वेवंप्रकृते किमायातमित्यतआह॥सत्येवमिति॥ननुमृन्मयघटस्येवमनोमयघटस्यतेनैवसमनसाग्रहीतुमशक्यत्वाद्ग्राहकांतराभावाच्चासिद्धिरेवे त्याशंक्याहग्राहकांतराभावोऽसिद्धइत्याहमन्मयइति॥यथामृन्मयोमानमेयस्तथाधीमयःसाक्षिभास्यइत्यर्थः॥३१॥भवत्वेवंद्विविधं द्वैतमत्रकस्यहेयत्वंकस्यवानेतिनज्ञायतइत्याशंक्यजीवसृष्टस्यहेयत्वमभिप्रेत्यतस्यबंधहेतुत्वंदर्शयतिअन्वयेति॥अन्वयेति॥अन्वयव्य

मातुर्मानाभिनिष्पत्तिर्निष्पन्नंमेयमेतितत्॥मेयाभिसंगतंतच्चमेयाभत्वंप्रपद्यते॥३०॥सत्येवंविषयौद्वौस्तोघटौ मृन्मयधीमयौ॥मृन्मयोमानमेयःस्यात्साक्षिभास्यस्तुधीमयः॥३१॥अन्वयव्यतिरेकाभ्यांधीमयोजीवबंधकृत्॥स त्यस्मिन्सुखदुःखेस्तस्मिन्नसतिनद्वयं॥३२॥असत्यपिचबात्यार्थेस्वप्नादौबध्यतेनरः॥समाधिसुप्तिमूर्छासुसत्य प्यस्मिन्नबध्यते॥३३॥दूरदेशंगतेपुत्रेजीवत्येवात्रतत्पिता॥विप्रलंभकवाक्येनमृतंमत्वाप्ररोदिति॥३४॥ ५॥

तिरेकावेवदर्शयति॥सत्यस्मिन्निति॥अस्मिन्जीवसृष्टेमानसप्रपंचेसतिविद्यमानेसुखदुःखेभवतः॥असतितस्मिन्नद्वयं॥सुखंदुः खंचनास्तीत्यर्थः॥३२॥ननुउक्तावन्वयव्यतिरेकौबात्यार्थविषयौकिन्नस्यातामित्यतआह॥असतीति॥नरोमनुष्यःएतदुपलक्षणमन्ये षामपि॥स्वप्नादौस्वप्नमनोराज्यादिकालेबात्यार्थेनकूलेबात्यार्थेनुकूलेयोषिदादौप्रतिकूलेव्याघ्रादौचपारमार्थिकेविषयेऽसत्यपिअविद्यमाने पिबध्यतेसुखदुःखाभ्यांयुज्यते॥समाध्यादिषुतुअस्मिन्बात्यार्थेसत्यपिनबध्यते॥नसुखदुःखादिभाग्भवति॥अतस्तद्विषयावन्वयव्य तिरेकौनस्तइत्यर्थः॥३३॥मनोमयप्रपंचस्यबंधकत्वेनान्वयव्यतिरेकावुदाहरणेनस्पष्टयतिसार्धेनदूरदेशमिति॥मृतेपीति॥देशांतरंप्राप्तेपु त्रेतत्रजीवत्येवसत्यत्रस्वगृहेस्थितस्तस्यपिता॥विप्रलंभकस्यमिथ्यावचनैःपरवंचकस्यत्वत्पुत्रोमृतइत्येवंरूपेणवाक्येन॥स्वपुत्रंमृतंकल्पयित्वाप्रके

तस्मिन्नेव पुत्रे तत्रैव मृतेपि॥ तन्मृतिवार्तायामश्रुतायां स त्वां न रोदनं करोतीति फलितमाह॥ अत इति॥ ३५॥ धीमयस्यैव जगतो बंधहेतुत्वांगीकारे बाह्यार्थापलापात् सिद्धांतापातः स्यादिति शंकते विज्ञानवाद इति॥ परिहरति॥ नेति॥ यद्यपि मानसप्रपंचस्यैव बंधहेतुत्वं॥ तथापि तद्धेतुत्वेन बाह्यार्थस्यापि स्वीकारान्न विज्ञानवादप्रसंग इति भावः॥३६॥ ननु तद्धाकारसमर्पणाय बाह्यपदार्थोपेक्षणीयः पूर्वपूर्वमानसप्रपंचसंस्कारस्यैवोत्तरोत्तरमानसप्रपंचहेतुत्वोपपत्तेरित्याशंक्य प्रौढवादेन तदंगीकरोति॥ वैयर्थ्यमिति॥ तर्हि विज्ञानवादात्को भेद इत्यत आह॥ बाह्यमिति॥ विज्ञानवादिनो बाह्यार्थमेवापलपंति॥ वयं न तथेत्ययमेव भेद इत्यर्थः॥ प्रयोजनशून्यत्वादभ्युपगमोप्ययुक्त एवेत्याशंक्याह प्रयोजनमिति मानाधीना वस्तुसिद्धिर्न प्रयोजनाधीना॥ मानसिद्धस्य प्रयोजनशून्यत्वमात्रेण सतस्य लौकिकैर्वादिभिर्वानभ्युपगमादिति

मृतेपि तस्मिन्वार्तायामश्रुतायां न रोदिति॥ अतः सर्वस्य जीवस्य बंधकृन्मानसं जगत्॥ ३५॥ विज्ञानवादो बाह्यार्थवैयर्थ्यात्स्यादिहेति चेत्॥ न हृद्याकारमाधातुं बाह्यस्यापेक्षितत्वतः॥ ३६॥ वैयर्थ्यमस्तु वा बाह्यं न वारयितुमीश्महे॥ प्रयोजनमपेक्षंते न मानानीति हि स्थितिः॥ ३७॥ बंधश्चेन्मानसं द्वैतं तन्निरोधेन शाम्यति॥ अभ्यसेद्योगमेवातो ब्रह्मज्ञानेन किं वद॥ ३८॥ तात्कालिकद्वैतशांतावप्यागामिजनिक्षयः॥ ब्रह्मज्ञानं विना न स्यादिति वेदांतडिंडिमः॥ ३९॥ अनिवृत्तेपीशसृष्टे द्वैते तस्य मृषात्मतां॥ बुध्वा द्वयं ब्रह्म बोद्धुं शक्यं वस्त्वैक्यवादिनः॥ ४०॥

भावः॥ ३७॥ ननु मानसस्यैव द्वैतस्य बंधहेतुत्वेन तस्य मनोनिरोधात्मकयोगेनैव निवृत्तिसंभवाद्ब्रह्मज्ञानस्य बंधनिवर्तकत्वाभ्युपगमो विरुध्येतेति शंकते बंधश्चेदिति॥ ३८॥ योगेन द्वैतोपशमस्तात्कालिक उच्यते उत आत्यंतिको वेति विकल्प्य आद्यमंगीकृत्य द्वितीयं दूषयति॥ तात्कालिकेति॥ ज्ञात्वा देवं मुच्यते सर्वपाशैः॥ ज्ञात्वा शिवं शांतिमत्यंतमेति॥ यदा चर्मवदाकाशं वेष्टयिष्यंति मानवाः॥ तदा देवमविज्ञाय दुःखस्यांतो भविष्यतीत्यादिश्रुतिषु न्यपरातिरेकाभ्यां ब्रह्मज्ञानादेव बंधनिवृत्तिरभिधीयत इति भावः॥ ३९॥ ननु बाह्यद्वैतनिवारणमंतरेणाद्वितीयब्रह्मज्ञानमेव नोदेतीत्याशंक्य तन्निवारणाभावेपि तस्य मिथ्यात्वज्ञानादेव पारमार्थिकमद्वैतं बोद्धुं शक्यमित्याह॥ अनिवृत्तेपीति॥ ४०॥

नद्वैतं मृषात्वज्ञानमद्वैतज्ञानप्रयोजकमपि तु तन्निवारणमेवेत्यभिनिविशमानं प्रत्याह॥ प्रलय इति॥ प्रलयेप्रलयावस्थायां तन्निवृत्तौ तु तस्य द्वैतस्य निवृत्तौ सत्यां तु॥ विरोधिद्वैताभानेप्यद्वैतज्ञानविरोधित्वेन भवदभिमतस्य द्वैतनिवारणे सत्यपि गुरुशास्त्राद्यभावतः गुरुशास्त्रादिरूपस्य ज्ञानसाधनस्याभावाद्धेतोरद्वयं वस्तु बोद्धुं शक्यं न भवत्यतस्तन्निवारणमप्रयोजकमिति भावः॥ ४१॥ तथापि सति द्वैते कथमद्वैतज्ञानमित्याशंक्याह॥ अबाधकमिति॥ ईश्वरनिर्मितद्वैतमबाधकं॥ तन्मृषात्वज्ञाने नैवाद्वैतज्ञानोत्पत्तेरुक्तत्वात्॥ साधकं च गुरुशास्त्रादिरूपस्य तस्य द्वैतस्य ज्ञानसाधनत्वात्॥ आकाशादिरूपं द्वैतमस्माभिरपनेतुमशक्यं चेति हेतोस्तद्द्वैतमास्तां॥ कुतः कारणाद्द्विष्यत इति भावः॥ ४२॥ इदानीं जीवसृष्टद्वैतं विभजते॥ जीवद्वैतं तु शास्त्रीयमशास्त्रीयमिति द्विधेति॥ किं तद्द्वि

प्रलये तन्निवृत्तौ तु गुरुशास्त्राद्यभावतः॥ विरोधिद्वैताभानेपि न शक्यं बोद्धुमद्वयं॥ ४१॥ अबाधकं साधकं च द्वैतमीश्वरनिर्मितं॥ अपनेतुमशक्यं चेत्यास्तां तद्द्विष्यते कुतः॥ ४२॥ जीवद्वैतं तु शास्त्रीयमशास्त्रीयमिति द्विधा॥ उपाददीत शास्त्रीयमातत्वस्यावबोधनात्॥ ४३॥ आत्मब्रह्मविचाराख्यं शास्त्रीयं मानसं जगत्॥ ४३॥ बुद्धे तत्त्वे तस्य हेयमिति श्रुत्यनुशासनं॥ दद्यान्नावसरं कंचित्कामादीनां मनागपि॥ ४४॥ शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः॥ परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत्॥ ४५॥ ग्रंथमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः॥ पलालमिव धान्यार्थी त्यजेद्ग्रंथमशेषतः॥ ४६॥ तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः॥ नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तत्॥ ४७॥

धमपि सदा हेयमेव नेत्याह॥ उपाददीतेति॥ आतत्वस्यावबोधनात्तत्त्वस्यावबोधनपर्यंतमित्यर्थः॥ ४३॥ किं तच्छास्त्रीयं द्वैतमित्याकांक्षायामाह॥ आत्मेति॥ प्रत्यग्रूपस्य ब्रह्मणो विचाराख्यं श्रवणादिकं॥ तच्छास्त्रीयं मानसं जगदित्यर्थः॥ ४३॥ नन्वातत्वस्यावबोधनादित्युक्तमनुपपन्नं॥ आसुप्तेरामृतेः॥ कालं नयेद्वेदांतचिंतयेत्युक्तत्वादित्याशंक्याह॥ बुद्धे तत्त्व इति॥ तत्त्वब्रह्मात्मैकत्वलक्षणं साक्षात्कृते सतीत्यर्थः॥ तर्ह्यासुप्तेरितिवाक्यस्य का गतिरिति चेत्॥ दद्यान्नावसरमिति॥ पूर्वार्धं कामाद्यवसरप्रदानस्यानिषिद्धत्वान्तत्परत्वेनेति वदामः॥ ४४॥ तत्त्वबोधोत्तरकाले तद्धेयत्वप्रतिपादनपराः श्रुतीरुदाहरति॥ ४५॥ ग्रंथमभ्यस्येति॥ ४६॥
तमेव धीर इति॥ ४७॥

69/1938

तमेवैकमिति॥तमेवैकंविजानीतेत्यनेनतमेवैकं जानथ आत्मानमन्यावाचोविमुंचथ अमृतस्यैषसेतुरितिश्रुतिरर्थतः पठिता॥४८॥अ
शास्त्रीयस्यापिद्वैतस्यावांतरभेदमाह॥अशास्त्रीयमिति॥द्विधाद्विविधमपिक्रमेणोदाहरति॥कामेति॥इतरन्मंदमित्यर्थः॥४९॥
किमनयोःशास्त्रीयद्वैतस्येवतत्वबोधात्प्राक्कालमेवहेयत्वंनेत्याह॥उभयमिति॥प्राकूनिवारणंकिमर्थमित्यत आह॥बोधसिद्धय
इतितत्रलिंगमाह॥शमइति॥यतस्तत्वबोधात्प्राकृतयोर्हेयत्वं॥नतएवनित्यानित्यवस्तुविवेकादिवत्तज्ज्ञानसाधनेषुमध्ये॥
शांतःसमाहितइतिपदाभ्यांशांतिसमाधीश्रूयेतेइत्यर्थः॥५०॥ननुतत्वबोधात्प्राक्निवार्यमित्यभिधानादुत्तरकालमस्यस्वीकार्य
तास्यादित्याशंक्याह॥बोधादिति॥उक्तमर्थंव्यतिरेकमुखेनदृढयति॥कामादीति॥कामादिरूपोयःक्लेशःसएवबंधस्तेनयुक्तस्यबद्ध

तमेवैकंविजानीतन्यावाचोविमुंचथ॥यस्तेद्वाज्ञानसीमानइत्याद्याःश्रुतयःस्फुटाः॥४८॥अशास्त्रीयमपिद्वैतंती
व्रंमंदमितिद्विधा॥कामक्रोधादिकंतीव्रंमनोराज्यंतथेतरत्॥४९॥उभयंतत्वबोधात्प्राक्निवार्यंबोधसिद्धये॥शमः
समाहितत्वंचसाधनेषुश्रुतंयतः॥५०॥बोधादूर्ध्वंचतद्धेयंजीवन्मुक्तिप्रसिद्धये॥कामादिक्लेशबंधेनयुक्तस्यनहिमु
क्तता॥५१॥जीवन्मुक्तिरियंमाभूज्जन्माभावेत्वहंकृती॥तर्हिजन्मापितेस्तेववस्वैमात्रात्कृतीभवान्॥५२॥क्षयातिशयदो
षेणस्वर्गोहेयोयदातदा॥स्वयंदोषतमात्मायंकामादिःकिंनहीयते॥५३॥तत्वंबुध्वापिकामादीन्निःशेषंनजहासिचेत्॥
यथेष्टाचरणंतेस्यात्कर्मशास्त्रातिलंघिनः॥५४

स्यमुक्तताजीवन्मुक्तत्वंनहिनास्त्येवेत्यर्थः॥५१॥ननुजन्मादिसंसारादुद्वि
ग्नस्यात्यंतिकपुरुषार्थरूपयाविदेहमुक्त्यैवालंकिमनयाऽपातिकयाजीवन्मुक्त्येतिशंकते॥जीवन्मुक्तिरिति॥ऐहिकभोगानिवृत्तिप्र
याज्जीवन्मुक्तिस्त्यागे॥आमुष्मिकभोगनिवृत्तिप्रयाहिदेहमुक्तिरपित्याज्यास्यादितिप्रतिबंधापरिहरति॥तर्हिजन्मेति॥५२॥प्रतिबंदीमो
चनंशंकते॥क्षयेति॥दोषयुक्तत्वेनस्वर्गादेस्त्याज्यत्वेसकलपुरुषार्थविघातकत्वेनातीवदोषरूपस्यकामादेःसुतरांत्याज्यत्वमित्या
हतदेति॥५३॥ननुवैराग्यादिसंपादनेनास्तुतानर्थहेतोःकामादेस्त्यक्तत्वादैहिकभोगमात्रोपयोगिकामाद्यभ्युपगमेकोदोषइत्याशं
क्याह॥तत्वमिति॥तत्वविदात्माभिमानेनविधिनिषेधशास्त्रमतिक्रम्यकामाद्यधीनतयावर्तमानस्यतवयथेष्टाचरणस्यादित्यर्थः॥५४॥ ५

अस्तुकोदोषइत्याशंक्यतदनिष्टत्वप्रतिपादनपरंसुरेश्वराचार्यवचनमुदाहरति॥बुद्धेति॥बुद्धमद्वैतसतत्वमद्वैतस्वरूपंब्रह्मयेनसबुद्धा
द्वैतसतत्वस्तत्वविन्तस्ययथेष्टाचरणंयदिस्यात्तर्हिअशुचिभक्षणादिकमपिस्यात्तथासतिशुनांतत्वदृशांचैवनकोपिविशेषःस्यादित्यर्थः
॥५५॥एतावतानिकमनिष्टमापादितमित्याशंक्यसोपहासमुत्तरमाह॥बोधादिति॥तत्वज्ञानोदयात्पुराकामक्रोधादिचित्तदोषैस्त्व
कुत्सितोभूः इदानींसर्वलोकनिंदामपिमहत्सइतिकृतार्थोऽहमितिभावः॥५६॥नर्हिकिंकर्तव्यमित्यत आह॥विड्वराहेति॥सर्वलोकनिंदा
हेतुतत्वज्ञानबोधत्वंकामादित्यागाभावत्वेनसर्वात्मनाविड्वराहादिसाम्यंमाकांक्षीःकिंतुकामादिलक्षणसकलमनोदोषहानेनसर्वज्ञ
नैर्देवैरपिपूज्योभवेत्यर्थः॥५७॥तत्यागोपायमाह॥काम्येति॥काम्याःकामनाविषयाःस्त्रगादयआदयोयेषांद्वेषादीनांतेका

बुद्धाद्वैतसतत्वस्ययथेष्टाचरणंयदि॥शुनांतत्वदृशांचैवकोभेदोऽशुचिभक्षणे॥५५॥बोधात्पुरामनोमात्रदोषात्क्लिष्टस्यथाधु
ना॥अशेषलोकनिंदाचेत्यहोतेबोधवैभवं॥५६॥विड्वराहादितुल्यत्वंमाकांक्षीस्तत्वविद्भवान्॥सर्वधीदोषसंत्यागाल्लोकैः
पूज्यस्वदेववत्॥५७॥काम्यादिदोषदृष्ट्याद्याःकामादित्यागहेतवः॥प्रसिद्धामोक्षशास्त्रेषुतानन्विष्यसुखीभव॥५८॥त्यज्यता
मेषकामादिर्मनोराज्येतुकाक्षतिः॥अशेषदोषबीजत्वात्क्षतिर्भगवतेरिता॥५९॥ध्यायतोविषयान्पुंसःसंगस्तेषूपजा
यते॥संगात्संजायतेकामःकामात्क्रोधोभिजायते॥६०॥शक्यंजेतुंमनोराज्यंनिर्विकल्पसमाधिना॥सुसंपादःक्रमात्सोपिस
विकल्पसमाधिना॥६१॥

म्यादयस्तेषांयेदोषाअनित्यत्वसातिशयत्वादयस्तेषांदृष्टिरवलोकनमाद्यंयेषांकोपस्वरूपाद्य
चारादीनांतेतथोक्ताःतेषांकामादित्यागहेतुत्वेप्रमाणमाह॥प्रसिद्धेति॥भवतुनतःकिमायातमित्यत आह॥तानिति॥५८॥ननुका
मादीनामनर्थहेतुत्वात्त्याज्यत्वमस्तुमनोराज्यस्यतुतथात्वाभावात्त्यागोऽनपेक्षितइतिशंकते॥त्यज्यतामिति॥साक्षादनर्थहेतुत्वाभा
वेपिपरंपरयानर्थहेतुत्वात्त्याज्यमेवेत्यभिप्रेत्यपरिहरति॥अशेषेति॥५९॥परंपरयाअनर्थहेतुत्वप्रदर्शनपरंभगवद्वाक्यमुदाहरति
ध्यायतइति॥६०॥तर्हिस्यमनोराज्यस्यकःपरिहारोपाय इत्यत आह॥शक्यमिति॥सोपिकुतःसिध्यतीत्यत आहसुसंपादइति॥६१॥

71/1958

नन्वष्टांगयोगयुक्तस्य तथास्तु तद्रहितस्य का गतिरित्यत आह बुद्धतत्त्वेनेति॥ बुद्धमवगतं तत्त्वं ब्रह्मात्मैक्यलक्षणं येन स बुद्धतत्त्वस्तेन कामक्रोधादिबुद्धि
दोषरहितेन॥ एकांतवासिना विजनदेशनिवासशीलेन पुरुषेण दीर्घं षड्द्वादशादिमात्रोपेतं प्रणवमोंकारमुच्चार्य मनोराज्यं विजीयते निवार्यत
इत्यर्थः॥६२॥ मनोराज्यविजये किं भवतीत्यत आह॥ जित इति॥ यथा मूकः सकलवाग्व्यापाररहितस्तिष्ठत्येवं मनोपि सर्वव्यापाररहितमवतिष्ठत
इत्यर्थः॥ अत्रानिकमनोवस्थानस्य पुरुषार्थत्वे प्रमाणमाह॥ एतदिति॥ एतत्पदमियं दशेत्यर्थः॥६३॥ वासिष्ठश्लोकवाक्यद्वयमुदाहरति॥ दृ
श्यमिति॥ नेह नानास्ति किंचनेत्यादिश्रुत्या द्वितीयब्रह्मातिरिक्तजगदभावज्ञानेन मनसः सकाशाद्दृश्यनिवारणं संपन्नं यदि तर्हि निरतिशयं
मोक्षसुखं निष्पन्नमिति ज्ञानीयादित्यर्थः॥६४॥ विचारितमिति॥ अद्वैतशास्त्रमत्यर्थं विचारितं तथा परस्परं गुरुशिष्यादिसंवादद्वारा चि
रकालं प्रत्यायितं॥ एवं कृत्वा किं स्विन्निश्चितमित्यत आ॥ संत्यक्तेति॥ सम्यक्परित्यक्तकामादिवासनान्मनसस्तूष्णींभावादृते धिकः पुरुषार्थो

बुद्धतत्त्वेन धीदोषशून्येनैकांतवासिना॥ दीर्घं प्रणवमुच्चार्य मनोराज्यं विजीयते॥६२॥ जितेतस्मिन्वृत्तिशून्यं मनस्तिष्ठति मूकवत्॥
एतत्पदं वसिष्ठेन रामाय बहुधेरितं॥६३॥ दृश्यं नास्तीति बोधेन मनसो दृश्यमार्जनं॥ संपन्नं चेत्तदुत्पन्ना परा निर्वाणनिर्वृतिः॥६४॥
विचारितमलं शास्त्रं चिरमुद्ग्राहितं मिथः॥ संत्यक्तवासनान्मौनादृते नास्त्युत्तमं पदं॥६५॥ विक्षिप्यते कदाचिद्धीः कर्मणा भोग
दायिना॥ पुनः समाहिता सा स्यात्तदैवाभ्यासपाटवात्॥६६॥ विक्षेपो यस्य नास्त्यस्य ब्रह्मवित्त्वं न मन्वते॥ ब्रह्मैवायमिति प्राहुर्मुनयः
पारदर्शिनः॥६७॥ दर्शनादर्शने हित्वा स्वयं केवलरूपतः॥ यस्तिष्ठति स तु ब्रह्मन्ब्रह्म न ब्रह्मवित्स्वयम्॥६८॥ जीवन्मुक्तेः
परा काष्ठा जीवद्वैतविवर्जनात्॥ लभ्यतेसावतोत्रेदमीशद्वैताद्विवेचितं॥६९॥ इति द्वैतविवेकः समाप्तः॥ श्रीगजाननाय नमः॥

नास्तीति निश्चितमित्यर्थः॥६५॥ एवं निर्द्वंद्वनिकस्यापि तस्य प्रारब्धकर्मणा विक्षेपे सति तत्सतौ कोपायः क इत्यपेक्षायामाह॥ विक्षिप्य
त इति॥ भोगपदेन प्रारब्धकर्मणा बुद्धिः कदाचिद्विक्षिप्यते चेत्तर्हि सा बुद्धिरभ्यासदार्ढ्यात्तदैव पुनरपि समाहिता स्यादित्यर्थः॥६६॥
सदा चित्तविक्षेपरहितस्य ब्रह्मवित्त्वमप्यौपचारिकमित्याह॥ विक्षेप इति॥ पारदर्शिनो वेदांतपारंगता इत्यर्थः॥६७॥ अत्रापि वसिष्ठवा
क्यमुदाहरति॥ दर्शनादर्शनेति॥ यो ब्रह्मज्ञानामिवज्ञानाभासमिव्यवहारद्वयं परित्यज्य स्वयमद्वितीयचैतन्यमात्ररूपेणावतिष्ठते स स्वयं ब्रह्मैव
न ब्रह्मविदित्यर्थः॥६८॥ सकलं द्वैतविवेचनमुपसंहरति॥ जीवन्मुक्तेरिति॥ असावुक्तप्रकारा जीवन्मुक्तेः परा काष्ठा निरतिशयपर्यवसा
नभूमिः॥ जीवद्वैतस्य मनोमयप्रपंचस्य विवर्जनात्परित्यागाल्लभ्यतेतः कारणादिदं जीवद्वैतमीशद्वैतादीश्वरसृष्टद्वैताद्विवेचितं विविच्य प्रद
र्शितमित्यर्थः॥६९॥ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण रामकृष्णाख्यविदुषा विरचिता द्वैतवि
वेकपदयोजना समाप्ता॥ श्रीरामचंद्रार्पणमस्तु॥ ॥छ॥ ॥छ॥ श्रीअंबिकादेव्यैर्पणमस्तु॥ ॥छ॥ ॥छ॥॥ ६

73/1938

॥अथवाक्यविवेकप्रारंभः॥ प्रक.५

श्रीभगवानेरव्यासायनमः॥ नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ महावाक्यविवेकस्यकुर्वेव्याख्यांसमासतः॥ मुमुक्षोर्मोक्षसाधनब्रह्मा
त्मैकत्वावगतिसिद्ध्येप्रसिद्धानांचतुर्णांमहावाक्यानामर्थंक्रमेणनिरूपयन्परमकृपालुराचार्यआदौतावदैतरेयारण्यकगतेप्रज्ञानंब्रह्मेति
महावाक्येप्रज्ञानशब्दस्यार्थमाह॥येनेति॥येनचक्षुर्द्वारानिर्गतांतःकरणवृत्त्युपहितचैतन्येनेदंदर्शनयोग्यंरूपादिकमीक्षतेपश्यतिपुरु
षस्तथाश्रोत्रद्वारानिर्गतांतःकरणवृत्त्युपहितेनौपाधिकेनयेनगंधजातंजिघ्रति॥येनवागिंद्रियावच्छिन्नेनव्याकरोति॥शब्दजातंव्या
हरति॥येनरसनेंद्रियद्वारानिर्गतांतःकरणवृत्त्युपाधिकेनस्वाद्वस्वादुविजानाति॥अनुक्तसमुच्चयार्थश्चशब्दः॥तथाचोक्तानुक्तैःसकलें
द्रियैरंतःकरणवृत्तिभेदैश्चोपलक्षितंयच्चैतन्यमस्तितदेवात्रप्रज्ञानमित्युच्यतइत्यर्थः॥×शब्दजातंशृणोति॥तथैवघ्राणद्वारानिर्गतां
तःकरणवृत्त्युपहितेनौपाधिकेन× अनेनयेनवापश्यतीत्यादेश्चसर्वाण्येवैतानिप्रज्ञानस्यनामधेयानीत्यंतस्यावांतरवाक्यसंदर्भस्यार्थः

येनेक्षतेशृणोतीदंजिघ्रतिव्याकरोतिच॥स्वाद्वस्वादुविजानातितत्प्रज्ञानमुदीरितं॥१॥चतुर्मुखेंद्रदेवेषुमनुष्याश्वगवादिषु॥चैतन्य
मेकंब्रह्मातःप्रज्ञानंब्रह्ममय्यपि॥२॥परिपूर्णःपरात्मास्मिन्देहेविद्याधिकारिणि॥बुद्धेःसाक्षितयास्थित्वास्फुरन्नहमितीर्यते॥३॥

संक्षिप्यप्रदर्शितः॥१॥एवंप्रज्ञानशब्दस्यार्थमभिधायब्रह्मशब्दार्थमाह॥चतुर्मुखेति॥उत्तमेषुदेवादिषुमध्यमेषुमनुष्यादिषुअधमेषु
श्वगवादिषुदेहधारिष्वाकाशादिषुभूतेषुचजगज्जन्मादिहेतुभूतंयदेकंचैतन्यमस्तितद्ब्रह्मेत्यर्थः॥अनेनचएषब्रह्मैषइंद्रइत्यादेःप्रज्ञाप्रति
ष्ठेत्यंतस्यावांतरवाक्यस्यार्थःसंक्षिप्यदर्शितः॥इत्थंपदार्थमभिधायवाक्यार्थमाह॥अतइति॥यतःसर्वत्रावस्थितंप्रज्ञानंब्रह्मातोमय्यपिस्थि
तंप्रज्ञानंब्रह्मैवप्रज्ञानत्वाविशेषादित्यर्थः॥२॥एवंऋक्शाखागतंमहावाक्यार्थंनिरूप्ययजुःशाखासुमध्येबृहदारण्यकोपनिषद्गतस्या
हंब्रह्मास्मीतिमहावाक्यस्यार्थविवरणायाहंशब्दस्यार्थमाह॥परिपूर्णइति॥परिपूर्णःस्वभावतोदेशकालवस्तुभिरपरिच्छिन्नःपरमा
त्मास्मिन्मायाकल्पितेजगतिविद्याधिकारिणिशमादिसाधनसंपन्नत्वेनविद्यासंपादनयोग्येस्मिन्श्रवणाद्यनुष्ठानवतिदेहेमनुष्यादिशरीरे
बुद्धेःबुद्ध्युपलक्षितस्यसूक्ष्मशरीरस्यसाक्षितयाऽविकारित्वेनावभासकतयास्थित्वावस्थायस्फुरत्प्रकाशमानोहमितीर्यतेलक्षणयाहंपदेनोच्यत 1
इत्यर्थः॥३॥

75/1938

ब्रह्मशब्दार्थमाह॥स्वतइति॥स्वतःपरिपूर्णःस्वभावतोदेशकालाद्यनवच्छिन्नःपूर्वोक्तःपरमात्मात्रास्मिन्महावाक्येब्रह्मशब्देनब्रह्मेत्यनेन
पदेनवर्णितःलक्षणयोक्तइत्यर्थः॥एतद्वाक्यगतेनास्मीतिपदेनपदद्वयसामानाधिकरण्यलभ्यंजीवब्रह्मणोरैक्यंपरामृश्यतइत्याह॥अ
स्मीत्यैक्यपरामर्शइति॥फलितमाह॥तेनेति॥४॥इदानींछांदोग्यश्रुतिगतस्यतत्त्वमसीतिवाक्यस्यार्थप्रकाशनायतत्पदलक्ष्यार्थमाह॥एके
ति॥सदेवसोम्येदमग्रआसीदेकमेवाद्वितीयमितिवाक्येनसृष्टेःपुरास्वगतादिभेदशून्यंनामरूपरहितंयत्सद्वस्तुप्रतिपादितमस्ति॥अ
स्यसद्वस्तुनोधुनापिसृष्ट्युत्तरकालमपितादृक्त्वंविद्यमानत्वात्तदितिपदेनेर्यतेलक्ष्यतइत्यर्थः॥५॥त्वंपदलक्ष्यार्थमाह॥श्रोतु
रिति॥श्रोतुःश्रवणाद्यनुष्ठानेनवाक्यार्थंप्रतिपित्सोर्देहेंद्रियातीतंदेहेंद्रियोपलक्षितस्थूलादिशरीरत्रयसाक्षितयातद्विलक्षणंसद्वस्तु॥
सद्वस्त्वेवत्वंपदेरितंवाक्यगतेनत्वमितिपदेनलक्षितमित्यर्थः॥एतद्वाक्यस्थेनअसीतिपदेनतत्त्वंपदसामानाधिकरण्यलब्धंपदार्थ

स्वतःपूर्णःपरात्मात्रब्रह्मशब्देनवर्णितः॥अस्मीत्यैक्यपरामर्शस्तेनब्रह्मभवाम्यहं॥४॥एकमेवाद्वितीयंसन्नामरूपविव
र्जितं॥सृष्टेःपुराधुनाप्यस्यतादृक्त्वंतदितीर्यते॥५॥श्रोतुर्देहेंद्रियातीतंवस्त्वत्रत्वंपदेरितं॥एकताग्राह्यतेसीतितदै
क्यमनुभूयतां॥६॥स्वप्रकाशापरोक्षत्वमयमित्युक्तितोमतं॥अहंकारादिदेहांतात्प्रत्यगात्मेतिगीयते॥७॥ ५॥

द्वयैक्यंशिष्यंप्रतिग्राह्यतइत्याह॥एकतेति॥सिद्धमर्थमाह॥तदैक्यमिति॥तयोस्तत्त्वंपदार्थयोरैक्यंप्रमाणसिद्धमेकत्वमनुभूयतांमु
मुक्षुभिरित्यर्थः॥६॥क्रमप्राप्तस्याथर्वणवेदगतस्यायमात्माब्रह्मेतिवाक्यस्यार्थंव्याचिकीर्षुरादावयमात्मेतिपदद्वयेनविवक्षितमर्थंक्र
मेणदर्शयति॥स्वप्रकाशेति॥अयमित्युक्तितोयमितिशब्देनस्वप्रकाशापरोक्षत्वंस्वयंप्रकाशत्वेनापरोक्षत्वंमतमभिमतं॥अहमादिवन्नि
त्यपरोक्षत्वंघटादिवद्रूपत्वंचव्यावर्तयितुंविशेषणद्वयमितिबोद्धव्यं॥देहादिष्वप्यात्मशब्दप्रयोगदर्शनादत्रात्मशब्देनकिंविवक्षितमित्या
कांक्षायामाह॥अहंकारेति॥अहंकारआदिर्यस्याहंकारप्राणमनइंद्रियदेहसंघातस्यसोहंकारादिः॥तथादेहः॥अंतोयस्योक्तसंघातस्य
सदेहांतोहंकारादिश्चासौदेहांतश्चेतितस्मात्प्रत्यगधिष्ठानतयासाक्षि तयाचआंतरआत्मेतिगीयतेस्मिन्वाक्यइत्यर्थः॥८॥

आत्मत्वादिष्वपिआत्मशब्दस्यप्रयोगदर्शनात्तद्व्यावर्तनायात्रविवक्षितमर्थमाह॥दृश्यमानस्येति॥ दृश्यत्वेनमिथ्याभू
तस्यसर्वस्याकाशादेर्जगतस्तत्त्वमधिष्ठानतयातद्बाधावधित्वेनचपारमार्थिकंसच्चिदानंदलक्षणंयद्रूपमस्तितद्
त्वशब्देनेर्यतेकथ्यतइत्यर्थः॥वाक्यार्थमाह॥तद्रूपेति॥यदुक्तलक्षणंआत्मस्वप्रकाशात्मारूपंयस्यतत्

दृश्यमानस्यसर्वस्यजगतस्तत्त्वमीर्यते॥आत्मशब्देनतद्रूपत्वस्वप्रकाशात्मरूपकं॥८॥इति॥

स्वप्रकाशात्मस्वरूपकंसएवेत्यर्थः॥८॥इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्य
किंकरेणरामकृष्णाख्यविदुषाविरचितायांकूटस्थदीपविवेकव्याख्यासमाप्तः॥ श्रीनारायणार्पणमस्तु॥ ७ ॥ २

77/1938

अथचित्रदीपप्रारंभः प्रक॰६

पं॰ द॰ चि॰ टी॰

१

श्री गणेशाय नमः॥ शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशांतये॥ १॥ यस्य स्मरणमात्रेण विघ्ना दूरं प्रया
तिहि॥ वंदे हं दंतिवक्त्रं तं वाञ्छितार्थप्रदायकं॥ २॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ क्रियते चित्रदीपस्य व्याख्या तात्पर्यबोधिनी॥ ३॥
चिकीर्षितस्य ग्रंथस्य निष्प्रत्यूह परिपूरणाय परमात्मनीति पदेनेष्टदेवतानत्वानुसंबंधानुलक्षणं मंगलमाचरन्स्वेनैव ग्रंथस्य वेदांतप्रकरणत्वा
त्तदीयैरेव विषयादिभिस्तद्वत्त्वात्सिद्धिं मनसि धायाध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यत इति न्यायमनुसृत्य परमात्मन्यारोपितस्य जगतः स्थिति
प्रकारं सदृष्टांतं प्रतिजानीते॥ यथेति॥ चित्रपटे यथा वक्ष्यमाणानां अवस्थानां चतुष्टयं तथा परमात्मन्यपि वक्ष्यमाणमवस्था चतुष्टयं ज्ञेयमिति
॥ १॥ किं तदित्याकांक्षायां दृष्टांतदार्ष्टांतिकयोरप्यवस्था चतुष्टयं क्रमेणादिशति॥ यथेति॥ धौतो घट्टितो लांछितो रंजित इत्येवं प्रकाराश्चतस्रोव

यथा चित्रपटे दृष्टमवस्थानां चतुष्टयं॥ परमात्मनि विज्ञेयं तथावस्था चतुष्टयं॥ १॥ यथा धौतो घट्टितश्च लांछितो रंजितः पटः॥ चिदंतर्यामिसू
त्रात्मा विराट् चात्मा तथेर्यते॥ २॥ स्वतः शुभ्रोत्र धौतः स्यात् घट्टितोन्नविलेपनात्॥ मष्याकारैर्लांछितः स्यात् रंजितो वर्णपूरणात्॥ ३॥ स्वतश्चि
दंतर्यामी तु मायावी सूक्ष्मसृष्टितः॥ सूत्रात्मा स्थूलसृष्ट्यैष विराडित्युच्यते परः॥ ४॥ ब्रह्माद्याः स्तंबपर्यंताः प्राणिनोत्र जडा अपि॥ उत्तमाधमभा
वेन वर्तंते पटचित्रवत्॥ ५॥ चित्रार्पितमनुष्याणां वस्त्राभासाः पृथक् पृथक्॥ चित्राधारेण वस्त्रेण सदृशा इव कल्पिताः॥ ६॥ श्रीः॥ ॐ॥

स्था यथा चित्रपट उपलभ्यंते तथा परमात्मन्यपि चिदंतर्यामीसूत्रात्मा विराट् चेत्यवस्था चतुष्टयं बोद्धव्यमित्यर्थः॥ २॥ दृष्टांतस्थितानामवस्थानां स्व
रूपं क्रमेण व्युत्पादयति॥ स्वत इति॥ अत्र आस्ववस्थासु मध्ये स्वतो द्रव्यांतरसंबंधं विना शुभ्रो धौत इत्युच्यते॥ अन्नेन लिप्तो घट्टितः॥ मषीमयैराका
रैर्युक्तो लांछितः॥ यथायोग्यं वर्णैः पूरितो रंजितः स्यात्॥ ३॥ दार्ष्टांतिके ताव्युत्पादयति॥ स्वत इति॥ परः परमात्मा स्वतः मायातत्कार्यरहितश्चिदित्यु
च्यते॥ मायायोगादंतर्यामी॥ अपंचीकृतभूतकार्यसमष्टिसूक्ष्मशरीरयोगात्सूत्रात्मा॥ पंचीकृतभूतकार्यसमष्टिस्थूलशरीरोपाधियोगाद्विराडिति॥
४॥ ननु परमात्मनः चित्रपटस्थानीयत्वे तदाश्रितानि चित्राणि वक्तव्यानीत्यत आह॥ ब्रह्माद्या इति॥ अत्र परमात्मनि उत्तमाधमभावेन वर्तमानं स्तंबप
र्यंतं चेतनात्मकं गिरिनद्यादि जडात्मकं च चित्रस्थानीयमित्यर्थः॥ ५॥ ब्रह्मादिजगतश्चेतनस्थानीयत्वे कारणं वक्तुं दृष्टांतमाह॥ चित्रेति॥ यथा चित्रे लि
खितानां मनुष्यादिशरीराणामेव नानावर्णोपेता वस्त्रविशेषा लिख्यंते॥ ते च शीताद्यनिवारकत्वाद्वस्त्राभासा एव॥ ६॥ श्रीराम॥ हरे कृष्ण॥ श्रीः ३

दार्ष्टांतिकमाह॥ पृथगिति॥ एवं परमात्मन्यारोपितानां देवादीनां शरीराणामेव जीवनामानश्चिदाभासाः प्रत्येकं कल्प्यंते॥ न पर्वतादीनाम्॥ तेषां कल्प
नकारणमाह॥ बहुधेति॥ अमी जीवाः देवतिर्यङ्मनुष्यादिशरीरप्राप्त्या बहुधा संसरंति॥ न परमात्मा तस्य निर्विकारत्वादित्यभिप्रायः॥ ७॥ ननु सर्वे
वादिनो लौकिकाश्चात्मन एव संसार इति वदंति॥ तत्र किं कारणमित्याशंक्य ज्ञानमेव कारणमिति सदृष्टांतमाह॥ वस्त्राभासेति॥ ८॥ गिरिनद्यादीनां तु
चिदाभासकल्पनाभावं दृष्टांतपुरःसरमाह॥ चित्रस्थेति॥ प्रयोजनाभावादिति भावः॥ ९॥ एवमात्मन्यारोपितस्य संसारस्य ज्ञाननिवर्त्यत्वसिध्यर्थं त
न्मूलभूतामविद्यामाह॥ संसार इति॥ १०॥ कथं विद्यातल्लाभोपायश्च क इत्याकांक्षायां विद्यास्वरूपं तल्लाभोपायं च दर्शयति॥ आत्माभासस्येति॥ चि
दाभासस्येत्यर्थः॥ ११॥ विचाराल्लभ्यते विद्येत्युक्तं॥ कस्य विचाराल्लभ्यते विद्येत्याशंक्याह॥ सदेति॥ ननु परमात्मा विचार्यतां मोक्षावस्थायां फलरू
पत्वात् नाजीवजगतोर्विचारः॥ कोपयुज्यत इत्याशंक्य तयोरपबाधेन परमात्मावशेषणे उपयुज्यत इत्याह॥ जीवभावेति॥ १२॥ ननु विचारेण जी

पृथक् पृथक् चिदाभासाश्चैतन्याध्यस्तदेहिनां॥ कल्प्यंते जीवनामानो बहुधा संसरंत्यमी॥ ७॥ वस्त्राभासस्थितान्वर्णान्यद्वदाधारवस्त्रगान्॥ वदंत्य
ज्ञास्तथा जीवसंसारं चिद्गतं विदुः॥ ८॥ चित्रस्थपर्वतादीनां वस्त्राभासो न लिख्यते॥ सृष्टिस्थमृत्तिकादीनां चिदाभासस्तथा नहि॥ ९॥ संसारः परमार्थोयं
संलग्नः स्वात्मवस्तुनि॥ इति भ्रांतिरविद्या स्याद्विद्ययैषा निवर्तते॥ १०॥ आत्माभासस्य जीवस्य संसारो नात्मवस्तुनः॥ इति बोधो भवेद्विद्या लभ्यतेसौ वि
चारणात्॥ ११॥ सदा विचारयेत्तस्माज्जगज्जीवपरात्मनः॥ जीवभावजगद्भावबाधे स्वात्मैव शिष्यते॥ १२॥ नाप्रतीतिस्तयोर्बाधः किंतु मिथ्यात्वनिश्चयः
नो चेत्सुषुप्तिमूर्छादौ मुच्येतायत्नतो जनः॥ १३॥ परमात्मावशेषोपि तत्सत्यत्वविनिश्चयः॥ न जगद्विस्मृतिर्नो चेज्जीवन्मुक्तिर्न संभवेत्॥ १४॥ श्रीः॥

वभावजगद्भावबाधे स्वात्मैव शिष्यत इत्युक्तं विचारेण जीवजगतोर्बाधे तदप्रतीत्या व्यवहारलोपः प्रसज्येतेत्याशंक्य बाधशब्दस्य विवक्षितमर्थं विपक्षे दं
डं चाह॥ नाप्रतीतिरिति॥ सुषुप्तिमूर्छादौ स्वत एव द्वैतप्रतीत्यविचारेण जीवभावजगद्भावबाधे स्वात्मैव शिष्यत इत्युक्तं॥ विचारेण जीवजगतोर्बाधे तदप्रती
त्या व्यवहारलोपः प्रसज्येतेत्याशंक्य बाधशब्दस्य विवक्षितमर्थं विपक्षे दंडं चाह॥ नाप्रतीतिरिति॥ सुषुप्तिमूर्छादौ स्वत एव द्वैतप्रतीत्यभावात्तत्त्वज्ञानं वि
नापि मुक्तिः स्यादि॥ १३॥ स्वात्मैव शिष्यत इत्यनेनापि परमात्मनः सत्यत्वज्ञानमेव विवक्ष्यते॥ न तदतिरिक्तजगद्विस्मृति॥ जीवन्मुक्त्यभावप्रसंगादित्याह॥

परमात्मस्थिति ॥ ४२॥

79/1938

सदाविचारयेदित्युक्त्यादेहपातपर्यंतंविचारप्रसक्तौसत्यांतस्यावधिमाह॥ परोक्षाचापरोक्षेति॥ १५॥ विचारजन्याविद्यापरोक्षत्वापरोक्ष
त्वभेदेनद्विधेत्युक्तंतयोरुभयोः स्वरूपंक्रमेणदर्शयति॥ अस्तिब्रह्मेतिचेदिति॥ एवंविधात्मसाक्षात्कारसाधारणकारणमात्मतत्वविवेच
नंप्रतिजानीते॥ साक्षात्कारेति॥ येनसाक्षात्कारेणपुमानसद्यएवविमुच्यते॥ तत्साक्षात्कारसिध्यर्थमितिपूर्वेणान्वयः॥ १७॥ चिदात्मनः
पारमार्थिकमेकत्वंनिश्चेतुंव्यवहारदशायांप्रतीयमानंचैतन्यभेदमुद्दिशति॥ कूटस्थइति॥ एकस्याश्चिन्नश्चातुर्विध्येदृष्टांतमाह॥ घटा
काशेति॥ १८॥ घटावच्छिन्नस्यघटाकाशस्य॥ तदनवच्छिन्नस्यचमहाकाशस्य॥ प्रसिद्धत्वात्तेविहायाप्रसिद्धंजलाकाशंव्युत्पादयति॥
घटावच्छिन्नेतिघटावच्छिन्नेआकाशेयदुदकमस्ति॥ तत्रजलेप्रतिबिंबिताभ्रनक्षत्रसहितआकाशोजलाकाशइत्युच्यते॥ १९॥ अभ्रा

परोक्षाचापरोक्षेतिविद्याद्वेधाविचारजा॥ तत्रापरोक्षविद्याप्तौविचारोयंसमाप्यते॥ १५॥ अस्तिब्रह्मेतिचेद्वेदपरोक्षज्ञानमेवतत्॥ अहं
ब्रह्मेतिचेद्वेदसाक्षात्कारः सउच्यते॥ १६॥ तत्साक्षात्कारसिध्यर्थमात्मतत्वंविविच्यते॥ येनायंसर्वसंसारात्सद्यएवविमुच्यते॥ १७॥ कूट
स्थोब्रह्मजीवेशावित्येवंचिच्चतुर्विधा॥ घटाकाशमहाकाशौजलाकाशाभ्रखेयथा॥ १८॥ घटावच्छिन्नखेनीरंयत्तत्रप्रतिबिंबितः॥ सा
भ्रनक्षत्रआकाशोजलाकाशउदीर्यते॥ १९॥ महाकाशस्यमध्येयन्मेघमंडलमीक्ष्यते॥ प्रतिबिंबतयातत्रमेघाकाशोजलेस्थितः॥ २०॥
मेघांशरूपमुदकंतुषाराकारसंस्थितं॥ तत्रखप्रतिबिंबोयंनीरत्वादनुमीयते॥ २१॥ अधिष्ठानतयादेहद्वयावच्छिन्नचेतनः॥ कूटवन्नि
र्विकारेणस्थितः कूटस्थउच्यते॥ २२

काशंव्युत्पादयति॥ महाकाशस्येति॥ अत्रमेघमंडलेयज्जलंतस्मिन्नित्यर्थः॥ २०॥ ननुमेघजलस्याप्रतीयमानत्वान्नभसस्तत्रकथंप्रति
बिंबितत्वज्ञानमित्याशंक्याह॥ मेघांशेतिमेघस्थजलस्यप्रत्यक्षेणानुपलंभेपि॥ वृष्टिलक्षणकार्येणमेघेतदुपादानमुदकंसूक्ष्मावयवरू
पमस्ति॥ इत्यनुमीयते॥ उदकत्वेनैवलिंगेनप्रतिबिंबवत्वमपि॥ विमतंजलंआकाशबिंबवद्भवितुमर्हति॥ जलत्वात्॥ घटगतजलवदित्य
नुमानेनमेघांशरूपजलस्याकाशप्रतिबिंबसद्भावोवगम्यतइत्यर्थः॥ २१॥ एवंदृष्टांतभूतमाकाशचतुष्टयंव्युत्पाद्य॥ दार्ष्टांतिकेप्रथमो
द्दिष्टंकूटस्थंव्युत्पादयति॥ अधिष्ठानेति॥ पंचीकृतापंचीकृतभूतकार्यत्वेनस्थूलसूक्ष्मरूपस्यदेहद्वयस्याविद्याकल्पितस्याधारत्वेनवर्तमा
नत्वेन॥ ताभ्यामवच्छिन्नआत्माकूटस्थइत्युच्यते॥ तत्रकूटस्थशब्दप्रवृत्तौनिमित्तमाह॥ कूटवदिति॥ २२॥ श्रीराम॥ श्रीहरीविठ्ठल॥

81/1938

एवंकूटस्थंव्युत्पाद्यजीवस्यकूटस्थेकल्पितबुद्धिप्रतिबिंबत्वेनेतत्पक्षपातित्वात्तंव्युत्पादयति॥ कूटस्थइति॥ तस्यजीवशब्दाभिधेयत्वेनि
मित्तमाह॥ प्राणानामिति॥ कूटस्थातिरिक्तजीवकल्पनमप्रयोजनमित्याशंक्य॥ अविकारिणः॥ कूटस्थस्यसंसारासंभवात्तंनिर्वाहार्थंसों
गीकर्तव्यइत्याह॥ संसारेणेति॥ २३॥ ननुजीवातिरिक्तः कूटस्थोस्तिचेत्किमितिनप्रतिभासतइत्याशंक्यजीवेनतिरोहितत्वादितिसदृष्टांत
माह॥ जलेति॥ नन्वेतत्तिरोधानंनक्वापिशास्त्रेप्रतिपादितमित्याशंक्यतस्यान्योन्याध्यासशब्देनाभिधानान्मैवमित्याह॥ सोन्योन्याध्या
सइतिउच्यते॥ भाष्यादिष्विततिशेषः॥ २४॥ नन्वयमेवाध्यासश्चेदस्यकारणरूपाविद्यावक्तव्येत्याशंक्य॥ जीवकूटस्थयोः संसारदशा
यांभेदाप्रतीतिरेव॥ अविद्येत्याह॥ अयमिति॥ २५॥ पूर्वोक्तस्यजीवस्यअविद्याकल्पितत्वस्यस्पष्टीकरणायअविद्यांविभजते॥ विक्षेपेति॥

कूटस्थेकल्पिताबुद्धिस्तत्रचित्प्रतिबिंबकः॥ प्राणानांधारणाज्जीवः संसारेणसयुज्यते॥ २३॥ जलव्योम्नाघटाकाशोयथासर्वस्तिरोहितः॥
तथाजीवेनकूटस्थः सोन्योन्याध्यासउच्यते॥ २४॥ अयंजीवोनकूटस्थंविविनक्तिकदाचन॥ अनादिरविवेकोयंमूलाविद्येतिगम्यतां॥ २५॥
विक्षेपावृतिरूपाभ्यांद्विधाविद्याव्यवस्थिता॥ नभातिनास्तिकूटस्थइत्यापादनमावृतिः॥ २६॥ अज्ञानीविदुषापृष्टः कूटस्थंनप्रबुध्यते॥ न
भातिनास्तिकूटस्थइतिबुध्वावदत्यपि॥ २७॥ स्वप्रकाशेकुतोविद्यातांविनाकथमावृतिः॥ इत्यादितर्कजालानिस्वानुभूतिर्ग्रसत्यसौ॥ २८॥ ॥

विक्षेपहेतुत्वेनाभ्यर्हितत्वादावृतिंप्रथमंलक्षयति॥ नभातीति॥ कूटस्थोनभाति॥ नप्रकाशतेनास्तिचेतिव्यवहारहेतुरावरणमित्यर्थः॥ २६॥ न
न्वविद्यायास्तत्कृतावरणस्यचसद्भावेकिंप्रमाणमित्याशंक्यलोकानुभवएवेत्याह॥ अज्ञानीति॥ विदुषाकूटस्थंकिंजानासीतिपृष्टोज्ञानीतं
नजानामीत्यज्ञानमनुभूयवक्ति॥ अयमविद्यानुभवः॥ नकेवलमज्ञानानुभवमेववक्ति॥ अपितुनास्तिनभातिकूटस्थइतिकूटस्थाभावाभा
नेचानुभूयवदति॥ अयमावरणानुभवः॥ तेउभयत्रानुभवः प्रमाणमितिभावः॥ २७॥ ननुभवन्मतेआत्मनः स्वप्रकाशत्वात्तस्मिन्नविद्या
नोपपद्यते॥ तमस्तिमिरयोरिवविरुद्धस्वभावत्वेनतयोः संबंधानुपपत्तेः॥ अविद्याभावेचतत्कृतमावरणंदुर्निरूपंस्यात्॥ तदभावेचतन्मूलकस्यवि
क्षेपस्यासंभवः॥ विक्षेपाभावेचज्ञाननिवर्त्यस्यानर्थस्याभावात्॥ ज्ञानवैयर्थ्यं॥ ततस्तत्प्रतिपादकशास्त्रमप्रमाणंस्यादित्याशंक्येतत्स
र्वंपूर्वोक्तानुभवबाधितमित्याह॥ स्वप्रकाशइति॥ नहिदृष्टेनुपपन्नंनामेतिन्यायादितिभावः॥ २८॥ श्रीकृष्णार्पणमस्तुशुभमस्तु॥

पं.२० चि.टी.

३ नन्वनुभवस्योक्तनर्कविरोधेनाभासत्वात् ॥ अतेनतत्वनिश्चयइत्याशंक्य अनुभव प्रामाण्यानभ्युपगमे ॥ केवलतर्कस्यानिश्चायकत्व
स्यस्वेनैवाभ्युपगतत्वात् ॥ अतार्किकस्यतत्वनिश्चयः कापिस्यादित्याह स्वानुभूतावितिः ॥ २९ ॥ नन्वनुभवः तत्वनिश्चायकएव ।
तथाप्यनुभूयमानस्यार्थस्य संभावितत्वज्ञानायतर्कोप्यभ्युपेतव्यइत्यालोकामनूद्य ॥ तर्ह्यनुभवानुसारेणैवतर्कोवर्णनीयो ॥
नतद्विरोधेनेत्याह ॥ बुध्यारोहायेति ॥ ३० ॥ कोसावनुभवो यदनुसारेणतर्कोवर्णनीयइत्याकांक्षायांपूर्वोक्तमविद्यादिगोचरमनु
संभवंस्मारयति ॥ स्वानुभूतिरिति ॥ फलितमाह ॥ ३१ ॥ अतइति ॥ ३१ ॥ तमेवतर्कमभिनीयदर्शयति ॥ तच्चेदिति ॥ अविद्यावरण

स्वानुभूतावविश्वासेतर्कस्याप्यनवस्थितेः ॥ कथंवातार्किकंमन्यस्तत्वनिश्चयमाप्नुयात् ॥ २९ ॥ बुध्यारोहायतर्कश्चेदपेक्षतेत
थापेक्षि ॥ स्वानुभूत्यनुसारेण तर्क्यतांमाकुतर्क्यतां ॥ ३० ॥ स्वानुभूतिरविद्यायामात्मनोचप्रदर्शिता ॥ अतः कूटस्थचैतन्यमविरोधी
तितर्क्यतां ॥ ३१ ॥ तच्चेद्विरोधिकेनयमात्मनिर्ह्यनुभूयतां ॥ विवेकस्तुविरोध्यस्यात्तत्वज्ञानिनिदृश्यतां ॥ ३२ ॥ अविद्यावृतकूटस्थे
देहद्वययुताचितिः ॥ शुक्तौरूप्यवदध्यस्ताविक्षेपाध्यासएवहि ॥ ३३ ॥ इदमंशस्यसत्यत्वंशुक्तिगंरूप्यईक्ष्यते ॥ स्वयंत्वंवस्तुताचैवं
विक्षेपवीक्ष्यतेन्यगं ॥ ३४ ॥ नीलपृष्ठत्रिकोणत्वंयथाशुक्तौतिरोहितं ॥ असंगानंदताद्येवंकूटस्थेपितिरोहितं ॥ ३५ ॥ श्रीः ॥

साधकचैतन्यस्यैवतद्विरोधित्वेविद्याप्रतीतिरेवनस्यादितिभावः तर्ह्यविद्यायाः कोविरोधीत्यतआह ॥ विवेकइति ॥ विवेकउपनिष
द्विचारजन्यंज्ञानं ॥ विवेकस्यअविद्याविरोधित्वंक्वदृष्टमित्यतआह ॥ तत्वज्ञानिनीति ॥ ३२ ॥ एवमविद्यावरणंदर्शयित्वाविक्षेपा श्री
ध्यासमाह ॥ अविद्येति ॥ पूर्वोक्ताविद्यावरणवतिकूटस्थेअत्यगात्मन्यारोपितस्थूलसूक्ष्मशरीरसहितश्चिदाभासोविक्षेपाध्या
सइत्यर्थः ॥ ३३ ॥ अस्यविक्षेपस्याध्यासत्वसिद्धयेशुक्तिरजताध्याससाम्यंदर्शयति ॥ इदमंशस्येति ॥ शुक्तिकायांस्थितंपुरो ३
देशादिसंबंधित्वमबाध्यत्वंयथारोपितरजतेवभासते ॥ एवंस्वयंत्ववस्तुत्वंचकूटस्थनिष्ठमारोपितेचिदाभासेवभासतइत्यर्थः
॥ ३४ ॥ एवंसामान्यांशप्रतीतिमुभयत्रप्रदर्श्य ॥ विशेषांशाप्रतीतिसाम्यंदर्शयति ॥ नीलेति ॥ ३५ ॥ श्रीरामचंद्रायनमः ॥ ॥
श्रीः ॥ छः ॥ श्रीः ॥ छः ॥ श्रीः ॥ छः ॥ श्रीः ॥ छः ॥ श्रीः

83/1938

साम्यांतरंदर्शयति ॥ आरोपितस्येति ॥ दृष्टांतेशुक्तिस्थलेआरोपितपदार्थस्यरूप्यंनामरूप्यमितिनामयथा ॥ एवंकूटस्थेकल्पित
स्यचिदाभासरूपविक्षेपस्यपूर्वोक्तस्याहमितिनामेत्यर्थः ॥ ३६ ॥ ननुदृष्टांतेपुरोवर्तिनिशुक्तिशकलेइंद्रियसंन्निकर्षेजातेसति ॥ रू
प्यमिदमितितदतिरिक्तरजताभिमानउपपद्यते ॥ नैवंदार्ष्टांतिके ॥ आत्मातिरिक्तवस्त्वभिमानइत्याशंक्याशापिस्वप्रकाशतयाचि
दात्मन्यवभासमाने ॥ तदतिरिक्तोहमित्यभिमानउपलभ्यतेतोनवैषम्यमित्यभिप्रायेणाह ॥ इदमंशमिति ॥ ३७ ॥ ननुस्वयमहं
शब्दयोरेकार्थत्वात्कथंदृष्टांतदार्ष्टांतिकयोः साम्यमित्याशंक्यदंरूप्यशब्दार्थयोः स्वयमहंशब्दार्थयोश्चसामान्यविशेषरूपत्व
स्योभयत्रसाम्यान्नैवमित्याह ॥ इदमिति ॥ ३८ ॥ स्वयंशब्दार्थस्यसामान्यरूपत्वंस्पष्टीकर्तुंलौकिकप्रयोगंतावद्दर्शयति ॥ देवद

आरोपितस्यदृष्टांतेरूप्यंनामयथातथा ॥ कूटस्थाध्यस्तविक्षेपनामाहमितिनिश्चयः ॥ ३६ ॥ इदमंशंस्वतः पश्यन्रूप्यमित्य
भिमन्यते ॥ तथास्वंचस्वतः पश्यन्अहमित्यभिमन्यते ॥ ३७ ॥ इदंत्वरूप्यतेभिन्नेस्वत्वाहंतेतथेष्यतां ॥ सामान्यंचविशेषश्च
उभयत्रापिगम्यते ॥ ३८ ॥ देवदत्तः स्वयंगच्छेत्वंवीक्ष्यस्वस्वयंतथा ॥ अहंस्वयंनशक्नोमीत्येवंलोकेप्रयुज्यते ॥ ३९ ॥ इदंरूप्यमिदं
वस्त्रमितियद्वदिदंतथा ॥ असौत्वमहमित्येषुस्वयमित्यभिमन्यते ॥ ४० ॥ अहंत्वाद्भिद्यतांस्वत्वंकूटस्थेतेनकिंतव ॥ स्वयंशब्दा
र्थएवैषकूटस्थइतिमेभवेत् ॥ ४१ ॥ अन्यत्ववारकंस्वत्वमितिचेदन्यवारणं ॥ कूटस्थस्यात्मतांवक्तुमिष्टमेवहितद्भवेत् ॥ ४२ ॥ श्रीः ॥

त्तइति ॥ ३९ ॥ भवत्वेवंलोकप्रयोगः ॥ कथमेतावतास्वयंशब्दार्थस्यसामान्यरूपत्वमित्याशंक्यदंशब्दार्थवदित्याह ॥ इदंरूप्यमि
ति ॥ यथारूप्यवस्त्रादौसर्वत्रेदंशब्दस्यप्रयुज्यमानत्वात्तदर्थस्यसामान्यरूपत्वं ॥ तथाअसौत्वमहमित्यादौसर्वत्रस्वयंशब्दप्रयोगा
त्तदर्थस्यापिसामान्यरूपत्वमेवगम्यतइत्यर्थः ॥ ४० ॥ भवतुस्वयमहंशब्दयोर्लोकेभेदस्तावताकूटस्थात्मनिकिमायातमिति ॥ एकु
ति ॥ अहंत्वादिति ॥ सामान्यरूपः स्वयंशब्दार्थएवकूटस्थइतीदमायातमित्याह ॥ स्वयंशब्दार्थइति ॥ ४१ ॥ ननुस्वत्वरूपोधर्मो
न्यत्वंनिवारयति ॥ नकूटस्थत्वंबोधयतिइतिशंकते ॥ अन्यत्ववारकमिति ॥ स्वयंशब्दार्थस्यकूटस्थस्यैवात्मत्वात्स्वत्वेनान्यवा
रणमिष्टमेवेतिपरिहरति ॥ अन्यवारणंकूटस्थस्येति ॥ ४२ ॥ श्रीः ॥ ५ ॥ छः ॥ ५ ॥ ५ श्रीः ५ ॥

पं॰ द॰ चि॰ टी॰
४

ननु स्वयमात्मशब्दयोर्भिन्नप्रवृत्तिनिमित्तयोर्गवाश्वादिशब्दयोरिवैकार्थत्वाभावात् ॥ कथं स्वयंशब्दार्थस्य कूटस्थस्यात्मत्वमि
त्याशंक्य हस्तकरादिशब्दवदेकार्थत्वोपपत्तेर्मैवमिति परिहरति ॥ स्वयमात्मेतीति ॥ पर्यायत्वे सहप्रयोगाभावं हेतुमाह ॥ तेनलो
कमिति ॥ फलितमाह ॥ अतः स्वत्वमिति ॥ ४३ ॥ ननु घटादिष्वचेतनेष्वपि स्वयंशब्दस्य प्रयोगदर्शनात् ॥ स्वयंत्वात्मत्वयोरे
कत्वं न घटत इति शंकते ॥ घट इति ॥ घटादिष्वपि स्फुरणरूपेणात्मचैतन्यस्य सत्वात् ॥ तेष्वपि स्वयंशब्दप्रयोगो न विरुध्यत
इत्याह ॥ दृश्यतामिति ॥ ननु घटादिष्वप्यात्मचैतन्यस्य सत्वे ॥ चेतनाचेतनविभागो निर्निमित्तकः स्यादित्याशंक्य चेतनाचेतन
विभागस्य चिदाभासासत्वासत्वलक्षणकारणसद्भावान्मैवमिति परिहरति ॥ चेतनेति ॥ ४५ ॥ ननु चेतनाचेतनविभागस्य

स्वयमात्मेति पर्यायौ तेन लोके नयोः सह ॥ प्रयोगो नास्त्यतः स्वत्वमात्मत्वं चान्यवारकं ॥ ४३ ॥ घटः स्वयं न जानातीत्येवं स्वत्वं
घटादिषु ॥ अचेतनेष्वपि दृष्टं चेतनेष्वयमोत्मत्वतः ॥ ४४ ॥ चेतनाचेतनभिदा कूटस्थात्मकृता नहि ॥ किंतु बुद्धिकृताभासकृ
तैत्यवगम्यतां ॥ ४५ ॥ यथा चेतन आभासः कूटस्थे भ्रांतिकल्पितः ॥ अचेतनो घटादिश्च तथा तत्रैव कल्पितः ॥ ४६ ॥ तत्तेदंते अपि
स्वत्वमिवत्वमहमादिषु ॥ सर्वत्रानुगते तेन तयोरप्यात्मतेति चेत् ॥ ४७ ॥ ते आत्मत्वेप्यनुगते तत्तेदंते ततस्तयोः ॥ आत्मत्वं नैव संभा
व्यं सम्यक्त्वादेर्यथा तथा ॥ ४८ ॥ तत्तेदंते स्वतान्यत्वे त्वंताहंते परस्परं ॥ प्रतिद्वंद्वितया लोके प्रसिद्धे नास्ति संशयः ॥ ४९ ॥ श्रीः ॥ ॐ ॥

चिदाभाससत्वासत्वप्रयुक्तत्वाभ्युपगमे चेतनेष्वात्मसत्वाभ्युपगमो निष्प्रयोजनः स्यादित्याशंक्य ॥ चेतनाचेतनविभागहे
तुत्वेन कूटस्थस्यानभ्युपगम्यते ॥ यच्चेतनकल्पनाधिष्ठानत्वेन कूटस्थोभ्युपगंतव्य इत्यभिप्रायेण ॥ घटादेस्तत्र कल्पितत्वे श्रीः
महष्टांतमाह ॥ यथा चेतन इति ॥ ४६ ॥ स्वत्वात्मत्वयोरेकत्वातिप्रसंगं शंकते ॥ तत्तेदंते अपीति ॥ त्वमहमादिषु सर्वत्रानुगतस्य स्व
त्वस्येव सर्वत्रानुगतयोस्तत्तेदंतयोरप्यात्मस्वरूपता किं न स्यादिति भावः ॥ ४७ ॥ तत्तेदंतयोरात्मत्वाधिकवृत्तित्वादात्मत्वं न संभव ४
तीत्याह ॥ ते आत्मत्वेपीति ॥ तत्तेदंते स्वत्वमिव यद्यपि त्वमहमादिषु अनुगते ॥ तथापि तेष्वनुवर्तमाने आत्मत्वेप्यनुगते ॥ तदात्मत्व
मित्यादिव्यवहारसंभवात् ॥ ततस्तयोरात्मत्वाधिकवृत्तित्वादात्मस्वरूपता न संभाव्यते ॥ तत्र दृष्टांतः ॥ सम्यक्त्वादेरिति ॥ आत्म
त्वं सम्यगात्मत्वमसम्यगिति व्यवहारदर्शनादात्मत्वेप्यनुवर्तमानयोः सम्यक्त्वासम्यक्त्वयोरिवेत्यर्थः ॥ ४८ ॥ श्रीराम ॥ ॐ ॥

85
1938

एवं प्रासंगिकं परिसमाप्य फलितप्रदर्शनाय लोकव्यवहारसिद्धमर्थमनुवदति ॥ तत्तेदंते इति ॥ तत्ताप्रतियोगित्वमिदंतायास्तदिदमि
ति ॥ स्वत्वप्रतियोगित्वमन्यत्वस्य स्वयमन्य इति ॥ त्वंताप्रतियोगित्वमहंतायास्त्वमहमिति ॥ लोके प्रतिद्वंद्वित्वेन प्रयोगदर्शनात् प्रसि
द्धमिति भावः ॥ ४९ ॥ भवत्वेवं लोके ॥ प्रकृते किमायातमित्यत आह ॥ अन्यताया इति ॥ अन्यत्वप्रतियोगी स्वयंशब्दार्थः ॥ त्वंताप्रति
योग्यहंशब्दार्थश्चिदाभासः कूटस्थे कल्पित इत्यर्थः ॥ ५० ॥ ननूक्तप्रकारेण जीवकूटस्थयोर्भेदे सत्यपि सर्वे इत्थं किमिति न जानंती
त्याशंक्याह ॥ अहंतेति ॥ बुद्धिसाक्षिणः कूटस्थस्य बुध्या प्रत्यक्षीकर्तुमशक्यत्वात्स्वयमहमिति प्रतिभासमायोर्नैव कूटस्थयो
र्भ्रांत्यैकत्वं प्रतिपन्ना इत्यर्थः ॥ ५१ ॥ नन्वस्य जीवकूटस्थयोरेकत्वभ्रमस्य किं कारणमित्यपेक्षायामाह ॥ तादात्म्येति ॥ अत्रास्मि

तत्तेदंते स्वतान्यत्वे त्वंताहंते परस्परं ॥ प्रतिद्वंद्वितया लोके प्रसिद्धे नास्ति संशयः ॥ ४९ ॥ अन्यतायाः प्रतिद्वंद्वी स्वयं कूटस्थ इष्यतां ॥
त्वंतायाः प्रतियोग्येषोहमित्यात्मनि कल्पितः ॥ ५० ॥ अहंतास्वत्वयोर्भेदे रूप्यते दंतयोरिव ॥ स्पष्टेपि मोहमापन्ना एकत्वं प्रतिपेदिरे
॥ ५१ ॥ तादात्म्याध्यास एवात्र पूर्वोक्ताविद्यया कृतः ॥ अविद्यायां निवृत्तायां तत्कार्यं विनिवर्तते ॥ ५२ ॥ अविद्यावृत्तितादात्म्ये विद्य
यैव विनश्यतः ॥ विक्षेपस्य स्वरूपं तु प्रारब्धक्षयमीक्षते ॥ ५३ ॥ उपादाने विनष्टेपि क्षणं कार्यं प्रतीक्षते ॥ इत्याहुस्तार्किकास्तद्वदस्माकं कि
न्न संभवेत् ॥ ५४ ॥
न ग्रंथ आनादिरविवेकोयमित्यत्रोक्तयाविद्ययेत्यर्थः ॥ यतोविद्याकार्यत्वमस्यातो विद्यानिवर्तकज्ञानेनैव तन्निवृत्तिरित्याह ॥ अवि
द्यायामिति ॥ ५२ ॥ नन्वध्यासस्याविद्याकार्यत्वात्स्यातो विद्यानिवर्तकज्ञानेनैव तन्निवृत्या निवृत्तिः स्यात्तदनुपपन्नं ॥ ब्रह्मात्मैकत्व
विद्याया मुत्पन्नायामप्यविद्याकार्यस्य देहादेरुपलभ्यमानत्वादित्यत आह ॥ अविद्यावृत्तीति ॥ अविद्यैककारणयोरावृत्तितादात्म्य
योर्विद्ययैव विनिवृत्तिः प्रारब्धकर्मसहिताविद्याजन्यस्य तु विक्षेपस्वरूपस्यैकर्मावसानपर्यंतमवस्थानमित्यविरोध इति भावः ॥
॥ ५३ ॥ ननु प्रारब्धकर्मणो निमित्तमात्रत्वात्तत्सद्भावमात्रेणोपादानेविनष्टेपि कथं कार्यानुवृत्तिरित्याशंक्य शास्त्रांतरसिद्धदृ
ष्टांतेन तदनुवृत्तिं संभावयति ॥ ५४ ॥ उपादान इती ॥ ५४ ॥ ॥ ॥ ॥ ॥ ॥

पं०१० चि० ४०

५

ननु तार्किकैः कार्यस्य क्षणमात्रमवस्थानमंगीकृतं न चिरकालमित्याशंक्याह॥ तं तूनामिति॥ संसारस्यानादिकालमारभ्यानुवृत्त
त्वात्तत्संस्कारवशेन कुलालचक्रभ्रमवच्चिरकालानुवृत्तिर्न विरुध्यत इति भावः॥ ५५॥ ननु तार्किकैर्यथा युक्तमभिहितं तद्वदूवता
पीत्याशंक्य स्वोक्तं तेनैव पश्यंदर्शयति॥ विनेति॥ क्षोदक्षमं विचारसहं मानं विना प्रमाणमंतरेणेत्यर्थः॥ तस्य तावदेव चिरं याव
न्न विमोक्ष्येऽथ संपत्स्य इति श्रुतिः॥ चक्रभ्रमादिदृष्टांतो युक्तिः अनुभूतिर्विद्वदनुभवः एतेभ्यः प्रमाणेभ्यः किं वक्तुमशक्यमित्यभि
प्रायः॥ ५६॥ प्रकृतमनुसरति॥ आस्तामिति॥ स्वयमहं शब्दार्थयोः कूटस्थपरिणामिनोरेकत्वं भ्रांत्या सिध्यं॥ ५७॥ ननु कूटस्थजीव
योरेकत्वं भ्रांतिसिध्यं चेदिदं भ्रांतामिति केऽपि कुतो न जानंतीत्याशंक्य श्रुतितात्पर्यपर्यालोचनशून्यत्वादित्याह॥ भ्राम्यंत इति॥ ५८॥

तं तूनां दिनसंख्यानां तेम्नादकृक्षणईरितः॥ भ्रमस्यासंख्यकल्पस्य योग्यः क्षण इहेष्यतां॥ ५५॥ विनाक्षोदक्षमं मानं तैर्वृथा परिक
ल्प्यते॥ श्रुतियुक्त्यनुभूतिभ्यो वदतां किन्नु दुःशकं॥ ५६॥ आस्तां दुस्तार्किकैः सार्धं विवादः प्रकृतं ब्रुवे॥ स्वाहंमाः सिद्धमेकत्वं कूटस्थपरि
णामिनाः॥ ५७॥ भ्राम्यंते पंडितंमन्याः सर्वे लौकिकतैर्थिकाः॥ अनादृत्य श्रुतिं मौर्ख्यात्केवलां युक्तिमाश्रिताः॥ ५८॥ पूर्वापरपरामर्श
विकलास्तत्र केचन॥ वाक्याभासान्स्वस्वपक्षे योजयंत्यप्यलज्जया॥ ५९॥ कूटस्थादिशरीरांतसंघातस्यात्मतां जगुः॥ लोकायताः पा
मराश्च प्रत्यक्षाभासमाश्रिताः॥ ६०॥ श्रौतीकर्तुं स्वपक्षं ते कोशमन्नमयं तथा॥ विरोचनस्य सिद्धांतं प्रमाणं प्रतिजज्ञिरे॥ ६१॥ श्रीः॥

ननु श्रुत्यर्थप्रवक्तारोऽपि केचिदित्थं कुतो न जानंतीत्याशंक्य तेषां साकल्येन श्रुत्यर्थपर्यालोचनाभावादित्याह॥ पूर्वापरेति॥ ५९॥ तत्र श्रीः
तावत्प्रत्यक्षैकप्रमाणाभ्युपगमेनातिस्थूलत्वाल्लोकायतादिपक्षं प्रथमतोऽनुभाषते॥ कूटस्थादीति॥ प्रत्यक्षसिद्धत्वेन देहादेरात्म
त्वं पारमार्थिकं स्यादित्याशंक्योक्तं॥ प्रत्यक्षाभासमिति॥ ६०॥ न प्रत्यक्षैकप्रमाणवादिनोऽपि परव्यामोहनाय स्वमतं श्रुतिसिद्ध ५
मिति दर्शयितुं वाक्यमप्युदाहरंतीत्याह॥ श्रौतीकर्तुमिति॥ कोशमन्नमयमिति शब्देनान्नमयकोशप्रतिपादकं स वा एष पुरुषोऽन्न
रसमय इत्यादिवाक्यं लक्ष्यते॥ विरोचनस्य सिद्धांतमिति॥ तत्सिद्धांतप्रतिपादकमात्मैव देहमय इत्यादिवाक्यं लक्ष्यते॥ एतद्वा
क्यद्वयं प्रमाणत्वेन प्रतिजानंते न त्वेनत्प्रपादयितुं समाः प्रकरणविरोधादिति भावः॥ ६१॥ श्रीसीतारामचंद्रार्पणमस्तु॥ ॐ॥

अस्मिन्मते दोषदर्शनपुरःसरं मतांतरमुत्थापयति॥ जीवात्मेति॥ ६२॥ कीदृशो देहातिरिक्त आत्मा केन वा प्रमाणेनावगम्यत इत्या
शंकायामाह॥ प्रत्यक्षत्वेनेति॥ अहं पश्यामि अहं पश्यामीत्यादिप्रयोगदर्शनात् देहातिरिक्ताहंबुद्धिगम्यानींद्रियाण्यात्मेत्यर्थः॥ ६३॥
नन्विंद्रियाणामचेतनानां कथमात्मत्वमित्याशंक्य श्रुतौ इंद्रियसंवादश्रवणाच्चेतनत्वमभिधमित्याह॥ वागादीनामिति॥ चेत
नत्वस्यैवात्मलक्षणत्वात्॥ चेतनानामिंद्रियाणामात्मत्वमुचितमित्याह॥ आत्मत्वमिति॥ ६४॥ मतांतरमुत्थापयति॥ हैरण्यग
र्भा इति॥ ६५॥ प्राणस्यात्मत्वे श्रौतलिंगानीति दर्शयति॥ प्राण इति॥ प्राणाग्नय एवैतस्मिन्पुरे जाग्रतीत्यादिना प्राणजागरणं श्रूय
ते तत्प्राण प्रपच्च उदतिष्ठन्नतदुक्थमभवत्तदेतदुक्थमिति॥ प्राणस्य श्रैष्ठ्यादिकं श्रूयते अन्योंतर आत्मा प्राणमय इत्यादिना प्राणमयः

जीवात्मनिर्गमे देहमरणस्यात्र दर्शनात्॥ देहातिरिक्त एवात्मेत्याहुर्लोकायताः परे॥ ६२॥ प्रत्यक्षत्वेनाभिमताहंधीर्देहातिरेकिणं॥ गमयेदिं
द्रियात्मानं वच्मीत्यादिप्रयोगतः॥ ६३॥ वागादीनामिंद्रियाणां कलहः श्रुतिषु श्रुतः॥ तेन चैतन्यमेतेषामात्मत्वं तत एव हि॥ ६४॥ हैर
ण्यगर्भाः प्राणात्मवादिनस्त्वेवमूचिरे॥ चक्षुराद्यक्षलोपेऽपि प्राणसत्त्वे तु जीवति॥ ६५॥ प्राणो जागर्ति सुप्तेऽपि प्राणश्रैष्ठ्यादिकं श्रुतं॥ को
शः प्राणमयः सम्यग्विस्तरेण प्रपंचितः॥ ६६॥ मन आत्मेति मन्यंत उपासनपरा जनाः॥ प्राणस्याभोक्तृतास्पष्टा भोक्तृत्वं मनसस्ततः॥
६७॥ मन एव मनुष्याणां कारणं बंधमोक्षयोः॥ श्रुतो मनोमयः कोशस्तेनात्मेतीरितं मनः॥ ६८॥ विज्ञानमात्मेति परे आहुः क्षणिक
वादिनः॥ यतो विज्ञानमूलत्वं मनसो गम्यते स्फुटं॥ ६९॥ अहंवृत्तिरिदंवृत्तिरित्यंतःकरणं द्विधा॥ विज्ञानं स्यादहंवृत्तिरिदंवृत्तिर्मनो भवेत्॥
॥ ७०॥

कोशः प्रपंचितः॥ आदिशब्देन प्राणसंवादश्रवणादिकं ग्राह्यं॥ ६६॥ प्राणादप्यांतरस्य मनसः आत्मत्ववादिनां मतं दर्शयति॥ मन
आत्मेतीति॥ प्राणस्यानात्मत्वे युक्तिमाह॥ प्राणस्येति॥ ६७॥ मनस आत्मत्वयुक्तिप्रतिपादिकां श्रुतिमाह॥ मन एवेति॥ तस्माद्वा एत
स्मात्प्राणमयादन्योंतर आत्मा मनोमय इति श्रुत्यंतरं दर्शयति॥ श्रुत इति॥ फलितमाह॥ तेनेति॥ ६८॥ मनसोऽप्यांतरस्य विज्ञानस्य
आत्मत्ववादिनां बौद्धस्य मतं दर्शयति॥ ॥ विज्ञानमिति॥ विज्ञानस्यांतरत्वे युक्तिमाह॥ यत इति॥ ६९॥ विज्ञानमयः शब्द
वाच्यस्यांतःकरणस्यैकत्वात्॥ कथं मनोविज्ञानयोः कार्यकारणभाव इत्याशंक्य तमुपादयितुं तयोर्भेदं तावद्दर्शयति॥ अहंवृत्तिरिति॥ ७०॥

87
1938

नयोः कार्यकारणभावमाह॥ अहंप्रत्ययबीजत्वमिति॥ तदेवोपपादयति॥ अविदित्वेति॥ अहंवृत्त्युदयाभावेऽदंवृत्त्यनुदयादनयोः कार्यकारणभाव इत्यर्थः॥ ७१॥ तस्य विज्ञानस्य क्षणिकत्वे नुभवं प्रमाणयति॥ क्षणक्षण इति॥ क्षणिकत्वमुपपाद्य स्वप्रकाशत्वमुपपादयति स्वप्रकाशं इति॥ स्वेनैव प्रमितत्वादित्यर्थः॥ ७२॥ विज्ञानस्यात्मत्वे आगमः प्रमाणमित्याह॥ विज्ञानमयेति तस्माद्वा एतस्मान्मनोमयादन्योंतर आत्मा विज्ञानमयः॥ विज्ञानं यज्ञं तनुते इत्यादि वाक्यं विज्ञानस्यात्मत्व प्रतिपादकमिति भावः॥ ७३॥ बौद्धवांतरभेदस्य शून्यवादिनो मतं दर्शयति॥ विज्ञानमिति॥ ७४॥ तत्र श्रुतिमाह॥ असदेवेदमिति॥ शून्यस्यैव तद्रूपत्वे प्रतीयमानस्य जगतः का गतिरित्यत आह॥ ज्ञानेति॥ ७५॥ तदेतन्मतं दूषयति॥ निरधिष्ठानेति॥ निःस्वरूपस्य शून्यस्याधिष्ठानत्वायोगान्नि

अहंप्रत्ययबीजत्वमिदंवृत्तेरितिस्फुटं॥ अविदित्वा स्वमात्मानं बाह्यं वेत्ति न तु क्वचित॥ ७१॥ क्षणक्षणजन्मनाशावहंवृत्तेर्मितौ यतः॥ विज्ञानं क्षणिकं तेन स्वप्रकाशं स्वतो मितेः॥ ७२॥ विज्ञानमयकोशोयं जीव इत्यागमा जगुः॥ सर्वः संसार एतस्य जन्मनाशसुखादिकः॥ ७३॥ विज्ञानं क्षणिकं नात्मा विद्युदभ्रनिमेषवत॥ अन्यस्यानुपलब्धत्वाच्छून्यं माध्यमिका जगुः॥ ७४॥ असदेवेदमित्यादाविदमेव श्रुतं ततः॥ ज्ञानज्ञेयात्मकं सर्वं जगद्भ्रांतिप्रकल्पितं॥ ७५॥ निरधिष्ठानविभ्रांतेरभावादात्मनोस्तिता॥ शून्यस्यापिससाक्षित्वादन्यथा नोक्तिरस्य ते॥ ७६॥ अन्यो विज्ञानमयत आनंदमय आंतरः॥ अस्तीत्येवोपलब्धव्य इति वैदिकदर्शनं॥ ७७॥ अणुर्महान्मध्यमो वेत्येवं तत्रापि वादिनः॥ बहुधा विवदंते हि श्रुतियुक्तिसमाश्रयात॥ ७८॥ अणुं वदंत्यांतरालाः सूक्ष्मनाडीप्रचारतः॥ रोम्णः सहस्रभागेन तुल्यासु प्रचरत्ययं॥ ७९॥ श्री

रधिष्ठानस्य भ्रमस्यानुपपत्तेः जगत्कल्पनाधिष्ठानस्यात्मनः सत्ताभ्युपगंतव्या॥ किंच शून्यवादिनापि शून्यसाक्षित्वेनावश्यमात्माभ्युपगंतव्यः॥ अन्यथा तस्यानभ्युपगमे अस्य शून्यस्योक्तिः शून्यमित्यभिधानं ते बौद्धस्य तव मते न सिध्येदिति भावः॥ ७६॥ कस्तर्ह्यात्मेत्यत आह॥ अन्य इति॥ तस्माद्वा एतस्माद्विज्ञानमयादन्योंतर आत्मानंदमयः॥ अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन चेति श्रुतिसद्भावादानंदमय आत्माभ्युपगंतव्य इति वैदिकदर्शनं वैदिकसिद्धांतः॥ ७७॥ एवमात्मस्वरूपवादिविप्रतिपत्तिं प्रदर्श्य इदानीं तत्परिमाणविशेषवादिविप्रतिपत्तिं दर्शयति॥ अणुरिति॥ ७८॥ अत्राणुत्ववादिनस्तावद्दर्शयति॥ अणुमिति॥ अणुत्वाभिधाने हेतुमाह॥ सूक्ष्मेति॥ तदुपपादयति॥ रोम्ण इति॥ नाडीष्विति शेषः॥ सूक्ष्मासु नाडीषु संचारोणुत्वमंतरेण न घटत इत्यभिप्रायः॥ ७९॥ श्री

अणुत्वे किं प्रमाणमित्यत आह॥ अणोरिति॥ अणोरणीयान्महतो महीयान् एषोणुरात्मा चेतसा वेदितव्यः॥ सूक्ष्मात्सूक्ष्मतरं नित्यमित्यादि श्रुतय इत्यर्थः॥ ८०॥ श्रुत्यंतरमुदाहरति॥ वालाग्रेति॥ ८१॥ मध्यमपरिमाणवादिनो दर्शयति॥ दिगंबरा इति॥ तत्रोपपत्तिमाह॥ आपादतिमस्तक इह प्रविष्ट आनखाग्रेभ्य इति श्रुतिरप्यत्र प्रमाणमित्याह॥ आनखाग्रेति॥ ८२॥ ननु मध्यमपरिमाणत्वे श्रुतिसिद्धो नाडीप्रचारो न घटत इत्याशंक्याह॥ सूक्ष्मनाडीति॥ यथा देहावयवयोर्हस्तयोः कंचुकप्रवेशेन देहस्य कंचुकप्रवेशस्तद्वदात्मावयवानां सूक्ष्माणां नाडीषु प्रचारणात्मनोपि प्रचार उपचर्यत इत्यर्थः॥ ८३॥ नन्वात्मनो नियतमध्यमपरिमाणत्वे कर्मवशान्न्यूनाधिकशरीरप्रवेशो न घटत इत्याशंक्य अवयवागमापायाभ्यामात्मनो नियतमध्यमपरिमाणत्वाद्देहवदुभयं न विरुध्यत इत्याह॥ न्यूनाधिकेति॥ फलित

अणोरणीयानेषोणुः सूक्ष्मात्सूक्ष्मतरं त्विति॥ अणुत्वमाहुः श्रुतयः शतशोथ सहस्रशः॥ ८०॥ वालाग्रशतभागस्य शतधा कल्पितस्य च॥ भागो जीवः स विज्ञेय इति चाह परा श्रुतिः॥ ८१॥ दिगंबरा मध्यमत्वमाहुरापादमस्तकं॥ चैतन्यव्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि॥ ८२॥ सूक्ष्मनाडीप्रचारस्तु सूक्ष्मैरवयवैर्भवेत॥ स्थूलदेहस्य हस्ताभ्यां कंचुकप्रतिमोकवत॥ ८३॥ न्यूनाधिकशरीरेषु प्रवेशोपि गमागमैः॥ आत्मांशानां भवेत्तेन मध्यमत्वं विनिश्चितं॥ ८४॥ सांशस्य घटवन्नाशो भवत्येव तथा सति॥ कृतनाशाकृताभ्यागमयोः को वारको भवेत॥ ८५॥ तस्मादात्मा महानेव नैवाणुर्नापि मध्यमः॥ आकाशवत्सर्वगतो निरंशः श्रुतिसंमतः॥ ८६॥ इत्युक्त्वा तद्विशेषे तु बहुधा कलहं ययुः॥ अचिद्रूपोथ चिद्रूपश्चिदचिद्रूप इत्यपि॥ ८७॥ प्राभाकरास्तार्किकाश्च प्राहुरस्याचिदात्मतां॥ आकाशवद्द्रव्यमात्मा शब्दवत्तद्गुणाश्चितिः॥ ८८॥

माह॥ तेनेति॥ ८४॥ आत्मनः सावयवत्वे घटादिवदनित्यत्वप्रसंगेन तत॥ दूषयति॥ सांशस्येति॥ भवतु को दोषस्तत्राह॥ तथा सतीति॥ कृतयोः पुण्यपापयोर्भोगमंतरेण नाशः अकृतयोरकस्मात्फलदातृत्वमकृताभ्यागमः॥ एतद्दोषद्वयमात्मनो नित्यत्वाभ्युपगमे भवेदिति भावः॥ ८५॥ अतः पारिशेष्यादात्मनो विभुत्वं सिद्धमित्याह॥ तस्मादिति॥ तत्र प्रमाणमाह॥ आकाशवदिति॥ आकाशवत्सर्वगतश्च नित्यः निष्कलं निष्क्रियमित्याद्यागमः प्रमाणमित्यर्थः॥ ८६॥ एवमात्मनो विभुत्वं प्रसाध्य तस्यचिद्रूपत्वं निश्चेतुं तावद्वादिविप्रतिपत्तिं दर्शयति इत्युक्त्वेति॥ ८७॥ अचिद्रूपत्ववादिनो दर्शयति॥ प्राभाकरा इति॥ तत्प्रक्रियामनुभाषते॥ आकाशवद्द्रव्यमिति॥ आत्मा द्रव्यं भवितुमर्हति गुणवत्वादाकाशवदिति अनुमानं सूचितं॥ आत्मनः पृथिव्यादिभ्यो भेदसाधकं विशेषगुणं दर्शयति॥ शब्दवदिति॥ आत्मा पृथिव्यादिभ्यो भिद्यते ज्ञानगुणकत्वात॥ यत्पृथिव्यादिभ्यो न भिद्यते तत् ज्ञानगुणकमपि न भवति यथा पृथिव्यादीत्यनुमानं द्रष्टव्यं॥ ८८॥

89/1938

पं० द० वि० टि०

तयोः कार्यकारणभावमाह॥ अहंप्रत्ययबीजत्वमिति॥ तदेवोपपादयति॥ अविदित्वेति॥ अहंवृत्त्युदयाभावे इदंवृत्त्यनुदयादनयोः का
र्यकारणभाव इत्यर्थः॥ ७१॥ तस्य विज्ञानस्य क्षणिकत्वमनुभवं प्रमाणयति॥ क्षणेक्षण इति॥ क्षणिकत्वमुपपाद्य स्वप्रकाशत्वमुपपा
दयति स्वप्रकाशं इति॥ स्वेनैव प्रमितत्वादित्यर्थः॥ ७२॥ विज्ञानस्यात्मत्वे आगमः प्रमाणमित्याह॥ विज्ञानमय इति तस्माद्वा एतस्मा
न्मनोमयादन्योऽन्तर आत्मा विज्ञानमयः॥ विज्ञानं यज्ञं तनुते इत्यादि वाक्यं विज्ञानस्यात्मत्वप्रतिपादकमिति भावः॥ ७३॥ योगाचारान्तर
स्वभेदस्य शून्यवादिनो मतं दर्शयति॥ विज्ञानमिति॥ ७४॥ तत्र युक्तिमाह॥ असदेवेदमिति॥ शून्यस्यैव तद्रूपत्वे प्रतीयमान
स्य जगतः॥ का गतिरित्यत आह॥ ज्ञानेति॥ ७५॥ तदेतन्मतं दूषयति॥ निरधिष्ठानेति॥ निःस्वरूपस्य शून्यस्याधिष्ठानत्वायोगान्नि

अहंप्रत्ययबीजत्वमिदंवृत्तेरिति स्फुटं॥ अविदित्वा स्वमात्मानं बाह्यं वेत्ति न तु क्वचित्॥ ७१॥ क्षणेक्षणे जन्मनाशावहंवृत्तेर्मितौ यतः
॥ विज्ञानं क्षणिकं तेन स्वप्रकाशं स्वतो मितेः॥ ७२॥ विज्ञानमयकोशोऽयं जीव इत्यागमा जगुः॥ सर्वः संसार एतस्य जन्मनाशसुखादिकः
॥ ७३॥ विज्ञानं क्षणिकं नात्मा विद्युदभ्रनिमेषवत्॥ अन्यस्यानुपलब्धत्वाच्छून्यं माध्यमिका जगुः॥ ७४॥ असदेवेदमित्यादाविदमेव श्रु
तं ततः॥ ज्ञानज्ञेयात्मकं सर्वं जगद्भ्रान्तिप्रकल्पितं॥ ७५॥ निरधिष्ठानविभ्रान्तेरभावादात्मनोऽस्तिता॥ शून्यस्यापि ससाक्षित्वादन्यथा
नोक्तिरस्य ते॥ ७६॥ अन्यो विज्ञानमयत आनंदमय आंतरः॥ अस्तीत्येवोपलब्धव्य इति वैदिकदर्शनं॥ ७७॥ अणुर्महान्मध्यमो वेत्ये
वं नानावादिनः॥ बहुधा विवदंते हि श्रुतियुक्तिसमाश्रयात्॥ ७८॥ अणुं वदन्त्यान्तरालाः सूक्ष्मनाडीप्रचारतः॥ रोम्णः सहस्रभागेन तुल
यासु प्रचरत्ययं॥ ७९॥ ६:

रधिष्ठानस्य भ्रमस्यानुपपत्तेः जगत्कल्पनाधिष्ठानस्यात्मनः सत्ताभ्युपगंतव्या॥ किंच शून्यवादिनापि शून्यसाक्षित्वेनावश्यमात्मा
भ्युपगंतव्यः॥ अन्यथा तस्यानभ्युपगमे अस्य शून्यस्योक्तिः शून्यमित्यभिधानं ते तवाध्यक्षस्य तव मतं न सिध्येदिति भावः॥ ७६॥ क
स्तर्ह्यात्मेत्यत आह॥ अन्य इति॥ तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मानंदमयः॥ अस्तीत्येवोपलब्धव्यस्तत्त्वभावेन च
श्रुतिसद्भावादानंदमय आत्माभ्युपगंतव्य इति वैदिकदर्शनं वैदिकसिद्धांतः॥ ७७॥ एवमात्मस्वरूपे वादिविप्रतिपत्तिं प्रदर्श्येदं तत्परि
माणविशेषेऽपि वादिविप्रतिपत्तिं दर्शयति॥ अणुरिति॥ ७८॥ अत्राणुत्ववादिनस्तावद्दर्शयति॥ अणुमिति॥ अणुत्वाभिधाने हेतुमा
ह॥ सूक्ष्मेति॥ तदुपपादयति॥ रोम्ण इति॥ नाडीष्विति शेषः॥ सूक्ष्मासु नाडीषु संचाराणुत्वमंतरेण न घटत इत्यभिप्रायः॥ ७९॥ श्री

श्री

89/1938

अणुत्वे किं प्रमाणमित्यत आह॥ अणोरिति॥ अणोरणीयान्महतो महीयान् एषोऽणुरात्मा चेतसा वेदितव्यः॥ सूक्ष्मात्सूक्ष्मतरं नित्यमित्या
दि॥ श्रुतय इत्यर्थः॥ ८०॥ श्रुत्यंतरमुदाहरति॥ वालाग्रेति॥ ८१॥ मध्यमपरिमाणवादिनो दर्शयति॥ दिगंबरा इति॥ तत्रोपपत्तिमाह॥
आपादेति मस्तकदेहं प्रविष्ट आनखाग्रेभ्य इति श्रुतिरप्यत्र प्रमाणमित्याह॥ आनखाग्रेति॥ ८२॥ ननु मध्यमपरिमाणत्वे श्रुतिसिद्धाना
डीप्रचारो न घटत इत्याशंक्याह॥ सूक्ष्मनाडीति॥ यथा देहावयवयोर्हस्तयोः कंचुकप्रवेशेन देहस्य कंचुकप्रवेशस्तद्वदात्मावयवानां
सूक्ष्माणां नाडीषु प्रचारेणात्मनोऽपि प्रचार उपचर्यत इत्यर्थः॥ ८३॥ नन्वात्मनो नियतमध्यमपरिमाणत्वे कर्मवशान्न्यूनाधिकशरीरप्रवे
शो न घटत इत्याशंक्य अवयवागमापायाभ्यामात्मनो नियतमध्यमपरिमाणत्वाद्देहवदुभयं न विरुध्यत इत्याह॥ न्यूनाधिकेति॥ फलित

अणोरणीयानेषोऽणुः सूक्ष्मात्सूक्ष्मतरं त्विति॥ अणुत्वमाहुः श्रुतयः शतशोऽथ सहस्रशः॥ ८०॥ वालाग्रशतभागस्य शतधा कल्पितस्य
च॥ भागो जीवः स विज्ञेय इति चाहापरा श्रुतिः॥ ८१॥ दिगंबरा मध्यमत्वमाहुरापादमस्तकं॥ चैतन्यव्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि॥ ८२॥
सूक्ष्मनाडीप्रचारस्तु सूक्ष्मैरवयवैर्भवेत्॥ स्थूलदेहस्य हस्ताभ्यां कंचुकप्रतिमोकवत्॥ ८३॥ न्यूनाधिकशरीरेषु प्रवेशोऽपि गमागमैः॥ आ
त्मांशानां भवेत्तेन मध्यमत्वं विनिश्चितं॥ ८४॥ सांशस्य घटवन्नाशो भवत्येव तथा सति॥ कृतनाशाकृताभ्यागमयोः को वारको भवेत्॥ ८५॥
तस्मादात्मा महानेव नैवाणुर्नापि मध्यमः॥ आकाशवत्सर्वगतो निरंशः श्रुतिसंमतः॥ ८६॥ इत्युक्त्वा तद्विशेषे तु बहुधा कलहं ययुः॥ अचिद्रू
पोऽथ चिद्रूपश्चिदचिद्रूप इत्यपि॥ ८७॥ प्राभाकरास्तार्किकाश्च प्राहुरस्याचिदात्मतां॥ आकाशवद्द्रव्यमात्मा शब्दवत्तद्गुणश्चितिः॥ ८८॥

माह॥ तन्नेति॥ ८४॥ आत्मनः सावयवत्वे घटादिवदनित्यत्वप्रसंगेन तत् दूषयति॥ सांशस्येति॥ भवतु को दोषस्तत्राह॥ तथा स
तीति॥ कृतयोः पुण्यपापयोर्भोगमंतरेण नाशः अकृतयोरकस्मात्फलदातृत्वमकृताभ्यागमः॥ एतद्दोषद्वयमात्मनोऽनित्यत्वाभ्यु
पगमे भवेदिति भावः॥ ८५॥ अतः पारिशेष्यादात्मनो विभुत्वं सिद्धमित्याह॥ तस्मादिति॥ तत्र प्रमाणमाह॥ आकाशवदिति॥ आका
शवत्सर्वगतश्च नित्यः निष्कलं निष्क्रियमित्याद्यागमः प्रमाणमित्यर्थः॥ ८६॥ एवमात्मनो विभुत्वं प्रसाध्य तस्याचिद्रूपत्वं निश्चेतुं तावद्वा
दिविप्रतिपत्तिं दर्शयति इत्युक्त्वेति॥ ८७॥ अचिद्रूपत्ववादिनो दर्शयति॥ प्राभाकरा इति॥ तत्प्रक्रियामनुभाषते॥ आकाशवद्द्रव्यमिति॥ आ
त्मा द्रव्यं विभुर्महति गुणवत्त्वादाकाशवदिति अनुमानं सूचितं॥ आत्मनः पृथिव्यादिभ्यो भेदसाधकं विशेषगुणं दर्शयति॥ शब्दवदिति॥ आ
त्मा पृथिव्यादिभ्यो भिद्यते ज्ञानगुणकत्वात्॥ यस्तु पृथिव्यादिभ्यो न भिद्यते तत् ज्ञानगुणकमपि न भवति यथा पृथिव्यादीत्यनुमानं द्रष्टव्यं॥ ८८॥

पं०द०वि०टि०

१

तंस्येवविशेषगुणांतराण्याह॥ इच्छेति॥ तत्संस्काराः भावनाः॥ ८९॥ एषांगुणानामुत्पत्तिविनाशकारणमाह॥ आत्मनइति॥ स्वाहष्ट
वशात आत्मनोमनसायोगइत्यन्वयः॥ ९०॥ आत्मनश्चिद्रूपत्वेकथंचेतनत्वाभ्युपगमइत्याशंक्यचितिमत्वादित्याह॥ चितिमत्वादि
ति॥ आत्मनश्चेतनत्वेहत्वंतरमाह॥ इच्छेति॥ तस्येश्वराद्वैलक्षण्यमाह॥ स्वादिति॥ ९३॥ नन्वात्मनोविभुत्वेलोकांतरगमनादिकंकथंघ
टेतेत्याशंक्यास्मिन्देहेकर्मवशादिच्छायुत्पत्तौसत्यामसात्मनोस्थानादिव्यवहारइवकर्मवशाल्लोकांतरदेहांतरात्पत्तौतदवच्छिन्नात्मत्वप्र
देशेसुखादुत्पत्तिवशात्तत्रात्मनोगमनादिव्यवहारइत्यौपचारिकमात्मनोगमनादिकमित्यभिप्रेत्याह॥ यथात्रकर्मवशातइति॥ ९२॥ आत्म
नः कर्तृत्वादिधर्मवत्वेकिंप्रमाणमित्यतआह॥ कर्मकांडइति॥ ९३॥ नन्वन्यानविज्ञानमयात॥ आनंदमयआंतरइत्यत्रानंदमयस्यात्म

इच्छाद्वेषप्रयत्नाश्चधर्माधर्मौसुखासुखे॥ तत्संस्काराश्चतस्यैतेगुणाश्चितिवदीरिताः॥ ८९॥ आत्मनोमनसायोगस्वाहष्टवशातोगुणाः
॥ जायंतेथप्रलीयंतेसुषुप्तेहष्टसंक्षयात॥ ९०॥ चितिमत्वाच्चेतनोयमिच्छाद्वेषप्रयत्नवान्॥ स्याद्धर्माधर्मयोः कर्ताभोक्तादुःखादिम
त्वतः॥ ९१॥ यथात्रकर्मवशातः कदाचित्सुखादिकं॥ तथालोकांतरेदेहेकर्मणेच्छादिजन्यते॥ ९२॥ एवंचसर्वगस्यापिसंभवेतांगमागमौ
॥ कर्मकांडःसमस्तोत्रप्रमाणमितिनेवदन॥ ९३॥ आनंदमयकोशाख्यःसुषुप्तौपरिशिष्यते॥ अस्पष्टचित्सआत्मैषांपूर्वकोशोस्यतेगुणाः॥
॥ ९४॥ गूढंचैतन्यमुत्प्रेक्ष्यजडबोधस्वरूपतां॥ आत्मनोब्रुवतेभाट्टाश्चिदुत्प्रेक्षोत्थितस्मृतेः॥ ९५॥ छः॥ श्रीः॥

त्वमुक्तमिदानीमिच्छादिमान॥ अन्यः प्रतिपाद्यतेतः पूर्वोत्तरविरोधइत्याशंक्याह॥ आनंदमयेति॥ सुषुप्तावस्पष्टचिद्य आनंदमयकोशः
परिशिष्यते॥ सपूर्वकोशः श्रोतपुपंचकोशेषुप्रथमस्यांप्राकारादीनांमात्मा अस्यात्मनस्तेपूर्वोक्ताःज्ञानादयोगुणाइत्यर्थः॥ ९४॥ अ
स्यैवात्मनश्चिदचिद्रूपत्वंभाट्टावर्णयंतीत्याह॥ गूढमिति॥ भाट्टाआत्मनोगूढमस्पष्टंचैतन्यमुत्प्रेक्ष्यउत्थितत्वाउत्थितस्यजायमाना
त्स्मरणात्सोपुं चिज्जडोभयात्मकतांवर्णयंति॥ चैतन्योत्प्रेक्षायाकारणमाह॥ चिदुत्प्रेक्षेति॥ उत्थितस्मृतेचिदुत्प्रेक्षाभवतीतियोजना॥
सुप्तोत्थितस्यजायमानात्स्मरणात्सोषुप्तचैतन्यस्योत्प्रेक्षाभवतीत्यर्थः॥ ९५॥ श्रीकृष्णाहरेवासुदेवपाहिमांकृपाकर॥ छ॥

श्रीः

१

91
1938

चिदुत्प्रेक्षाप्रकारमेवस्पष्टयति॥ जडोभूत्वेति॥ तदासुषुप्तिकालेजडोभूत्वास्वाप्समित्येवंरूपाजाड्यस्मृतिरुत्थितस्यपुरुषस्यजायमा
नासुषुप्तिकालीनजाड्यानुभवमंतरेणअनुपपद्यमानातदानींतनजाड्यानुभवंकल्पयतीतिभावः॥ ९६॥ सुषुप्तौचैतन्यलोपाभा
वेप्रमाणमाह॥ द्रष्टुरिति॥ नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेअविनाशित्वादिति॥ श्रुतेर्द्रष्टुरात्मनः स्वरूपभूतायाः दृष्टेर्लोपोनविद्यतेवि
नाशरहितस्वभावत्वात॥ अन्यथालोपवादिनोपिनिः साक्षिकस्यवक्तुमशक्यत्वात्सुषुप्तौचैतन्यलोपाभावः॥ श्रूयते॥ ततोपि
कारणादयमात्माद्योतनवदस्फुरणाभ्यांयुक्तोभवतीत्यर्थः॥ ९७॥ अस्मिन्भाट्टमतेदूषणाभिधानपुरःसरंसांख्यमतमुत्थापय

जडोभूत्वातदास्वाप्समितिजाड्यस्मृतिस्तदा॥ विनाजाड्यानुभूतिंनकथंचिदुपपद्यते॥ ९६॥ द्रष्टुर्दृष्टेरलोपश्चश्रुतःसुप्तौततस्त्व
यं॥ अप्रकाशप्रकाशाभ्यामात्माखद्योतवद्युतः॥ ९७॥ निरंशस्योभयात्मत्वंनकथंचितघटिष्यते॥ तेनचिद्रूपएवात्मेत्याहुःसां
ख्याविवेकिनः॥ ९८॥ जाड्यांशःप्रकृतेरूपंविकारित्रिगुणंचतत॥ चितोभोगापवर्गार्थंप्रकृतिःसाप्रवर्तते॥ ९९॥ असंगाया
श्चितेर्बंधमोक्षौभेदाग्रहान्मतौ॥ बंधमुक्तिव्यवस्थार्थंपूर्वेषामिवचिद्भिदा॥ १००॥ महतःपरमव्यक्तमितिप्रकृतिरुच्यते॥ श्रुतावसंगता
तद्वदसंगोहीत्यतःस्फुटा॥ १०१॥ चिसंनिधौप्रवृत्तायाःप्रकृतेर्हिनियामकं॥ ईश्वरंब्रुवतेयोगाःसजीवेभ्यःपरःश्रुतः॥ २॥ छः॥

ति॥ निरंशस्येति॥ ९८॥ जाड्यस्मृतेस्तर्हिकागतिरित्याशंक्याह॥ जाड्यांशइति॥ ततप्रकृतिरूपंसत्वरजस्तमोगुणात्मकं॥ प्रकृति
कल्पनायाःप्रयोजनमाह॥ चितइति॥ चितःपुरुषस्येतियावत॥ ९९॥ ननुचितोसंगतत्वेनप्रकृतिपुरुषयोरत्यंताविविक्तत्वा
त॥ प्रकृतिप्रवृत्त्याकथंपुरुषस्यभोगापवर्गावित्याशंक्यतयोर्विवेकस्याग्रहणात्पुरुषभावापवर्गौव्यवह्रियेतेइत्याह॥ असंगा
याइति॥ तार्किकादिभिरिवसांख्यरात्मभेदोंगीक्रियतइत्याह॥ बंधमुक्तीति॥ १००॥ प्रकृतिसद्भावेपुरुषस्यासंगत्वेचश्रुतिमु
दाहरतिमहतइति॥ १०१॥ एवंजीवविषयंवादिविप्रतिपत्तिंप्रदर्श्येश्वरविषयांतांप्रदर्शयितुंईश्वररूपेतावत्कथापयति॥ चित्संनि
धाविति॥ ननुप्रकृतिपुरुषातिरिक्तेश्वरकल्पनमप्रमाणमित्याशंक्याह॥ सजीवेभ्यइति॥ १०२॥ श्रीराम॥ छ॥ जयराम॥ ॥

पं० द० वि० टी० ८

तामेवेश्वरसद्भावप्रतिपादिकां श्रुतिं पठति॥ प्रधानेति॥ प्रधानं गुणसाम्यावस्थारूपं क्षेत्रज्ञा जीवास्तेषां पतिः गुणाः सत्वादयस्तेषा मीशानि यामक इत्यर्थः॥ न केवलं नियमश्रुतिरीश्वरप्रतिपादिका॥ अंतर्यामिब्राह्मणमपीत्याह॥ आरण्यक इति॥३॥ तामेव वा दिप्रतिपादितं प्रतिजानीते॥ अत्रापीति प्रतिमनति कस्मिन्यथा प्रज्ञं॥ ४॥ इदानीं पतंजलिनोक्तमीश्वरप्रतिपादकं क्लेशकर्मविपाका शयैरपरामृष्टः पुरुषविशेष ईश्वर इत्येतत्सूत्रमर्थतः पठति॥ क्लेशेति॥ क्लेशा अविद्यादयः॥ पंच कर्माणि॥ कर्माशुक्लकृष्णं योगिनस्त्रिविधमितरेषामितिसूत्रितानि॥ सतिमूले तद्विपाको जात्यायुर्भोगा इत्युक्ताः कर्मविपाकाः फलविशेषास्तदाशया स्तेषां संस्का रास्तैः क्लेशादिभिरसंस्पृष्टः पुरुषविशेष ईश्वरो भवति॥ सोपि जीववदसंगश्चिद्रूपश्चेत्यर्थः॥ ५॥ नन्वसंगश्चिद्रूपश्चेत्कथं नियंतृ

प्रधानक्षेत्रज्ञपतिर्गुणेशाइतिहिश्रुतिः॥ आरण्यके संभ्रमणात्यंतर्याम्युपपादितः॥ ३॥ अत्रापि कलहायंते वादिनः स्वस्वयुक्तिभिः॥ वाक्यान्यपि यथाप्रज्ञं दार्ढ्यायोदाहरंति हि॥ ४॥ क्लेशकर्मविपाकैस्तदाशयैरप्यसंयुतः॥ पुंविशेषो भवेदीशो जीववत्सोप्यसंगचित्॥ ५॥ तथापि पुंविशेषत्वाद्घटते स्य नियंतृता॥ अव्यवस्थौ बंधमोक्षावापतेतामिहान्यथा॥ ६॥ भीषास्मादित्येवमादावसंगस्य परात्मनः॥ श्रु तं तद्युक्तमप्यस्य क्लेशकर्माद्यसंगमात्॥ ७॥ जीवानामप्यसंगत्वात् क्लेशादिर्नह्यथापि च॥ विवेकाग्रहतः क्लेशकर्मादि प्रागुदीरितं॥ ८॥ नित्यज्ञानप्रयत्नेच्छा गुणानीशस्य मन्वते॥ असंगस्य नियंतृत्वमयुक्तमिति तार्किकाः॥ ९॥ पुंविशेषत्वमप्यस्य गुणैरेव न चान्यथा॥ सत्यकामः सत्यसंकल्प इत्यादिश्रुतिर्जगौ॥ १०॥ नित्यज्ञानादिमत्वेस्य सृष्टिरेव सदा भवेत्॥ हिरण्यगर्भ ईशोतो लिंगदेहेन संयुतः॥ ११॥

त्वमित्यत आह॥ तथापीति॥ ईश्वरस्य नियंतृत्वानभ्युपगमदोषमाह॥ अव्यवस्थाविति॥ ६॥ असंगस्येश्वरनियंतृत्वं निष्प्रमाणकमित्या शंक्याह॥ भीषेति॥ तन्नियंतृत्वं श्रुतं॥ ननु श्रुतमप्ययुक्तं कथमंगीक्रियत इत्यत आह॥ युक्तमपीति॥ जीवधर्मस्य क्लेशादेरभावादुप पन्नं चेत्यर्थः॥ ७॥ ननु जीवा अप्यसंगचिद्रूपाः क्लेशादिरहितास्तथा चेश्वरं कोविशेष इत्याशंक्य जीवानां स्वतः क्लेशादिरहितत्वेपि बुध्यासह विवेकाग्रहात् क्लेशादिरस्तीति पूर्वोक्तं स्मारयति॥ जीवानामिति॥ ८॥ तार्किकास्त्वसंगस्य नियामकत्वमसहमाना जीवविलक्ष णान्यत्नज्ञानादिगुणत्रयं नित्यमंगीकुर्वंत इत्याह॥ ९॥ नित्येति॥ ९॥ नन्विच्छादिगुणकस्य तस्य कथं जीववैलक्षण्यमित्याशंक्य गुणानां नि त्यत्वादेवेति॥ परिहरति॥ पुंविशेषत्वमिति॥ गुणानां नित्यत्वे प्रमाणमाह॥ सत्येति॥ १०॥ तत्रापि दोषसद्भावात्पक्षांतरमाह॥ नित्येति॥ तस्य हिरण्यगर्भस्य किंरूपमित्यत आह॥ लिंगदेहेनेति॥ मायोपाधिकः परमात्मा लिंगशरीरसमष्ट्यभिमानेन हिरण्यगर्भ इत्यर्थः॥ ११॥ ७॥

श्री ८

93/1986

हिरण्यगर्भस्येश्वरत्वे किं प्रमाणमित्यत आह॥ उद्गीथेति॥ ननु लिंगशरीरयोरेव जीवः स्यादित्याशंक्याविद्याकामकर्माभावान्न जीव इत्याह॥ लिंगसत्वेपीति॥ १२॥ केवलं लिंगशरीरस्य स्थूलदेहं विहायानुपलभ्यमानत्वात्॥ स्थूलशरीरसमष्ट्यभिमानी वैराट ईश्वर इत्याह॥ स्थू लदेहं विनेति॥ १३॥ तत्सद्भावे प्रमाणमाह॥ सहस्रशीर्षेति श्रुतं वाक्यमिति शेषः॥ विश्वरूपस्य चिंतकाः॥ विराडुपासकाः॥ १४॥ तत्रा पि दोषदृष्ट्या देवतांतरमालंबत इत्याह॥ सर्वत इति॥ १५॥ एवं केरुच्यत इत्यत आह॥ पुत्रार्थमिति॥ प्रजापतिः प्रजा असृजतेत्यादिवाक्यं

उद्गीथब्राह्मणे तस्य माहात्म्यमतिविस्तृतं॥ लिंगसत्वेपि जीवत्वं नास्य कर्माद्यभावतः॥ १२॥ स्थूलदेहं विना लिंगदेहो न क्वापि दृश्यते॥ वै राजो देह ईशोतः सर्वतो मस्तकादिमान्॥ १३॥ सहस्रशीर्षेत्येवं हि विश्वतश्चक्षुरित्यपि॥ श्रुतमित्याहुरनिशं विश्वरूपस्य चिंतकाः॥ १४॥ सर्वतः पाणिपादत्वे क्रियोदरपि चेशता॥ ततश्चतुर्मुखो देह एव शोततरः पुमान्॥ १५॥ पुत्रार्थं तमुपासीना एवमाहुः प्रजापतिः॥ प्र जा असृजतेत्यादिश्रुतीश्चोदाहरंत्यमी॥ १६॥ विष्णोर्नाभेः समुद्भूतो वेधाः कमलजस्ततः॥ विष्णुरेवेश इत्याहुर्लोके भागवता जनाः॥ १७॥ शिवस्य पादावन्वेष्टुं शाङ्र्ग्यशक्तस्ततः शिवः॥ ईशो न विष्णुरित्याहुः शैवा आगममानिनः॥ १८॥ पुरत्रयं सादयितुं विघ्नेशं सोप्यपूज यत्॥ विनायकं प्राहुरीशं गाणपत्यमते रताः॥ १९॥ एवमन्ये स्वस्वपक्षाभिमानेनान्यथान्यथा॥ मंत्रार्थवादकल्पादीनाश्रित्य प्रतिपादि रे॥ २०॥ अंतर्यामिणमारभ्य स्थावरांतेशवादिनः॥ संत्यश्वत्थार्कवंशादेः कुलदेवत्वदर्शनात्॥ २१॥ तत्वनिश्चयकामेन न्यायागमविचा रिणां॥ एकैव प्रतिपत्तिः स्यात्सात्र स्फुटमुच्यते॥ २२॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं॥ अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्॥ २३॥

तत्र प्रमाणमित्याहुरित्याह॥ प्रजापतिरिति॥ १६॥ भागवतमतमाह॥ विष्णोरिति॥ १७॥ शैवानां मतं आह॥ शिवस्येति॥ १८॥ गाण पत्यमतमाह॥ पुरत्रयमिति॥ १९॥ उक्तन्यायमन्यत्राप्यतिदिशति॥ एवमिति॥ अन्ये भैरवमैरालाद्युपासकाः अन्यथान्यथा वर्ण नेकारणमाह॥ स्वस्वेति॥ तत्र तत्र प्रमाणानि संतीति दर्शयति॥ मंत्रेति॥ २०॥ एवं कतिमतानीत्याशंक्य असंख्यानीत्याह॥ अं तर्यामिणमिति॥ स्थावरशवादिनः क्वापि दृष्टचर इत्याशंक्याह॥ अश्वत्थार्केति॥ २१॥ नन्वेवं तेषु मतभेदेषु स्यात्पादेयत्वं कस्य वा हेयत्व मित्याकांक्षायामाह॥ तत्वनिश्चयेति॥ तत्वनिश्चयकामेन तत्वनिश्चयेच्छया॥ न्यायागमयोर्विचारणशीलानां पुरुषाणां प्रतिप त्तिरेकैव स्यात् सा कीदृशीत्यत आह॥ माय्यत्रेति॥ २२॥ ७॥ ७॥ ॥७॥ ॥७॥ श्रीः॥

नामेवप्रतिपत्तिंदर्शयितुंतदनुकूलांश्रुतिंपठति॥ मायांत्विति॥ मायामेवप्रकृतिंजगदुपादानकारणंविद्यात् जानीयात्॥ मा
यिनंतुमायोपाधिकंमंतर्यामिणमेवमहेश्वरंमायाधिष्ठातारंनिमित्तकारणंजानीयात्॥ अस्यमायिनोमहेश्वरस्यावय
वभूतैरंशरूपैस्तुराचरात्मकैर्जीवैः कृत्स्नमिदंजगत्व्याप्तमित्यस्याः श्रुतेरर्थः॥ २३॥ एतच्छ्रुत्यनुसारेणेश्वरविषयेऽनिर्व
चायुक्तइत्याह॥ इतीति॥ कुतोयुक्तइत्याशंक्यसर्वत्राविरुद्धत्वादित्याह॥ तथेति॥ सर्वस्यापीश्वरस्याभ्युपगमान्नकेनापि
विरोधइतिभावः॥ २४॥ ननुजगत्प्रकृतिभूतायामायायाः किंरूपमित्यतआह॥ मायाचेयमिति॥ कुतइत्यतआह॥ तापनी
यइति॥ मायाचतमोरूपेति॥ तापनीयोपनिषदितमोरूपत्वस्याभिधानादित्यर्थः॥ मायायास्तमोरूपत्वेकिंप्रमाणमित्याकां

मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरं॥ अस्यावयवभूतैस्तुव्याप्तंसर्वमिदंजगत्॥ २३॥ इतिश्रुत्यनुसारेणान्यायोऽनिर्वा
चईश्वरे॥ तथासर्वविरोधस्यात्तथावंरांतेशवादिनां॥ २४॥ मायाचेयंतमोरूपातापनीयेनदीरणात्॥ अनुभूतिंतत्रमानंप्रति
जज्ञेश्रुतिःस्वयं॥ २५॥ जडंमोहात्मकंतच्चेत्यनुभावयतिश्रुतिः॥ आबालगोपंस्पष्टत्वादानंत्यंतस्यसाब्रवीत्॥ २६॥ अचि
दात्मघटादीनांयत्स्वरूपंजडंहितत्॥ यत्रकुंठीभवेद्बुद्धिःसमोहइतिलौकिकाः॥ २७॥ इत्थंलौकिकदृष्ट्येतत्सर्वैरप्यनुभूयते॥ यु
क्तिदृष्ट्यात्वनिर्वाच्यंनासदासीदितिश्रुतेः॥ २८॥

क्षायांअनुभूतिमितिश्रुतिरेवाचानुभवतः प्रमाणमिति प्रतिजानीतइत्याह॥ अनुभूतिमिति॥ २५॥ तत्रमायास्तमोरूपत्वेकोसावनुभव
इत्याकांक्षायांतदनंतजडंमोहात्मकमितिश्रुतिरेवाचानुभवंस्पष्टयतीत्याह॥ जडमिति॥ अनंतमितिश्रुत्यासर्वानुभवसिद्धत्वमुच्यतइ
त्याह॥ आबालेति॥ जडंमोहंचप्रकृतेः कार्यमितिआबालगोपालादीनांसर्वेषांअनुभवइत्यर्थः॥ २६॥ जडशब्दस्यार्थमाह॥ अचिदा
त्मेति मोहशब्दार्थमाह॥ यत्रेति॥ २७॥ उक्तप्रकारेणसर्वानुभवसिद्धत्वलक्षणमानंत्यंसिद्धमित्याह॥ इत्थमिति॥ एतज्जाड्यमोह
लक्षणतमोरूपत्वं॥ नन्वेवंमायायाः सर्वानुभवसिद्धत्वेघटादिवत्॥ ज्ञानेनानिवर्त्यत्वंस्यादित्याशंक्याह॥ युक्तीति॥ तुशब्दःशं
काव्यावृत्त्यर्थः॥ अनिर्वाच्यंसत्वेनासत्वेनसदसत्वेनानिर्वाच्यंकुमत्रावयं॥ तत्रकिंप्रमाणमित्यतआह॥ नसादितिश्रुतेः॥ २८॥

95/1938

अन्यथाकरणमेव स्पष्टयति॥ कूटस्थासंगमिति॥ जीवेशावाभासेन करोतीति श्रुत्युक्तं जीवेश्वरविभागं च करोतीत्याह॥ चिदा
भासेति॥ ३३॥ नन्वात्मनोऽन्यथाकरणे कूटस्थत्वहानिः स्यादित्याशंक्याह॥ कूटस्थमिति॥ ननु कूटस्थत्वाविघातेन जगदादिस्व
रूपत्वापादनं दुर्घटमित्याशंक्य मायायां दुर्घटकविधायिन्यां नेदमाश्चर्यकारणमित्याह॥ दुर्घटेति॥ अन्यथा मायात्वमेव भज्ये
तेति भावः॥ ३४॥ मायाया दुर्घटकारित्वस्वभावत्वे दृष्टांतमाह॥ द्रवत्वमिति॥ उदकादीनां द्रवत्वादि यथा स्वाभाविकं तद्वन्मायाया
दुर्घटकारित्वमित्यर्थः॥ ३५॥ ननु मायाया दुर्घटकारित्वमाश्चर्यकारणं न भवतीति उक्तं अनुपपन्नं लोके मायाया आश्चर्यकारहे

कूटस्थमसंगमात्मानं जगत्त्वेन करोति सा॥ चिदाभासस्वरूपेण जीवेशावपि निर्ममे॥ ३३॥ कूटस्थमनुपद्रुत्य करोति जगदादिकं॥
दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः॥ ३४॥ द्रवत्वमुदके वह्नावौष्ण्यं काठिन्यमश्मनि॥ मायाया दुर्घटत्वं च स्वतः सिध्य
ति नान्यतः॥ ३५॥ न वेत्ति लोको यावत्तं साक्षात्तावच्चमत्कृतिं॥ धत्ते मनसि पश्चात्तु मायैषेत्युपशाम्यति॥ ३६॥ प्रसरंति हि चोद्या
न्यानि जगद्वस्तुत्ववादिषु॥ न चोदनीयं मायायां तस्याश्चोद्यैकरूपतः॥ ३७॥ चोद्येऽपि यदि चोद्यं स्यात्त्वच्चोद्ये चोद्यते मया॥
परिहार्यं ततश्चोद्यं न पुनः प्रतिचोद्यतां॥ ३८॥ विस्मयैकशरीराया मायायाश्चोद्यरूपतः॥ अन्वेष्यः परिहारोऽस्या बुद्धिमद्भिः
प्रयत्नतः॥ ३९॥ मायात्वमेव निश्चेयमिति चेत्तर्हि निश्चिनु॥ लोकप्रसिद्धमायाया लक्षणं यत्तदीक्ष्यतां॥ ?४०॥ श्रीः॥

श्रीः

तुल्यदर्शनादित्याशंक्य मायाप्रयोक्तृसाक्षात्कारपर्यंतमेवास्या आश्चर्यकारणत्वं नोपरिष्टादित्याह॥ न वेत्तीति॥ ३६॥ किं
च॥ जगत्सत्यत्ववादिनां नैय्यायिकादीन् प्रत्येवं विधानि चोद्यानि कर्तव्यानि न मायावादिनं प्रतीत्याह॥ प्रसरंतीति॥ ३७॥
मायावादिनं प्रति चोद्यकरणे तिप्रसंगमाह॥ चोद्येऽपीति॥ तर्हि किं कर्तव्यमित्यत आह॥ परिहार्यमिति॥ ३८॥ उक्तमेवा
र्थं प्रपंचयति॥ विस्मयेति॥ ३९॥ मायात्वनिश्चये तत्परिहारान्वेषणमुचितं तत्त्वेनेदानीं सिद्धमिति शंकते॥ मायात्वमिति
॥ मायालक्षणसद्भावान्मायात्वं निश्चीयतामित्यभिप्रायेणाह॥ तर्हीति॥ किंलक्षणमित्यत आह॥ लोकेति॥ ४०॥ श्रीः॥

१०

97/1938

तस्या अपि किं लक्षणमित्यत आह॥ न निरूपयितुमिति॥ ४१॥ दृष्टांतेसिद्धं लक्षणं दार्ष्टांतिके योजयति॥ स्पष्टमिति॥ ४२॥ जग
तोऽशक्यनिरूपणत्वं कथमित्याशंक्य तद्दर्शयति॥ निरूपयितुमिति॥ ४३॥ अशक्यनिरूपणत्वमेवोदाहरणेन स्पष्टयति॥ दे
हेंद्रियेति॥ ४४॥ स्वभाववादी शंकते॥ वीर्यस्येति॥ सिद्धांती पृच्छति॥ कथं तदिति॥ अन्वयव्यतिरेकाभ्यां जानामीत्याशंक्य

न निरूपयितुं शक्या विस्पष्टं भासते च या॥ सा मायेतींद्रजालादौ लोकाः संप्रतिपेदिरे॥ ४१॥ स्पष्टं भाति जगच्चेदमशक्यं त
न्निरूपणं॥ मायामयं जगत्तस्मादीक्षस्वापक्षपाततः॥ ४२॥ निरूपयितुमारब्धे निखिलैरपि पंडितैः॥ अज्ञानं पुरतस्तेषां
भाति कक्षासु कासुचित्॥ ४३॥ देहेंद्रियादयो भावा वीर्येणोत्पादिताः कथं॥ कथं वा तत्र चैतन्यमित्युक्ते ते किमुत्तरं॥ ४४॥
वीर्यस्यैष स्वभावश्चेत्कथं तद्विदितं त्वया॥ अन्वयव्यतिरेकौ यौ भग्नौ तौ वंध्यवीर्यतः॥ ४५॥ न जानामि किमप्येतदित्यंते श
रणं तव॥ अत एव महांतोऽस्य प्रवदंतींद्रजालतां॥ ४६॥ एतस्मात्किमिवेंद्रजालमपरं यद्गर्भवासस्थितं॥ रेतश्चेतति हस्तमस्तक
पदप्रोद्भूतनानांकुरं॥ पर्यायेण शिशुत्वयौवनजरावेषैरनेकैर्वृतं पश्यत्यत्ति शृणोति जिघ्रति तथा गच्छत्यथागच्छति॥ ४७॥
देहवद्वटधानादौ सुविचार्य विलोक्यतां॥ क्व धाना कुत्र वा वृक्षस्तस्मान्मायेति निश्चिनु॥ ४८॥ निरुक्तावभिमानं ये दधते ता
र्किकादयः॥ हर्षमिश्रादिभिस्ते तु खंडनादौ सुशिक्षिताः॥ ४९॥ अचिंत्याः खलु ये भावा न तांस्तर्केषु योजयेत्॥ अचिंत्यरचना
रूप्यं मनसापि जगत्खलु॥ १५०॥ अचिंत्यरचनाशक्तिबीजं मायेति निश्चिनु॥ मायाबीजं तदेवैकं सुषुप्तावनुभूयते॥ १५१॥ ॥

व्याप्त्यभावान्नेत्यर्थमित्याह॥ अन्वयेति॥ ४५॥ एवं पुनः पुनः पृष्टः सन् किमपि न जानामीत्येवोत्तरं देयमिति फलितमाह॥ न जानामी
ति॥ ४६॥ उक्तानिर्वचनीयत्वे वृद्धसंमतिं दर्शयति॥ एतस्मादिति॥ ४७॥ न केवलं देहस्यैकस्यैव दुर्निरूपत्वं किंतु वटादेरपी
त्याह॥ देहवदिति॥ ४८॥ नन्वस्माभिर्विवेक्तुमशक्यत्वेऽपि उदयनादिभिराचार्यैर्निरुच्यत इत्याशंक्याह॥ निरुक्ताविति॥ ४९॥
उक्तार्थे सांप्रदायिकानां वाक्यं संवादयति॥ अचिंत्या इति॥ १५०॥ ननु भवत्त्वेवं जगतोऽचिंत्यरचनात्वं मायायाः किमायातमि
त्यत आह॥ अचिंत्यरचनेति॥ अचिंत्यरचनाशक्तिमत्यद्बीजं कारणं सैव मायेत्यर्थः॥ नन्वेवंविधं कारणं क्व दृष्टमित्यत आ
ह॥ मायेति॥ १५१॥

कथंतस्याजगद्बीजत्वमित्यतआह॥ आप्रलयादिति॥ ततः किमित्यतआह॥ तस्मादिति॥ यतोजगत्कारणंमायातोशेषजगद्वासना
स्तत्रमायायांतिष्ठंतीत्यर्थः॥ ५२॥ ततोपिकिंतत्राह॥ याबुद्धीति॥ ननुतासुप्रतिबिंबोस्तिचेत्कुतोनानुभूयतइत्याशंक्या
स्पष्टत्वादित्याह॥ मेघेति॥ तर्हिकुतस्तत्सिद्धिरित्यतआह॥ अनुमीयतामिति॥ ५३॥ ननुमेघांशोदकस्यास्पष्टाकाशप्रति
बिंबवत्त्वेपितज्जातीयस्यघटोदकस्यस्पष्टाकाशप्रतिबिंबवतः सद्भावान्मेघाकाशानुमानंघटते॥ इहतथाविधदृष्टांता
भावात्कथमनुमानोदयइत्याशंक्यात्रापितथाविधदृष्टांतसंपादनायाह॥ साभासमिति॥ चिदाभासविशिष्टंतदेवाज्ञानं

आप्रलयंप्रजगत्तत्रलीनंबीजइवद्रुमः॥ तस्मादशेषजगतोवासनास्तत्रसंस्थिताः॥ ५२॥ याबुद्धिवासनास्तासुचैतन्यंप्रति
बिंबति॥ मेघाकाशवदस्पष्टचिदाभासोनुमीयतां॥ ५३॥ साभासमेवतद्बीजंधीरूपेणप्ररोहति॥ अतोबुद्धौचिदाभासोवि
स्पष्टंप्रतिभासते॥ ५४॥ मायाभासेनजीवेशौकरोतीतिश्रुतौश्रुतं॥ मेघाकाशजलाकाशाविवतौसुव्यवस्थितौ॥ ५५॥ मेघ
वद्वर्ततेमायामेघस्थिततुषारवत्॥ धीवासनाश्चिदाभासस्तुषारस्थखवत्स्थितः॥ ५६॥ मायाधीनश्चिदाभासः श्रुतोमायी
महेश्वरः॥ अंतर्यामीचसर्वज्ञोजगद्योनिः सएवहि॥ ५७॥ सौषुप्तमानंदमयंप्रक्रम्यैवंश्रुतिर्जगौ॥ एषसर्वेश्वरइतिसोयंवे
दोक्तईश्वरः॥ ५८॥

बुद्धिरूपेणपरिणममानंविस्पष्टचिदाभासवद्भवतीतिभावः॥ एवंचेदनुमानमत्रसूचितंभवति॥ विमताबुद्धिवासनाश्चि
त्प्रतिबिंबवत्योभवितुमर्हंतिबुद्ध्यवस्थाविशेषत्वाद्बुद्धिवृत्तिवदिति॥ ५४॥ एवंजीवेश्वरयोर्मायिकत्वंश्रुत्युक्तमुपपादित
मुपसंहरति॥ मायाभासेनेति॥ ननुजीवेशयोर्मायिकत्वेसमानेकथमवांतरभेदसिद्धिरित्याशंक्यास्पष्टस्पष्टोपाधिमत्त्वे
नमेघाकाशजलाकाशयोरिवतत्सिद्धिरित्याह॥ मेघाकाशेति॥ ५५॥ ईशस्यमेघाकाशसाम्यंस्फुटीकरोति॥ मेघवदि
ति॥ ५६॥ मायाप्रतिबिंबस्येश्वरत्वेकिंप्रमाणमित्याशंक्यश्रुतिरेवेत्याह॥ मायाधीनइति॥ नकेवलमीश्वरत्वमस्यश्रुतं
अपित्वंतर्यामित्वादिकमपिधर्मजातंश्रुतमस्तीत्याह॥ अंतर्यामीति॥ ५७॥ श्रीः छः श्रीराम॥ हरिविठ्ठलपाहिमां
ननुधीवासनाप्रतिबिंबस्येश्वरत्वादिकंकथंश्रुतिसिद्धंइत्याशंक्यतदुपपादिकांश्रुतिंदर्शयति॥ सौषुप्तमिति॥ सुषुप्तस्थानएकी
भूतः प्रज्ञानघनएवेत्यादिकाश्रुतिर्धीवासनाप्रतिबिंबरूपस्यानंदमयस्येश्वरत्वादिकंप्रतिपादयतीत्यर्थः॥ १५८॥ छः॥

श्रीः

३३

ननुआनंदमयस्यसर्वज्ञत्वादिकंअनुभवविरुद्धमित्याशंक्याह॥ सर्वज्ञत्वादिकइति॥ कुतइत्यतआह॥ श्रौतेति॥ इतोपि
नविप्रतिपत्तिः कार्येत्याह॥ मायायामिति॥ ५९॥ नन्वनुकूलयुक्त्यभावेश्रुतिरपिग्रावप्लवनवाक्यवदर्थवादः स्यादित्या
शंक्यश्रुतिप्रामाण्यसिद्धयेसर्वेश्वरत्वादिकमुपपादयति॥ अयमिति॥ अयमानंदमयोयदादिविश्वंसृजतितत्केना
प्यन्यथाकर्तुंनशक्यते॥ अतोयंसर्वेश्वरइत्यर्थः॥ ६०॥ इदानींसर्वज्ञत्वमुपपादयति॥ अशेषेति॥ तत्रसौषुप्तेज्ञानेकारणभू
तेकार्यभूतानांसर्वप्राणिबुद्धीनांवासनानिवसंतितात्भिश्चवासनाभिः सर्वजगत्क्रोडीकृतंविषयीकृतंतेनसर्वबुद्धिवासना
वदज्ञानोपाधिकत्वेनसर्वज्ञउच्यतइत्यर्थः॥ ६१॥ ननुयदिसर्वज्ञत्वमस्तितर्हितत्॥ कुतोनानुभूयतइत्याशंक्यतदुपाधीनां

सर्वज्ञत्वादिकेतस्यनैवविप्रतिपद्यतां॥ श्रौतार्थस्यावितर्क्यत्वान्मायायांसर्वसंभवात्॥ ५९॥ अयंयत्सृजतेविश्वंतदन्यथ
यितुंपुमान्॥ नकोपिशक्तस्तेनायंसर्वेश्वरइतीरितः॥ ६०॥ अशेषप्राणिबुद्धीनांवासनास्तत्रसंस्थिताः॥ ताभिः क्रोडीकृतं
सर्वंतेनसर्वज्ञईरितः॥ ६१॥ वासनानांपरोक्षत्वात्सर्वज्ञत्वंनहीक्ष्यते॥ सर्वबुद्धिषुतद्दृष्ट्वावासनास्वनुमीयतां॥ ६२॥ वि
ज्ञानमयमुख्येषुकोशेष्वन्यत्रचैवहि॥ अंतस्तिष्ठन्यमयतितेनांतर्यामितांव्रजेत्॥ ६३॥ बुद्धौतिष्ठन्नांतरोस्याधियानीक्ष्य
श्चधीवपुः॥ धियमंतर्यमयतीत्येवंवेदेनघोषितं॥ ६४॥ तंतुः पटेस्थितोयद्वदुपादानतयातथा॥ सर्वोपादानरूपत्वात्सर्व
त्रायमवस्थितः॥ ६५॥

वासनानांपरोक्षत्वान्नानुभवइत्याह॥ वासनानामिति॥ कथंतर्हितदवगमइत्याशंक्याह॥ सर्वबुद्धिष्विति॥ सर्वबुद्धिनिष्ठंसर्वज्ञ
त्वंपुरस्तात्कारणभूतवासनागतसर्वज्ञत्वपुरःसरंभवितुमर्हतिकार्यनिष्ठधर्मविशेषत्वात्पटगतरूपादिवदित्यर्थः॥ ६२॥ सर्व
ज्ञत्वमुपपाद्यांतर्यामीतिश्रुत्युक्तमंतर्यामित्वमुपपादयति॥ विज्ञानेति॥ अन्यत्रपृथिव्यादौतिष्ठन्सन्यमयतियतस्तेनेत्य
न्वयः॥ ६३॥ अस्मिन्नर्थेन्तर्यामिब्राह्मणंकृत्स्नंप्रमाणमितिदर्शयितुंतदेकदेशभूतंयोविज्ञानेतिष्ठन्नित्यादिवाक्यमर्थतो
नुक्रामति॥ बुद्धाविति॥ ६४॥ इदानीमंतर्यामिब्राह्मणस्यप्रतिपर्यायंव्याख्यानेग्रंथबाहुल्यभयाद्व्याख्यानस्यसर्वप
र्यायसंचारित्वसिद्धयेसर्वपुरुषेत्यादिपर्यायव्याख्यानाय: सर्वपुरुषेषुतिष्ठन्नित्यसार्थंदृष्टांतमाह॥ तंतुः पटेति॥ ६५॥

९१/१९३८

ननूपादानतयासर्वत्रायामवस्थितश्चेत्तर्हि किमिति सर्वत्र नोपलभ्यत इत्याशंक्य सर्वांतरत्वादित्याह॥ पटादपीति॥ अत्रेदमनु
मानं॥ आंतरत्वतारतम्यं क्वचिद्विश्रांतं तारतम्यत्वादणुत्वतारतम्यवदिति॥ ६६॥ नन्वांतरत्वेप्यंशवादिवदंतर्यामिणोदर्शनं
किं न स्यादित्याशंक्यातपामिव बाह्यत्वाभावान्न दृश्यत इत्यभिप्रायेणाह॥ द्विव्यांतरत्वेति॥ कुतस्तर्हि तन्निर्णय इत्यत आह॥
तत इति॥ अचेतनस्य चेतनाधिष्ठानमंतरेण प्रवृत्त्यनुपपत्तिर्युक्तिः श्रुतिस्तूदाहृतैव॥ ६७॥ यस्य सर्वाणि भूतानि शरीरमि
त्यस्यार्थमाह॥ पटरूपेणेति॥ पटरूपेणावस्थितस्य तंतोः पटः शरीरं यथा एवं सर्वरूपेणावस्थितस्य सर्वं शरीरमित्यर्थः॥
॥६८॥ यः सर्वाणि भूतान्यंतरो यमयतीति वाक्यस्य तात्पर्यं सदृष्टांतमाह॥ श्लोकद्वयेन॥ तंतोरिति॥ ६९॥ तंतुसंकोचादीना

पटादप्यांतरस्तंतुस्तंतोरप्यंशुरांतरः॥ आंतरत्वस्य विश्रांतिर्यत्रासावनुमीयताम्॥ ६६॥ द्वित्र्यांतरत्वकक्षाणां दर्शनेप्ययमां
तरः॥ न वीक्ष्यते ततो युक्तिश्रुतिभ्यामस्य निर्णयः॥ ६७॥ पटरूपेण संस्थानात् पटस्तंतोर्वपुर्यथा॥ सर्वरूपेण संस्थानात्सर्वम
स्य वपुस्तथा॥ ६८॥ तंतोः संकोचविस्तारचलनादौ पटस्तथा॥ अवश्यमेव भवति न स्वातंत्र्यं पटे मनाक्॥ ६९॥ तथांतर्याम्य
यं यत्र यथा वासनया यथा॥ विक्रियेत तथावश्यं भवत्येव न संशयः॥ ७०॥ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति॥ भ्रामय
न् सर्वभूतानि यंत्रारूढानि मायया॥ ७१॥ सर्वभूतानि विज्ञानमयास्ते हृदये स्थिताः॥ तदुपादानभूतेशस्तत्र विक्रियते खलु॥ ७२॥
देहादिपंजरं यंत्रं तदारोहोऽभिमानिता॥ विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत्॥ ७३॥ विज्ञानमयरूपेण तत्प्रवृत्तिस्वरूपतः॥
स्वशक्त्येशो विक्रियते मायया भ्रामणं हि तत्॥ ७४॥ अंतर्यमयतीत्युक्तावयमेवार्थ उच्यते॥ पृथिव्यादिषु सर्वत्र न्या
योऽयं योज्यतां धिया॥ ७५॥ श्रीः॥

पटासंकोचादीर्यथा भवति एवं पृथिव्यादिषूपादानत्वेन स्थितोंतर्यामी यथा यथा वासनया यथा घटिकायंत्ररूपेण विक्रि
यते तत्तत्कार्यजातं तथावश्यं भवत्येवमंतर्यामिप्रतिपादिकां श्रुतिमुत्पन्यस्य स्मृतिमप्युपन्यस्यति॥ ईश्वर इति॥ ७१॥ सर्वभूता
नामिति पदस्यार्थमाह॥ सर्वभूतानीति॥ ते च हृदयपुंडरीके स्थिताः॥ ननु तेषां कुतो हृद्यवस्थानमित्याशंक्य हृद्यंतर्यामिणो वि
ज्ञानमयाकारपरिणामादित्याह॥ तदुपादानेति॥ ७२॥ यंत्रारूढानीत्यत्र यंत्रारोहशब्दयोरर्थमाह॥ देहादीति॥ भ्रामयन्निति॥
पदस्य तात्पर्यमाह॥ विहितेति॥ ७३॥ इदानीं णिच्प्रत्ययमायापदयोरर्थमाह॥ विज्ञानमयेति॥ ७४॥ श्रौतस्य यमयतीति पद
स्याप्ययमेवार्थ इत्याह॥ अंतर्यमयतीति॥ उक्तव्याख्यानं पर्यायांतरेष्वतिदिशति॥ पृथिव्यादिष्विति॥ ७५॥ श्रीः॥

101
1938

प्रवृत्तिजातस्य सर्वेश्वराधीनत्वे वचनांतरमुदाहरति॥ जानामि धर्ममिति॥ ७६॥ ननु प्रवृत्तेरीश्वराधीनत्वे पुरुषप्रयत्नो व्यर्थः स्यादि
त्याशंक्य पुरुषप्रयत्नस्यापीश्वररूपत्वान्नैवमिति परिहरति॥ नार्थ इति॥ अर्थः प्रयोजनं पुरुषकारः पुरुषप्रयत्नः॥ ७७॥ ननु पुरुष
प्रयत्नस्यापीश्वररूपत्वे यमयति भ्रामयतीति प्रतिपादितमंतर्यामिप्रेरणं वृथा स्यादित्याशंक्य तद्बोधनस्यात्मासंगत्वज्ञानलक्षण
फलस्य सत्त्वान्नैवमिति परिहरति॥ ईदृगिति॥ ईदृग्बोधेनेशस्य पुरुषकारादिरूपेणावस्थानज्ञानेन प्रवृत्तिः॥ अंतर्यामिरूपेण प्रेर
णं॥ ७८॥ आत्मनोऽसंगत्वज्ञानेनापि किं प्रयोजनमित्यत आह॥ तावतेति॥ श्रुतिस्मृत्युदितस्यानतिलंघनीयत्वे स्मृतिं दर्शयति॥ श्रुति

जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः॥ केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि॥ ७६॥ नार्थः पुरु
षकारेणैवमेवं मा शंक्यतां यतः॥ ईशः पुरुषकारस्य रूपेणापि प्रवर्तते॥ ७७॥ ईदृग्बोधेनेश्वरस्य प्रवृत्तिर्नैव वार्यतां॥ तथापीशस्य
बोधेन स्वात्मासंगत्वधीजनिः॥ ७८॥ तावता मुक्तिरित्याहुः श्रुतयः स्मृतयस्तथा॥ श्रुतिस्मृती ममैवाज्ञे इत्यपीश्वरभाषितं॥ ७९॥ आ
ज्ञाया भीतिहेतुत्वं भीषास्माद्दिति हि श्रुतं॥ सर्वेश्वरत्वमेतत्स्यादंतर्यामित्वतः पृथक्॥ १८०॥ एतस्य वा अक्षरस्य प्रशासन इति श्रुतिः॥
अंतः प्रविष्टः शास्ता यं जनानामिति च श्रुतिः॥ ८१॥ जगद्योनिर्भवेदेष प्रभवाप्ययकर्तृतः॥ आविर्भावतिरोभावावुत्पत्तिप्रलयौ मतौ॥
॥८२॥ आविर्भावयति स्वस्मिन् विलीनं सकलं जगत्॥ प्राणिकर्मक्षयवशात् पुनस्तिरयते क्रमात्॥ ८३॥

स्मृतीति॥ ७९॥ श्रुत्यापीश्वरस्य भीतिहेतुत्वमुक्तमित्याह॥ आज्ञाया इति॥ ईश्वरस्य भीतिहेतुत्वं किमर्थमुक्तमित्याशंक्य सर्वेश्वरत्वस्यां
तर्यामित्वतः पार्थक्यं सिद्धयितुमित्याह॥ सर्वेश्वरेति॥ १८०॥ बहिरंतश्चेश्वरत्वान्नियामक इत्यत्र श्रुतिद्वयमाह॥ एतस्येति॥ ८१॥
क्रमप्राप्तस्यैव योनिरित्यस्यार्थमाह॥ जगद्योनिरिति॥ प्रतिज्ञातार्थं प्रभवाप्ययो हि भूतानामिति वाक्यं॥ हेतुत्वेन योजयति॥ प्रभ
वेति॥ प्रभावाप्यययोरुत्पत्तिप्रलययोस्तत्कर्तृकत्वात्॥ जगद्योनिरित्यर्थः॥ उत्पत्तिप्रलयशब्दयोर्विवक्षितमर्थमाह॥ आविर्भावेति
उत्पत्तिप्रलयावाविर्भावतिरोभावौ मतावितियोजना॥ ८२॥ आविर्भावकार्त्स्न्यं सदृष्टांतमुपपादयति॥ आविर्भावयतीति॥ य
था संकुचितश्चित्रपटः स्वस्य प्रसारणे स्वनिष्ठानि चित्राण्याविर्भावयति एवमीशोऽपीत्यर्थः॥ १८४॥ श्रीहरीप्रसन्न॥

तस्यैव प्रलयकारणत्वं दर्शयति॥ पुनरिति॥ स एव पटः संकुचितः॥ चित्रिणी यथा तिरोभावयति तद्वदित्यर्थः॥ ८४॥ आ
विर्भावतिरोभावयोर्दृष्टांतांतराणि दर्शयति॥ रात्रिघस्राविति घस्रेहः॥ ८५॥ नन्वीश्वरस्य जगद्योनित्वं किमारंभकत्वेनाहो
स्विद् तदाकारपरिणामित्वेन॥ नाद्यः॥ अद्वितीयस्यारंभकत्वायोगात्॥ न द्वितीयः॥ निरवयवस्य परिणामासंभवादित्या
शंक्य विवर्तवादाश्रयणान्नायं दोष इति परिहरति॥ आसाविर्भावेति॥ ८६॥ नन्वेक एवेश्वरः कथं चेतनाचेतनजगदुपादानं
भवतीत्याशंक्योपाधिप्राधान्येनाचेतनोपादानं चित्प्राधान्येन चेतनोपादानं च भवतीत्याह॥ अचेतनानामिति॥ ८७॥ ननु मा

पुनस्तिरोभावयति स्वात्मन्येवाखिलं जगत्॥ प्राणिकर्मक्षयवशात्संकोचितपटो यथा॥ ८४॥ रात्रिघस्रौ सुप्तिबोधावुन्मी
लननिमीलने॥ तूष्णींभावमनोराज्ये इव सृष्टिलयाविमौ॥ ८५॥ आविर्भावतिरोभावशक्तिमत्त्वेन हेतुना॥ आरंभपरिमाणा
दिदोषाणां नात्र संभवः॥ ८६॥ अचेतनानां हेतुः स्याज्जाड्यांशेनेश्वरस्तथा॥ चिदाभासांशतस्त्वेष जीवानां कारणं भवेत्॥ ८७॥
तमःप्रधानः क्षेत्राणां चित्प्रधानं चिदात्मनां॥ परः कारणतामेति भावनाज्ञानकर्मभिः॥ ८८॥ इति वार्तिककारेण जडचेतन
हेतुना॥ परमात्मान एवोक्तो नेश्वरस्येति चेन्न तत्॥ ८९॥ अन्योन्याध्यासमत्रापि जीवकूटस्थयोरिव॥ ईश्वरब्रह्मणोः सि
द्धं कृत्वा ब्रूते सुरेश्वरः॥ ९०॥ सत्यं ज्ञानमनंतं यत् ब्रह्म तस्मात्समुत्थिताः॥ खं वाय्वग्निर्जलोर्व्योषध्यन्नदेहा इति श्रुतिः॥ ९१॥

मायाविन ईश्वरस्य जगत्कारणत्वप्रतिपादनमनुपपन्नं सुरेश्वराचार्यैः परमात्मन एव तदभिधानादिति शंकते॥ तमःप्रधा
न इति॥ तमःप्रधानः तमोगुणप्रधानमायोपाधिकः क्षेत्राणां शरीरादीनां भावनाज्ञानकर्मभिः भावना संस्कारः ज्ञानं देव
ताध्यानादि कर्म पुण्यापुण्यलक्षणं तैर्निमित्तभूतैरित्यर्थः॥ त्वंपदार्थ इव तत्पदार्थेप्यधिष्ठानारोप्ययोरन्योन्याध्यासस्य
विवक्षितत्वान्मैवमिति॥ परिहरति नतत्॥ ८९॥ अन्योन्याध्यासमिति॥ ९०॥ ननु सुरेश्वराचार्यैरीश्वरब्रह्मणोरन्योन्या
ध्यासः सिद्धवत्कृत्य व्यवहृत इति कुतोवगम्यत इत्याशंक्य श्रुत्यर्थपर्यालोचनवशात् इति दर्शयितुं श्रुतिमर्थतः पठति॥
सत्यमिति॥ ९१॥

103/1938

भवत्वेवं श्रुतिरनया कथमन्योन्याध्यासावगतिरित्यत आह॥ आपातेति॥ तत्र तस्यां श्रुतौ सत्यादिलक्षणस्य निर्गुणस्य ब्रह्म
णो जगत्कारणत्वं जगत्कारणस्य मायाधीनचिदाभासस्य च सत्यत्वमायातं ततः प्रतीयमानमन्योन्याध्यासमंतरेण न घटत इ
ति भावः॥ ९२॥ एवमन्योन्याध्याससिद्धमीश्वरब्रह्मणोरेकत्वं पूर्वं योदाहृतं घट्टितपटदृष्टांतस्मारणेन दृढयति॥ अन्योन्ये
ति॥ ९३॥ भ्रांत्यैकत्वापत्तौ दृष्टांतमभिधायापातदर्शिनामेवाप्रतीतौ पूर्वोक्तमेव दृष्टांतांतरं दर्शयति॥ मेघाकाशेति॥ तद्वत् ब्रह्मेशयोरैक्यं
पश्यंति॥ न भेदमित्यर्थः॥ ९४॥ कुतस्तर्हि ब्रह्मेशयोर्भेदावगतिरित्यत आह॥ उपक्रमेति॥ उपक्रमोपसंहाराभ्यासापूर्वताफलं॥ अर्थ

आपातदृष्टितस्तत्र ब्रह्मणभातिहेतुना॥ हेतोश्च सत्यता तस्मादन्योन्याध्यास इष्यते॥ ९२॥ अन्योन्याध्यासरूपोसावन्नलिप्तपटो य
था॥ घट्टितेनैकतामेति तद्भ्रांत्यैकतां गतः॥ ९३॥ मेघाकाशमहाकाशौ विविच्येते न पामरैः॥ तद्वद्ब्रह्मेशयोरैक्यं पश्यंत्यापातदर्शिनः
॥ ९४॥ उपक्रमादिभिर्लिंगैस्तात्पर्यस्य विचारणात्॥ असंगं ब्रह्म मायावी सृजत्येष महेश्वरः॥ ९५॥ सत्यं ज्ञानमनंतं चेत्युपक्रम्योपसं
हृतं॥ यतो वाचो निवर्तंत इत्यसंगत्वनिर्णयः॥ ९६॥ मायी सृजति विश्वं सन्निरुद्धस्तत्र मायया॥ अन्य इत्यपरा ब्रूते श्रुतिस्तेनेश्वरः सृजन्॥
॥ ९७॥ आनंदमय ईशोयं बहु स्यामित्यवैक्षत॥ हिरण्यगर्भरूपोभूत्सुप्तिः स्वप्नो यथा भवेत्॥ ९८॥ श्रीसच्चिदानंदाय नमः॥ ३॥

वादोपपत्ती चालिंगं तात्पर्यनिर्णय इत्युक्तैः षड्भिर्लिंगैः श्रुतितात्पर्यावधारणे सति ब्रह्मासंगं मायावी स्रष्टेत्यवगम्यत इति शेषः
॥ ९५॥ श्रुतावुपक्रमोपसंहारैकरूप्यप्रदर्शनमोक्तं ब्रह्मणोसंगत्वं स्पष्टयति॥ सत्यमिति॥ अतोसंगत्वनिर्णयो भवतीति शे
षः॥ ९६॥ मायाविन ईश्वरस्य स्रष्टृत्वप्रतिपादिकां श्रुतिमर्थतो दर्शयति॥ मायीति॥ अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चा
न्यो मायया संनिरुद्ध इति श्रुतिरीश्वरस्य स्रष्टृत्वं जीवस्य तत्र जगति बद्धत्वं च दर्शयतीति भावः॥ ९७॥ एवमानंदमयस्येश्वरस्य
जगत्कारणत्वं प्रतिपाद्य तस्माज्जगदुत्पत्तिप्रकारमाह॥ आनंदमय इति॥ ईक्षित्वा च हिरण्यगर्भरूपोभूदित्यन्वयः॥ तत्र दृष्टां
तमाह॥ सुप्तिरिति॥ ९८॥ श्रीः॥

तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादौ क्रमेण सृष्टिश्रवणादिदं सर्वमसृजतेति युगपच्छ्रवणाच्चैकस्योपादेयत्वं कस्य
वाह्यत्वमित्याकांक्षायां श्रुतियुक्त्युपपत्त्याद्युभयं ग्राह्यमित्याह॥ क्रमेणेति॥ एवा जगत्सृष्टिर्द्विविधश्रुतिसद्भावात्॥ क्रमेणयु
गपद्वा यथाश्रुति ज्ञेयेति योजना तत्रोपपत्तिर्द्विविधस्वप्नदर्शनादिति॥ लोके क्रमयुक्तस्य चाक्रमयुक्तस्य च स्वप्नपदार्थजातस्य द
र्शनादिति भावः॥ ९९॥ हिरण्यगर्भस्य स्वरूपं निरूपयति॥ सूत्रात्मेति॥ सूत्रात्मा पठसूत्रमिव जगत्यनुस्यूत आत्मा स्वरूपं यस्य
स तथाविधः॥ सर्वजीवघनात्मकः सर्वेषां जीवानां लिंगशरीरोपाधिकानां घनात्मकः समष्टिस्वरूपः॥ तत्र हेतुः सर्वाहंमानेति॥ स
र्वेषु व्यष्टिलिंगशरीरेषु अहंमानवत्त्वादिति भावः इच्छाज्ञानक्रियाशक्तिमांश्च॥ २००॥ हिरण्यगर्भावस्थायां जगत्प्रतीतौ दृष्टांतमा

क्रमेण युगपद्वैषा सृष्टिर्ज्ञेया यथाश्रुति॥ द्विविधश्रुतिसद्भावात् द्विविधस्वप्नदर्शनात्॥ ९९॥ सूत्रात्मा सूत्रदेहाख्यः सर्वजीव
घनात्मकः॥ सर्वाहंमानधारित्वात् क्रियाज्ञानादिशक्तिमान्॥ २००॥ प्रत्युषे वा प्रदोषे वा मग्नो मंदे तमस्ययं॥ लोको भाति यथा
तद्वदस्पष्टं जगदीक्ष्यते॥ १॥ सर्वतो लांछितो मष्या यथा स्यात् घट्टितः पटः॥ सूक्ष्माकारैस्तथैवास्य वपुः सर्वत्र लांछितं॥ २॥ सस्यं
वा शाकजातं वा सर्वतोंऽकुरितं यथा॥ कोमलं तद्वदेवैष पेलवो जगदंकुरः॥ ३॥ आतपाभातलोको वा पटो वा वर्णपूरितः॥ सस्यं वा फ
लितं यद्वत्तथा स्पष्टवपुर्विराट्॥ ४॥ विश्वरूपाध्याय एष उक्तः सूक्तेऽपि पौरुषे॥ धात्रादिस्तंबपर्यंतानेतस्यावयवान् विदुः॥ ५॥

ह॥ प्रत्युषइति॥ प्रत्यूषः उषः कालः॥ १॥ एवं लोकप्रसिद्धदृष्टांतमभिधाय यथा धौतइति पूर्वोक्तश्लोकेऽभिहितं लांछितपटदृष्टां
तयति॥ सर्वतइति॥ यथा घट्टितः पटो मषी ग्रथैराकारविशेषैर्लांछितो भवति तथा मायिन ईश्वरस्य वपुः अपंचीकृतभूतकार्य
लिंगशरीरैर्लांछितमित्यर्थः॥ २॥ बुध्यारोहाय वैभवात् दृष्टांतांतरमाह॥ सस्यं वेति॥ २०३॥ एवं सूत्रात्मस्वरूपं विशदीकृत्य
तस्यैवावस्थाभेदं पंचीकृतभूतकार्योपाधिकं विराजं दृष्टांतत्रयेण विशदयति॥ आतपेति॥ सूर्योदयानंतरमातपेन प्रकाशितो
लोकः आतपाभातलोकः॥ ४॥ तत्सद्भावप्रमाणमाह॥ विश्वरूपेति॥ विश्वरूपाध्यायादौ कीदृग्रूपमुदितमित्याकांक्षायां ब्र
ह्मादिस्तंबपर्यंतं जगतद्रूपमुदितमित्याह॥ धात्रादिति॥ ५॥ ७ ७ ७ ७ ७ ७ श्रीः

105/1938

एतावता प्रकृतं किमायातमित्याशंक्यांतर्यामि प्रभृति कुद्दालकादि पर्यंत वस्तुजातं प्रत्येकमीश्वरत्वेन पूज्यतामित्याह॥ ईशेत्यादिना
श्लोकत्रयेण॥ ६॥ ७॥ ८॥ तं यथा यथोपासते तदेव भवतीति श्रुतिः तत्तत्पूजातस्तत्तत्फलसद्भावे प्रमाणमित्याह॥ यथा यथेति॥ ननु स
र्वेषामीश्वरत्वे फलवैषम्यं कुत इत्याशंक्य पूज्यानामधिष्ठानानां पूजनानामर्चादीनां च सात्त्विकादिभेदेन वैषम्यमित्याह॥ फलोत्कर्षेति
॥ ९॥ सांसारिकफलसिद्धिरेवं भवतु मुक्तिः कस्योपासनाद्भवतीत्याशंक्य ज्ञानव्यतिरेकेण न केनापि भवतीत्याह॥ मुक्तिरिति॥ तत्र दृष्टां
तमाह॥ स्वप्नबोधमिति॥ स्वजागरणमंतरेण स्वनिद्राकल्पितस्वप्नो यथा न निवर्तते तथाब्रह्मतत्त्वज्ञानमंतरेण तदज्ञानकल्पितस्वसंसा
रो न निवर्तत इति भावः॥ १०॥ ननु द्वैतनिवृत्तिलक्षणायाः मुक्तेः स्वप्नदृष्टांतेन तत्त्वबोधसाध्यत्वाभिधानमनुपपन्नं निवर्त्यस्य द्वैतस्य स्व

ईशसूत्रविराड्वेधा विष्णुरुद्रेंद्रवह्नयः॥ विघ्नभैरवमैराल मारिकायक्षराक्षसाः॥ ६॥ विप्रक्षत्रियविट्शूद्रा गवाश्वमृगपक्षिणः॥ अश्व
त्थवटचूताद्या यवव्रीहितृणादयः॥ ७॥ जलपाषाणमृत्काष्ठवास्याकुद्दालकादयः॥ ईश्वराः सर्व एवैते पूजिताः फलदायिनः॥ ८॥
यथा यथोपासते तं फलमीयुस्तथा तथा॥ फलोत्कर्षापकर्षौ तु पूज्यपूजानुसारतः॥ ९॥ मुक्तिस्तु ब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथा॥ स्व
प्रबोधं विना नैव स्वस्वप्नो हीयते यथा॥ १०॥ अद्वितीयब्रह्मतत्त्वे स्वप्नोऽयमखिलं जगत्॥ ईशजीवादिरूपेण चेतनाचेतनात्मकं॥ ११॥
आनंदमयविज्ञानमयावीश्वरजीवकौ॥ मायया कल्पितावेतौ ताभ्यां सर्वं प्रकल्पितं॥ १२॥ ईक्षणादिप्रवेशांता सृष्टिरीशेन कल्पिता॥ जा
ग्रदादिविमोक्षांतः संसारो जीवकल्पितः॥ १३॥ अद्वितीयं ब्रह्मतत्त्वमसंगं तन्न जानते॥ जीवेशयोर्मायिकयोर्वृथैव कलहं ययुः॥ १४॥ ७

प्रतुल्यत्वाभावादित्याशंक्यान्यथाग्रहणरूपत्वेन स्वप्नतुल्यत्वमस्त्येव त्वयं मत्कृपुत्तं स्वप्नं मायामात्रमिति श्रुत्याभिहितत्वान्मैवमि
त्याह॥ अद्वितीयेति॥ ईशजीवादिरूपेण वर्तमानं चेतनाचेतनात्मकं यदखिलं जगदस्त्ययमद्वितीयब्रह्मतत्त्वे स्वप्न इति॥ योजना॥ ११॥
नन्वीशजीवयोर्ब्रह्माभिन्नयोः कथं जगदंतःपातित्वमित्याशंक्य तयोर्मायाकल्पितत्वेन जगदंतःपातित्वमित्याह॥ आनंदमयेति॥ १२॥
ताभ्यां सर्वं कल्पितमित्युक्तं तत्र केन किं यत्कल्पितमित्याकांक्षायामाह॥ ईक्षणादीति॥ स ईक्षत लोकान्नु सृजा इत्यादिकया एतयैव द्वारा प्रा
पद्यतेत्यंतया श्रुत्या प्रतिपादिता सृष्टिरीश्वरकर्तृका तस्य त्रय आवसथा इत्यादिकया एवमेव पुरुषं ब्रह्म ततमपश्यदित्यंतया प्रतिपादितः
संसारो जीवकर्तृक इत्यर्थः॥ १३॥ ननु ब्रह्मणः पारमार्थिकत्ववादिनां जीवेश्वरतत्त्वविषया विप्रतिपत्तिः कुत इत्याशंक्य श्रुतिमिथ्यात्वं ज्ञा

त्याद्याह॥ अद्वितीयमिति॥ १४॥

पं॰ द॰ चि॰ दि॰ ३

१५

जीवेश्वरविषयाया वादिविप्रतिपत्तेः अज्ञानमूलत्वेन याविधतत्त्वं ते बोधनीया इत्याभ्यये शं दृष्टान्त्रमलान्वेत्याह॥ ज्ञात्वेति॥ १५॥ ईश्व
रेजीवे च भ्रान्त्या विप्रतिपन्नान् वादिनो विभज्य दर्शयति॥ तृणेति॥ १६॥ कुतो भ्रान्तत्वं तेषामित्यत आह॥ अद्वितीयेति॥ ततः किं त
त्राह॥ तेषामिति॥ परिगृहीतपक्षप्रतिपादनाभिनिवेशानां चित्तविश्रान्त्यभावात्॥ नैहिकमपि सुखं तेषामित्याह॥ ऐहवेति॥ १७॥ न
नु तेषां ब्रह्मविद्याभावेपि इतरविद्याप्रयुक्तउत्तमाधमभावो दृश्यते तउत्तमत्वप्रयुक्तं स्वंकेषांचित्स्यादित्याशंक्यतस्य मुमुक्षुभिरना
दरणीयत्वं दृष्टान्तेनाह॥ उत्तमाधमेति॥ १८॥ जीवेश्वरवादयोर्मुक्तिहेतुत्वाभावान्न मुमुक्षुभिस्तत्र मतिर्निवेशनीयेत्युपसंहरति॥ तस्मा

ज्ञात्वा सदा तत्त्वनिष्ठाननुमोदामहे वयं॥ अनुशोचाम एवान्यान्न भ्रान्तैर्विवदामहे॥ १५॥ तृणार्च्चकादियोगान्ता ईश्वरे भ्रान्तिमाश्रिताः॥
लोकायतादिसांख्यान्ता जीवे विभ्रान्तिमाश्रिताः॥ १६॥ अद्वितीयब्रह्मतत्त्वं न जानन्ति यदा तदा॥ भ्रान्ता एवाखिलास्तेषां क्व मुक्तिः क्वे
ह वा सुखं॥ १७॥ उत्तमाधमभावश्चेत्तेषां स्यादस्तु तेन किं॥ स्वप्नस्थराज्यभिक्षाभ्यां न बुद्धः स्पृश्यते खलु॥ १८॥ तस्मान्मुमुक्षु
भिर्नैव मतिर्जीवेशवादयोः॥ कार्या किंतु ब्रह्मतत्त्वं विचार्य बुध्यतां च तत्॥ १९॥ पूर्वपक्षतयातौ चेत्तत्त्वनिश्चयहेतुतां॥ प्राप्नोतीस्त
निमज्जस्व तयोर्नैतावता वशः॥ २०॥ असंगचिद्विभुर्जीवः सांख्योक्तस्तादृगीश्वरः॥ योगोक्तस्तत्त्वमोरर्थौ शुद्धौ ताविति चेच्छृणु॥
॥२१॥ न तत्त्वमोरुभावर्थावस्मत्सिद्धान्ततां गतौ॥ अद्वैतबोधनायैव साक्षाकर्ता च दिष्यते॥ २२॥ ७ श्रीः

दिति॥ तर्हि किं कर्तव्यमित्याशंक्य श्रुतिविचारेण ब्रह्मबोध एव कर्तव्य इत्याह॥ किंत्विति॥ १९॥ ननु ब्रह्मतत्त्वनिश्चयाय तयोः स्वरूपं
हेयत्वेन ज्ञातव्यमित्याशंक्य तथात्वे जीवेशवादयोरेव बुद्धिर्न परिसमापनीयेत्याह॥ पूर्वपक्षतयेति॥ एतावता पूर्वपक्षतया तत्त्वनिश्च
र्णयहेतुत्वसंभवेन तयोर्जीवेशवादयोः सविशेषविवेकज्ञानशून्यो न निमज्जस्वेति योजना॥ २०॥ ननु सांख्ययोगशास्त्रोक्तयोर्जीवेश
योः शुद्धचिद्रूपत्वेन भवद्भिरप्युपादेयत्वान्न तयोः पूर्वपक्षत्वमिति शंकते॥ असंगचिदिति॥ सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः
शुद्धचिद्रूपत्वेपि तयोर्वास्तवभेदस्येतेरंगीकारान्नायमस्मत्सिद्धान्त इत्याह॥ शृण्विति॥ २३॥ तत्त्वंपदयोरुभावर्थावस्मत्सिद्धान्तत्वं
गताविति॥ योजना ननु कूटस्थब्रह्मशब्दाभ्यां शुद्धौ तत्त्वंपदार्थौ भवद्भिरपि भिन्नौ निरूपितावित्याशंक्याह॥ अद्वैतेति अद्वैतबोधना
यैवेति लोकप्रसिद्धभेदनिरासद्वारेणैक्यप्रतिपादनायैव तौ भेदेनानूदितौ न तु तयोर्भेदः प्रतिपाद्यत इति भावः॥ २२॥ श्रीरामहरी॥

श्रीः

१५

107/1938

तर्हि पदार्थशोधनं किमर्थमित्यत आह॥ अनादीति॥ अत्र मायाशब्देन स्वाश्रयव्यामोहिका अविद्या उच्यते तया विपरीतज्ञानं प्रा
प्ताः कर्तृत्वादिमत्त्वं जीवस्य सर्वज्ञत्वादिगुणयोगित्वं चेश्वरस्य पारमार्थिकं मन्यन्ते तस्तान्निवृत्त्यर्थमेव शोधनं क्रियत इत्यर्थः
॥ २३॥ शोधनप्रकारमपि दिदर्शयिषुस्तदुपायत्वेन पूर्वोक्तदृष्टान्तं स्मारयति॥ अत एवेति॥ यतः पदार्थशोधनं कर्तव्यम तएवे
त्यर्थः॥ २४॥ पदार्थशोधनप्रकारमाह॥ जलाभ्रेति॥ ये जलाकाशाभ्रखे ते जलाभ्रोपाध्यधीनत्वादपारमार्थिके तयोराधारभूतौ
घटाकाशमहाकाशौ सुनिर्मलौ जलाद्युपाधिनिरपेक्षाकाशमात्ररूपावित्यर्थः॥ २५॥ दार्ष्टान्तिकमाह॥ एवमिति॥ २६॥ ननु

अनादिमायया भ्रान्ता जीवेशौ सुविलक्षणौ॥ मन्यन्ते तत्तु दासायके वलं शोधनं तयोः॥ २३॥ अत एवात्र दृष्टान्तो योग्यः प्राक् सम्य
गीरितः॥ घटाकाशमहाकाशजलकाशाभ्रखात्मकः॥ २४॥ जलाभ्रोपाध्यधीने ते जलाकाशाभ्रखे तयोः॥ आधारौ तु घ
टाकाशमहाकाशौ सुनिर्मलौ॥ २५॥ एवमानन्दविज्ञानमयौ मायाधियौ वशौ॥ तदधिष्ठानकूटस्थब्रह्माणी तु सुनिर्मले॥ २६॥
एतत्कक्षापर्याय गतसांख्ययोगौ मतौ यदि॥ देहान्नमयकक्षत्वादात्मत्वेनाभ्युपेयतां॥ २७॥ आत्मभेदो जगत्सत्यमीशान्य इति
चेत्त्रयं॥ त्यज्यते तैस्तदा सांख्ययोगवेदान्तसंमतिः॥ २८॥ जीवो संगत्वमात्रेण कृतार्थ इति चेत्तदा॥ स्रक्चन्दनादिनित्यत्वमा
त्रेणापि कृतार्थता॥ २९॥ यथा स्रगादिनित्यत्वं दुःसंपादं तथात्मनः॥ असंगत्वं न संभाव्यं जीवतो जगदीशयोः॥ ३०॥ अवश्यं प्र
कृतिः संगं पुनरेवापादयेत्तथा॥ नियच्छत्येतमीशोपि को स्य मोक्षस्तथा सति॥ ३१॥ ॥श्रीरामचन्द्राय नमः॥ छः ॥

पदार्थद्वयशोधनकक्षोपयोगित्वेनापि सांख्ययोगमतद्वयमंगीकार्यमिति चेदत्यल्पमिदमुच्यते इतरेषामपि शास्त्राणां तत्त
त्कक्षोपयोगित्वेनास्माभ्युपगम्यत्वादित्याह॥ एतदिति॥ २७॥ कुतस्तर्हि सांख्ययोगयोर्वेदान्तविरोधित्वमित्याशंक्य जीवभेद
जगत्सत्यत्वेश्वरतटस्थलक्षणेऽशेत्याह॥ आत्मभेद इति॥ २८॥ ननु जीवस्यासंगत्वज्ञानादेव मुक्तिसिद्धेः किमद्वैतबोधने
त्याशंक्याद्वैतज्ञानमन्तरेणासंगत्वादेकेन संभाव्यत इत्यभिसंधिं हृदि निधाय तत्र रमाह॥ जीव इति॥ २९॥ अभिसंधिमाविः क
रोति॥ यथेति॥ ३०॥ असंभवमेव स्पष्टयति॥ अवश्यमिति॥ फलितमाह॥ कोस्येति॥ ३१॥ श्रीकृष्णाय नमः॥ छः॥

संगनियमनयोरविवेककार्यत्वात् विवेकज्ञानेन च अविवेकनिवृत्तौ कुतः पुनः संगाद्युत्पत्तिरिति शंकते अविवेकेति॥ एवं सत्यप
सिद्धांतापात इति परिहरति॥ बलादिति॥ अयं भावः॥ अविवेको नाम किं विवेकाभावः॥ किं वदंतन्य उत तद्विरोधी नाद्यः अभावमात्र
स्य भावकार्यजनकत्वायोगात् न द्वितीयः॥ विवेकादन्यस्य घटादेः संगहेतुत्वादर्शनात्॥ तृतीये तु तस्य भावरूपाज्ञानत्वमेवेति मा
यावादप्रसंग इति॥ ३२॥ अद्वैताभ्युपगमे बंधमोक्षव्यवस्थानुपपत्ते रात्मभेदोंगीकर्तव्य इति चोदयति॥ बंधमोक्षेति॥ एकस्याप्यात्म
नो मायया बंधमोक्षव्यवस्थापपत्तेर्मैवमिति परिहरति॥ नयत इति॥ ३३॥ मायापि कथं व्यवस्थापयेदित्याशंक्य तस्या दुर्घटकारित्वस्व
भाव्यादित्याह॥ दुर्घटमिति॥ बंधस्याविद्यकत्वेपि मोक्षो वास्तवोभ्युपगंतव्य इत्याशंक्य श्रुतिविरोधान्मैवमित्याह॥ वास्तवाविति॥ न सहते

अविवेकः कृतः संगो नियमश्चेति चेत्तदा॥ बलादापतितो मायावादः सांख्यस्य दुर्मतेः॥ ३२॥ बंधमोक्षव्यवस्थार्थमात्मनानात्वमिष्यतां॥
इति चेन्न यतो माया व्यवस्थापयितुं क्षमा॥ ३३॥ दुर्घटं घटयामीति विरुद्धं किन्न पश्यसि॥ वास्तवौ बंधमोक्षौ तु श्रुतिर्न सहते तरां॥ ३४॥ न
निरोधो न चोत्पत्तिर्न बद्धो न च साधकः॥ न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥ ३५॥ मायाख्यायाः कामधेनोर्वत्सौ जीवेश्वरावुभौ॥ यथे
च्छं पिबतां द्वैतं तत्त्वं त्वद्वैतमेव हि॥ ३६॥ कूटस्थब्रह्मणोर्भेदो नाममात्रादृते न हि॥ घटाकाशमहाकाशौ वियुज्येते नहि क्वचित्॥ ३७॥ यदद्वै
तं श्रुतं सृष्टेः प्राक् तदेवाद्य चोपरि॥ मुक्तावपि वृथा माया भ्रामयत्यखिलान् जनान्॥ ३८॥

नरामतितरां न सहत इत्यर्थः॥ बंधमिव मोक्षमपि वास्तवं न सहत इति भावः॥ ३४॥ मोक्षादेर्वास्तवत्वप्रतिषेधिकां श्रुतिं पठति॥ न निरोध
इति॥ निरोधो नाशः उत्पत्तिर्देहसंबंधः बद्धः सुखदुःखादिधर्मवान् साधकः श्रवणाद्यनुष्ठाता मुमुक्षुः साधनचतुष्टयसंपन्नः मुक्तः॥
निवृत्ताविद्यः इत्येतत्सर्वं वस्तुतो नास्तीत्यर्थः॥ ३५॥ एवं जीवेश्वरादिभेदस्य मायामयत्वमुपपादितमुपसंहरति॥ मायाख्याया इति॥
३६॥ ननु जीवेश्वरयोर्मायिकत्वेन तद्भेदस्य मिथ्यात्वेपि कूटस्थब्रह्मणोः पारमार्थिकत्वेन तद्भेदोपि पारमार्थिकः स्यात्॥ इत्याशंक्य भे
दप्रयोजकस्य स्वरूपवैलक्षण्यस्याभावान्मैवमिति परिहरति॥ कूटस्थ इति॥ नाममात्राद्भेदप्रतीतावपि वस्तुतो भेदाभावे दृष्टांतं पूर्वोक्तं
स्मारयति॥ घटाकाशेति॥ ३७॥ एवं भेदस्य मिथ्यात्वसमर्थनेन किं फलमित्याह॥ यदद्वैतमिति॥ सदेव सोम्येदमग्र आसीत्॥ एकमेवा
द्वितीयमिति श्रुतो यदद्वितीयं ब्रह्म प्रतिपादितं तदेव कालत्रयेप्यबाध्यत्वेन वास्तवं न भेद इति भावः॥ कुतस्तर्हि सर्वे भेदाभिनिवेशः क्रिय
त इत्याह॥ वृथा मायेति तत्त्वज्ञानरहितत्वाद् भिन्नत्वं कुर्वतीति भावः॥ ३८॥ ॥ छ॥ ॥ छः॥ छः ॥ श्रीः॥

169
1938

ननु प्रपंचस्य मायामयत्वं तत्त्वस्याद्वितीयत्वं च येवर्णयंति तेपि संसरंतो दृश्यंते अतस्तत्त्वज्ञानेन किं प्रयोजनमिति शंकते॥ येवदंतीति॥ कर्मब
शात्तेषां चिह्नवद्देहस्य सत्यपि पूर्ववदभिनिवेशाभावान्मैवमिति परिहरति॥ न यथेति॥ ३९॥ ज्ञानिनां॥ भ्रांत्यभावं दर्शयितुं अज्ञानिनां निश्च
यं तावदाह॥ ऐहिकेति॥ इहलोके भवः॥ ऐहिकः पुत्रकलत्रादिपोषणरूपः॥ अमुष्मिन् परलोके भव आमुष्मिकः स्वर्गसुखाद्यनुभवरूपः॥ ४०॥
तत्त्वज्ञस्य विनिश्चयस्य ततो वैलक्षण्यं दर्शयति॥ ज्ञानिनामिति॥ अद्वैतं पारमार्थिकं भाति च संसारस्त्वपरमार्थिक इति निश्चय इत्यर्थः॥
ततः किमित्याशंक्य स्वस्वनिश्चयानुसारेण फलं भवतीत्याह॥ स्वस्वेति॥ ४१॥ अद्वैतं भातीत्युक्तिः शास्त्रात्स्वेनानुभवतो न तन्निश्च
य इति शंकते॥ नाद्वैतमिति॥ अनुभवागोचरत्वमसिद्धमिति परिहरति॥ न चिद्रूपेणेति॥ घटः स्फुरति पटः स्फुरति इति घटादिष्वनुस्यूतस्फु
रणरूपेण भानादित्यर्थः॥ ननु चिद्रूपत्वस्य भानेपि तत्कार्त्स्न्येन न प्रतीयत इति शंकते॥ अशेषेणेति॥ साकल्येन भानाभावो द्वैतेपि सम

येवदंतीत्थमेतेपि भ्राम्यंतेविद्यया त्वकं॥ न यथापूर्वमेतेषामत्र भ्रांतेरदर्शनात्॥ ३९॥ ऐहिकामुष्मिकः सर्वः संसारो वास्तवस्ततः॥
न भाति नास्ति चाद्वैतमित्यज्ञानिविनिश्चयः॥ ४०॥ ज्ञानिनां विपरीतोस्मान्निश्चयः संम्यगीष्यते॥ स्वस्वनिश्चयतो बद्धा मुक्तोहं वे
ति मन्यते॥ ४१॥ नाद्वैतमपरोक्षं चेन्न चिद्रूपेण भासनात्॥ अशेषेण न भातं चेद्द्वैतं किं भासतेखिलं॥ ४२॥ दिङ्मात्रेण विभानं तु द्वयोर
पि समं खलु॥ द्वैतसिद्धिवदद्वैतासिद्धिस्तेतावता न किं॥ ४३॥ द्वैतेन हीनमद्वैतं द्वैतज्ञाने कथं त्विदं॥ चिद्भानं त्वविरोध्यस्य द्वैतस्यातो समे
उभे॥ ४४॥ एवं तर्हि शृणु द्वैतमसन्मायामयत्वतः॥ तेन वास्तवमद्वैतं परिशेषाद्विभासते॥ ४५॥

न इत्याह॥ द्वैतं किमिति॥ ४२॥ एवं दोषसाम्यमभिधाय परिहारसाम्यमाह॥ दिङ्मात्रेणेति॥ दिङ्मात्रेण एकदेशेन द्वयोर्द्वैताद्वैतयोरि
त्यर्थः॥ एतावता कथं परिहारसाम्यमित्याशंक्याह॥ द्वैतसिद्धिवदिति॥ तेन च पक्षे तावता एकदेशप्रतीतिसद्भावेन द्वैतसिद्धिवत् द्वैतनि
श्चय इवाद्वैतसिद्धिरद्वैतनिश्चयोपि किं न भवति॥ किंतु भवत्येवेत्यर्थः॥ ४३॥ पूर्ववादी प्रकारांतरेणाद्वैतासिद्धिं शंकते॥ द्वैतेनेति
अद्वैतं द्वैतरहितं तयोः परस्परविरोधात्तथा सति द्वैतप्रतीतावद्वैतं न संभवतीत्यर्थः॥ ननु तर्हि द्वैतस्याप्यद्वैतविरोधित्वात् द्वैतप्रति
भासमानं द्वैतस्यासिद्धिरिति चोद्यं समानमित्याशंक्याह॥ पूर्ववादी चिद्भानं त्विति॥ भवन्मते चिद्रूपप्रतीतेरेवाद्वैतप्रतीतित्वात्
स्याश्च द्वैतविरोधित्वाभावान्नोभयोः साम्यमिति भावः॥ ४४॥ प्रतीयमानस्यापि द्वैतस्य वास्तवत्वाभावान्न वास्तवाद्वैतविघाति
त्वमिति परिहरति सिद्धांती॥ एवमिति॥ प्रसक्तप्रतिषेधेन्यत्राप्रसंगाच्छिष्यमाणे संप्रत्ययः परिशेषः॥ ४५॥ ॥ श्रीः॥ ॥

परिशेष प्रकारमेवदर्शयति॥ अचिंत्येति॥ नचिंत्या अचिंत्या अचिंत्यारचनारूपं यस्य तत्तथाविधं सकलं जगत् मायैव मिथ्ये
वेत्यनेन प्रकारेणानिर्वचनीयत्वान्मिथ्यात्वं द्वैतस्य निश्चित्य वास्तव मद्वैतं परिशेष्यतामित्यर्थः॥ ४६॥ नन्वेव मद्वैतनिश्चये
कृतेपि पुनः पुनर्द्वैतसत्यत्वं पूर्ववासनया भातीत्याशंक्य तन्निवृत्तये पुनः पुनर्मिथ्यात्वं विचारयेदित्याह॥ पुनर्द्वैतस्येति॥
आवृत्तिरसकृदुपदेशादिति चतुर्थाध्यायव्यासेन श्रवणाद्यावर्तनस्य विहितत्वादिति भावः॥ ४७॥ कियंतं कालमित्थं विचा
रणीयमित्याशंक्य तत्रापरोक्षविद्याप्राप्ति विचारोयं समाप्य इति विचार॥ कालावधेरुक्तत्वान्नाद्वैतविचारेयं खेदो युक्तः॥ किं

अचिंत्यरचनारूपं मायैव सकलं जगत्॥ इतिनिश्चित्य वस्तुत्व मद्वैत परिशेष्यतां॥ ४६॥ पुनर्द्वैतस्य वस्तुत्वं भाति चेत्त्वं
तथा पुनः॥ परिशीलय कोवात्र प्रयासस्तेन ते वद॥ ४७॥ कियंतं कालमिति चेत्खेदोयं द्वैत इष्यतां॥ अद्वैते तु न युक्तोयं स
र्वानर्थनिवारणात्॥ ४८॥ क्षुत्पिपासादयो दृश्या यथापूर्वं मयीति चेत्॥ मच्छब्दवाच्येहंकारे दृश्यतां नेति को वदेत्॥ ४९॥
चिद्रूपेपि प्रसज्येरंस्तादात्म्याध्यासतो यदि॥ माध्यासं कुरु किंतु त्वं विवेकं कुरु सर्वदा॥ ५०॥ ० ॥ ० ॥
झटित्यध्यास आयाति दृढवासनयेति चेत्॥ आवर्तयेद्विवेकं च दृढं वासयितुं सदा॥ ५१॥ ० ० ० ०

तु द्वैत प्रतिभासत्व सयुक्त इत्याह॥ कियंतमिति॥ ४८॥ नन्वेव मद्वैतात्मतत्त्वापरोक्षज्ञानवत्यपि मयि क्षुत्पिपासानर्थस्य परिदृ
श्यमानत्वादनर्थनिवारकत्वमात्मज्ञानस्यासिद्धमिति शंकते॥ क्षुत्पिपासादय इति॥ किं मच्छब्दवाच्य अहंकारे दृश्यंत उत मच्छ
ब्दोपलक्षिते चिदात्मनीति विकल्प्य॥ आद्यमंगीकरोति॥ मच्छब्दवाच्य इति॥ न द्वितीयः॥ तस्यासंगत्वादविषयत्वाच्चेति॥
वह्निरिव द्रष्टव्यं॥ ४९॥ वस्तुतस्तत्प्रतीत्यभावेपि भ्रांत्या तत्र सक्तिः स्यादिति शंकते॥ चिद्रूपेपीति॥ एवं तर्ह्यनर्थहेतोरध्या
सस्य निवृत्तये सदा विवेकः क्रियतामित्याह॥ माध्यासमिति॥ २५०॥ अनादिवासनावशात् पुनरध्यासागमने तन्निवृत्त
ये विवेक एवावर्तनीयो पायांतरमित्याह॥ झटीतीति॥ ५१॥ ० ० ० ० ० ०

ननु विचारेण द्वैतस्य मायामयत्वं युक्त्यैव सिध्यति नानुभवत इत्याशंक्याचिंत्यरचनात्वलक्षणमिथ्यात्वानुभवस्य स्वसाक्षिक
त्वान्मैवमिति परिहरति॥ विवेक इति॥ ५२॥ नन्वचिंत्यरचनात्वं मिथ्यापदार्थलक्षणमुक्तं चिदात्मन्यतिव्याप्तमिति शंकते॥
चिदपीति॥ प्रागभावयुक्तत्वे सत्यचिंत्यरचनात्वं मिथ्यात्वलक्षणं पदार्थलक्षणमुक्तं चिदात्मन्यतिव्याप्तमिति शंकते॥ णमिति वि
वक्षयाचिंत्यरचनात्वमात्मनो गीकरोति॥ तथापीति॥ एवमंगीकारे पसिद्धांत इत्याशंक्य परिहरति॥ नोचेयमिति॥ तत्र हेतुमा
ह॥ नित्यत्वादिति॥ वर्या चितिः किचिंत्यरचनां नाप्नुम इति योजना॥ ५३॥ चितेर्नित्यत्वं कुत इत्याशंक्य प्रागभावादित्याह॥ प्रागभावइ

विवेके द्वैतमिथ्यात्वं युक्त्यैवेति न भण्यतां॥ अचिंत्यरचनात्वस्यानुभूतिर्हि स्वसाक्षिकी॥ ५२॥ चिदप्यचिंत्यरचना यदि त
र्ह्यस्तु नो वयं॥ चितिमचिंत्यरचनां ब्रूमहि मा नित्यत्वकारणात्॥ ५३॥ प्रागभावो नानुभूतश्चितेर्नित्यात नाश्चितिः॥ द्वैतस्य
प्रागभावस्तु चैतन्येनानुभूयते॥ २५४॥ ० ० ० ० ० ० ० ०

नियतश्चितेः प्रागभावो नानुभूतस्तेनानित्येति योजना॥ इदमत्राकूतं॥ चितेः प्रागभावोस्तीति वदन्प्रष्टव्यः॥ चित्प्रागभावः
चितानुभूतोन्येन वा नान्येन तस्य जडत्वेनानुभवितृत्वानुपपत्तेः॥ चितानुभूयत इत्यस्मिन्पक्षे किं चिदंतरेणात्मनैव ना द्यः॥
अद्वैतवादे चिदंतरस्याभावात्॥ नत्स्वीकारेपि चित्स्वतियोगिकस्याभावस्याचित्सद्दणमंतरेण गृहीतुमशक्यत्वात् तस्या अपि
गृह्यमाणत्वे घटादिवदचित्त्वापत्तेः॥ नापि द्वितीयः॥ स्वाभावस्य त्वेन गृहीतुमशक्यत्वादिति॥ ननु द्वैतस्य प्रमात्रादिभेद
रूपत्वात्तदभावस्य चैतन्येनानुभवितुमशक्यत्वात्तदनुभावित्वेन तराभावाच्च चैतन्यवदद्वैतस्यापि नित्यत्वापत्तिरित्याशंक्या
नुभवित्रंतराभावो असिद्ध इति परिहरति॥ द्वैतस्येति॥ जाग्रदादिद्वैताभावस्य सुषुप्तौ साक्षिणानुभूयमानत्वात्॥ तमसः सा
क्षी सर्वस्य साक्षीति श्रुतेश्चेति भावः॥ २५४॥ ० ० ० ० ० ० ०

श्री
११

111
1938

पं० द० चि० दि०
१८

एवं च प्रागभाव युतत्वे सति अचिंत्यरचनात्वस्य मिथ्यात्वलक्षणस्य सद्भावान्नद्वैतमिथ्यात्वं सिध्यमित्याह॥ प्रागभावेति॥ प्रागभा
वयुत मितिहेतुगर्भितं विशेषणं॥ द्वैतं प्रागभावयुतत्वात॥ घटादिवद्रच्यते हि तथापि रच्यमानत्वेपि॥ नस्य द्वैतस्य रचनाचिंत्यात्वे
नरच्यमानत्वे सत्यचिंत्यरचनात्वेनेंद्रजालिप्रासादवन्मिथ्यैवेत्यर्थः॥ ५५॥ चितिस्तावत्स्वप्रकाशत्वेन नित्याः परोक्षा च भास
ते॥ चिद्व्यतिरिक्तस्य च मिथ्यात्वं न ययचिंतानुभूयत इति दर्शितं॥ एवं च सत्यद्वैतस्या परोक्षता सीतिवदतो व्याघातश्च स्यादित्या
ह॥ चित्प्रत्यक्षेति॥ चिद्रूपेणभासनादित्यभिहितयुक्तिसमुच्चयार्थश्च शब्दः॥ अद्वैतम परोक्षं नेत्येतत्कथं न स्यादह तं चेति योजना
५६॥ एवं वेदांतार्थज्ञानतामपि पुरुषाणां केषांचिदत्राविश्वासः॥ कुतोनजायत इति पृच्छति॥ इत्थमिति॥ सम्यग्विचारशून्यत्वा
दितिविवक्षुः प्रतिबंदी गृह्णाति॥ चार्वाकादेरिति आदिशब्देन पामरा गृह्यंते॥ प्रबुध्यस्याह्यपाहकुत्रास्य॥ ५७॥ प्रतिबंदीमे

प्रागभाव युतं द्वैतं रच्यते हि घटादिवत॥ तथापि रचनाचिंत्या मिथ्यातेनेंद्रजालवत॥ ५५॥ चित्प्रत्यक्षा ततोन्यस्य मिथ्यात्वं चा
नुभूयते॥ नाद्वैतम परोक्षं चेत्येतन्न व्याहतं कथं॥ ५६॥ इत्थं ज्ञात्वाप्यसंतुष्टाः केचित्कुतइतीर्यतां॥ चार्वाकादेः प्रबुद्धस्यापया
त्मा देहः कुतो वद॥ ५७॥ सम्यग्विचारो नास्त्यस्य धीदोषादिति चेत्तथा॥ असंतुष्टास्तु शास्त्रार्थं न त्वैक्षंत विशेषतः॥ ५८॥ यदा स
र्वे प्रमुच्यंते कामा येस्य हृदि श्रिताः॥ इति श्रौतं फलं दृष्टं नेति चेद्दृष्टमेव तत॥ २५९॥ ७ ७ ७ ७ ७ ७

१८

चनं शंकते॥ सम्यगिति॥ साम्येन समाधत्ते॥ तथेति॥ धीदोषादित्यनुषज्यते तु शब्दस्त्वशब्दार्थः॥ ५८॥ इत्थं तत्त्वं विचार्य तज्जन्य
तत्त्वज्ञान फलं विचारयितुं तत्प्रतिपादिकां श्रुतिं पठति॥ यदेति॥ अथ मर्त्योमृतो भवत्यत्र ब्रह्म समश्नुत इत्यस्य मंत्रस्योत्तरार्धं अस्य
मुमुक्षोर्हृदि श्रिता ये कामास्तादात्म्याध्यासमूला इच्छादयः॥ संति ते सर्वे यदा यस्मिन काले प्रमुच्यंते तत्त्वज्ञानेनाध्यासनिवृत्तो निवर्तंते
अथ तदानीमेव मर्त्यः पूर्वदेहतादात्म्याध्यासेन मरणशीलः पुरुषः अमृतः अध्यासाभावेन तद्रहितो भवति तत्र हेतुमाह॥ अत्र ब्रह्म
समश्नुत इति॥ अत्रास्मिन्नेव देहे ब्रह्म सत्यादिलक्षणं समश्नुते सम्यगाप्नोतीत्यस्याः श्रुतेरर्थः॥ श्रुत्या प्रतिपादितं फलं कामनिवृत्त्या
दिलक्षणं नानुभवसिद्धं किंतु शाब्दमेवेति शंकते॥ इति श्रौतमिति॥ समनंतर श्रुतिवाक्य तात्पर्यालोचनया तस्य दृष्टत्वं सिध्यतीत्यभिप्रा
यण परिहरति॥ दृष्टमेव तदिति॥ ५९॥

113/1938

तस्य दृष्टत्वस्य स्पष्टीकरणाय तद्वाक्यमुदाहृत्य तस्यार्थमाह॥ यदा सर्वे इति॥ अनेन वाक्यशेषेण कामप्रमोक्षस्य ग्रंथिभेदत्वेन व्याख्या
तत्वात॥ ग्रंथिभेदस्य अहंकारचिदात्मनोस्तादात्म्याध्यासनिवृत्तिलक्षणस्यानुभवसिद्धत्वान्नाप्रत्यक्षतेति भावः॥ वाक्यशेषत इत्येनेन वा
क्येनेत्यर्थः॥ २६०॥ ननु लोके कामशब्देनेच्छाभिदत्वाच्यते अतः कथं तस्य ग्रंथित्वेन व्याख्यानमित्याशंक्याध्यासमूलस्यैवेच्छाविशेषस्य
कामशब्दवाच्यत्वं नत्विच्छामात्रस्येत्याह॥ अहंकारमिति॥ ६१॥ नन्वध्यासमूलस्यैव कामस्य त्याज्यत्वे सतीतरो भ्युपेतव्यः स्यादित्याशंक्य
बाधकत्वाभावादभ्युपेयतएवेत्याह॥ अप्रवेश्येति॥ अहंकारं चिदात्मानमप्रवेश्य तादात्म्याध्यासेनानंतर्भाव्येत्यर्थः॥ ६२॥ नन्वध्यासाभा
वे कामानामनुदयस्स्यादित्याशंक्य प्रारब्धकर्मवशात्तेषामुत्पत्तिः संभविष्यतीत्याह॥ ग्रंथिभेदेपीति॥ अत्र दृष्टांतमाह॥ बुध्यापीति॥ ६३॥

यदा सर्वे प्रभिद्यंते हृदयस्य ग्रंथयस्त्विति॥ कामा ग्रंथिस्वरूपेण व्याख्याता वाक्यशेषतः॥ २६०॥ अहंकारचिदात्मानावेकीकृत्याविवेकतः॥ इदं
मेस्त्विदं मे स्यादितीच्छाः कामशब्दिताः॥ ६१॥ अप्रवेश्य चिदात्मानं पृथक्पश्यन्नहंकृतिं॥ इच्छंस्तु कोटिवस्तूनि न बाधो ग्रंथिभेदतः॥ ६२॥
ग्रंथिभेदेपि संभाव्या इच्छाः प्रारब्धदोषतः॥ बुध्यापि पापबाहुल्यादसंतोषो यथा तव॥ ६३॥ अहंकारगतेच्छाद्यैर्देहव्याध्यादिभिस्तथा॥ वृक्षा
दिजन्मनाशैर्वा चिद्रूपात्मनि किं भवेत॥ ६४॥ ग्रंथिभेदात्पुरा प्येवमिति चेत्तन्न विस्मर॥ अयमेव ग्रंथिभेदस्तव तेन कृती भवान॥ २६५॥
नैवं जानंति मूढाश्चेत्सोयं ग्रंथिर्न चापरः॥ ग्रंथितद्भेदमात्रेण वैषम्यं मूढबुद्धयोः॥ ६६॥ प्रवृत्तौ वा निवृत्तौ वा देहेंद्रियमनोधियां॥ न किं
चिदपि वैषम्यमस्त्यज्ञानिविबुध्ययोः॥ २६७॥

अध्यासाभावेहंकारगतेच्छादेरबाधकत्वं दृष्टांतद्वय प्रदर्शनेन विशदयति॥ अहंकारेति॥ यथा देहगतव्याध्यादिभिरहंकारसाक्षिण आबा
धोनास्ति देहसंबंधरहितत्वात् यथा वृक्षादिगतजन्मादिभिरेवमध्यासनिवृत्तावहंकारगतेच्छादिभिरपीति भावः॥ ६४॥ चिदात्मनोसंगत्वस्व
रूपत्वात पूर्वमपि कामादिबाधो नास्तीति शंकते ग्रंथिभेदादिति॥ एवंविधबोधस्यैव ग्रंथिभेदत्वेनास्माभिरभिधीयमानत्वादिदं चो
द्यमस्मदनुकूलमित्याह॥ तन्न विस्मरेति॥ ६५॥ एवंविधज्ञानाभाव एव ग्रंथिरित्याह॥ नैवमिति॥ ननु ज्ञानिनोपीच्छाभ्युपगमे ज्ञान्य
ज्ञानिनोः॥ कुतो विलक्षण्यमित्याशंक्य ग्रंथिभेदाभेदातिरेकेण न कुतोपीत्याह ग्रंथितद्भेदेति॥ ६६॥ कारणांतराभावमेव विशदय
ति॥ प्रवृत्ताविति॥ २६७॥

द॰ चि॰ टी॰

१०

...त्तमाह॥ श्रान्त्येति॥ ६८॥ ज्ञानिनो ग्रंथिशून्यत्वे गीतावाक्यं प्रमाणयति॥ नद्वेष्टीति॥ संप्रवृत्तानि आपातानि दुःखानि नद्वेष्टि
निवृत्तानि सुखानि नकांक्षति उदासीनवद्वर्तत इत्यर्थः॥ ग्रंथिभिदा ग्रंथिभेदः॥ ६९॥ इदंवाक्यमौदासीन्यविधिपरं नतु ग्रंथिभेदप्र
माणमिति शंकते॥ औदासीन्यमिति॥ विधिपरत्वेवशब्दो व्यर्थः स्यादिति परिहरति॥ वद्धब्देति॥ ज्ञानिदेहादेरकार्यक्षमत्वादप्रवृत्ति
र्नतु ग्रंथिभेदादित्याशंक्योपहसति॥ नशक्ताइति॥ ७०॥ भवतु कोदोषस्तत्राह॥ तत्वबोधमिति॥ दुःशकमसाध्यमित्यर्थः॥ ७१॥ नन्व
ज्ञान परिहामाय ज्ञानिनां प्रवृत्त्यभावस्य पुराणसिद्धत्वादिति॥ शंकते॥ भरतादेरिति॥ श्रुतिमज्ज्ञानान्नश्वादयसीति परिहरति जक्षदिति॥
जक्षत्क्रीडन्रममाणस्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा वयस्यैर्वानोपजनं स्मरन्निदं शरीरमिति श्रौतं वाक्यं नाशोषीरित्यर्थः॥ जक्षन्भक्षयन्

व्रात्य श्रोत्रिययोर्वेदपाठापाठकृता भिदा॥ नाहारादावस्तिभेदः सोयं न्यायोत्र योज्यतां॥ ६८॥ नद्वेष्टि संप्रवृत्तानि ननिवृत्तानि कांक्षति॥ उ
दासीनवदासीन इति ग्रंथिभिदोच्यते॥ ६९॥ औदासीन्यं विधेयं चेद्वद्धब्दो व्यर्थता तदा॥ नशक्ता अस्य देहाद्या इति चेद्रोग एव सः॥ ७०॥
तत्वबोधं क्षयं व्याधिं मन्यंते ये महाधियः॥ तेषां प्रज्ञाविशदा किं तेषां दुःशकं वद॥ ७१॥ भरतादेरप्रवृत्तिः पुराणोक्तेति चेत्तदा॥ जक्षन्क्री
डन्रतिं विंदन्नित्यश्रौषीर्नकिंश्रुतिं॥ ७२॥ नह्याहारादि संत्यज्य भरताद्याः स्थिताः क्वचित्॥ काष्ठपाषाणवत्किंतु संगभीता उदासते॥ ७३॥
संगी हि बाध्यते लोकैर्निःसंगः सुखमश्नुते॥ तेन संगः परित्याज्यः सर्वदा सुखमिच्छता॥ ७४॥ अज्ञात्वा शास्त्रहृदयं मूढो वक्त्यन्यथान्यथा॥
मूर्खाणां निर्णयस्त्वास्तामस्मत्सिद्धांत उच्यते॥ ७५॥ वैराग्यबोधोपरमाः सहायास्ते परस्परं॥ प्रायेण सहवर्तंते वियुज्यंते क्वचित्क्वचित्॥ ७६॥

जक्षभक्षहसनयोरिति धातुः क्रीडन्स्वेच्छया विहरन् रममाणः स्त्र्यादिभिर्नोपजनं स्मरन्निदं शरीरमित्युपजनं जनानां समीपे वर्तमानमिदं
स्वशरीरं स्मरन्नानुसंदधान इत्यर्थः॥ श्लोके रतिं विंदन्निति श्रौतस्य रममाण इति पदस्य व्याख्यानं॥ ७२॥ ननु तर्हि पुराणस्य का गतिरि
त्याशंक्य पुराणमप्यौदासीन्यबोधनपरं न प्रवृत्त्यभावपरमित्यभिप्रेत्याह॥ नह्याहारादिति॥ ७३॥ संगोपि कुतस्त्यज्यत इत्यत आह॥
संगीहीति॥ ७४॥ ननु तर्हि मानससंगस्यैव त्याज्यत्वात् संगशून्यानां बहिर्व्यवहरतामज्ञत्वादिकं जनैः कथमुच्यत इत्याशंक्य शास्त्रता
त्पर्यज्ञानशून्यत्वादित्याह॥ अज्ञात्वेति॥ अतो मूढव्यवहारो नात्र विचारणीय इत्याह॥ मूर्खाणामिति॥ तर्हि किमनुसंधेयमित्याकांक्षा
यां शास्त्रहृदयमित्याह॥ अस्मत्सिद्धांत इति॥ ७५॥ कोसावित्यत आह॥ वैराग्येति॥ २७६॥ श्रीरामहरे वासुदेवायनमइति॥ ॐ॥

श्री

१०

115
1938

वैराग्यादीनामन्योन्यापरिहारेणावस्थानदर्शनाद्भेदाशंकायां तद्धेत्वादीनां भेदाद्भेदोवगंतव्य इत्याह॥ हेतुस्वरूपेति॥ २७७॥ वैराग्यस्य
हेत्वादित्रयं दर्शयति॥ दोषदृष्टिरिति॥ ७८॥ इदानीं तत्वबोधस्य कारणादि निदर्शयति॥ श्रवणादीति॥ आदिशब्देन मनननिदिध्या
सने गृह्येते॥ आत्मावारे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्यात्मदर्शनसाधनत्वेन श्रवणादिविधानाच्छ्रवणादेर्ज्ञानहेतुत्वं॥ त
त्वमिथ्याविवेचनं कूटस्थाहंकारादेश्च भेदज्ञानं॥ ग्रंथेरनुदयोन्योन्याध्यासानुत्पत्तिः॥ ७९॥ उपरतेस्तानि दर्शयति॥ यमादिरिति॥
आदिपदेन नियमादयो गृह्यंते॥ धीनिरोधश्चित्तवृत्तिनिरोधलक्षणो योगः॥ ८०॥ किमेतेषां समप्राधान्यमुतनेत्याशंक्याह॥ तत्वबो
ध इति तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यते यनायेति श्रुतेरित्यर्थः॥ इतरयोस्तूपकारित्वं॥ ब्राह्मणो निर्वेदमायान्नास्त्यकृतः

हेतुः स्वरूपकार्याणि भिन्नान्येषामसंकरः॥ यथावदवगंतव्यः शास्त्रार्थं प्रविविच्यता॥ ७७॥ दोषदृष्टिर्जिहासा च पुनर्भोगेष्वदीनता॥
असाधारणहेत्वाद्या वैराग्यस्य त्रयोप्यमी॥ ७८॥ श्रवणादित्रयं तद्वत्तत्वमिथ्याविवेचनं॥ पुनर्ग्रंथेरनुदयो बोधस्यैते त्रयो मताः॥
७९॥ यमादिर्धीनिरोधश्च व्यवहारस्य संक्षयः॥ स्युर्हेत्वाद्या उपरतेरित्यसंकर ईरितः॥ ८०॥ तत्वबोधः प्रधानं स्यात्साक्षान्मोक्षप्रदत्व
तः॥ बोधोपकारिणावेतौ वैराग्योपरमावुभौ॥ ८१॥ त्रयोप्यत्यंतपक्वाश्चेन्महतस्तपसः फलं॥ दुरितेन क्वचित्किंचित्कदाचित्प्रतिबध्यते॥
८२॥ वैराग्योपरती पूर्णे बोधस्तु प्रतिबध्यते॥ यस्य तस्य न मोक्षोस्ति पुण्यलोकस्तपोबलात्॥ ८३॥ पूर्णे बोधे तदन्यौ द्वौ प्रतिबद्धौ यदा तदा॥
मोक्षो विनिश्चितः किंतु दृष्टदुःखं न नश्यति॥ ८४॥ ब्रह्मलोकतृणीकारो वैराग्यस्यावधिर्मतः॥ देहात्मवत्परात्मत्वदार्ढ्ये बोधः समाप्यते॥ ८५॥

कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्॥ शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति॥ श्रुतिभ्यामवगम्यते॥ ८१॥
प्रायेण सहवर्तंते वियुज्यंते क्वचित्क्वचिदित्युक्तं॥ तत्र कारणमाह॥ त्रयोपीति॥ अनेकजन्मार्जितपुण्यपुंजपरिपाके त्रयाणां सद्भावो भ
वति॥ अन्यथा तु प्रतिबंधकपापानुसारेण पुरुषविशेषकालविशेषेण कस्यचित्प्रतिबंधो भवतीति भावः॥ ८२॥ तत्रापि तत्वज्ञान प्रति
बंधे मोक्षो नास्तीत्याह॥ वैराग्येति॥ तर्हि वैराग्यादिसंपादनेन किं फलमित्याशंक्य प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः शुचीनां श्रीम
तां गेहे योगभ्रष्टोभिजायत इति॥ भगवद्वचनात् पुण्यलोकप्राप्तिर्भवतीत्याह॥ पुण्यलोकस्तपोबलादिति॥ ८३॥ वैराग्योपरत्योस्तु प्रति
बंधे जीवन्मुक्तिसुखं न सिध्यतीत्याह॥ पूर्णे बोध इति॥ ८४॥ इदानीं वैराग्यादीनामवधिं दर्शयति॥ ब्रह्मलोकेति॥ २८५॥ श्रीराम॥

मुक्तिवदिति॥ अवांतरतारतम्यं स्वस्वबुध्यानिश्चेयमित्याह॥ दिव्येति॥ ८६॥ ननुतत्वबोधवतामपिरागादिमत्वेनवैषम्यात्फलंभात॥
ज्ञानस्यापिमुक्तिहेतुत्वंनिश्चेतुंनशक्यतइत्याशंक्यरागाद्यध्यासादिवदारब्धकर्मफलत्वान्मुक्तिप्रतिबंधकत्वमसिद्धमतोनशास्त्रार्थवि
प्रतिपन्नत्वमित्याह॥आरब्धकर्मनानात्वादिति॥ ८७॥ किंतर्हिप्रतिपन्नत्वमित्यतआह॥ स्वस्वेति॥ सर्वेषांब्रह्माहमस्मीतिज्ञानेमेकाका

र्क्षिवद्धिस्मृतिःसीमाभवतुपरमस्याह॥ दिव्यज्ञानयाविनिश्चेयंतारतम्यमवांतरं॥ ८६॥ आरब्धकर्मनानात्वाद्बुद्धानामन्यथान्यथा॥
वर्तनंतेनशास्त्रार्थेभ्रमितव्यंनपंडितैः॥ ८७॥ स्वस्वकर्मानुसारेणवर्ततांतेयथातथा॥ अविशिष्टःसर्वबोधःसमामुक्तिरितिस्थितिः॥
॥८८॥ जगच्चित्रंस्वचैतन्यपटेचित्रमिवार्पितं॥ माययातदुपेक्ष्यैवचैतन्यंपरिशोध्यतां॥ ८९॥ चित्रदीपमिमंनित्यंयेनुसंदधतेबुधाः॥ पश्यंतोपिजगच्चित्रंतेनमुह्यंतिपूर्ववत्॥ १९०॥ इति॰ यंसंक्षिप्यदर्शयति॥ जगदिति॥ ८९॥ ग्रंथाभ्यासफलमाह॥ ॥

चित्रदीपमिति॥ २९०॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यश्रीचरणशिष्यरामकृष्णाख्यविदु
षाविरचितातात्पर्यबोधनीनामकंचित्रदीपव्याख्यानंसमाप्तं॥ आयातमायातमपेक्षणीयंगतंगतंसर्वमुपेक्षणीयं॥ अलंवृथाखेद
नमोदनाभ्यांयदस्मदीयंनहितत्परेषां॥ १॥ शके१७४७ पार्थिवाब्देदक्षिणायनेदंपुस्तकंनभमासेशुक्लैकादश्यांतिथौचित्र॰ समाप्तः॥ श्री

२०

श्रीः

अथतृप्तिदीपप्रारंभः प्रक० ७

112/1932

पं॰ द॰ चि॰ दी॰

२०

सुभिवदिति॥ अवांतरं तारतम्यं स्वस्वबुध्यानिश्चयमित्याह॥ दिवोति॥ ८६॥ ननु तत्त्वबोधवतामपि रागादिमत्त्वेनैवमुख्याफलं भातु॥
ज्ञानस्यापि मुक्तिहेतुत्वं निश्चेतुं न शक्यत इत्याशंक्य रागादेर्बाध्यादिवदारब्धकर्मफलत्वान्मुक्तिप्रतिबंधकत्वमसिद्धमतो न शास्त्रार्थवि
प्रतिपन्नत्वमित्याह॥ आरब्धकर्मनानात्वादिति॥ ८७॥ किं तर्हि प्रतिपन्नत्वमित्यत आह॥ स्वस्वेति॥ सर्वेषां ब्रह्माहमस्मीति ज्ञानमेकाका

रमिव हि स्मृतिः सीमामवेतु परम स्वाहि॥ दिशान याविनिश्चेयं तारतम्यमवांतरं॥ ८८॥ आरब्धकर्मनानात्वाद्बुद्धानामन्यथान्यथा॥
वर्तनं तेन शास्त्रार्थे भ्रमितव्यं न पंडितैः॥ ८७॥ स्वस्वकर्मानुसारेण वर्तंतां ते यथा तथा॥ अविशिष्टः सर्वबोधः समा मुक्तिरिति स्थितिः॥
॥ ८८॥ जगच्चित्रं स्वचैतन्ये पटे चित्रमिवार्पितं॥ मायया तदुपेक्ष्यैव चैतन्ये परिशेष्यतां॥ ८९॥ चित्रदीपमिमं नित्यं येऽनुसंदधते बुधाः॥ पश्यंतोऽपि जगच्चित्रं ते न मुह्यंति पूर्ववत्॥ २९०॥ इति॰ ग्रंसक्षिप्य दर्शयति॥ जगदिति॥ ८९॥ ग्रंथाभ्यासफलमाह॥ ॥

चित्रदीपमिति॥ २९०॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमाधवभारतीतीर्थविद्यारण्यश्रीचरणशिष्येण रामकृष्णाख्यविदु
षा विरचितं तात्पर्यबोधिनीनामकं चित्रदीपव्याख्यानं समाप्तं॥ आयातमायातमपेक्षणीयं गतं गतं सर्वमुपेक्षणीयं॥ अलं वृथा खेद
नमोदनाभ्यां यदस्मदीयं न हि तत्परेषां॥ ३॥ शके १७४७ पार्थिवनाम्नि संवत्सरे दक्षिणायने दंपुस्तकं नममासे शुक्ले एकादश्यां तिथौ चित्र॰ समाप्तः॥ श्री

२०

श्री:

THE ASIATIC SOCIETY OF BOMBAY

117/1938

अथतृप्तिदीप प्रारंभः प्रक॰ ७

श्रीगणेशाय नमः ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥ पुमर्थांश्चतुरो देयात् विद्यातीर्थमहेश्वरः ॥ १ ॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ॥ क्रियते तृप्तिदीपस्य व्याख्यानं गुर्वनुग्रहात् ॥ २ ॥ तृप्तिदीपाख्यं प्रकरणमारभमाणः श्रीभारतीतीर्थगुरुस्तस्य श्रुतिव्याख्यानरूपत्वात् तत्र व्याख्येयां श्रुतिमादौ पठति ॥ आत्मानमिति ॥ १ ॥ इदानीं चिकीर्षितग्रंथविचारं तत्फलं च दर्शयति अस्या इति अत्र तृप्तिदीपाख्ये ग्रंथे आत्मानं चेद्विजानीयादित्यादिकायाः श्रुतेरभिप्रायस्तात्पर्यं सम्यक् विचार्यते तेनाभिप्रायविचारेण जीवन्मुक्तस्य श्रुतिप्रसिद्धा या तृप्तिः सा विज्ञायते स्पष्टा भवति २ पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना आक्षेपस्य समाधानं व्याख्यानं पंचलक्षणमिति व्याख्यानलक्षणस्योक्तत्वात् पुरुष इति पदस्यार्थमभिधातुं तदुपोद्घातत्वेन सृष्टिं संक्षिप्य दर्शयति मायाभासेनेति प्रतिपाद्यमर्थं बुद्धौ संगृह्य तदर्थमर्थांतरवर्णनमुपोद्घातः अत्र मायाशब्देन चिदानंदमयब्रह्मप्रतिबिंबसमन्विता सत्वरजस्तमोगुणात्मि

॥श्रीः॥ आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् १

अस्याः श्रुतेरभिप्रायः सम्यगत्र विचार्यते जीवन्मुक्तस्य या तृप्तिः सा तेन विज्ञायते २

मायाभासेन जीवेशौ करोतीति श्रुतत्वतः कल्पितावेव जीवेशौ ताभ्यां सर्वं प्रकल्पितं ३

का जगदुपादानभूता प्रकृतिरुच्यते सा च सत्वगुणस्य शुद्ध्यविशुद्धिभ्यां द्विधा भिद्यमाना क्रमेण माया चाविद्या च भवति तयोर्मायाविद्ययोः प्रतिबिंबितं चैतन्यमेवेश्वरो जीवश्चेत्युच्यते तदिदं तत्त्वविवेकाख्ये ग्रंथे श्रीमद्विद्यारण्यगुरुभिर्निरूपितं चिदानंदमयब्रह्मप्रतिबिंबसमन्विता तमोरजःसत्वगुणा प्रकृतिर्द्विविधा च सा १ सत्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते मायाबिंबो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा २ सा कारणशरीरं स्यादिति इममेवार्थमनसि निधाय जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवतीति श्रुतिरपि प्रवृत्ता अतो जीवेश्वरयोर्मायाकल्पितत्वं अन्यत्कृत्स्नं जगत्ताभ्यामेव प्रकल्पितं ३ ४ ५

तत्र केन किं यत्कल्पितमित्यत आह ईक्षणादीति तदैक्षत बहु स्यां प्रजायेयेति श्रुतमीक्षणमादिर्यस्याः साईक्षणादिः अनेन जीवात्मनानुप्रविश्येति श्रुतः प्रवेशः अंतो यस्याः सा प्रवेशांता ईक्षणादिश्चासौ प्रवेशांता चेति पश्चात्कर्मधारयः सेयं सृष्टिरीश्वरेण कल्पिता जाग्रदादिर्यस्य संसारस्य असौ जाग्रदादिः विमोक्षो मुक्तिरंतो यस्य सः विमोक्षांतः संसारो जीवेन कल्पितः तदभिमानित्वात् जीवस्येत्यर्थः तत्र जाग्रदादयश्चैवं श्रूयंते सत्यमायापरिमोहितात्मा शरीरमास्थाय करोति सर्वं स्त्र्यन्नपानादिविचित्रभोगैः स एव जाग्रत्परितृप्तिमेति १ स्वप्नेऽपि जीवः स सुखदुःखभोक्ता स्वमायया कल्पितविश्वलोके सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति २ पुनश्च जन्मांतरकर्मयोगात्स एव जीवः स्वपिति प्रबुद्धः पुरत्रये क्रीडति यश्च जीवस्ततस्तु जातं सकलं विचित्रं ३ जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं यत्प्रकाशते तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यत इति ४ एवं पुरुषशब्दार्थावबोधोपयोगिनीं पुरुषशब्दार्थमाह असङ्गधि

ईक्षणादिप्रवेशांता सृष्टिरीशेन कल्पिता जाग्रदादिविमोक्षांतः संसारो जीवकल्पितः ४

असङ्गाधिष्ठानभूतात्मा कूटस्थासंगचिद्वपुः अन्योन्याध्यासतोऽसंगधीस्थजीवोऽत्र पूरुषः ५

साधिष्ठानो विमोक्षादौ जीवोऽधिक्रियते न तु केवलो निरधिष्ठानविभ्रांतेः क्वाप्यसिद्धितः ६

ष्ठानेति यः कूटस्थासंगचिद्वपुरविकार्यसंगचित्स्वरूपः असङ्गाधिष्ठानभूतात्मा भ्रमस्य देहद्वयाध्यासस्य अधिष्ठानत्वेन वर्तमानः परमात्मास्ति सोऽसंग एव अन्योन्याध्यासतः अन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येति आचार्यैर्निरूपितेन तादात्म्याध्यासेनासंगधीस्थजीवः स्वेन पारमार्थिकसंबंधं अन्यायां बुद्धौ वर्तमानो जीवः सन् अत्रास्यां श्रुतौ पुरुष इत्युच्यते स वा अयं पुरुषः सर्वासु पूर्षु पुरिशय इति श्रुत्या पुरुषशब्दस्य व्युत्पादितत्वात्पुरुषस्यैव च पुरुषत्वात् पुरुष एव पूरुषः बुद्ध्यादिकल्पनाधिष्ठानकूटस्थचैतन्यमेव बुद्धौ प्रतिबिंबितत्वेन प्राप्तजीवभावं सत्पुरुषशब्देनोच्यत इत्यभिप्रायः ५ नन्वत्र पुरुषशब्देन केवलचिदाभासरूपो जीव एवोच्यतां किमनेन कूटस्थचैतन्ये अधिष्ठानभूतेनेत्याशंक्य तस्य मोक्षाद्यन्वयित्वसिद्ध्ये तदपेक्षा कर्तव्यामित्याह साधिष्ठान इति साधिष्ठानः अधिष्ठानेन कूटस्थचैतन्येन सहितो जीवः विमोक्षादौ मोक्षस्वर्गादिसाधनानुष्ठानेऽधिक्रियते अधिकारी भवति ननु केवलश्चिदाभासः कुत इत्यत आह निरधिष्ठानविभ्रांतेः क्वाप्यसिद्धितः इति अधिष्ठानरहितस्यारोप्यस्य लोके दृष्टत्वा ५०

119
1938

इदानीं साधिष्ठानस्यैव तस्य संसारादि व्यवहारत्वं श्लोकद्वयेन विभज्य दर्शयति अधिष्ठानांशेति जीवो यदा अधिष्ठानांशसंयुक्तं कूटस्थसहितं भ्रमांशं चिदाभासोपेतं शरीरद्वयमवलंबते स्वस्वरूपत्वेन स्वीकरोति तदाहं संसारीत्येवमभिमन्यते ७ यदा पुनर्भ्रमांशस्य देहद्वयसहितस्य चिदाभासस्य तिरस्कारात् मिथ्यात्वज्ञानेनानादरणात् अधिष्ठानप्रधानता अधिष्ठानभूतस्यैव कूटस्थस्य स्वस्वरूपत्वं जीवेन स्वीक्रियते तदा अहं चिदात्मासंग इत्यस्मीति बुध्यते जानाति ८ नन्वधिष्ठानं चेतन्यस्य जीवस्य स्वरूपत्वस्वीकारे चिदात्माहमसंगोस्मीति बुध्यत इति यदुक्तं तदनुपपन्नं स्यात् असंगचिद्रूपस्य कूटस्थस्य अहंप्रत्ययविषयत्वाभावात् इति शंकते नासंग इति असंगे चिदात्मनि अविषये अहंप्रत्ययो न युज्यते यतः अतश्च कथमहमस्मीति जानीयात् न कथमपीत्यर्थः मुख्यया वृत्त्याहंप्रत्ययविषयत्वाभावेपि लक्षणया तदस्तीति विवक्षुरहंशब्दार्थं तावद्विभजते शृणु एको मुख्य इति अहमो अहंशब्दस्येत्यर्थः ९ कीदृशो मुख्योर्थ इत्याकांक्षायां तं दर्शयति अन्योन्येति कूटस्थचिदाभासयोः स्व

अधिष्ठानांशसंयुक्तं भ्रमांशमवलंबते यदा तदाहं संसारीत्येवं जीवोभिमन्यते ७ भ्रमांशस्य तिरस्कारादधिष्ठानप्रधानता यदा तदा चिदात्माहमसंगोस्मीति बुध्यते ८ नासंगेहंकृतिर्युक्ता कथमस्मीति चेच्छृणु एको मुख्यो द्वावमुख्यावित्यर्थस्त्रिविधोहमः ९ अन्योन्याध्यासरूपेण कूटस्थाभासयोर्वपुः एकीभूय भवेन्मुख्यस्तत्र मूढाः प्रयुंजते १० पृथगाभासकूटस्थावमुख्यौ तत्र तत्ववित् पर्यायेण प्रयुंक्तेहं शब्दं लोके च वैदिके ११

रूपमन्योन्याध्यासेनैकं प्राप्तं अहंशब्दस्य वाच्यत्वेन मुख्यो अर्थो भवति अस्य कुतो मुख्यत्वमित्यत आह तत्र मूढाः प्रयुंजत इति यत इत्यध्यासं सर्वेप्यहंशब्दः प्रयुज्यते अतोस्य मुख्यत्वमित्यर्थः १० इदानीममुख्यौ द्वौ दर्शयति पृथगिति आभासकूटस्थौ प्रत्येकमहंशब्दार्थत्वेन यदा विवक्षितौ तदा अमुख्यार्थौ भवतः अनयोरमुख्यत्वे कारणमाह तत्र तस्मिन्नविविक्ते कूटस्थचिदाभासयोः स्वरूपयोर्ताविवेक ज्ञानशून्यैश्च सर्वैरप्यहंशब्दः प्रयुज्यते अतोस्य मुख्यत्वमित्यर्थः हारः तत्र तत्वविदिति तत्रापि यत इत्यध्याहारः तत्वविद्यतस्तत्र तयोः कूटस्थचिदाभासयोरहंशब्दं लोके लौकिके च वैदिके वैदिकव्यवहारे पर्यायेण प्रयुंक्त इति योजना अयं भावः चिदाभासकूटस्थयोरविविक्तरूपस्य सार्वजनीनव्यवहारविषयत्वान्मुख्यार्थत्वं विविक्तरूपस्य तु कतिपयजनैः कदाचिदेव व्यवह्रियमाणत्वादमुख्यार्थत्वमिति ११

121
1938

पर्यायेण प्रयुंक्त इत्युक्तमेवार्थं प्रपंचयति प्रतिपत्तिसौकर्याय श्लोकद्वयेन लौकिकेति बुधो विद्वानहं गच्छामीत्यादि लौकिकव्यवहारे कूटस्थाच्चिदाभासं विविच्य तमेवाहंशब्देन विवक्षति वक्तुमिच्छति १२ असंग इति अयमेव बुधः शास्त्रीयदृष्टितः वेदान्तश्रवणजनितज्ञानेन केवले चिदाभासाद्विविक्ते कूटस्थे असंगोहं चिदात्माहमिति लक्षणयाहंशब्दं प्रयुंक्ते अतो लक्षणया अहंशब्दार्थत्वेनाहंप्रत्ययविषयत्वसंभवादसंगोहमस्मीति ज्ञानमुपपद्यत इत्यभिप्रायः १३ ननु पृथगाभासकूटस्थावहंशब्दस्य अमुख्यार्थावित्युक्तं तयोर्मध्ये कूटस्थः किं मज्ञाननिवृत्तये असंगोस्मीति जानाति किं वा चिदाभासः न तावत्कूटस्थः तस्यासंगचिद्रूपत्वेन ज्ञानित्वाज्ञानित्वयोरनुपपत्तेः अतश्चिदाभासस्य ज्ञानित्वादिकं वक्तव्यं तथा च सति कूटस्थादन्यश्चिदाभासोहं कूटस्थोस्मीति न ज्ञातुमर्हतीति शंकते ज्ञानिताज्ञानितेति १४

लौकिकव्यवहारेहं गच्छामीत्यादिके बुधः विविच्यैव चिदाभासं कूटस्थात्तं विवक्षति १२ असंगोहं चिदात्माहमिति शास्त्रीयदृष्टितः अहंशब्दं प्रयुंक्तेयं कूटस्थे केवले बुधः १३ ज्ञानिताज्ञानिते त्वात्माभासस्यैव न चात्मनः तथा च कथमाभासः कूटस्थोस्मीति बुध्यतां १४ नायं दोषश्चिदाभासः कूटस्थैकस्वभाववान् आभासत्वस्य मिथ्यात्वात्कूटस्थत्वावशेषणात् १५ कूटस्थोस्मीति बोधोपि मिथ्या चेन्नेति को वदेत् नहि सत्यतयाभीष्टं रज्जुसर्पविसर्पणं १६ तादृशेनापि बोधेन संसारो हि निवर्तते यक्षानुरूपो हि बलिरित्याहुर्लौकिका जनाः १७ तस्मादाभासपुरुषः सकूटस्थो विविच्य तं कूटस्थोस्मीति विज्ञातुमर्हतीत्यभ्यधाच्छ्रुतिः १८

तस्य कूटस्थादन्यत्वमेवासिद्धमिति परिहरति नायमिति तत्रोपपत्तिमाह आभासत्वेति यथा दर्पणे प्रतीयमानस्य मुखाभासस्य ग्रीवास्थमुखमेव तत्वं तद्वदिति भावः १५ ननु चिदाभासस्य मिथ्यात्वे तदाश्रितं कूटस्थोस्मीति ज्ञानमपि मिथ्या स्यादिति शंकते कूटस्थ इति कूटस्थस्वरूपातिरिक्तस्य कृत्स्नस्यापि मिथ्यात्वाभ्युपगमात् तन्मिथ्यात्वमस्माकमिष्टमेवेति परिहरति नेति को वदेदिति उक्तमर्थं दृष्टान्तेन स्पष्टयति नहीति रज्जौ कल्पितस्य सर्पस्य गत्यादिकमपि प्रतीयमानं वास्तवं नांगीक्रियते यथा तद्वदिति भावः १६ ज्ञानस्य मिथ्यात्वे तेन संसारनिवृत्तिर्न स्यादित्याशंक्य निवर्त्यस्य संसारस्यापि तथात्वात्तन्निवृत्तिरुपपद्यते स्वाप्नव्याघ्रदर्शनेन निद्रानिवृत्तिवदित्यभिप्रायेणाह तादृशेनेति तत्र यादृशो यक्षस्तादृशो बलिरिति लौकिकगाथां संवादयति यक्षेति १७ उपपादितमर्थमुपसंहरति तस्मादिति यस्मात्कूटस्थ एव चिदाभासस्य निजस्वरूपं तस्मात्पुरुषशब्दवाच्यः कूटस्थसहितश्चिदाभासः कूटस्थांशं मिथ्याभूतात्स्वस्माद्विविच्य लक्षणया कूटस्थोहमस्मीति ज्ञातुं शक्नोतीत्यभिप्रायेण श्रुतिरस्मीत्युक्तवतीत्यर्थः १८

पं०द० त०टी०

३

एवं पुरुषोऽस्मीतिपदद्वयप्रयोगाभिप्रायमभिधाय अयमितिपदप्रयोगाभिप्रायमाह असंदिग्धेति लोकिकानांप्रसिद्धेदेहरूप आत्मनि संशय विपर्ययरहितोयमस्मीतिबोधोयद्वद्दुपलभ्यते अत्रप्रत्यगात्मनिविषयेतद्वत्तथाविधंज्ञानंमुक्तिसिद्धयेसंपाद्यमितिनिर्णेतुमयमित्यभिधीय तेश्रुत्येतिशेषः १९ ईदृशस्यैवबोधस्यमोक्षसाधनत्वमाचार्येवाक्येनसंवादयति देहात्मेति अहंमनुष्यइति देहात्मविषयोदृढप्रत्ययो यथाएवंप्रत्यगात्मन्येवंदृढ एवात्मन्येवंदेहात्मत्वज्ञानापबाधनेनब्रह्माहमस्मीतिज्ञानंयस्यजायतेसविद्वान्नेच्छन्नपिमोक्षोच्छारहितो पिमुच्यते संसारहेतोरज्ञानस्यज्ञानेनापबाधितत्वादितिभावः २० अयमितिपदप्रयोगस्याभिप्रायांतरंशंकते अयमिति यथायं घटइत्यादिप्रयोगेष्विदमानिर्दिश्यस्यवस्तुनआपरोक्ष्यंदृष्टं तथायमस्मीत्यत्रापीतिभावः तदप्यस्माकमिष्टमेवेत्याह तदुच्यतामिति कु

असंदिग्धाविपर्यस्तबोधोदेहात्मनीष्यते तद्वदत्रेतिनिर्णेतुमयमित्यभिधीयते १९ देहात्मज्ञानवज्ज्ञानंदेहात्मज्ञानबाधकं॥ आत्मन्येवंभवेद्यस्यसनेच्छन्नपिमुच्यते २० अयमित्यपरोक्षत्वमुच्यतेचेत्तदुच्यतां स्वयंप्रकाशचैतन्यमपरोक्षंसदायतः २१ परो क्षमपरोक्षंचज्ञानमज्ञानमित्यदः नित्यापरोक्षरूपेपिद्वयंस्याद्दशमेयथा २२ नवसंख्याहृतज्ञानोदशमोविभ्रमात्तदा नवेत्तिदश मोस्मीतिवीक्ष्यमाणोपितान्नव २३ ६२ ६२ ६३ ६२

तदुच्यतआह स्वयमिति साधनांतरनिरपेक्षतयावभासमानंचैतन्यंमबाधकाभावान्नित्यापरोक्षमित्यस्माभिरभ्युपेतत्वादित्यर्थः २१ नन्वात्मनःस्वप्रकाशचिद्रूपत्वेननित्यापरोक्ष्याभ्युपगमेयमितिपदप्रयोगस्याभिप्रायवर्णनांगीकारबलादागतमात्मनःपरोक्षविषयत्वमपरो क्षविषयत्वंचसर्वलोकेज्ञानाज्ञानाश्रयविषयत्वंचानुपपन्नंस्यादित्याशंक्यदशमइवसर्वमुपपत्स्यतइत्याह परोक्षमपरोक्षंचेति परोक्ष मपरोक्षंचेत्येकंयुगलंज्ञानमज्ञानमित्यपरंइदंद्वयंनित्यापरोक्षरूपेप्यात्मनिदशमइवस्यादित्यर्थः २२ दृष्टांतंव्युत्पादयति नव राम

संख्येति परिगणनीयपुरुषनिष्ठ यानवसंख्ययापहृतविवेकेविज्ञानोदशमस्तदानात्मपरिगणनीयान्नवसंख्याकान्वीक्ष्यमा णोपिस्वस्यकूपस्थत्वपिभ्रांत्यागणनाकर्तारंस्वात्मानंदशमोहमस्मीतिनवेत्तीत्यर्थः २३ ६२ ६२ ६२ २

123
1938

एवंदशमेज्ञानंप्रदर्श्यतत्कार्यमावरणंदर्शयति नभातीति तदादशमः स्वंदशमंसंतंदशमोनभातिनास्तीतिमत्वावक्तिअस्यव्यवहारस्य यत्कारणंतदज्ञानकृतंअज्ञानकार्यमावरणंविदुर्बुधाइतिशेषः २४ अज्ञानस्यैवकार्यंविशेषंविक्षेपंदर्शयति नद्यामिति दशमस्यासत्वं २५ शनिवर्तकंपरोक्षज्ञानमाह नमृतइति २६ तस्यैवाभानांशनिवर्तकमपरोक्षज्ञानंदर्शयति त्वमेवेतिस्वेनपरिगणितैर्नवभिःसह स्वात्मानंगणयित्वात्वमेवदशमोसीतिप्रदर्शितःअहंदशमोस्मीतिअपरोक्षतयाज्ञात्वाहर्षंप्राप्नोतिरोदनंत्यजति २७ एवंदृष्टांतभू तदशमेप्रदर्शितमवस्थासप्तकमनुद्यदार्ष्टांतिकआत्मन्यपितद्योजनीयमित्याहअज्ञानेति अज्ञानंचावृत्तिश्चविक्षेपश्चद्विविधंज्ञा नंचतत्मिश्रेद्वंद्वःसमासः २८ तत्रात्मन्यज्ञानादिकंक्रमेणदर्शयति संसारासक्तेत्यादिना संसारेति अयंचिदाभासोविषयस

नभातिनास्तिदशमइतिस्वंदशमंतदा मत्वावक्तितदज्ञानकृतमावरणंविदुः २४ नद्यांममारदशमइतिशोचन्प्ररोदिति अज्ञान कृतविक्षेपंरोदनादिंविदुर्बुधाः २५ नमृतोदशमोस्तीतिश्रुत्वाप्तवचनंतदा परोक्षत्वेनदशमंवेत्तिस्वर्गादिलोकवत् २६ त्वमेव दशमोसीतिगणयित्वाप्रदर्शितः अपरोक्षतयाज्ञात्वाहृष्यत्येवनरोदिति २७ अज्ञानावृत्तिविक्षेपद्विविधज्ञानतृप्तयः शोका पगमइत्येतेयोजनीयाश्चिदात्मनि २८ संसारासक्तचित्तसन्चिदाभासःकदाचन स्वयंप्रकाशकूटस्थंस्वतत्वंनैववेत्त्ययं २९ नभातिनास्तिकूटस्थइतिवक्तिप्रसंगतः कर्ताभोक्ताहमस्मीतिविक्षेपंप्रतिपद्यते ३० अस्तिकूटस्थइत्यादौपरोक्षंवेत्तिवार्तया पश्चात्कूटस्थएवास्मीत्येवंवेत्तिविचारतः ३१

पादनादिध्यानासक्तचित्तःसन्कदाचनश्रुतिविचारात्पूर्वंकदापिस्वतत्वंस्वस्यनिजंरूपंस्वप्रकाशचिद्रूपंकूटस्थंप्रत्यगात्मानंनैववेत्ति न जानातियत्तदज्ञानं २९ नभातीति चिदाभासविषयेप्रसंगेजातेकूटस्थोनास्तिनभातीति मत्वाब्रूतेइदमज्ञानकार्यमावरणं कूटस्थास ६४ त्वाभानाभिधानवतकर्तृत्वादिकमात्मन्यारोपयति कर्तेति अस्यारोपस्यहेतुर्देहद्वयमुतश्चिदाभासोविक्षेपः ३० अस्तिकूट स्थइति परेणबोधितःकूटस्थोस्तीतिजानातीतिइदंपरोक्षज्ञानं श्रवणादिपरिपाकवशात्कूटस्थोहमेवास्मीतिजानातिइदमपरोक्षं

कर्त्रेति कूटस्थासंगात्मज्ञानानंतरं कर्तृत्वादिशोकजातं त्यजतीति यदयं शोकापगमः कृत्यं कर्तव्यजातं कृतं निष्पादितं प्रापणीयं फलजातं लब्धमिति तुष्यति इयं तृप्तिरित्यर्थः ३२ दार्ष्टांतिके पूर्वोक्तमवस्थासप्तकं अनुवदति अज्ञानमिति ३३ ननु काऽवस्थासप्तकस्याश्रयभूतो धर्मी जीवो वा कूटस्थो वा इत्याशंक्याह नैते वस्थाः कूटस्थस्येत्याह सप्तावस्थेति सर्वं वाक्यं सावधारणमिति न्यायेन चिदाभासस्यैव न कूटस्थस्येत्यवगम्यते सप्तावस्थानां आसामत्रापन्यासो ऽर्थः इत्याशंक्य न वृथा बंधमोक्षकारित्वं द्योतनफलत्वात् इत्यभिप्रायेणाह तास्विमाविति किमासां सप्तानामप्यविशेषेण बंधमोक्षकारित्वं नेत्याह तत्रेति अज्ञानावरणविक्षेपास्तिस्र इत्यर्थः ३४ आसां बंधकारित्वं दर्शयितुमासामपि स्वरूपं प्रत्येकं कार्यप्रदर्शनेन स्पष्टीचिकीर्षुरज्ञानस्य स्वरूपं तावद्दर्शयति नजा

कर्ताभोक्तेत्येवमादि शोकजातं प्रमुंचति कृतं कृत्यं प्रापणीयं प्राप्तमित्येव तुष्यति ३२ अज्ञानमावृतिस्तद्वद्विक्षेपश्च परोक्षधीः अपरोक्षमतिः शोकमोक्षस्तृप्तिर्निरंकुशा ३३ सप्तावस्था इमाः संति चिदाभासस्य तास्विमौ बंधमोक्षौ स्थितौ तत्र तिस्रो बंधकृतः स्मृताः ३४ न जानामीत्युदासीनव्यवहारस्य कारणं विचारप्रागभावेन युक्तमज्ञानमीरितं ३५ अमार्गेण विचार्याथ नास्ति नो भाति चेत्यसौ विपरीतव्यवहृतिरावृतेः कार्यमिष्यते ३६ देहद्वयचिदाभासरूपो विक्षेप ईरितः कर्तृत्वाद्यखिलः शोकः संसाराख्योऽस्य बंधकः ३७ अज्ञानमावृतिश्चैते विक्षेपात्प्राक् प्रसिध्यतः यद्यप्यथाप्यवस्थे ते विक्षेपस्यैव नात्मनः ३८ ॥

नामीति आत्मतत्वविचारप्रागभावसहितं उदासीनव्यवहारस्य कारणं न जानामीत्यनुभूयमानमज्ञानमीरितमित्यर्थः ३५ आवृतिकार्यं दर्शयति अमार्गेणेति शास्त्रोक्तप्रकारमतिलंघ्य केवलतर्केण विचार्यानंतरं कूटस्थो नास्ति न भातीत्येवंरूपो विपरीतव्यवहार आवरणकार्यमित्यर्थः ३६ विक्षेपस्य स्वरूपं तत्कार्यं च दर्शयति देहद्वयेति स्थूलसूक्ष्मात्मकशरीरद्वयसहितश्चिदाभासएव विक्षेपः बंधकः बंधहेतुः संसाराख्यः कर्तृत्वाद्यखिलः शोकः अस्य चिदाभासस्य कार्यमिति शेषः कर्तृत्वादित्यादिशब्देन प्रमातृत्वादयो गृह्यंते ३७ ननु सप्तावस्थाः चिदाभासस्येत्युक्तमनुपपन्नं अज्ञानावरणयोर्विक्षेपोत्पत्तेः पुरासिद्धत्वात् चिदाभासस्य च विक्षेपांतःपातित्वात्तदवस्थानुपपत्तेरित्याशंक्याह अज्ञानमिति अनयोर्विक्षेपात् पुरासिद्धत्वेपि नात्मावस्थात्वं तस्यासंगत्वेनावस्थावत्त्वानुपपत्तेः अतः परिशेषाच्चिदाभासावस्थात्वमेव तयोर्वक्तव्यमिति राम ६

125
1938

अवस्थावतो विक्षेपस्य तदानीमभावात्तदवस्थात्वाभिधानमनुपपन्नमित्याशंक्य विक्षेपाभावेपि तत्संस्कारस्य तदानीं सत्वाद्विक्षेपावस्थात्वाभिधानं न विरुध्यत इत्याह विक्षेपेति ततः कारणात्तयोस्तदवस्थात्ववर्णनमविरुद्धमिति योजना ३९ नन्वप्रसिद्धसंस्काराभ्युपगमद्वारा विक्षेपावस्थात्ववर्णनाद्वरमधिष्ठानतया प्रसिद्धब्रह्मावस्थात्ववर्णनमित्याशंक्यातिप्रसंगान्नैवमिति परिहरति ब्रह्मण्येति ४० ननु ब्रह्मण्यारोपितत्वाविशेषेपि विक्षेपोत्पत्त्युत्तरकालभाविनीनां संसारित्वाद्यवस्थानां जीवाश्रितत्वेनानुभूयमानत्वान्न ब्रह्मावस्थात्वमिति शंकते संसारीति संसारी कर्तृत्वादिधर्मवान् विबुधः तत्त्वसाक्षात्कारवान् निःशोकः शोकरहितस्तुष्टः वक्ष्यमाणकृतकृत्यत्वादिजनितसंतोषवानहमस्मीत्येवमवस्था जीवगा जीवाश्रिता भांति न ब्रह्माश्रिता इत्यर्थः ४१ एवं तर्ह्यज्ञानावरणयोरपि जीवाश्रितत्वेनानुभूयमानत्वाज्जीवावस्था

विक्षेपोत्पत्तितः पूर्वमपि विक्षेपसंस्कृतिः अस्त्येव तदवस्थात्वमविरुद्धं ततस्तयोः ३९ ब्रह्मण्यारोपितत्वेन ब्रह्मावस्थे इमे इति न शंकनीयं सर्वासां ब्रह्मण्येवाधिरोपणात् ४० संसार्यहं विबुद्धोहं निःशोकस्तुष्ट इत्यपि जीवगा उत्तरावस्था भांति न ब्रह्मगा यदि ४१ तर्ह्यज्ञोहं ब्रह्मसत्वभाने मद्दृष्टितो न हि इति पूर्वे अवस्थे च भासेते जीवगे खलु ४२ अज्ञानस्याश्रयो ब्रह्मेत्यधिष्ठानतया जगुः जीवावस्थात्वमज्ञानाभिमानित्वादवादिषं ४३ ज्ञानद्वयेन नष्टेस्मिन्नज्ञाने तत्कृतावृतिः न भाति नास्ति चेत्येषा द्विविधापि विनश्यति ४४ ॥

त्वमेवेति परिहरति तर्ह्यज्ञोहमिति मद्दृष्टितो मम अनुभवेनेत्यर्थः ४२ ननु तर्ह्यज्ञानाश्रयत्वं ब्रह्मणः पूर्वाचार्यैः कथमुक्तमित्याशंक्य तद्विवक्षां दर्शयति अज्ञानस्येति ब्रह्मणो अज्ञानाधिष्ठानत्वविवक्षया तदाश्रयत्वमुक्तमित्यर्थः ४ भवद्भिस्तर्हि किंविवक्षया जीवावस्थात्वमुक्तमित्याशंक्य स्वविवक्षां दर्शयति जीवावस्थात्वमिति ४३ एवं बंधहेतुमवस्थात्रयं प्रदर्श्य अवशिष्टास्ववस्थासु मध्ये पूर्वोक्ताज्ञानावरणनिवृत्तिद्वारा मुक्तिहेतुमवस्थाद्वयं दर्शयति ज्ञानद्वयेनेति परोक्षत्वापरोक्षत्वलक्षणेन ज्ञानद्वयेनावरणकारणे अज्ञाने नष्टे सति तत्कृतावृतिः तेनाज्ञानेनोत्पादितं न भाति नास्तीति व्यवहारकारणं द्विविधमप्यावरणं कारणाभावान्नश्यतीति ४४ ॥ ॥

श्रीगोपालकृष्ण ॥ ॥ ॥ श्रीसांबसदाशिव

कस्यांशस्यकेनानिवृत्तिरित्यपेक्षायांउभयंविभज्यदर्शयति परोक्षज्ञानतइति कूटस्थोऽस्तीत्येवंरूपात्परोक्षज्ञानादज्ञानस्यासत्वावरणकार
णत्वंनिवर्त्ततेकूटस्थोऽस्मीत्यपरोक्षज्ञानेनतुकूटस्थोनभातीत्येवंरूपावरणकारणत्वंनिवर्त्तते ४५ इदानींज्ञानस्यफलरूपावस्थाद्वयेप्रथमा
वस्थामाह अभानावरणइति अभानावरणेनिवृत्तेभ्रांत्याप्रतीयमानस्यजीवत्वस्यापिनिवृत्तत्वातनिमित्तकः कर्त्तृत्वादिलक्षणः संसा
रात्यशोकः सर्वोपिनिवर्त्ततइत्यर्थः ४६ एवंशोकापगमरूपावस्थांप्रदर्श्यनिरंकुशतृप्तिलक्षणांद्वितीयांदर्शयति निवृत्तेसर्वसंसारइति
४७ ननुआत्मानंचेद्विजानीयादितिमंत्रव्याख्यानेप्रवृत्तत्वात्त्वद्विहायमध्येऽज्ञानाद्यवस्थासप्तकनिरूपणंप्रकृतासंगतमित्याशंक्य आत्मा
नंचेद्विजानीयादित्यस्याःश्रुतेस्तात्पर्यनिरूपणत्वेपत्त्वेनाभिहितत्वान्नप्रकृतासंगतमित्यभिप्रेत्यश्रुतितात्पर्यमाह अपरोक्षज्ञानेतिद्वि

परोक्षज्ञानतोनश्येदसत्त्वावृत्तिहेतुता अपरोक्षज्ञाननाश्यात्यभानावृत्तिहेतुता ४५ अभानावरणेनष्टेजीवत्वारोपसंक्षयात कर्तृ
त्वाद्यखिलःशोकःसंसाराख्योनिवर्त्तते ४६ निवृत्तेसर्वसंसारेनित्यमुक्तत्वभासनात निरंकुशाभवेत्तृप्तिःपुनःशोकासमुद्भवात
४७ अपरोक्षज्ञानशोकनिवृत्त्याख्येउभेइमे अवस्थेजीवगेब्रूतआत्मानंचेदितिश्रुतिः ४८ अयमित्यपरोक्षत्वमुक्तंतद्द्वि
धंभवेत विषयस्वप्रकाशत्वात्धियाप्येवंतदीक्षणात ४९ परोक्षज्ञानकालेपिविषयस्वप्रकाशता समाब्रह्मस्वप्रकाशमस्तीत्ये
वंविबोधनात ५०

दाभासनिष्ठंयदवस्थासप्तकमस्तितत्रपरोक्षज्ञानशोकनिवृत्तिलक्षणमवस्थाद्वयंप्रतिपादयितुमयंमंत्रः प्रवृत्तइत्यभिप्रायः ४८ अयमि
त्यपरोक्षत्वमित्यत्रायमितिपदेनात्मनःपरोक्षत्वमुक्तंतदुक्तं तथासति अपरोक्षज्ञानविषयत्वमेवस्यान्नपरोक्षज्ञानविषयत्वमित्या
शंक्यतदुपपादनायापरोक्षंविभजते अयमितीति द्वैविध्यकारणमाह विषयेति विषयस्यचिद्रूपस्यात्मनःस्वप्रकाशत्वात्स्वव्यवहा
रेसाधनांतरनिरपेक्षत्वात्धियाबुध्याएवंस्वप्रकाशत्वेनतदीक्षणात्तस्यविषयस्यात्मनोवलोकनाच्चेत्यर्थः ४९ भवतुद्वैविध्यंएता
वतापरोक्षज्ञानविषयत्वेकिमायातमित्याशंक्यविषयस्वप्रकाशत्वंपरोक्षज्ञानविषयत्वेविरोधिनभवतीत्याह परोक्षज्ञानेति अ
परोक्षज्ञानकालइवपरोक्षज्ञानकालेपिविषयस्यब्रह्मणःस्वप्रकाशतास्त्येवतत्रोपपत्तिमाह ब्रह्मस्वप्रकाशमिति ५० ६७ राम
५

127
1938

प्रत्यगभिन्नब्रह्मगोचरस्यज्ञानस्यकुतःपरोक्षत्वमित्याशंक्यप्रत्यगंशाग्रहणादित्याह अहंब्रह्मेति नन्विदंभ्रांतमित्याशंक्यास्यभ्रां
तत्वंकिंबाध्यत्वादुतव्यक्त्यनुल्लेखादथवाअपरोक्षेणग्रहणयोग्यस्यपारोक्ष्येणग्रहणात्उतयद्वांशाग्रहणादितिचतुर्धाविकल्प्यप्रथमंप्रत्या
हएतदिति ५१ हेतुंविवृणोति ब्रह्मनास्तीति ५२ द्वितीयमतिप्रसंगेनदूषयति व्यक्तीति अयंस्वर्गइत्येवमाकारेणग्रहणाभावात्किं
तुस्वर्गोऽस्तीत्येवंसामान्याकारेणप्रतीतेःस्वर्गबुद्धेरपिभ्रमत्वप्रसंगइत्यर्थः ५३ तृतीयंनिराकरोति अपरोक्षत्वेति अपरोक्षत्वेनग्र
हणयोग्यस्यप्रत्यगभिन्नब्रह्मविषयस्यपरोक्षज्ञानस्यभ्रमत्वंनसंभवतिकुइत्यत्राह परोक्षमिति ब्रह्मपरोक्षमित्येवमाकारेणग्रहणाभावात्कु
तस्तर्हितस्यपरोक्षत्वमित्याशंक्याह अर्थादिति इदंब्रह्मेत्येवंव्यक्त्युल्लेखाभावसामर्थ्यात्परोक्षत्वसिद्धिरितिभावः ५४ चरममाशंकते॥

अहंब्रह्मेत्यनुल्लेखात्ब्रह्मास्तीत्येवमुल्लिखन परोक्षज्ञानमेतन्नभ्रांतंबाधानिरूपणात ५१ ब्रह्मनास्तीतिमानंचेतस्याद्बाध्येततदा
ध्रुवं नचैवंप्रबलंमानंपश्यामोतोनबाध्यते ५२ व्यक्त्यनुल्लेखमात्रेणभ्रमत्वेस्वर्गधीरपि भ्रांतिःस्याद्व्यक्त्यनुल्लेखात्सामान्योल्लेखदर्शना
त ५३ अपरोक्षत्वयोग्यस्यनपरोक्षमतिर्भ्रमः परोक्षमित्यनुल्लेखादर्थात्पारोक्ष्यसंभवात ५४ अंशागृहीतेर्भ्रांतिश्चेत्घटज्ञानंभ्रमो
भवेत निरंशस्यापिसांशत्वंव्यावर्त्यांशविभेदतः ५५ असत्वांशोनिवर्त्तेतपरोक्षज्ञानतस्तथा अभानांशनिवृत्तिःस्यादपरोक्षधिया
कृता ५६ दशमोस्मीतिविभ्रांतंपरोक्षज्ञानमीक्ष्यते ब्रह्मास्तीत्यपितद्वत्स्यादज्ञानावरणंसमं ५७ ६८ ६८

अंशेति ब्रह्मांशाग्रहणेपिप्रत्यगंशाग्रहणात्भ्रमत्वमित्यर्थः एवंतर्हिघटादिज्ञानस्यापिभ्रमत्वप्रसंगइति परिहरति घटज्ञानमिति आंतरा
वयवानामग्रहणादितिभावः ननुघटस्यसावयवत्वादंशाग्रहणेपिअंशाग्रहणंसंभवति ब्रह्मणस्तुनिरंशत्वात्कथमंशाग्रहणसंभवइत्याशंक्य
व्यावर्त्यांशोपाधिनिमित्तकंसांशत्वंतस्यभविष्यतीत्याह निरंशस्येति ५५ कोसौव्यावर्त्योंशइत्याकांक्षायामाह असत्वांशइति ५६ अपरो
क्षत्वेनग्रहणयोग्यविषयंपरोक्षज्ञानंभ्रमानभवतीत्येतत दृष्टांतदर्शनेनापिद्रढयति दशमइति दशमोस्मीत्याप्तवाक्यजन्यंपरोक्षज्ञानमभ्रां
तंयथाब्रह्मास्तीतिवाक्यजन्यज्ञानमपितद्वदभ्रांतंस्यादज्ञानकृतस्यासत्वावरणांशस्यसमत्वादितिभावः ५७ ६७ ६८

पं०द०तृ०टी०
६

ननु वाक्यात्परोक्षज्ञानमुत्पद्यते चेत् अपरोक्षज्ञानं कुतो जायत इत्याशंक्य विचारसहिताद्वाक्यादेवेत्याह आत्मेति अयमात्मा ब्रह्मेति महावाक्यार्थे सम्यग्विचार्यमाणे शेषमस्तीति परोक्षतया अवगतस्य ब्रह्मणः प्रत्यगभिन्नत्वं साक्षात्क्रियते तत्र दृष्टांतः यद्वदिति दशमस्त्वमसीत्यतो वाक्यात् स्वात्मानं दशमत्वेन यथा साक्षात्क्रियते तद्वदित्यर्थः ५८ विचारसहकृतेन वाक्येन अपरोक्षज्ञानोत्पत्तिप्रकारं सदृष्टांतमाह दशम इति त्वयास्तीति निरूपितो दशमः क इति प्रश्ने कृते तस्य त्वमेवेति परिहारे ऽभिहिते स्वात्मना सहेतरान्नव गणयित्वाहं दशमोस्मीति स्वमेव दशमं स्मरेदित्यर्थः ५९ अस्य दशमोस्मीति ज्ञानस्य विचारसहितवाक्यजनितत्वान्न विपर्ययादिरूपतेत्या

आत्मा ब्रह्मेति वाक्यार्थे निःशेषेण विचारिते । व्यक्तिरुल्लिख्यते यद्वत् दशमस्त्वमसीत्यतः ५८ दशमः क इति प्रश्ने त्वमेवेति निराकृते । गणयित्वा स्वेन सह स्वमेव दशमं स्मरेत् ५९ दशमोस्मीति वाक्योत्था न धीरस्य विहन्यते । आदिमध्यावसानेषु न नवत्वस्य संशयः ६० सदेवेत्यादिवाक्येन ब्रह्मसत्त्वं परोक्षतः । गृहीत्वा तत्त्वमस्यादिवाक्याद्व्यक्तिं समुल्लिखेत् ६१ आदिमध्यावसानेषु स्वस्य ब्रह्मत्वधीरियं । नैव व्यभिचरेत्तस्मादापरोक्ष्यं प्रतिष्ठितं ६२ ॥ ॥

ह दशम इति अस्य दशमस्य त्वमेव दशमोसीति वाक्यात्परिगणनादिलक्षणविचारसहितादुत्पन्नाहं दशमोस्मीति बुद्धिर्न विहन्यते न केनापि ज्ञानेन बाध्यते परिगणनक्रियायां च नवानामादिमध्यावसानेषु परिगणनेपि अहं दशमो न वेति संशयश्च न भवेदतः सा दृढापरोक्षरूपेत्यर्थः ६० एतत्सर्वं दार्ष्टांतिके योजयति सदेवेत्यादीति सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यादिवाक्येन ब्रह्मसद्भावं प्रथमं निश्चित्य तस्य जीवरूपेण प्रवेशादियुक्तिपर्यालोचनया प्रत्यग्रूपत्वं संभाव्य तत्त्वमसीत्यादिवाक्येनाद्वितीय ब्रह्मरूपमात्मानमहं ब्रह्मास्मीति साक्षात्कुर्यात् ६१ आदिमध्येति अत इयमात्मनो ब्रह्मत्वबुद्धिः पंचानां कोशानामादिमध्यावसानेष्वात्मनो व्यवहारेपि नैवान्यथा भवति अतोस्यात्म्या बुद्धेरपरोक्षज्ञानत्वं सुस्थितमित्यर्थः ६२ ॥ ॥ राम ६
श्रीसांबसदाशिव ॥
श्रीरामचंद्र ॥ ॥ ॥

129/1958

नन्वेवं प्रथमतः केवलं वाक्यात्परोक्षज्ञानं उत्पद्यते पश्चात् विचारसहितादपरोक्षज्ञानमित्येतत्कुतोवगम्यत इत्याशंक्य तैत्तिरीयकादिश्रुत्यर्थपर्यालोचनयेत्याह जन्मादीति भृगुनामकः कश्चिदृषिः पुरा यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीति तद्विजिज्ञासस्व तद्ब्रह्मेति वाक्यश्रुतेन जगज्जन्मादिकारणत्वाख्यलक्षणेन जगत्कारणं ब्रह्म परोक्षतयावगत्यान्नमयादिपंचकोशविचाराद्व्यक्तिं प्रत्यगात्मरूपं ब्रह्म दृष्टवानित्यर्थः ६३ नन्वस्मिन्प्रकरणे त्वं ब्रह्मासीत्येवमाद्युपदेशवाक्याभावात्कथं भृगोरात्मसाक्षात्कार इत्याशंक्यात्मसाक्षात्कारहेतुविचारयोग्यस्थलप्रदर्शनादित्याह यद्यपीति ६४ नन्वन्नमयादिकोशेषु विचारितेषु प्रतीचः साक्षात्कारो भवतु ब्रह्मणस्तु कथमित्याशंक्य प्रतीच एव ब्रह्मत्वात्पंचकोशविचारेणानंदात्मव्यक्तिं साक्षात्कृत्य आनं

जन्मादिकारणत्वाख्यलक्षणेन भृगुः पुरा । परोक्षेण गृहीत्वाथ विचाराद्व्यक्तिमैक्षत ६३ यद्यपि त्वमसीत्यत्र वाक्यं नोचे भृगोः पिता । तथाप्यन्नं प्राणमिति विचार्यस्थलमुक्तवान् ६४ अन्नप्राणादिकोशेषु सुविचार्य पुनःपुनः । आनंदव्यक्तिमीक्षित्वा ब्रह्मलक्ष्माप्ययूयुजत् ६५ सत्यं ज्ञानमनंतं वेत्येवं ब्रह्मस्वलक्षणं । उक्त्वा गुहाहितत्वेन कोशेष्वेतत्प्रदर्शितं ६६ पारोक्ष्येण विबुध्येंद्रो य आत्मेत्यादिलक्षणात् । अपरोक्षीकर्तुमिच्छंश्चतुर्वारं गुरुं ययौ ६७

दात्मैव खल्विमानि भूतानि जायंते आनंदेन जातानि जीवंति आनंदं प्रयंत्यभिसंविशंतीत्येवं ब्रह्मलक्षणमपि प्रतीच्येव योजितवानित्याह अन्नप्राणादीति ६५ ननु ब्रह्मलक्षणस्यानंदात्मरूपेण प्रतीचि योजनं न घटते ब्रह्मणस्तटस्थत्वेन प्रतीचोभिन्नत्वादित्याशंक्य न भेदः सत्यादिलक्षणस्य ब्रह्मणः प्रत्यग्रूपेणावस्थानश्रवणादित्याह सत्यमिति सत्यं ज्ञानमनंतं ब्रह्मेत्येवं ब्रह्मस्वलक्षणं ब्रह्मणः स्वरूपलक्षणमभिधाय यो वेद निहितं गुहायां परमे व्योमन्नित्यनेन वाक्येन पंचकोशगुहांतःस्थितत्वेन तस्यैव प्रत्यग्रूपत्वमभिहितमित्यर्थः ६६ एवं तैत्तिरीयश्रुतिपर्यालोचनया भृगोः परोक्षज्ञानपूर्वकविचारजन्यत्वं साक्षात्कारस्य दर्शयित्वा छांदोग्यश्रुतिपर्यालोचनेनापि तद्दर्शयति पारोक्ष्येणेति इंद्रो य आत्मापहतपाप्मा विजरो विमृत्युर्विशोक इत्यादिवाक्यप्रतिपादितेन लक्षणेनात्मानं परोक्षतयावगत्य विचाराच्छरीरत्रयनिराकरणेन तत्साक्षात्करणाय गुरुं ब्रह्माणं चतुर्वारमुपसन्न इति छांदोग्योपनिषद्यष्टमाध्याये श्रूयते ६७ ॥

इदानीमैतरेयकश्रुतावपितद्दर्शयति आत्मावाइति आत्मावाइदमेकएवाग्र आसीन्नान्यत्किंचनमिषदित्यनेनवाक्येनब्रह्मणोलक्षणमभिधा
यसईक्षतलोकान्नुसृजाइतीत्युपक्रम्यतस्यत्रयअवसथास्त्रयःस्वप्नाअयमावसथोयमावसथोयमावसथइत्यनेनपरमात्मनिजगदध्यारो
पणप्रकारमभिधायसजातोभूतान्यभिव्यैक्षत्किमिहान्यंवावदिषदितित्यादिनापित्स्यापवादमभिधायसएतमेवपुरुषंब्रह्मततममप
श्यदिदमदर्शमितिइतिप्रत्यगात्मनोब्रह्मस्वरूपत्वमभिहितंपुनश्चपुरुषोहवेत्यादिनाज्ञानसाधनंवैराग्यजननायगर्भवासादिदुःखंप्रद
र्श्यकोयमात्मेतिवयमुपास्महइत्यादिनाविचारेणतत्त्वंपदार्थपरिशोधनपुरःसरंप्रज्ञानंब्रह्मेतिप्रज्ञानरूपस्यात्मनोब्रह्मत्वंदर्शितमित्य
र्थः ६८ उक्तन्यायमितरासुश्रुतिष्वप्यतिदिशति आवांतरेणेति सर्वत्रसर्वासुश्रुतिष्वित्यर्थः ६९ ननुमहावाक्यविचारस्यअपरोक्षज्ञा

आत्मावाइदमित्येषोपरोक्षंब्रह्मलक्षितं अध्यारोपापवादाभ्यांप्रज्ञानंब्रह्मदर्शितं ६८ आवांतरेणवाक्येनपरोक्षाब्रह्मधीर्भवेत् सर्वत्रैव
महावाक्यविचारादपरोक्षधीः ६९ ब्रह्मापरोक्षसिध्यर्थंमहावाक्यमितीरितं वाक्यवृत्तावतोब्रह्मापरोक्षेविमतिर्नहि ७० आलंबनतयाभाति
योस्मत्प्रत्ययशब्दयोः अंतःकरणसंभिन्नबोधःसत्वंपदाभिधः ७१ मायोपाधिर्जगद्योनिःसर्वज्ञत्वादिलक्षणः पारोक्ष्यशबलःसत्याद्या
त्मकस्तत्पदाभिधः ७२
नजनकत्वंस्वकपोलकल्पितमित्याशंक्यवाक्यवृत्तावाचार्यैस्तथाप्रतिपादितत्वान्नैवमित्याह ब्रह्मापरोक्षेति अतोवाक्यात् ब्रह्मापरोक्षज्ञा
नेविप्रतिपत्तिर्नास्तीत्यर्थः ७० वाक्यवृत्तावुपपादनप्रकारंदर्शयति आलंबनतयेति योंतःकरणसंभिन्नबोधःअंतःकरणोपाधिकश्चिदात्मा
स्मत्प्रत्ययशब्दयोरहमितिज्ञानस्याहमितिशब्दस्यचालंबनतयाविषयत्वेनभातिसःतथाविधोबोधःत्वंपदाभिधःत्वमितिपदमभिधावा
चकंयस्यसःत्वंपदाभिधःत्वंपदाभिधःत्वंपदवाच्यइत्यर्थः ७१ एवंत्वंपदवाच्यार्थमभिधायतत्पदवाच्यार्थमाह मायोपाधिरिति पारो राम
क्ष्यशबलःपरोक्षत्वधर्मविशिष्टइत्यर्थःएवंतटस्थलक्षणमभिधायस्वरूपलक्षणमाह सत्याद्यात्मकइति सत्यमादिर्येषांज्ञा ७
नादीनांतेसत्यादयःआत्मास्वरूपंयस्यसतथाविधःतत्पदाभिधःतत्पदमभिधावाचकंयस्यसःतत्पदाभिधःतत्पदवाच्यइ
त्यर्थः ७२ ७ ८ ८ ८

131/1958

एवंपदार्थावभिधायवाक्यार्थबोधनायलक्षणावृत्तिराश्रयणीयेत्याह प्रत्यक्परोक्षतेति प्रत्यक्परोक्षत्वसद्वितीयत्वेनसहितापूर्णतेतिमध्यम
पदलोपीसमासः सद्वितीयत्वपूर्णत्वेचैकस्यवस्तुनोयतोविरुध्येते अतोलक्षणावृत्तिराश्रयणीयेत्यर्थः ७३ साचकीदृशीत्यतआह त
त्वमसीति भागलक्षणाभागत्यागलक्षणेत्यर्थः तत्रदृष्टांतः सोयमिति सोयंदेवदत्तइतिवाक्यस्थयोःसोयमितिपदयोर्यथाजहल्लक्षणावृत्ति
राश्रितानापरान् जहल्लक्षणानाप्यजहल्लक्षणातद्वदत्रापीत्यर्थः ७४ ननुगामानयेत्यादिवाक्येषुलक्षणावृत्याविनापिवाक्यार्थबोधोदृ
श्यतेनतद्वदत्रापिकिंनस्यादित्याशंक्याह संसर्गेति लोकेगामानयेत्यादौ[illegible]दैःस्मारितानांआकांक्षादिमतांगवादिपदार्थानामन्व
योवाक्यार्थत्वेनांगीकृतःयथानीलंमहत्सुगंध्युत्पलमित्यादौनीलत्वादिविशिष्टस्योत्पलस्यवाक्यार्थत्वंस्वीकृतंनैवमत्रमहावाक्येषुसं

प्रत्यक्परोक्षतैकस्यसद्वितीयत्वपूर्णता विरुध्येतेयतस्तस्माल्लक्षणासंप्रवर्तते ७३ तत्वमस्यादिवाक्येषुलक्षणाभागलक्षणा सोयमित्यादि
वाक्यस्थपदयोरिवनापरा ७४ संसर्गोवाविशिष्टोवावाक्यार्थोनात्रसंमतः अखंडैकरसत्वेनवाक्यार्थोविदुषांमतः ७५ प्रत्यग्बोधोयआभा
तिसोद्वयानंदलक्षणः अद्वयानंदरूपश्चप्रत्यग्बोधैकलक्षणः ७६ इत्थमन्योन्यतादात्म्यप्रतिपत्तिर्यदाभवेत् अब्रह्मत्वंत्वमर्थस्यव्यावर्ते
ततदैवहि ७७ तदर्थस्यचपारोक्ष्यंयद्येवंकिंततःशृणु पूर्णानंदैकरूपेणप्रत्यग्बोधोवतिष्ठते ७८

सर्गविशिष्टयोरन्यतरस्यवाक्यार्थत्वमभ्युपगम्यते किंतु अखंडैकरसत्वेनसगतादिभेदशून्यवस्तुमात्ररूपेणवाक्यार्थोविद्वद्भिरभ्यु
पगम्यते अतोलक्षणाआश्रयणीयेत्यर्थः ७५ अखंडैकरसंवाक्यार्थंदर्शयति प्रत्यग्बोधइति यःप्रत्यग्बोधःसर्वांतरश्चिदात्माआभा
तिबुध्यादिसाक्षित्वेनस्फुरतिसोद्वयानंदलक्षणःअद्वितीयआनंदरूपःपरमात्मेत्यर्थः अद्वयानंदरूपश्चतथाविधःपरमात्माप्रत्य
ग्बोधैकलक्षणश्चिदेकरसःप्रत्यगात्मैवेत्यर्थः ७६ एवमखंडार्थबोधनेकिंस्यादित्यतआह इत्थमिति ७७ तदर्थस्येति त्वम
र्थस्यप्रत्यगात्मनोब्रह्मत्वंभ्रांतिसिद्धाब्रह्मरूपतातदर्थस्यब्रह्मणश्चपारोक्ष्यंपरोक्षज्ञानैकविषयत्वंचनिवर्त्तते ततोपिकिमिति
पृच्छति यद्येवमिति उत्तरमाह शृण्विति ७८ ८ ८ ८

पं.२०.टी.१० ननु ममबलेन मम्यक् परोक्षानुभवसाधनमागमइत्यागमलक्षणं अतो वाक्यस्यापरोक्षज्ञानजनकत्वं कथमुच्यतइत्याशंक्य सिद्धांतपरिज्ञा
६ नशून्योयमितिमनसिनिधायोपहसति एवंसतीति एवंवदंतः सिद्धांतरहस्यं तेन जानंतीत्यर्थः ७९ ननु सिद्धांतस्तावत्तिष्ठतु वाक्यस्यापरोक्ष
ज्ञानजनकत्वमनुमानसिद्धमितिशंकते आस्तामिति विमतं वाक्यं परोक्षज्ञानजनकं भवितुमर्हति वाक्यत्वात् स्वर्गादिप्रतिपादकवाक्यवदि
त्यनुमानेन परोक्षज्ञानजनकत्वंसिद्धमित्यर्थः अनैकांतिकोयंहेतुरितिपरिहरति नैवमिति दशमस्त्वमसीतिवाक्येवाक्यत्वेसत्यपरोक्षज्ञान
जनकत्वस्योपलंभादितिभावः ८० किंच त्वंपदार्थस्य जीवस्यापरोक्षत्वाभावप्रसंगादपि न महावाक्यं परोक्षज्ञानजनकमित्यंगीकार्यमि

त्यभिप्रायेण ... एवं सति महावाक्यात्परोक्षज्ञानमीर्यते येस्तेषां शास्त्रसिद्धांतविज्ञानं शोभनेतरां ७९ आस्तां शास्त्रस्य सिद्धांतो युक्त्या वाक्यात्परोक्ष
धीः स्वर्गादिवाक्यवन्नैवं दशमे व्यभिचारतः ८० स्वतोपरोक्षजीवस्य ब्रह्मत्वमभिवांछतः नश्येत्सिद्धापरोक्षत्वमिति युक्तिर्महत्यहो ८१
... लौकिकं वचनं सार्थं संपन्नं त्वत्प्रसादतः ८२ अंतःकरणसंभिन्नबोधो जीवोपरोक्षतां अर्हत्यु
पाधिसद्भावान्न तु ब्रह्मानुपाधितः ८३ नैवं ब्रह्मत्वबोधस्य सोपाधिविषयत्वतः यावद्विदेहकैवल्यमुपाधेरनिवारणात् ८४ अंतः
करणसाहित्यराहित्याभ्यां विशिष्यते उपाधिर्जीवभावस्य ब्रह्मताया अनन्यथा ८५ ५ ५

साहस्यतइति ८१ इष्टापत्तिरित्याशंक्याह दशमेति ८२ ननु सोपाधिकत्वाज्जीवस्यापरोक्षत्वं युक्तं ब्रह्मणस्तु निरुपाधिक
त्वात्तन्न युज्यतइतिशंकते अंतइति ८३ ब्रह्मणो निरुपाधिकत्वमसिद्धमितिपरिहरति नैवं ब्रह्मेति जीवस्य ब्रह्मरूपताज्ञानं यद
स्ति तस्य सोपाधिकज्ञानविषयत्वात्तद्विषयस्य ब्रह्मणोपि सोपाधिकत्वं ज्ञानस्य सोपाधिकविषयत्वं च ज्ञेयस्य सोपाधिकत्व
मंतरेण न घटतइतिभावः तदेवकुतइत्यतआह यावदिति ८४ ननु तर्हि जीवब्रह्मणोर्विलक्षणमुपाधिद्वयं वक्तव्यमित्या
शंक्याह अंतइति जीवभावब्रह्मभावयोरंतःकरणसाहित्यराहित्ये उपाधी इत्यर्थः ८५ ५ ५ राम
श्रीरामकृष्ण ५ ५ ५ श्रीराम ६

133
1938

नन्वंतःकरणसंबंधस्य भावरूपत्वादुपाधित्वमस्तु नाभावरूपस्य तद्राहित्यस्य तदुचितमित्याशंक्य यावत्कार्यमवस्थाभेदहेतोरुपाधित्वेस्यु
क्तोपाधिलक्षणस्य साहित्यराहित्ययोरुभयोरपि सत्त्वादुचितमेवोपाधित्वमित्यभिप्रायेण परिहरति यथाविधीति विधिर्भावरूपोंतःकर
णसंबंधो यथा उपाधिः स्यात्तथा प्रतिनिषेधो भावरूपोंतःकरणवियोगोन किं उपाधिर्नस्यात्किं तु स्यादेवेत्यर्थः तथापि भावाभाव
रूपत्वलक्षणमवांतरवैलक्षण्यं दृश्यतएवेत्याशंक्य तस्याकिंचित्करत्वेनानादरणीयत्वमभिप्रेत्य दृष्टांतमाह सुवर्णेति पुरुषप्रया
सनिरोधकत्वांशेनुपयुक्तं सुवर्णत्वलोहत्वादिवैलक्षण्यं यद्वदनादरणीयं तद्वदित्यर्थः ८६ विधिरिव निषेधस्यापि ब्रह्मबोधोपायत्वे
न ब्रह्मोपाधित्वं दर्शयितुं विधिनिषेधयोरुभयोरपि ब्रह्मबोधोपायत्वमाचार्यैर्निरूपितमिति दर्शयति तद्वदेन ब्रह्माभिधीयते अतद्व्द्

यथा विधिरुपाधिः स्यात्प्रतिषेधस्तथा नकिं सुवर्णलोहभेदेन शृंखलात्वं नभिद्यते ८६ अतद्व्यावृत्तिरूपेण साक्षाद्विधिमुखेन च वे
दांतानां प्रवृत्तिः स्याद्द्विधेत्याचार्यभाषितं ८७ अहमर्थपरित्यागादहं ब्रह्मेति धीः कुतः नैवमंशस्यहित्यागो भागलक्षणयोदितः ८८ अं
तःकरणसंत्यागादवशिष्टे चिदात्मनि अहंब्रह्मेति वाक्येन ब्रह्मत्वं साक्षिणो क्ष्यतां ८९

नतदितिविकल्पमज्ञानादि नतत अतत् तस्य व्यावृत्तिरस्यनंतत्स्वरूपं उपायस्तेन साक्षाद्विधिमुखेन च विधिर्विधानं सा
क्षाद्वाचकशब्दप्रयोगः सत्यं ज्ञानमनंतमित्येवमादिरूपस्तेन च मुखेन न तद्द्वारेणापीत्यर्थः वेदांतानामुपनिषदां प्रवृत्तिः प्रवर्तनं प्रतिपा
दनं ब्रह्मणातिशयः ८७ ननु वेदांतानामतद्व्यावृत्त्या ब्रह्मबोधकत्वांगीकारेहंशब्दार्थस्य कूटस्थस्यापि त्यागप्रसंगादहं ब्रह्मास्मी
ति सामानाधिकरण्येन ज्ञानं नोदेतुमर्हतीतिशंकते अहमर्थेति अहंशब्दार्थस्य सर्वस्यात्यक्तत्वान्नैवमितिपरिहरति नैवमि
ति हियस्मात्कारणात् भागलक्षणया जहदजहल्लक्षणया अंशस्याहंशब्दार्थैकदेशस्य जडांशस्य त्यागईरितः न कूटस्थ
स्यातोहं ब्रह्मास्मीति ज्ञानमुपपद्यतइत्यर्थः ८८ अंशत्यागेन बोधनप्रकारमभिनीय दर्शयति अंतरिति ८९ ५
५ ५ ५

ननुकेवलस्य प्रत्यगात्मनः स्वप्रकाशत्वात् बुद्धिवृत्तिविषयत्वंनघटतइत्याशंक्याह स्वप्रकाशइति अन्यवद्घटवदित्यर्थः स्वप्रकाशोऽहमि त्येवंबुद्धिसंभवादिति भावः तर्हि अपसिद्धांतइत्याशंक्य पूर्वाचार्यैरपिवृत्तिव्याप्यत्वस्यांगीकृतत्वात् नायमपसिद्धांतइतिपरिहरति फलव्याप्यत्वमिति फलंवृत्तिप्रतिबिंबितचिदाभासस्तद्व्याप्यत्वमेवास्यप्रत्यगात्मनोनिराकृतंस्वस्यैवस्फुरणरूपत्वादितिभावः ९० आत्मनिफलव्याप्त्यभावंदर्शयितुमनात्मनोरस्याफलेनचव्याप्यत्वंदर्शयति बुद्धितदिति उभयव्याप्तेःप्रयोजनमाह तत्रेति तत्रयोर्बुद्धिचिदाभासयोर्मध्येधियाबुद्धिवृत्त्याप्रमाणभूतयाअज्ञानंनश्यतिज्ञानाज्ञानयोर्विरोधादाभासेनघटःस्फुरेत जडत्वेन स्वतःस्फुरणायोगादितिभावः ९१ इदानीमात्मनितयोर्वैलक्षण्यंदर्शयति ब्रह्मणीति प्रत्यक्ब्रह्मणोरेकत्वस्याज्ञानेनावृतत्वा

स्वप्रकाशेऽपिसाक्ष्येवधीस्थयाव्याप्यतेन्यवत् फलव्याप्यत्वमेवास्यशास्त्रकृद्भिर्निवारितं ९० बुद्धितत्स्थचिदाभासौद्वावपिव्याप्नु तोघटं तत्राज्ञानंधियानश्येत् आभासेनघटःस्फुरेत् ९१ ब्रह्मण्यज्ञाननाशायवृत्तिव्याप्तिरपेक्षिता स्वयंस्फुरणरूपत्वान्नाभासउ पयुज्यते ९२ चक्षुर्दीपावपेक्ष्येते घटादेर्दर्शनेयथा नदीपदर्शनेकिंतुचक्षुरेकमपेक्ष्यते ९३ स्थितोऽप्यसौचिदाभासोब्रह्म ण्येकीभवेत्परं नतुब्रह्मण्यतिशयंफलंकुर्यात्घटादिवत् ९४ ७२

तस्याज्ञानस्यनिवृत्तयेवाक्यजन्ययाहंब्रह्मास्मीत्येवमाकारयाधीवृत्त्याव्याप्तिरपेक्ष्यते स्वस्यैवस्फुरणरूपत्वात्तत्स्फुरणायचि दाभासोनापेक्ष्यते अंतायुज्यमानोऽपिचिदाभासोनोपयुज्यतइत्यर्थः ९२ उक्तमर्थंदृष्टांतप्रदर्शनेनविशदयति चक्षुरिति अंधकारावृत्तघटादिदर्शनेचक्षुर्दीपावुभावप्यपेक्ष्येतेदीपप्रदर्शनेतुतथानकिंतुएकंचक्षुरेवापेक्ष्यतेयथातथाब्रह्मण्यज्ञान नाशायेतिपूर्वेणसंबंधः ९३ ननुबुद्धितद्वृत्तीनांचिदाभासेनव्याप्यस्वाभाव्याद्घटादिष्विवब्रह्मण्यपिफलव्याप्तिर्बलाद्भवेदि त्याशंक्याह स्थितोऽपीति यद्यपिघटाद्याकारवृत्तिवत्ब्रह्मगोचरवृत्तावपिचिदाभासोऽस्तितथापिनासौब्रह्मणाभेदेनभासते किंतुप्रचंडातपमध्यवर्तिप्रदीपप्रभावत्तेनैकीभूतोऽस्तिअतःस्फुरणलक्षणातिशयजनकोनब्रह्मणीत्यर्थः ९४ ७२

राम ९

135
1938

ननुब्रह्मणिफलव्याप्तिर्नास्तिवृत्तिव्याप्तिरस्त्विति यदुक्तं अत्रकिंप्रमाणमित्याशंक्यागमःप्रमाणमाह अप्रमेयमिति निर्विक ल्पमनंतंचहेतुदृष्टांतवर्जितं अप्रमेयमनादिंचयत्ज्ञात्वामुच्यतेबुधइत्यत्रास्मिन्मंत्रेश्रुत्याःमृतबिंदूपनिषदाअप्रमेयशब्देन दफलव्याप्तिराहित्यमुक्तंमनसैवेदमाप्तव्यंनेहनानास्तिकिंचनेति कठवल्यांधीव्याप्यताश्रुतावृत्तिव्याप्यत्वंश्रुतमित्यर्थः ९५ आत्मा नंचेद्विजानीयादितिमंत्रेणापरोक्षज्ञानशोकनिरत्यासव्यं जीवगतमवस्थाद्वयमभिधीयतइत्युक्तं अपरोक्षेति ९६ अनेनश्लोके नतत्रकियतांशेनापरोक्षज्ञानमुच्यतइत्याकांक्षायामाह आत्मानमिति ब्रह्मात्मव्यक्तिंसत्यादिलक्षणब्रह्माभिन्नप्रत्यगात्मस्वरू पमुल्लिख्यविषयीकृत्ययोबोधोजायतेब्रह्माहमस्मीतिसोऽभिधीयतेनेनवाक्येनेत्यर्थः ९७ ननुतर्हिपूर्वोक्तरीत्यामहावाक्यविचा

अप्रमेयमनादिंचेत्यत्रश्रुत्येदमीरितं मनसैवेदमाप्तव्यमितिधीव्याप्यताश्रुता ९५ अपरोक्षज्ञानशोकनिवृत्त्याख्येउभेइमे अवस्थे जीवगप्रूतआत्मानंचेदितिश्रुतिः ९६ आत्मानंचेद्विजानीयादयमस्मीतिवाक्यतः ब्रह्मात्मव्यक्तिमुल्लिख्ययोबोधःसोऽभिधीयते ९७ अस्तुबोधोऽपरोक्षोऽत्रमहावाक्यात्तथाप्यसौ नदृढःश्रवणादीनामाचार्यैःपुनरीरणात् ९८ अहंब्रह्मेतिवाक्यार्थबोधोयावद्दृढो भवेत् शमादिसहितस्तावदभ्यसेच्छ्रवणादिकं ९९ बाढंसंतिदार्ढ्यस्यहेतवःश्रुत्यनेकता असंभाव्यत्वमर्थस्यविपरीताचभा वना १००

रादेवापरोक्षज्ञानमिद्धेरावृत्तिरसकृदुपदेशादित्यादौविहितंश्रवणाद्यावर्तनमननुष्ठेयंस्यादित्याशंक्यज्ञानदार्ढ्यायतदावर्तनानुष्ठा नस्याचार्यैरभिहितत्वादनुष्ठेयमेवेत्याह अस्तुबोधइति अत्रब्रह्मात्मविषयमहावाक्यात्मकस्थुताद्विचारसहितादपरोक्षबोधोऽस्तु भवत्वेवंतथापिनासौदृढःअतःश्रवणाद्यावर्तनीयंश्रीमच्छंकराचार्यैःपुनर्वाक्यार्थज्ञानोत्पत्त्यनंतरमपिश्रवणाद्यावर्तनाभिधानादि त्यर्थः ज्ञानदार्ढ्यायेत्यर्थोलभ्यते ९८ आचार्यैःकेनवाक्येनाभिहितमित्याशंक्यतद्वाक्यंपठति अहंब्रह्मेतीति ९९ ननुवाक्यजनि तज्ञानस्यादार्ढ्यंकुतइत्याशंक्याह बाढमिति हियस्मात्कारणाच्छ्रुत्यनेकताश्रुतीनांनानात्वमेकोहेतुः अर्थस्याप्यद्वैतैकरसस्याद्विती यब्रह्मरूपस्यालौकिकत्वेनासंभावितत्वमपरःविपरीतभावनाचपुनःकर्तृत्वाभिमानरूपस्तृतीयःइत्येवंविधादार्ढ्यस्यहेतवोबाढंसं तिसर्वथाविद्यंते अतोऽपरोक्षानुभवदार्ढ्यायश्रवणादिकमावर्तनीयमितिभावः १०० ७२ ७२

एवंत्रिविधान् भेदान्मोहेत तु धन्यस्य श्रुतिनानात्वप्रयुक्तादान्निरत्तये श्रवणावृत्तिः कार्येत्याह शाखेति यथा शाखाभेदात्कर्मभेदः श्रूयते यदेवं चैव होत्रं क्रियते यजुषा आध्वर्यवं साम्नोद्गीथमिति यथा वा कामभेदात्कारीर्योष्टिकामो यजेत शतकृष्णलमायुष्कामइत्यादिकर्मभेदः श्रूत एवमुपनिषत्स्वपि प्रतिपाद्यतत्त्वस्य भेदशंकायां तन्निवारणाय श्रवणं पुनः पुनः कर्तव्यमित्यर्थः १०१ किं तच्छ्रवणमित्याकांक्षायां तल्लक्षणमाह वेदांतानामिति सर्वासामप्युपनिषदामुपक्रमोपसंहारादिपर्यालोचनायां ब्रह्मरूपे प्रत्यगात्मन्येव तात्पर्यं पारंपर्येण पर्यवसानमित्येवंरूपो निश्चयः श्रवणमित्यर्थः १०२ एवंविधश्रवणं कुत्र निरूपितमित्यत आह समन्वयाध्यायेति एतच्छ्रवणं समन्वयाध्याये सूत्रकृत्व्यासादिभिरिति शेषः अर्थासंभावनानिवृत्तिहेतुर्मननं तु द्वितीयाध्याये निरूपितमित्याह

शाखाभेदात्कामभेदाच्छ्रुतं कर्मान्यथान्यथा एवमत्रापि माशंकीत्यतः श्रवणमाचरेत् १०१ वेदांतानामशेषाणामादिमध्यावसानतः ब्रह्मात्मन्येव तात्पर्यमिति धीः श्रवणं भवेत् १०२ समन्वयाध्याय एतत्सूक्तं धीस्वास्थ्यकारिभिः तर्कैः संभावनार्थस्य द्वितीयाध्याय ईरिता २ बहुजन्मदृढाभ्यासाद्देहादिष्वात्मधीः क्षणात् पुनः पुनरुदेत्येवं जगत्सत्यत्वधीरपि ३ विपरीता भावनेयमैकाग्र्यात्सा निवर्तते तत्त्वोपदेशात्प्रागेव भवत्येतदुपासनात् ४ उपास्तयोऽत एवात्र ब्रह्मशास्त्रेपि चिंतिताः प्रागनभ्यासिनः पश्चाद्ब्रह्माभ्यासेन तद्भवेत् ५ तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः ६ ८२

धीस्वास्थ्यकारिभिरिति प्रमेयगतानुपपत्तिपरिहारद्वारा बुद्धिस्वास्थ्यकारिभिस्तर्कैः युक्तिशब्दाभिधेयैरर्थस्य संभावनासंभावितत्वानुसंधानं द्वितीयाध्याये मननं निरूपितमित्यर्थः २ इदानीं विपरीतभावनां तन्निरसनोपायं च दर्शयति बहुजन्मेति ३ विपरीतेति विपरीभावनानिवर्तकं यदेकाग्र्यं तत्कुतो जायत इत्याशंक्याह तत्त्वेति एतदेकाग्र्यं ब्रह्मोपदेशात् प्रागेव सगुणब्रह्मोपासनाद्भवति भवेदित्यर्थः ४ नन्वेतत्कुतोवगतमित्याशंक्य उपासनाविचारस्य वेदांतशास्त्रे कृतत्वादित्याह उपास्तेति अकृतोपास्तिकस्य कुतस्तज्जन्मेत्यत आह प्रागिति ५ ब्रह्माभ्यासश्च कीदृश इत्याकांक्षायामाह तच्चिंतनमिति ६ ८२ ८२ राम १०

137/1958

एकं देवपरत्वं विशदयितुं श्रुतिमाह तमेवेति धीरो ब्रह्मचर्यादिसाधनसंपन्नो ब्राह्मणो ब्रह्म भवितुमिच्छुर्मुमुक्षुस्तमेव प्रत्यग्रूपं परमात्मानमेव विज्ञाय मंगत्याद्युपायेषु यथा भवति तथा ज्ञात्वा प्रज्ञां ब्रह्मात्मैकत्वज्ञानसंततिरूपमैकाग्र्यं कुर्वीत संपादयेत् नात्मगोचरान् बहून् शब्दाननुध्यायात् नानुस्मरेत् ध्यानेनाभिधानमप्युपलक्ष्यते नाभिदध्याच्च अन्यथा शब्दध्यानेन वाग्विग्लापनानुपपत्तेः कुत इत्यत आह वाचो विग्लापनं तदिति हि यस्मात्तदभिध्यानं अनेन स्मरणमप्युपलक्ष्यते वाचः इति मनसोप्युपलक्षणं विग्लापनं विग्लापयतीति विग्लापनं श्रमहेतुः अयमभिप्रायः इतरशब्दानुसंधाने मनसः श्रमो भवति तदभिधाने तु वाच इति ७ एवमैकाग्र्यप्रतिपादिकां श्रुतिमभिधाय स्मृतिमप्याह अनन्येति ये जना अनन्या अहं ब्रह्मास्मीति ज्ञानेन मदभिन्नाः संतस्तथैव मां चिंतयंतः पर्युपासते परितः सर्वेष्वपि काले

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तत् ७ अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं ८ इति श्रुतिस्मृती नित्यमात्मन्येकाग्रतां धियः विधत्तो विपरीताया भावनायाः क्षयाय हि ९ यद्यथा वर्तते तस्य तत्त्वं हित्वान्यथात्वधीः विपरीता भावना स्यात्पित्रादावरिधीर्यथा १० आत्मा देहादिभिन्नोयं मिथ्या चेदं जगत्तयोः देहाद्यात्मत्वसत्यत्वधीर्विपर्ययभावना ११

षु उपासते तेषां मद्रूपाः एव वर्तंते नित्याभियुक्तानां सदा मच्चिंतानां तेषां अहं तदात्मत्वेनानुसंधीयमानोऽहं योगक्षेमं अलब्धलाभलब्धपरिरक्षणरूपौ योगक्षेमौ वहामि संपादयामि इत्यर्थः ८ उदाहृतयोः श्रुतिस्मृत्योस्तात्पर्यमाह इतीति एते श्रुतिस्मृती विपरीतभावनानिवृत्तये आत्मनि सदा चित्तैकाग्र्यं प्रतिपादयत इत्यर्थः ९ ननु देहाद्यात्मत्वबुद्धेः जगत्सत्यत्वबुद्धेश्च कुतो विपरीतभावनात्वमित्याशंक्य तल्लक्षणयोगादिति दर्शयितुं तस्याः लक्षणमाह यद्यथेति यद्वस्तु शुक्त्यादि यथा येन शुक्त्यादिरूपेण वर्तते तस्य तत्त्वं शुक्त्यादिरूपत्वं परित्यज्यान्यथात्वधीः अन्यथात्वस्य रजतादिरूपत्वस्य धीर्ज्ञानं विपरीतभावना स्यात् तस्मिंस्तद्बुद्धिरिति यावत् तामुदाहरति पित्रेति १० उक्तलक्षणं प्रकृतयोर्योजयति आत्मेति अयमात्मा वस्तुतो देहादिभ्यो भिन्नः इदं जगच्च मिथ्या एवं सत्यपि तयोः आत्मजगतोर्यथाक्रमं देहादिरूपत्वबुद्धिः सत्यत्वबुद्धिश्च यासा विपरीतभावनेत्यर्थः ११ ८३ ८३ ८३

पं०द०त०टी० सर्वमेकाग्यात्मानिवर्त्ततइतिसामान्येनोक्तमर्थंविशेषाकारेणाह तत्वभावनयेति सादेहाद्यात्मजगतस्सत्यत्वधीरूपाविपरीताभावना
११ तत्वभावनया आत्मनोदेहादितिरिक्तत्वस्यजगतोमिथ्यात्वस्यच भावनयानिरंतरध्यानेननश्येत अत आत्मनोदेहाद्यतिरिक्तत्वंदेहादेर्ज
गतोमिथ्यात्वंचसदाभावयेदित्युक्तं १२ तत्रजपादाविवनियमापेक्षास्तिवानवेतिपृच्छति किंमंत्रजपवदिति आत्मभेदाधीरात्मनो
देहादिभ्योविभिन्नज्ञानं जगतोमिथ्यात्वानुसंधानंचमंत्रजपदेवताध्यानादिवत्किं नियमेनानुष्ठातव्यंउतलौकिकव्यवहारवन्नियमं
तरेणापिकर्तुंशक्यतइति १३ दृष्टफलकत्वान्नात्रनियमःकश्चिदस्तीत्याह अन्यथेति अन्यथानियमंविनेत्यर्थः तत्रहेतुमाह भु
क्तिवदितिदृष्टार्थेपिभोजनेनियमाःश्रूतिस्मृत्योरुपलभ्यंतइत्याशंक्याह बुभुक्षुरिति क्षुदनपनयनायभोक्तुमिच्छन्पुरुषोजपंकुर्वा

तत्वभावनयानश्येत्सातोदेहादिविविक्तता आत्मनोभावयेत्तद्वन्मिथ्यात्वंजगतोनिशं १२ किंमंत्रजपवन्मूर्तिध्यानवद्वात्मभेदधीः जगन्
मिथ्यात्वधीश्चात्रभाव्यानियम्यादुतान्यथा १३ अन्यथेतिविजानीहि दृष्टार्थत्वेनभुक्तिवत् बुभुक्षुर्जपवद्भुंक्तेनकश्चिन्नियतः क्वचित् १४
अश्नातिवानवाश्नातिभुंक्तेवास्वेच्छयान्यथा येनकेनप्रकारेणक्षुधामपनिनीषति १५ नियमेनजपंकुर्यादकृतौप्रत्यवायतः अन्यथा
करणेनर्थः स्वरवर्णविपर्ययात् १६
णइवनियमेनभुंक्ते अपितुयथाक्षुद्बाधोपशांतिः सतथाभोजनंकरोतीत्यर्थः १४ एतदेवप्रपंचयति अश्नातीति अश्नातिवान्नंस
तिकदाचिद्भुंक्तेनवाश्नातितस्मिन्नसतिक्षुद्बाधाविस्मारकद्यूतादिचेष्टयाःनश्यन्नेवकालंनयति अन्यथावातिष्ठन्गच्छन्शयानोवा
स्वेच्छयाभुंक्तेएवंयेनकेनप्रकारेणतात्कालिकींक्षुद्बाधामपनेतुमिच्छति अयमभिसंधिःक्षुद्बाधानिवृत्तिलक्षणदृष्टफलायभोजनेन राम
वकार्येनियमास्तुपरलोकहेतवइति १५ जपादौभोजनादिवैलक्षण्यंदर्शयति नियमेनेति तत्रहेतुमाह अकृताविति भवत्वेवमकर ११
णेप्रत्यवायश्च अन्यथाकरणेतुसनास्तीत्याशंक्याह अन्यथेति मंत्रोहीनः स्वरतोवर्णतोवामिथ्याप्रयुक्तोनतमर्थमाह सवाग्व
ज्रोयजमानंहिनस्तियथेंद्रशत्रुः स्वरतोपराधादित्युक्तत्वादिति भावः १६ ७ ७
७ ७ ७ श्रीसांब० ७

ननुक्षुद्बाधायादृष्टबाधाहेतुत्वात्तन्निवर्त्तयःनियमेनापिभोक्तव्यमेवविपरीतभावनयास्तुतथात्वाभावात्तन्निवर्त्तकंध्यानमदृष्टफलायनि
यमेनानुष्ठेयमित्याशंक्याह क्षुधेवेतिविपरीतभावनायादुःखहेतुत्वस्यानुभवसिद्धत्वादितिभावः १७ तर्हिसउपायःप्रदर्शनीयः
णकल्पनानिर्बंधोस्तीत्याशंक्याहः यइत्याशंक्यपूर्वमेवप्रदर्शितइत्याह उपायइति ननुजपवत्प्राङ्मुखत्वादियेनियमोमाभूत्ध्यान
वदेतदेकपरत्वलक्षणेकाग्रतानिर्बंधोस्तीत्याशंक्याह एतदिति १८ ननुध्यानस्यध्येयचिंतामात्रात्मकत्वात्तत्रकोनिर्बंधइत्याशंक्य
ध्यानेनिर्बंधंदर्शयितुंध्यानस्वरूपंतावदाह मूर्त्तीति धियोबुद्धेः संबंधिनांप्रत्ययानांदेवतादिमूर्त्तिगोचराणांप्रत्ययानांयत्सांतत्यमवि
च्छिन्नतयावर्त्तमानत्वंतदन्यानंतरितमन्येनविजातीयप्रत्ययेनाव्यवहितंसतत्ध्यानमित्युच्यते एवंध्यानस्वरूपंनिरूप्यतत्रनिर्बंधंद

क्षुधेवदृष्टबाधाकृद्विपरीतात्वभावना जेयाकेनाप्युपायेननास्त्यत्रानुष्ठितेःक्रमः १७ उपायःपूर्वमेवोक्तस्तच्चिंताकथनादिकः एतदेक
परत्वेपिनिर्बंधोध्यानवन्नहि १८ मूर्त्तिप्रत्ययसांतत्यमन्यानंतरितंधियः ध्यानंतत्रातिनिर्बंधोमनसश्चंचलात्मनः १९ चंचलंहिमनः
कृष्णप्रमाथिबलवद्दृढं तस्याहंनिग्रहंमन्येवायोरिवसुदुष्करं २० अप्यब्धिपानान्महतःसुमेरून्मूलनादपि अपिवह्न्यशनात्साधोविष
मश्चित्तनिग्रहः २१ कथनादौनिर्बंधःशृंखलाबद्धदेहवत् किंत्वनंतेतिहासाद्यैर्विनोदोनाद्यवद्धियः २२ ७ ७

र्शयति तत्रेति सदापर्यटनशीलस्यकपितुरगादेरेकत्रस्तंभादौबंधनेयथापरोधस्तद्वदितिभावः १९ मनश्चांचल्यादौगीतावाक्यंप्रमाण
यति चंचलंहीति प्रमाथिप्रमथनशीलंपुरुषस्यव्याकुलत्वकारणंबलवत्समर्थमनिग्राह्यमित्यर्थः स्वदृढंसत्येसतिवाविषयेलग्नंततउ
द्धर्त्तुमशक्यमित्यर्थः अतस्तस्यमनसोनिग्रहोवायोर्निग्रहइवसुदुष्करः २० मनसोदुर्निग्रहत्वेवासिष्ठवाक्यमपिप्रमाणयति अपीति
२१ प्रकृतेतत्तोवैषम्यंदर्शयति कथनादाविति शृंखलाबद्धदेहस्ययथानिर्बंधःनतथात्रकथनादावित्यर्थः आदिशब्देनतच्चिंतनादि
कंगृह्यतेतर्हिकेवलंनिर्बंधाभावश्चप्रत्युतधियोविनोदइत्याह किंत्विति इतिहासःपूर्वेषांकथा आख्यायिकालौकिककथानुकूलयुक्तिदृ
ष्टांतप्रदर्शनादीनांते अनंता असंख्याता अनंताश्चतेइतिहासाद्याश्चइत्यनंतेतिहासाद्यास्तैर्धियःबुद्धेःविनोदःक्रीडाविशेषोभव
तितत्रदृष्टांतःनाद्यवदिति नित्यक्रियानिरीक्षणमिवेत्यर्थः २२ ७ ७ ७

139/1938

ननु कृष्यादिभिरप्येतदेकपरत्वविघातः स्यादित्याशंक्याह चिदेवेति इतिहासादीनामात्मा चिन्मात्ररूपो न देहादिरूपः जगच्च मिथ्येत्येत
स्मिन्नर्थे पर्यवसानात्तैर्नैतदेकपरत्वशब्दादिभिर्यस्य निदिध्यासनस्य विक्षेपइत्यर्थः २३ नन्वितिहासानामंगीकारे कृष्यादेरपि प्रसक्तिः
स्यादित्याशंक्याह कृषीति २४ कृष्यादीनां तत्त्वानुसंधानविघातित्वेन त्याज्यत्वे भोजनादेरपि तथात्वात्तदपि त्याज्यमेवेत्याशंक्याह अनुसं
२५ दधतेति कुतइत्यत आह आशु पुनः स्मृतेरिति ननु तदानीं विक्षेपाभावेपि तत्त्वविस्मृतिसद्भावात्पुरुषार्थहानिः स्यादित्याशंक्याह
तत्त्वविस्मृतीति कुतस्तर्ह्यनर्थइत्यत आह किंतु विपर्ययादिति विस्मरणे सति विपर्ययोपि स्यादित्याशंक्याह विपर्येतुमिति २६ ननु भो
जनादिषु प्रवर्तमानस्य तत्त्वाभ्यासरहितस्यापि तत्त्वस्मरणं किं न स्यादित्याशंक्याह तत्त्वस्मृतेरिति न केवलं तत्त्वानुसंधानावसराभाव एव किं

चिदेवात्मा जगन्मिथ्येत्यत्र पर्यवसानतः निदिध्यासनविक्षेपो नेतिहासादिभिर्भवेत् २३ कृषिवाणिज्यसेवादौ काव्यतर्कादिकेषु च विक्षिप्य
ते प्रवृत्तार्थीस्तैस्तत्त्वस्मृत्यसंभवात् २४ अनुसंदधतैवात्र भोजनादौ प्रवर्तितुं शक्यतेत्यन्तविक्षेपाभावादाशु पुनः स्मृतेः २५ तत्त्वविस्मृति
मात्रान्नानर्थः किंतु विपर्ययात् विपर्येतुं न कालोस्ति झटिति स्मरतः क्वचित् २६ तत्त्वस्मृतेरवसरो नास्त्यन्याभ्यासशालिनः प्रत्युताभ्यास
घातित्वाद्बलात्तत्त्वमुपेक्ष्यते २७ तमेवैकं विजानीथ ह्यन्या वाचो विमुंचथ इति श्रुतं तथान्यत्र वाचो विग्लापनं त्विह २८ आहारादि त्यजन्नैव
जीवेच्छास्त्रान्तरं त्यजन् किं न जीवसि येनैवं करोष्यत्र दुराग्रहं २९ जनकादेः कथं राज्यमिति चेद्दृढबोधतः तथा तवापि चेत्तर्कं पठ यद्वा कृषिं
कुरु ३०

नु काव्यतर्काद्यभ्यासस्य तत्त्वाभ्यासविरोधित्वात्तदानीं स्मृतमपि तत्त्वं बलादुपेक्ष्यतइत्याह प्रत्युतेति २७ तत्त्वानुसंधानविरोधिवाग्विला यौ...स्यं राम
सस्य त्याज्यत्वे प्रमाणत्वेन तमेवैकं जानथ आत्मानमन्या वाचो विमुंचथ अमृतस्यैष सेतुरिति श्रुतिवाक्यमर्थतः पठति तमेवेति नानुध्या ९२
याद्बहूञ्छब्दान्वाचो विग्लापनं हि तदित्येतदपि वाक्यं श्रूयतइत्याह तथेति २८ ननु तत्त्वानुसंधानातिरिक्तमाहारादि यथा न त्यज्यते
एवमितरशास्त्राद्यभ्यासोपि क्रियतामित्याग्रहं कुर्वाणं प्रत्याह आहारादीति २९ ननु तर्हि जनकादीनां तत्त्वविदां कथं राज्यपरिपाल
नादौ प्रवृत्तिरिति शंकते जनकादेरिति दृढापरोक्षज्ञानित्वात्तेषां मा न बाधिकेत्यभिप्रायेण परिहरति दृढबोधतइति तर्हि ममापि दृ
ढबोधोस्तीति वदंतं प्रत्याह तथेति ९३०

1591
1938

ननु तत्त्वविदः संसारासारतां जानंतः कुतस्तत्र प्रवर्तिष्यंतइत्याशंक्य प्रारब्धस्यावश्यंभाविफलत्वात्तद्योगेन तत्र स्वयापि प्रवृत्तिरित्याह
मिथ्यात्वेति ९३१ तर्ह्यनाचारेपि प्रवृत्तिः स्यादित्याशंक्याह अतिप्रसंगइति प्रारब्धवशादेवातिप्रसंगोपि स्यादित्याशंक्यांगीकरोति
अस्त्विति ३२ ननु ज्ञान्यज्ञानिनोः प्रारब्धकर्मण्यवश्यभोक्तव्यतया समानेतयोः कुतो वैलक्षण्यसिद्धिरित्याशंक्याह ज्ञानिनइति तत्र ३३
दृष्टांतमाह मार्गेइति ३४ इत्थमुपपादितमात्मानं चेदितिमंत्रस्य पूर्वार्धार्थमनुवदन्फलप्रदर्शनपरमुत्तरार्धमवतारयति साक्षादिति॥
सम्यक्साक्षात्कृतात्मधीः साक्षात्कृतः आमाययासा साक्षात्कृतात्मा तादृशी धीर्यस्य सः साक्षात्कृतात्मधीः अविपर्ययबाधितः विप
र्ययेण देहाद्यात्मत्वबुध्याबाधितो न भवतीत्यविपर्ययबाधितः उभयं हेतुगर्भं तद्विशेषणं ३५ अस्य मंत्रार्धस्य तात्पर्यमाह जगन्मिथ्येति

मिथ्यात्ववासनादार्ढ्ये प्रारब्धक्षयकांक्षया अक्लिश्यंतः प्रवर्तंते स्वस्वकर्मानुसारतः ३१ अतिप्रसंगो माशंक्यः स्वकर्मवशवर्तिनां अस्तु
वा केन शक्येत कर्म वारयितुं वद ३२ ज्ञानिनो ज्ञानिनश्चात्र समे प्रारब्धकर्मणि न क्लेशो ज्ञानिनो धैर्यान्मूढः क्लिश्यत्यधैर्यतः ३३ मार्गे गंत्रो
र्द्वयोः श्रांतौ समायामप्यदूरतां जानन्धैर्याद्द्रुतं गच्छेदन्यस्तिष्ठति दीनधीः ३४ साक्षात्कृतात्मधीः सम्यगविपर्ययबाधितः किमिच्छन्
कस्य कामाय शरीरमनुसंज्वरेत् ३५ जगन्मिथ्यात्वधीभावादाक्षिप्तौ काम्यकामुकौ तयोरभावे संतापः शाम्येन्निःस्नेहदीपवत् ३६
गंधर्वपत्तने किंचिन्नेंद्रजालिकनिर्मिते जानन्कामयते किंतु जिहासति हसन्निदं ३७ आपातरमणीयेषु भोगेष्वेवं विचारवान् नानुरज्यति
किंत्वेतान्दोषदृष्ट्या जिहासति ३८

काम्यं च कामुकश्च काम्यकामुकौ तावाक्षिप्तौ निरस्तौ तन्निराकरणे कारणमाह जगन्मिथ्यात्वेति ततः किमत्यत आह तयोरिति तयोः
काम्यकामुकयोरभावे संतापः कामनानिमित्तकः कारणाभावान्निःस्नेहदीपवच्छाम्यतइत्यर्थः ३६ काम्याभावात्कामनाभावः क्व दृष्टइत्या
शंक्याह गंधर्वेति मायाविनिर्मितपत्तने स्थितं वस्तु किंचिदपि इंद्रजालिकनिर्मितमिति जानन्न कामयते न केवलं कामनाभावः प्रत्युत इद
मनर्थमिति हसन् जिहासति परित्यक्तुमिच्छति ३७ दार्ष्टांतिकं योजयति आपातेति एवमापातरमणीयेषु प्रतीतिमात्ररम्येषु भोगेषु भुज्यंत
इति भोगाः विषयास्स्रक्चंदनवनितादयः तेषु एवं विचारवानापातरमणीयत्वानुसंधानवान्नानुरज्यति संनाक्तिं करोति किंतु दोषदर्शनेनैता

पं०२० टी० केनेविषयदोषाइत्यत आह अर्थानामिति ३६. एवंविषयाणांदुःखहेतुत्वंप्रदर्श्यशोभनत्वंकचिद्दर्शयति मांसेत्यादिश्लोकद्वयेनस्ता
२३ यवःशिराश्च अस्थीनिग्रंथयोमांसनिचयरूपानितंबस्तनादयःएतैःअसहितमांसपांचालिकायाःपुत्तलिकायायोषितोयंत्र
लोलेयंत्रवच्चंचलशीलेअंगपंजरेअंगान्येवपंजरनीडंतस्मिन्शरीरेकिंशोभनमिवनकिमपीत्यर्थः ३४० एवमादिष्वित्यादिशास्त्र
लब्धांसरलवाप्यांबुपृथक्कृत्वाविलोचने समालोकयरम्यंचेत्किंमुधापरिमुह्यसिइत्येवमादयोगस्त्यते ४१ विषयदोषदर्शनेसति
भोगेच्छाभावेयुक्तिसहितंदृष्टांतमाह क्षुधयेति स्वयमप्रहः विवेकीमिष्टान्नभोजनेनध्वस्ताविनष्टातद्दृष्ट्याआकांक्षायस्यसत
थोक्तइदंविषमिस्येवंजाननतदपिनजिघ्रसतिनात्तुमिच्छतीत्यर्थः ४२ ननुप्रारब्धकर्मणःप्रबलत्वात्ज्ञानिनोपीच्छाभवेदित्याशं

अर्थानामर्जनेक्लेशस्तथैवपरिपालने नाशेदुःखंव्ययेदुःखंधिगर्थान्क्लेशकारिणः ३९ मांसपांचालिकायास्तुयंत्रलोलेंगपंजरे स्ना
य्वस्थिग्रंथिशालिन्याःस्त्रियःकिमिवशोभनं ४० एवमादिषुशास्त्रेषुदोषाःसम्यक्प्रपंचिताः विमृशन्ननिशंतानिकथंदुःखेषुस
ज्जति ४१ क्षुधयापीड्यमानोपिनविषंह्यत्तुमिच्छति मिष्टान्नध्वस्ततड्जानन्नामूढस्तज्जिघत्सति ४२ प्रारब्धकर्मप्राबल्याद्भोगे
ष्विच्छाभवेद्यदि क्लिश्यन्नेवतदाप्येषभुंक्तेविष्टिगृहीतवत् ४३ भुंजानानाअपिबुधाःश्रद्धावंतःकुटुंबिनः नाद्यापिकर्मनश्छिन्नमिति
क्लिश्यंतिसंततं ४४ नायंक्लेशोत्रसंसारतापःकिंतुविरक्तता भ्रांतिज्ञाननिदानोहितापःसंसारिकःस्मृतः ४५ भ्यादिस्य २६ ४४

क्यस्यामपीच्छायांप्रीतिपुरःसरंनभुंक्तइत्याहप्रारब्धेति ४३ कथमेतदवगम्यतइत्याशंक्यलोकदर्शनादित्याह भुंजानानाइ राम
ति ४४ ननुतत्त्वविदांसंसारनिमित्तकस्तापानुपपन्नःज्ञानेवैयर्थ्यापातादित्याशंक्याह नायमिति अयंक्लेशः नाद्यापिकर्मन २३
श्छिन्नमित्येवमनुतापात्मकः संसारतापोनभवतिकिंत्वत्रसंसारेविरक्तताआसक्तिरहितताताापकत्वाभावेयुक्तिमाह भ्रांतिज्ञा
नेति हियस्मात्कारणात्सांसारिकस्तापोभ्रांतिज्ञाननिदानःभ्रांतिज्ञानकारणकःस्मृतःपूर्वाचार्यैःअयंतुविवेकज्ञानमूलत्वान्न

1413/1958

अयंक्लेशोविवेकमूलोभविवेकमूलोवेतिकुतोवगम्यतइत्याशंक्यकामनिवर्त्तकत्वाद्विवेकमूलइत्याह विवेकेनेति ४६ विवेकिनइ
वाविवेकिनोपिभोगेनैवतृप्तिःस्यादतोविवेकःप्रयोजकइत्याशंक्यभोगस्यतृप्तिहेतुत्वाभावप्रतिपादिकांश्रुतिंपठति नजातुकामइ
ति ४७ विवेकमूलस्यभोगस्यतृप्तिहेतुत्वमनुभवसिद्धमित्याह परिज्ञायेति अयंभोगएतावानेवप्रयाससाध्यइत्येवमनुभवपूर्वेश्व
दलंबुद्धिहेतुर्हिदृश्यतइत्यर्थः ननुतद्धाहेतोभोगस्यविवेकमाहत्त्वयंमात्रेणकथंतुष्टिकरत्वमित्याशंक्यसहकारिविशेषवशाद्दृप
गतकार्यकारित्वंलौकिकदृष्टमित्याह विज्ञायेति अयंचोरइतिज्ञात्वातेनमहवर्तमानस्यपुरुषस्यनचोरोभवति किंतुमित्रतामेती
त्यर्थः ४८ ननुकामनामरसत्वान्मनसःकथंस्वल्पभोगेनतृप्तिःस्यादित्याशंक्यनिदिध्यासनेननिगृहीतस्यातथात्वाद्भवत्येवत

विवेकेनपरिक्लिश्यन्नल्पभोगेनतृप्यति अन्यथानंतभोगेपिनैवतृप्यतिकर्हिचित् ४६ नजातुकामःकामानामुपभोगेनशाम्यति॥
हविषाकृष्णवर्त्मेवभूयएवाभिवर्द्धते ४७ परिज्ञायोपभुक्तोहिभोगोभवतितुष्टये विज्ञायसेवितश्चोरोमैत्रीमेतिनचोरतां ४८ मन
सोनिगृहीतस्यलीलाभोगोल्पकोपियः तमेवालभ्यविस्तारंक्लिष्टत्वाद्बहुमन्यते ४९ बद्धमुक्तोमहीपालोग्राममात्रेणतुष्यति परै
रबद्धोनाक्रांतोनराष्ट्रंबहुमन्यते ५० विवेकेजाग्रतिसतिदोषदर्शनलक्षणे कथमारब्धकर्मापिभोगेच्छांजनयिष्यति ५१ नैषदोषोयतो
नेकविधंप्रारब्धमीक्ष्यते इच्छानिच्छापरेच्छाचप्रारब्धंत्रिविधंस्मृतं ५२ अपथ्यसेविनश्चोराराजदाररताअपि जानंतएवस्वानर्थमिच्छंत्या ५३
रब्धकर्मतः ५३
सिद्धिमित्याह मनसइति निगृहीतस्ययोगाभ्यासेनवशीकृतस्यमनसोल्पकोपिस्वल्पोपिलीलाभोगःलीलानुभवोयोस्तिअलब्धविस्तार
मप्राप्तबाहुल्यंतमेवभोगंक्लिष्टत्वाद्दोषयुक्तत्वाद्बहुमन्यतेअधिकत्वेनजानातीत्यर्थः ४९ निगृहीतस्यमनसःस्वल्पेनापिभोगेनतृप्तिर्भवती अपथ्यंसेवंते
त्यत्रदृष्टांतमाहबद्धमुक्तइति ५० ननुप्रारब्धकर्मप्राबल्यात्भोगेच्छाभवेद्यदीत्यत्रकर्मवशादिच्छाभवेदित्युक्तंतदनुपपन्नंइच्छाविघातिनि
विवेकज्ञानेसतितदुत्पत्त्यसंभवादितिशंकते विवेकइति ५१ दोषदर्शनेसत्यपीच्छाजन्मसंभविष्यतिप्रारब्धस्यनानाप्रकारकत्वादितिपरि
हरति नैषेति नानाप्रकारत्वमेवदर्शयति इच्छेति इच्छाजनकमनिच्छयाभोगप्रदंपरेच्छयाभोगप्रदंचेतित्रिविधमित्यर्थः ५२ इच्छाप्रारब्धं

पं॰ २॰ ल॰ टी॰ अपथ्यसेवादीच्छायाः प्रारब्धप्रयुक्तत्वं कुतोवगम्यत इत्याशंक्य अपरिहार्यत्वादित्यभिप्रेत्याह नचेति अत्रास्मिन्लोके अपथ्यादीच्छंतीये
१४ तत्कुत इत्यत आह यत इति ५४ गीतावाक्यं पठति सदृशमिति विवेकज्ञानवानपि पुरुषः स्वस्याः स्वकीयायाः प्रकृतेः सदृशमनुरू
पं चेष्टते प्रकृतिर्नाम पूर्वकृतधर्माधर्मादिसंस्कारो वर्तमानजन्मादावभिव्यक्तः किंपुनर्वक्तव्यं तस्मात्प्रकृतिं यांतिभूतानिनिग्रहः प्रकृतिनिरो
ध्योनिर्गमो मयान्येनवा कृतः किं करिष्यति न किमपीत्यर्थः ५५ तीव्रप्रारब्धस्यापरिहार्यत्वेवचनांतरसंमतिमाह अवश्यमिति अव
श्यंभाविनांभावानां दुःखादीनामित्यर्थः ५६ प्रारब्धस्यापरिहार्यत्वेतत्परिहारासमर्थस्येश्वरस्यानीश्वरत्वप्रसंग इत्याशंक्याह नचेश्व
रत्वमिति कुत इत्यत आह यतः अवश्यमिति यतः कारणादेषां दुःखादीनामवश्यंभाविता पीश्वरेणैव निर्मिता तो नानीश्वरत्वप्रसंगः

नचोच्येत द्वारयितुमीश्वरेणापि शक्यते यत ईश्वर एवाह गीतायामर्जुनंप्रति ५४ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि प्रकृतिं यांति
भूतानि निग्रहः किं करिष्यति ५५ अवश्यंभाविभावानां प्रतीकारो भवेद्यदि तदा दुःखैर्न लिप्येरन्नलरामयुधिष्ठिराः ५६ नचेश्वरत्व
मीशस्यहीयते तावता यतः अवश्यंभाविताप्येषामीश्वरेणैव निर्मिता ५७ प्रश्नोत्तराभ्यामेवैतद्गम्यतेर्जुनकृष्णयोः अनिच्छापूर्वकं चा
स्ति प्रारब्धमिति तच्छृणु ५८ ॰ ॰ ॰ ॰

त्यर्थः ५७ एवं प्रपंचमिच्छाप्रारब्धमभिधायानिच्छाप्रारब्धं वक्तुमारभते प्रश्नोत्तराभ्यामिति अनिच्छापूर्वकं च प्रारब्धमस्ति
एतदर्जुनकृष्णयोः प्रश्नोत्तराभ्यामेवगम्यते ज्ञायत इति योजना तदभिधानाय शिष्यमभिमुखीकरोति तच्छृणिवति ५७ राम
तत्रार्जुनस्य प्रश्नं तावद्दर्शयति अथकेनेति हे वार्ष्णेय वृष्णिसंबंधिन् अयं पुरुषः केन प्रयुक्तः प्रेरितः अनिच्छन्नपि इच्छामकु १६
र्वन्नपि राजा बलान्नियोजित इव पापं चरति आचरतीति ५८ ॰ ॰ ॰
॰ ॰ श्रीराम श्रीकृष्ण॰

145
1958

कृष्णस्योत्तरमाह काम इति एषः पुरुषप्रवर्तकः रजोगुणात्समुद्भवः उत्पत्तिर्यस्य सः रजोगुणसमुद्भवः कामः एषप्रसिद्धोयं कामः क
दाचित्क्रोधरूपेणापि परिणमते ततः क्रोधः सपुनः कीदृशः महाशनः महदशनं विषयजातं यस्य स महाशनः महापाप्मा महतः पापस्य
हेतुत्वाद्दुष्पूरो वा महापाप्मत्वमस्य अत इह संसारे एनं कामं क्रोधरूपिणं वैरिणं विद्धि अयमभिप्रायः प्रारब्धवशाद्वृद्धिकर रजोगुणका
र्ययोः कामक्रोधयोरन्यतरस्यैव पुरुषप्रवर्तकत्वेन प्रवर्तकत्वमिच्छायाइति ५९ नन्वत्र कामक्रोधयोरेव पुरुषप्रवर्तकत्वमुपलभ्यते
नानिच्छाप्रारब्धस्येत्याशंक्य तस्यैव प्रवर्तकत्वप्रतिपादकं तद्वाक्यं पठति हे कौंतेय स्वेनैवानुष्ठितेन अतएव स्वकीयेन प्रारब्धेन कर्मणानि
बद्धः सन्यत्कर्तुं नेच्छसि तदपि मोहादविवेकतः अवशः परवशः करिष्यसीत्यतो निच्छाप्रारब्धमस्तीत्यभ्युपगंतव्यमिति भावः ६० इ

काम एष क्रोध एष रजोगुणसमुद्भवः महाशनो महापाप्मा विद्ध्येनमिह वैरिणं ५९ स्वभावजेन कौंतेय निबद्धः स्वेन कर्मणा कर्तुं नेच्छ
सि यन्मोहात्करिष्यस्यवशोपि तत् ६० नानिच्छंतो न चेच्छंतः परदाक्षिण्यसंयुताः सुखदुःखे भजंत्येतत्परेच्छापूर्वकर्म हि ६१ कथं
तर्हि किमिच्छन्नित्येवमिच्छा निषिध्यते नेच्छानिषेधः किं त्विच्छाबाधो भर्जितबीजवत् ६२ भर्जितानि तु बीजानि सत्यकार्यकराणि च॥
विद्वदिच्छा तथेष्टव्या सत्त्वबोधान्नकार्यकृत् ६३

दानीं परेच्छाप्रारब्धमप्यस्तीत्याह नानिच्छंत इति अनिच्छंतोपि न भजंति इच्छंतोपि न भजंति किं तु परदाक्षिण्यसंयुताः संतः तत्प्रीत्यर्थ
मेव सुखदुःखे अनुभवंति अत एतत्सुखादिभोगहेतुभूतं परेच्छापूर्वकं प्रारब्धं प्रसिद्धमित्यर्थः अतएव दोषदर्शनं सत्यपि प्रारब्धस्यांगीकृ
तिर्विरोध इति शंकते कथं तर्हीति किमिच्छन्नित्यनेन वाक्येन कथमिच्छाभावो वर्णितः परिहार्यत्वात्तस्येच्छाजनकत्वं निवारयितुं शक्यं
ति इति भावः ६१ ननु तत्त्वविदोपीच्छांगीकारे किमिच्छन्निति तद्वाक्यस्यार्थः नानेनेच्छाभावोभिधीयते किं तु सत्या अपि तस्याः समर्थप्र
वृत्तिजनकत्वं नास्तीति बोध्यत इति परिहरति नेच्छानिषेध इति स्वरूपेण सत्या अपि तस्याः सामर्थ्यराहित्ये दृष्टांतमाह भर्जितेति संक्षे
पेणोक्तमर्थं प्रपंचयति भर्जितानीति यथा भर्जितानि बीजानि स्वयं स्वरूपेण विद्यमानान्यपि नांकुरादिकार्यकराणि भवंति तथा विद्वदि
च्छा स्वयं विद्यमानापीष्यमाणपदार्थस्यासत्त्वज्ञानेन बाधितत्वान्न व्यसनादिकार्यक्षमेत्यर्थः ६३ ॰ ॰

ननु तर्हि विदुषः प्रेष्वंगीकर्त्तव्या फलाभावादित्याशंक्य फलाभावो ऽसिद्धो भोगलक्षणफलसद्भावादिति सदृष्टांतमाह दग्धबीजमिति दग्धं भर्जितमित्ययावत् व्यसनं विषयादिरूपं बहुविधं व्यसनं विपदि भ्रंशो दोषे कामजकोपजइत्यभिधानात् ६४ ननुक्तमेव भोगद्वारा व्यसनमपि जनयेदित्याशंक्याह भोगेनेति प्रारब्धकर्मणो भोगमात्रहेतुत्वान्न व्यसनजनकत्वमित्यर्थः कुतस्तर्हि व्यसनजन्मेत्यत आह भोक्तव्येति तत्र तस्मिन्विषये ६५ व्यसनहेतुभ्रमं दर्शयति मेति अयं भोगो मा विनश्यतु एष उत्तरोत्तरं वर्धतां विघ्नाश्चैनं मा प्रतिबध्नंतु अस्य प्रतिबंधं मा कुर्वंतु अस्मादेव भोगादहं धन्यः कृतार्थोऽस्मि एवंरूपो भ्रमो भवति ततश्च व्यसनमित्यर्थः ६६ प्रसंगादस्य परिहारोपायमाह यदभावीति यद्भवितुमयोग्यं तन्न भवेदेव भवितुं योग्यं चेत्तदन्यथा न भवेदेवेत्येवंरूपः चिंताविषघ्नः इदं मे श्रेयः कदा भविष्य

दग्धबीजमरोहेऽपि भक्षणायोपयुज्यते विद्वद्देहोऽप्यल्पभोगं कुर्यान्न व्यसनं बहु ६४ भोगेन चरितार्थत्वात्प्रारब्धं कर्म हीयते भोक्तव्यसत्यताभ्रांत्या व्यसनं तत्र जायते ६५ मा विनश्यत्वयं भोगो वर्धतामुत्तरोत्तरं मा विघ्नाः प्रतिबध्नंतु धन्योऽस्म्यस्मादिति भ्रमः ६६ यदभावि न तद्भावि भावि चेन्न तदन्यथा इति चिंताविषघ्नोऽयं बोधो भ्रमनिवर्तकः ६७ समेऽपि भोगे व्यसनं भ्रांतो गच्छेन्न बुद्धवान् अशक्यार्थस्य संकल्पात् भ्रांतस्य व्यसनं बहु ६८ मायामयत्वं भोगस्य बुद्ध्वास्थामुपसंहरन् भुंजानोऽपि न संकल्पं कुरुते व्यसनं कुतः ६९ स्वप्नेंद्रजालसदृशमचिंत्यरचनात्मकं दृष्टनष्टं जगत्पश्यन् कथं तत्रानुरज्यति १७० ७ ७

तीदं मम निष्टं कदा निवर्तिष्यत इत्येवमादि चिंतैव विषमिव स्वसंसृष्टपुरुषस्य नाशहेतुत्वात् द्वियं इदं चिंताविषं हंतीति चिंताविषघ्नः एवंभूतो यो बोधः सोऽयं भ्रमनिवर्तकः पूर्वोक्तभ्रमस्य निवर्तक इत्यर्थः ६७ ननु विद्वदविदुषोरुभयोरपि भोगित्वाविशेषे एकस्य व्यसनमपरस्य नेत्येतत्कुत इत्याशंक्य विपरीतज्ञानसत्त्वासत्त्वाभ्यां तत्सिद्धिरित्याह समेऽपीति बुद्धवान् ज्ञानवान् ज्ञानीत्यर्थः भ्रांतेः कथं व्यसनहेतुत्वमित्यत आह अशक्यार्थस्येति ६८ विवेकिनस्तदभावं दर्शयति मायामयेति ६९ ननु मायामयत्वबोधे सत्यपि भोग्यस्य तदानींतनसुखहेतुत्वात्कुत आस्थोपसंहार इत्याशंक्य बहुविधदोषदर्शनादित्याह स्वप्नेंद्रेति १७० ७ ७ राम १५

नन्वस्त्ववमेवंद्रजालसादृश्यादिज्ञानं सत्यासक्तिभावो न भवेत्तदेव कुतो जायत इत्याशंक्य तज्जन्मोपायमाह स्वस्वमिति श्लोकद्वयेन स्वकीयस्वप्नमपरोक्षतया दृष्ट्वा स्वकीयं च जागरमनुभवन् स्वप्नजागरावुभावपि अप्रमत्तः सन्मुहुश्चिंतयेत् स्वप्नतुल्योऽयं जागर इति ७१ एवं तयोः सर्वसाम्यं तात्कालिकभोगहेतुत्वपरिणतिविरसत्वविनाशित्वादिलक्षणं चिरमनुसंधाय जागरेऽपि सत्यत्वबुद्धिं परित्यज्य जाग्रद्दृष्टस्य पूर्ववत् जागत्सत्यत्वज्ञानदशायामिव नानुरज्यति अनुरक्तो न भवतीत्यर्थः ७२ ननु प्रपंचगोचरस्य मिथ्यात्वज्ञानस्य विषयसत्यत्वोपजीविनो भोगस्य च परस्परविरोधान्मिथ्यात्वज्ञाने सति कथं भोगसिद्धिरित्याशंक्य भोगस्य विषयस्य सत्यत्वापेक्षाभावान्न विरोध इति परिहरति इंद्रजालमिति इदं द्वैतं भोग्यजातं अचिंत्यरचनात्वादिंद्रजालवन्मिथ्येति युक्त्यानुसंधायाविस्मरतो विदुषः प्रारब्धभोगतः

स्वस्वप्नमापरोक्ष्येण दृष्ट्वा पश्यन्स्वजागरं चिंतयेदप्रमत्तः सन्नुभावनुदिनं मुहुः ७१ चिरं तयोः सर्वसाम्यमनुसंधाय जागरे सत्यत्वबुद्धिं संत्यज्य नानुरज्यति पूर्ववत् १७२ इंद्रजालमिदं द्वैतमचिंत्यरचनात्वतः इत्यविस्मरतो हानिः का वा प्रारब्धभोगतः ७३ निर्बंधस्तत्त्वविद्याया इंद्रजालत्वसंस्मृतौ प्रारब्धस्याग्रहो भोगे जीवस्य सुखदुःखयोः ७४ विद्यारब्धे विरुध्येते न भिन्नविषयत्वतः जानद्भिरप्यैंद्रजालविनोदो दृश्यते खलु ७५

प्रारब्धकर्मफलयोः सुखदुःखयोरनुभवेन मिथ्यात्वानुसंधानस्य का हानिः वा तद्वा मिथ्यात्वानुसंधानेन वा भोग्यस्य का हानिः विभिन्नविषयत्वादिति भावः १७३ विभिन्नविषयत्वमेव दर्शयति निर्बंध इति तत्त्वविद्याया जगतत्त्वविद्याया जगतत्त्वगोचरस्य ज्ञानस्य इंद्रजालवज्जगतो मिथ्यात्वानुसंधाने निर्बंधः न तु भोगापलापे प्रारब्धकर्मणश्च जीवस्य सुखदुःखयोः प्रदाने आग्रहः न तु भोग्यसत्यत्वापादान इति भावः ७४ एवं विभिन्नविषयत्वं प्रदर्श्य प्रयोगमाह विद्येति विद्यारब्धकर्मणी परस्परं न विरुध्येते विभिन्नविषयत्वात् संप्रतिपन्नपरसज्ञानवदित्यर्थः भोग्यमिथ्यात्वज्ञानं भोगबाधकं न भवतीत्येतत् क्व दृष्टमित्याशंक्याह जानद्भिरिति ऐंद्रजालो विनोद इंद्रजालसंबंधिचमत्कारविशेषः जानद्भिरपींद्रजालत्वं जानद्भिरप्यवलोक्यत इति प्रसिद्धमित्यर्थः ७५ ७ ७

147
1938

पं०द० नं०टी०
१६

किंच विद्याप्रारब्धकर्मणोर्विरोधोस्तीतिवदन्प्रष्टव्यः किंप्रारब्धकर्मविद्याविरोधीस्फच्यंते उतविद्याप्रारब्धकर्मविरोधिनीतिनाद्यइत्याहज
गदिति आरब्धंकर्मजगतोभोग्यजातस्यसत्यत्वमबाध्यत्वमापाद्यसंपाद्ययदिभोजयेज्जीवस्यसुखदुःखदद्यात्तदाविद्याविषयस्यमिथ्या
त्वस्यापहाराद्विद्यायाविरोधिस्यान्नचतथाकरोतिकिंतुभोगमेवप्रयच्छति अतोनविद्याविरोधिप्रारब्धमितिभावः भोगबलादेवभोग्यस्यस
त्यत्वमपिस्यादित्याशंक्याह भोगमात्रादिति विमतंसत्यंभोग्यत्वादित्यत्रदृष्टांताभावइतिभावः ७६ ननुमिथ्यामिथ्यापदार्थैर्भोगोभव
तीत्यत्रापिदृष्टांतोनास्तीत्याशंक्याह अन्यूनइति ७७ नापिद्वितीयइत्याह यदिविद्येति विद्यायदिजगद्भोग्यजातमपह्नुवीतनेदंरजत
मितिनिषेधज्ञानवत्प्रतीयमानस्यस्वरूपंविलापयेत् तदाप्रारब्धकर्मभोग्यस्यसुखदुःखानुभवस्यसाधनापहारेणप्रारब्धकर्मविद्या

जगत्सत्यत्वमापाद्यप्रारब्धंभोजयेद्यदि तदाविरोधिविद्यायाभोगमात्रान्नसत्यता ७६ अन्यूनोजायतेभोगः कल्पितैःस्वप्नवस्तुभिः
जाग्रद्वस्तुभिरप्येवमसत्यैर्भोगइष्यतां ७७ यदिविद्यापह्नुवीत जगत्प्रारब्धघातिनी तदास्यान्नतुमायात्वबोधेनतदपह्नवः ७८
अनपह्नुत्यलोकास्तदिंद्रजालमिदंत्विति जानंत्येवानपह्नुत्यभोगंमायात्वधीस्तथा ७९ यत्रत्वस्यजगत्स्वात्मापश्येत्कस्तत्रकेनकिं किंजिघ्रे
त्किंवदेद्वेतिश्रुतौतुबहुघोषितं ८०

तिनीस्यान्नचतत्करोति किंतुमिथ्यात्वमेवबोधयति अतोनप्रारब्धकर्मविरोधिनीतिभावः ननुमिथ्यात्वबोधनादेवस्वरूपमपिविलापयेदि
त्याशंक्याह नतुमायेति इंद्रजालादौस्वरूपविलापनमंतरेणापिमिथ्यात्वज्ञानदर्शनादितिभावः ७८ एतदेवप्रपंचयति अनपह्नुत्येति
लोकाजनास्तदिंद्रजालस्वरूपमनपह्नुत्यअनिरस्यइदमिंद्रजालमितिजानंत्येवयथातथाभोगभोग्यमनपह्नुत्यअविनाश्यमायात्वधीःज
गन्मिथ्यात्वज्ञानंभवतीत्यर्थः ७९ यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादिश्रुतिर्दृष्टृदर्शनदृश्याभावंबोधयन्त्यतोविद्योत्पद्यमा
नाजगद्विलापयेदेवएवंसतिविदुषोभोगश्चकथंस्यादितिश्रुत्यवष्टंभेनशंकतेश्लोकद्वयेन यत्रत्वित्यादिना यत्रयस्यांविद्यावस्थायांकृत्स्नं
जगदस्यविदुषःस्वात्मैवाभूदिदंसर्वंयदयमात्मेति ज्ञानेनस्वरूपमेवभवतितत्रतस्यांदशायांकोद्रष्टाकेनसाधनेनचक्षुषाकिंदृश्यंरूपजा
तंपश्येदेवघ्राणलक्षणेनकिंकुसुमादिकंजिघ्रेत किंवाअन्येनवागिंद्रियेणवदेदेवमितरेंद्रियव्यापाराभावद्योतनायवाशब्दः इत्येवंप्रकारे
णश्रुतौबहुवारमभिहितमित्यर्थः ८०

राम
१६

ततःकिमित्यत आह तेनेद्वैतमिति स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतंहीत्यस्मिन्सूत्रेयत्रत्वस्येत्युदाहृतायाःश्रुतेःसुप्तिमोक्षयोरन्य
तरविषयत्वेनव्याख्यातत्वान्नविद्ययाजगदपह्नवइतिपरिहरति शृण्विति ८१ स्वाप्ययःसुषुप्तिःसंपत्तिर्मुक्तिरित्यर्थः ८२ अस्याः
श्रुतेःसुषुप्त्यादिविषयत्वानंगीकारेबाधकमाह अन्यथेति तत्रोपपत्तिमाह द्वैतेति याज्ञवल्क्यादिर्यद्वैतंपश्येन्नर्हितदाद्वैतज्ञानाभा
वान्नाचार्योभवेत् अथद्वैतंनपश्यतितर्हिबोध्यशिष्याद्यनुपलंभादाचार्यवाक्शिष्यंप्रतिबोधनायनप्रवर्त्तेतअतोविद्यासंप्रदायोच्छेदप्र
संगइतिभावः ८३ ननुयाज्ञवल्क्यादीनामाचार्यत्वदशायांविद्यमानस्यज्ञानस्यविद्यात्वमस्त्येवतथापितस्यनापरोक्षविद्यात्वंद्वैतप्रती
तिसद्भावान्निर्विकल्पकसमाधौतुद्वैतदर्शनाभावात्सैवापरोक्षविद्येतिशंकते निर्विकल्पेति द्वैताप्रतीतेरप्यतिप्रसंगापादकत्वमेवेनेवमि

तेनेद्वैतमपह्नुत्यविद्योदेतिनचान्यथा तथाचविदुषोभोगःकथंस्यादितिचेच्छृणु ८१ सुषुप्तिविषयामुक्तिविषयावाश्रुतिस्त्विति उक्तंस्वा
प्ययसंपत्त्योरितिसूत्रेत्र्यतिस्फुटं ८२ अन्यथायाज्ञवल्क्यादेराचार्यत्वंनसंभवेत् द्वैतदृष्टावविद्वत्तादृष्टेनवाग्वदेत् ८३ निर्विकल्प
समाधौतुद्वैतादर्शनहेतुतः सैवापरोक्षविद्येतिचेत्सुषुप्तिस्तथानकिं ८४ आत्मतत्त्वंनजानातिसुप्तौयदितदात्वया आत्मधीरेवविद्येति
वाच्यंनद्वैतविस्मृतिः ८५ उभयंमिलितंविद्यायदितर्हिघटादयः अर्धविद्याभाजिनःस्युःसकद्वैतविस्मृतेः ८६ मशकध्वनिमुख्या
नांविक्षेपाणांबहुत्वतः तवविद्यानभानस्यात्घटादीनांयथादृढा ८८

तिपरिहरति सुषुप्तिस्तथानकिमिति ८४ अतिप्रसंगपरिहारंशंकते आत्मतत्वमिति सुप्तौद्वैतदर्शनाभावेपिआत्मगोचरज्ञानाभावान्न
विद्यात्वंतस्याइत्यर्थःतर्हिप्राप्तंविवेकज्ञानस्यैवविद्यात्वंनद्वैतदर्शनाभावस्येत्याह तदेति ८५ ननुद्वैतादर्शनात्मज्ञानयोर्मिलितयोरेवि
द्यात्वंनैकैकस्येतिशंकते उभयमिति द्वैतविस्मृतेरपिविद्यांशत्वांगीकारेजडस्याप्यर्धविद्यात्वप्रसंगइतिपरिहरति तर्हिघटादयइ
ति अत्रोपपत्तिमाह सकलमिति ८६ अस्मिन्नेवपक्षेसमाधिमतांपुरुषाणांअर्धविद्यावत्त्वमपिनस्यादितिसोपहासमाह मश
कध्वनीति घटादीनांयथा द्वैतविस्मरणंदृढं तथातवसमाधौद्वैतविस्मरणंनसंभवतिध्वन्यादीनामनेकेषांविक्षेपाणांसद्भा
वादित्यर्थः ८८

राम सीव०

ननु आत्मज्ञानस्यैव विद्यात्वं न द्वैतविस्मृतेरिति शंकते आत्मधीरेवेति तदस्माकमिष्टमित्यभिप्रायेणाङ्गीकरोति तर्हि सुखी भवेति नन्वात्म
धीरेव विद्या सा दुष्टचित्तेन संभवत्यतश्चित्तदोषपरिहाराय चित्तवृत्तिनिरोधः कार्य इति शंकामनुभाषते दुष्टचित्तमिति तदङ्गीकरोति नि
रुन्धि त्वमिति ८७ तदिष्टमिति अस्माकमपीति शेषः कुत इत्यत आह एष्टव्येति चित्तदोषापगमे सति अद्वितीयात्मज्ञानायेष्यमाणं
जगन्मायामयत्वं समग्रीक्ष्यते यतः अत इष्टमित्यर्थः एवं किमिच्छन्निति मन्त्रांशेनाभिप्रेतमर्थमुपपादितमुपसंहरति इच्छन्निति इच्छन्न
पि अयं नेच्छेदतः किमिच्छन्निति श्रुतमिति योजना ९८८ एवमभिप्रायवर्णने कारणमाह रागोलिङ्गमिति रागो लिङ्गमबोधस्य चित्त
व्यायामभूमिषु कुतः शाद्वलता तस्य यस्याग्निः कोटरे तरोरिति तत्त्वविदो रागनिषेधपरं शास्त्रं शास्त्रार्थस्य समाप्तत्वान्मुक्तिः स्या

आत्मधीरेव विद्येति यदि तर्हि सुखी भव दुष्टचित्तं निरुन्ध्याच्चेन्निरुन्धि त्वं यथासुखं ८७ तदिष्टमेष्टव्यमायामयत्वस्य समीक्षणात् इ
च्छन्नप्यज्ञवन्नेच्छेत् किमिच्छन्निति हि श्रुतं ८८ रागो लिङ्गमबोधस्य सन्तु रागादयो बुधे इति शास्त्रद्वयं सार्थमेवं सत्यविरोधतः ८९ ज
गन्मिथ्यात्ववत्स्वात्मासंगत्वस्य समीक्षणात् कस्य कामायेति वचो भोक्त्रभावविवक्षया ९० पतिजायादिकं सर्वं तत्तद्भोगाय नेच्छति
किं त्वात्मभोगार्थमिति श्रुतावुद्घोषितं बहु ९१

तावतापि तः रागादयः सन्तु कामं न तद्भावोऽपराध्यत इति तस्यैव रागाङ्गीकारपरं च शास्त्रमेवं च सति तत्त्वविदो दृढरागाभावे सति शास्त्र
द्वयं सार्थमर्थवद्भवति अविरोधतः रागनिषेधपरस्य शास्त्रस्य दृढरागविषयत्वात्तदभ्युपगमपरस्य शास्त्रस्य रागाभासविषयत्वादिति भा
वः ८९ एवं किमिच्छन्नित्यंशस्याभिप्रायमुपवर्ण्य कस्य कामायेत्यंशस्याभिप्रायमाह जगदिति यथा जगन्मिथ्यात्वबोधेन वास्तवकाम्या
भावविवक्षया किमिच्छन्नित्युक्तं एवमात्मनोऽसंगत्वबोधेन वास्तवभोक्त्रभावविवक्षया कस्य कामायेति श्रुत्याभिहितमित्यर्थः ९०
नन्वात्मनो भोक्तृत्वप्रतिषेधस्तत्प्रसक्तिपूर्वको वक्तव्यः सा तु न विद्यते असंगत्वादात्मन इत्याशंक्य तस्य स्वानुभवसिद्धत्वान्मैवमित्यभि
प्रेत्य तदनुवादिकां श्रुतिमर्थतोऽनुक्रामति पतिजायेति न वा अरे पत्युः कामाय पतिः प्रियो भवतीत्यारभ्यात्मनस्तु कामाय सर्वं प्रियं भव
तीत्यन्तेन वाक्यसंदर्भेण पतिजायादिकस्य प्रपञ्चस्यात्मनो भोगसाधनत्वं प्रतिपाद्यते ततः आत्मनो भोक्तृत्वप्रसक्तिरित्यर्थः ९१ ७८

एवमात्मनो भोक्तृत्वं प्रदर्श्य तदपवादाय भोक्तारं विकल्पयति किं कूटस्थेति किं कूटस्थस्य भोक्तृत्वं उत चिदाभासस्य किं वोभया
त्मकस्येति विकल्पार्थः तत्र प्रथमं प्रत्याह भोक्तातत्रेति ९२ असंगत्वमस्तु भोक्तृत्वमप्यस्तु को दोष इत्याशंक्याह सुखेति सुखित्वदुः
खित्वाभिमानलक्षणो विकारो भोगः सोऽसंगस्य कूटस्थस्य न युज्यते कूटस्थत्वविकारित्वयोरेकत्र समावेशायोगादित्यर्थः ९३ ननु त
र्हि विकारिणश्चिदाभासस्य भोक्तृत्वं स्यादित्याशंक्य विकारित्वेऽपि निरधिष्ठानस्य तस्यैवासिद्धेर्मैवमिति परिहरति विकारिबुद्ध्येति
चिदाभासस्य विकारिबुद्ध्युपाध्यधीनत्वात्स्वस्मिन् विकारे संभवत्यपि तस्यारोपितस्यारोपितस्वरूपत्वेनाधिष्ठानभूतं कूटस्थं विहा
य स्वातन्त्र्येणावस्थानासंभवात्केवलचिदाभासस्यापि भोक्तृत्वं न संभवतीति भावः ९४ तस्मात्तृतीयः पक्षः परिशिष्यत इत्याह

किं कूटस्थश्चिदाभासोऽथवा किं वोभयात्मकः भोक्ता तत्र न कूटस्थोऽसंगत्वाद्भोक्ततां व्रजेत् ९२ सुखदुःखाभि
मानाख्यो विकारो भोग उच्यते कूटस्थश्च विकारी चेत्येतन्न व्याहतं कथं ९३ विकारिबुद्ध्यधीनत्वादाभासो वि
कृतावपि निरधिष्ठानविभ्रान्तिः केवला न हि तिष्ठति ९४ उभयात्मक एवातो लोके भोक्ता निगद्यते तादृगात्मानमा
रभ्य कूटस्थः शेषितः श्रुतौ ९५ आत्मा कतम इत्युक्ते याज्ञवल्क्यो विबोधयन् विज्ञानमयमारभ्यासंगं तं पर्यशे
षयत् ९६

उभयात्मकेति यत एकैकस्य भोक्तृत्वं न संभवति अत उभयात्मकः साधिष्ठानचिदाभास एव लोके व्यवहारदशायां भोक्तेत्यभिधीयते परमा
र्थतस्तूभयात्मकत्वमेव न घटत इति भावः नन्वसंगो ह्ययं पुरुष इत्यादावसंगत्वस्येव योऽयं विज्ञानमयः प्राणेष्वित्यादौ बुद्धिसाक्षित्वस्या
पि श्रवणादुभयात्मकं भोक्तृस्वरूपमपि पारमार्थिकमेव स्यान्न लोकव्यवहारमात्रसिद्धमित्याशंक्य श्रुतेस्तत्र तात्पर्याभावान्मैवमित्याह ता
दृगिति तादृगात्मानं बुद्ध्युपाधिकं भोक्तारमात्मानमारभ्यानूद्य कूटस्थः बुद्ध्यादिकल्पनाधिष्ठानभूतश्चिदात्मा शेषितः बुद्ध्याद्यनात्मनि
रसनेन परिशेषितः श्रुतौ बृहदारण्यकादावित्यर्थः ९५ तत्र बृहदारण्यकवाक्यार्थं तावत्संक्षिप्य दर्शयति आत्मेति जनकेन कतम आत्मेत्ये
व आत्मनि पृष्टे सति याज्ञवल्क्यस्तं विबोधयन् योऽयं विज्ञानमयः प्राणेष्वित्यादिना विज्ञानमयमुपक्रम्यासंगो ह्ययं पुरुष इत्यसंगं कूटस्थं
परिशेषितवानित्यर्थः ९६

पं० द०
७१

एवं बृहदारण्यके संगात्म परिशेषप्रकारं प्रदर्श्य ऐतरेयादिश्रुत्यंतरेऽपि तद्दर्शयति कोयमात्मेति कोयमात्मेति वयमुपास्महे कतरः स
आत्मेत्येवमादावात्मविचारे णांतःकरणोपाधिकमात्मनमारभ्य प्रज्ञानमात्मात्मकः कूटस्थः परिशेषितः एवमन्यत्रापि द्रष्टव्यं एवंमुक्ति
श्रुतिप्रदर्शितो ... भोक्तृभिन्नात्मं पारमार्थिकत्वासंग स कूटस्थस्याभोक्तृत्वं सिद्धं ९७ ननु कर्तृत्वाभोक्तृमिथ्यात्वे प्राणि
नां तन्निमित्तस्य बुद्धिः कुतो आयात इत्याशंक्याह कूटस्थेति आत्मत्वो क्रमसिद्धो भोक्ताविवेकतः स्वस्य कूटस्थाद्विवेकज्ञानाभावेन कूटस्थ
निष्ठं सत्यत्वमात्मन्यध्यस्य तद्द्वारा स्वनिष्ठत्वं भोक्तृत्वस्यापि सत्यतां मत्वा भोगं कदाचिदपि न हातुमिच्छति ९८ ननु तर्ह्यात्मनस्तु का मायस
र्वप्रियं भवतीत्यात्मशेषत्वं भोग्यस्य कथं प्रतिपाद्यत इत्याशंक्य न कूटस्थात्मशेषत्वं प्रतिपाद्यते किंतु लोकप्रसिद्धो भयात्मक भोक्तृशेषत्व

कोशमात्मेत्येवमादौ सर्वत्रात्मविचारतः उभयात्मकमारभ्य कूटस्थः शोध्यते श्रुतौ ९७ कूटस्थसत्यतां स्वस्मिन्न
ध्यस्यात्माविवेकतः तात्त्विकीं भोक्तृतां मत्वा न कदाचिज्जिहासति ९८ भोक्ता स्वस्यैव भोगाय पतिजायादिमिच्छति ए
ष लौकिकवृत्तांतः श्रुत्यासम्यगनूदितः ९९ भोग्यानां भोक्तृशेषत्वान्माभोग्येष्वनुरज्यतां भोक्तर्येव प्रधानेतोऽनुरागं तं वि
धित्सति २०० या प्रीतिरविवेकानां विषयेष्वनपायिनी त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु २०१ ७

मेव श्रुत्यानूद्यत इत्याह भोक्तेति लोके ये भोक्तारः स्वस्यैव भोगाय पतिजायादिभोगोपकरणमिच्छंतीत्ययं लौकिकवृत्तांतः श्रुत्यास
म्यगनूदितः नार्थांतरं प्रतिपाद्यत इत्यर्थः ९९ अनुवादः किमर्थमित्याशंक्य भोक्तर्येव प्रेम्णो विधानायेत्याह भोग्यानामिति भोग्यानां पति
जायादीनां भोक्तृशेषत्वाद्भोग्येष्वनुरागो न कर्तव्यः किंतु प्रधानभूते भोक्तर्येवानुरागः कर्तव्य इति विधानायेत्यर्थः २००
भोग्येषु प्रेमत्यागपुरःसरं आत्मप्रेम कर्तव्यमित्यत्रोदाहरणं तेनैव प्रेम प्रार्थनापुरःसरं पुराणवचनमुदाहरति या प्रीतिरिति अविवेकाना ९१
मात्मज्ञानरहितानां विषयेष्वनपायिनी दृढा या प्रीतिस्त्वां स्मरतस्ता भक्तुः सदाचिंतयतो मे हृदयान्मनसः सर्पतु अपगच्छतु मम मनो
विषयेष्वासक्तिं परित्यज्य त्वय्येव सदा तिष्ठत्वित्यर्थः यद्वा अविवेकानां विषयेषु दृढा या यादृशी प्रीतिरस्ति सा तादृशी विषयेषु वि
द्यमाना प्रीतिः त्वामनुस्मरतो मे हृदयान्मापसर्पतु मा अपगच्छतु सदा तिष्ठत्वित्यर्थः २०१ ७ ७ ७

153
1938

भवत्येवं पुराणेऽप्युक्तिमायातमित्यत आह इतिन्यायेनेति इत्यनेन पुराणोक्तन्यायेन सर्वस्माद्भोग्यजातात् पतिजायादिलक्ष
णात् विरक्तधीः विरक्ता धीर्यस्यासौ विरक्तधीः पुरुषः तां भोग्यगोचरां प्रीतिं भोक्तर्यात्मन्युपसंहृत्य एवमात्मानं बुभुत्सते बोद्धु
मिच्छति २०२ एवमात्मन्येव प्रेमोपसंहारे फलितं सदृष्टांतमाह स्रक्चंदनेति पामरः पृथक्जनः स्रगादिविषये यथाप्रम
त्तः सावधानो भवति एवं मुमुक्षुरप्यात्मविषयेन प्रमाद्यत्यनवधानं न करोति किंतु तच्चिंतयैव तिष्ठतीत्यर्थः ३ अवधानाभा
वमेव बहुभिर्दृष्टांतैः स्पष्टयति यथा विजिगीषुः प्रतिवादिजयकाम इहलोकप्रधानः पुरुषो निरंतरं काव्यादीनभ्यस्यति ए
वं मुमुक्षुरपि सदा स्वात्मानं विचारयेत् ४ यथा वैदिकः श्रद्धस्वर्गाद्यर्थी तत्साधनानि जपादीनि श्रद्धापुरःसरमनुतिष्ठति त

इतिन्यायेन सर्वस्माद्भोग्यजाताद्विरक्तधीः उपसंहृत्य तां प्रीतिं भोक्तर्येवं बुभुत्सते २ स्रक्चंदनवधूवस्त्र
सुवर्णादिषु पामरः अप्रमत्तो यथा तद्वन्न प्रमाद्यति भोक्तरि ३ काव्यनाटकतर्कादिमभ्यस्यति निरंतरं वि
जिगीषुर्यथा तद्वन्मुमुक्षुः स्वं विचारयेत् ४ जपयागोपासनादि कुरुते श्रद्धया यथा स्वर्गादिवांछया तद्वच्छ्रद्द
ध्यात्स्वे मुमुक्षया ५ चित्तैकाग्र्यं यथा योगी महायासेन साधयेत् अणिमादिप्रेप्सयैवं विविच्यात्स्वं मुमुक्ष
या ६ कौशलानि विवर्धंते तेषामभ्यासपाटवात् यथा तद्वद्विवेकोऽस्याप्यभ्यासाद्विशदायते ७ ७:
विविंचता भोक्तृतत्त्वं जाग्रदादिष्वसंगता अन्वयव्यतिरेकाभ्यां साक्षिण्यध्यवसीयते ८

था मुमुक्षुरपि मोक्षेच्छया स्वात्मनि विश्वासं कुर्यात् ५ योगी योगाभ्यासवान् अणिमाद्यैश्वर्यलाभेच्छया महायासेन चित्तैका
ग्र्यं यथा संपादयेत् तद्वद्यमप्यात्मानं सदा विविच्यात् देहादिभ्यो विविच्य जानीयादित्यर्थः ६ नन्वेवमेतेषां सदाभ्यासेन किं फलमि
त्यत आह कौशलानीति यथा तेषां काव्याद्यभ्यासवतोऽभ्यासपाटवेन तस्मिंस्तस्मिन् विषये कौशलानि विवर्धंते एवमस्यापि
मुमुक्षोरभ्यासाद्विवेको देहादिभ्य आत्मनो भेदज्ञानं विशदायते स्पष्टं भवति ७ विवेकवैशद्यस्य फलमाह विविंचतेति अन्वय
व्यतिरेकाभ्यां भोक्तृतत्त्वं भोक्तुः पारमार्थिकस्वरूपं विविंचता भोग्येभ्यो जडजातेभ्यो भेदेन जानता पुरुषेण जाग्रदादिषु जाग्रत्स्वप्नसुषुप्ति
ष्ववस्थासु साक्षिण्यसंगताध्यवसायते निश्चीयत इत्यर्थः ८

पं०८०

१८

अन्वयव्यतिरेकौ दर्शयति यत्रेति जाग्रदादिषु मध्ये यत्र यस्मिन् स्थाने जाग्रति स्वप्ने सुषुप्तौ वा यत् स्थूलं सूक्ष्ममानंदश्चेति त्रिविधं
भोग्यं द्रष्टृसाक्षिणा दृश्यते अनुभूयते तत् दृश्यं तत्रैव तस्यामेवावस्थायां तिष्ठति इतरत्र न इतरस्यामवस्थायां नास्ति द्रष्टा सर्वत्रानुगत
तया वर्तते इत्यनुभवः सर्वसंमतः हि प्रसिद्धमेतदित्यर्थः २०९ न केवलमनुभवः आगमोपीत्यभिप्रायेण स यत्तत्र किंचित् पश्यत्यनन्वा
गतस्तेन भवत्यसंगो ह्ययं पुरुषः स वा एष एतस्मिन् संप्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवतीत्यादि
वाक्यद्वयमर्थतः पठति स यदिति स आत्मा तत्र तस्यामवस्थायां यत्किंचिद्भोग्यमीक्षते पश्यति तेन दृश्येनानन्वागतो भवेदनु
सृत्यगतो न भवेत् किंतु स्वयमेवावस्थांतरं गच्छतीत्यर्थः पुण्यं पुण्यफलं सुखं पापं तत्फलं दुःखं च दृष्ट्वैवानादायैवेत्यर्थः १०

यत्र यत् दृश्यते द्रष्टा जाग्रत्स्वप्नसुषुप्तिषु तत्रैव तन्नेतरत्रेत्यनुभूतिर्हि संमता ९ स यत्तत्रेक्षते किंचित्तेनानन्वा
गतो भवेत् दृष्ट्वैव पुण्यं पापं चेत्येवं श्रुतिषु डिंडिमः १० जाग्रत्स्वप्नसुषुप्त्यादि प्रपंचं यत् प्रकाशते तद्ब्रह्मा
हमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते ११ एक एवात्मा मंतव्यो जाग्रत्स्वप्नसुषुप्तिषु स्थानत्रयव्यतीतस्य पुनर्जन्म न वि
द्यते १२ त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् तेभ्यो विलक्षणः साक्षी चिन्मात्रोहं सदाशिवः १३

भोक्तृतत्वविवेचनपराणि श्रुत्यंतराणि दर्शयति जाग्रदिति यत्सत्यज्ञानानंदलक्षणं ब्रह्म साक्षिरूपेणावस्थितं तज्जा
ग्रदादिप्रपंचं प्रकाशते प्रकाशयति तद्ब्रह्माहमस्मिन् बुद्धिचिदाभासाद्यहमस्मीति ज्ञात्वा श्रुत्यनुभवाभ्यां निश्चित्य सर्वप्र
तिबंधैः प्रमातृत्वकर्तृत्वादिभिः प्रमुच्यते प्रकर्षेण सर्वात्मना मुच्यते ११ जाग्रदादिष्ववस्थासु एक एवात्मा मंतव्यः एवं विवेकज्ञाने
न स्थानत्रयव्यतीतस्यावस्थात्रयाद्विविक्तस्यात्मनः पुनर्जन्म न विद्यते एतच्छरीरपातानंतरं शरीरांतरप्राप्तिर्नास्तीत्यर्थः १२ त्रि
षु धामसु त्रिष्ववस्थानेषु यद्भोग्यं स्थूलप्रविविक्तानंदरूपं यश्च भोक्ता विश्वतैजसप्राज्ञरूपो यश्च भोगस्तदनुभवरूपश्चेति
यत् विद्यंते तेभ्यः स्थानादिभ्यो विलक्षणो भिन्नश्चिन्मात्ररूपः साक्षी सदाशिवः निरतिसदानंदरूपत्वेन सर्वदा शोभमानः परमात्मास्ति सो
हमस्मीत्यर्थः १३ १८

155
1938

एवं विवेकेनात्मतत्वे संगे निश्चिते सति भोक्तृत्वं कस्येत्यत आह एवमिति यो विज्ञानशब्देनाभिधीयमानश्चिदाभासस्तस्य विकारि
त्वात् भोक्तृत्वमित्यर्थः १४ ननु चिदाभासस्य भोक्तृत्वांगीकारे कस्य कामायेति वचो भोक्तृभावविवक्षयेति पूर्वोक्तं व्याहन्यंते त्याशं
क्य तस्य वचनस्य पारमार्थिकभोक्तृभावपरत्वमभिप्रेत्य भोक्तुश्चिदाभासस्य मिथ्यात्वं साधयति मायिक इति अयं चिदाभासो मायि
कोऽसत्यात्मकः श्रुतेः जीवेशावाभासेन करोतीति श्रुतेः अनुभवादपि द्रष्ट्रादित्रितयमध्यवर्तित्वेन अनुभूयमानत्वादपीत्यर्थः तदे
वोपपादयति इंद्रजालमिति इंद्रजालवन्मिथ्याभूते जगत्यंतर्भूतत्वादस्यापि मिथ्यात्वं नद्धनुभूयते विद्वद्भिरिति शेषः यस्माज्जग
दंतःपातीत्यतो मृषेति योजना १५ अस्य जगत इव विनाशित्वानुभवादपि मृषात्वमित्याह विलयोपीति मूर्छादिशब्दार्थः

एवं विवेचिते तत्वे विज्ञानमयशब्दितः चिदाभासो विकारी यो भोक्तृत्वं तस्य शिष्यते १४ मायिकोयं चिदाभासः श्रु
तेरनुभवादपि इंद्रजालं जगत्प्रोक्तं तदंतःपात्ययं यतः १५ विलयोप्यस्य सुप्त्यादौ साक्षिणा ह्यनुभूयते एतादृशं
स्वस्वभावं विविनक्ति पुनः पुनः १६ विविच्य नाशं निश्चित्य पुनर्भोगं न वांछति मुमूर्षुः शायितो भूमौ विवाहं कोभि
वांछति १७ जिह्रेति व्यवहर्तुं च भोक्ताहमिति पूर्ववत् छिन्ननास इव ह्रीतः क्लिश्यन्नारब्धमश्नुते १८ यदा स्व
स्यापि भोक्तृत्वं मंतुं जिह्रेत्ययं तदा साक्षिण्यारोपयेदेतदिति कैव कथा वृथा १९

भवतु मृषात्वं ततः किमित्यत आह एतादृशमिति यदा कूटस्थाद्विवेचितश्चिदाभासो मायिको ज्ञातस्तदा स्वस्वभावं स्वतत्वमेता
दृशं मृषात्मकं पुनःपुनः विविनक्ति कूटस्थाद्विविच्य जानाति १६ ततोपि किमित्यत आह विविच्येति स्वविनाशनिश्चये भोगेच्छाभा
वे दृष्टांतमाह मुमूर्षुरिति १७ किं च पूर्ववदहं भोक्तेति व्यवहर्तुमपि लज्जत इत्याह जिह्रेतीति तर्हि ज्ञानोत्पत्त्यनंतरं प्रारब्धावसानप
र्यंतं कथं व्यवहरतीत्यत आह छिन्नेति ह्रीतो लज्जितः क्लिश्यन्निदानीमपि कर्मसीयते क्लेशमनुभवन् प्रारब्धमश्नुते प्रारब्धकर्मफलं भुं
क्त इत्यर्थः १८ इदानीं ज्ञानानंतरं साक्षिणो भोक्तृत्वाभावः कैमुतिकन्यायसिद्ध इत्याह यदेति अयं चिदाभासः स्वस्यापि भोक्तृत्वं
मंतुमहं भोक्तेति ज्ञातुं जिह्रेति विलज्जते यदा तदा एतत्स्वगतं भोक्तृत्वं साक्षिण्यसंगे आरोपयेदिति वृथा कथा अर्थशून्या कैव न कापीत्यर्थः १९

उक्तमर्थं श्रुत्यारूढं करोति इतीति कस्यकामायेतिश्रुतिरित्यर्थः कूटस्थस्य चिदाभासस्य वा पारमार्थिकभोक्तृत्वाभावमभिप्रेत्याविशंकया शंकारहितेन भोक्तारमाक्षिपति निराकरोति भवत्येवं भोक्त्राक्षेपस्ततः किमित्यत आह ततइति ज्वरो ज्वरणं संतापः २० तत्वविदः शरीरानुज्वराभावं दर्शयितुं शरीरभेदं तत्र तत्र ज्वरसद्भावं च दर्शयति स्थूलमिति २१ तत्र स्थूलशरीरे ज्वरं तावदाह वातेति २२ सूक्ष्मशरीरे ज्वरान् दर्शयति कामेति कामशांत्यादीनां च ज्वरत्वमुपपादयति द्वयेपीति द्वयेपि द्विविधा अपि क्रमेण प्राप्त्यप्राप्तिभ्यां नरं बाधंते तो ज्वरसाम्यात् ज्वरा इत्युच्यंत इत्यर्थः २३ कारणशरीरगतो ज्वरः छांदोग्यश्रुतावुक्त इत्याह स्वंपरमिति नाहं खल्व

इत्यभिप्रेत्य भोक्तारमाक्षिपत्यविशंकया कस्यकामायेतिततः शरीरानुज्वरोनहि २० स्थूलं सूक्ष्मं कारणं च शरीरं त्रिविधं स्मृतं अवश्यं त्रिविधोस्त्येव तत्र तत्रोचितो ज्वरः २१ वातपित्तश्लेष्मजन्या व्याधयः कोटिशस्तनौ दुर्गंधत्व कुरूपत्व दाहभंगादयस्तथा २२ कामक्रोधादयः शांतिदांत्याद्यालिंगदेहगाः ज्वराद्वयेपिबाधंते प्राप्त्याप्राप्त्या नरं क्रमात् २३ स्वंपरंचनवेत्त्यात्माविनष्ट इवकारणे आगामिदुःखबीजं चेत्येतदिंद्रेण दर्शितं २४ एतेज्वराः शरीरेषु त्रिषु स्वाभाविका मताः वियोगे तु ज्वरैस्तानि शरीराण्येव नासते २५ तंतोर्वियुज्येत पटो वा लेभ्यः कंबलो यथा मृदो घटस्तथा देहो ज्वरेभ्योपीति दृश्यतां २६

यमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामीति वाक्येन स्वपरज्ञानशून्यत्वमज्ञानेन ष्टत्वं परेद्युरागामि दुःखबीजवासनासद्भावं चेंद्रेण शिष्येण गुरोः प्रजापतेः पुरतो निवेदितमित्यर्थः २४ एवं त्रिष्वपि देहेषु ज्वरानभिधायतेषामपरिहार्यत्वमाह एतइति त्रिष्वपि शरीरेषु प्रतीयमाना एते ज्वराः शरीरैः सहोत्पन्नत्वेन स्वाभाविकाः संमताः स्वाभाविकत्वं व्यतिरेकमुखेन दर्शयति वियोगेत्विति यतः कारणादेभिर्ज्वरैस्तेषां शरीराणां वियोगे तानि शरीराणि नासत एव नैव भवंति अतः स्वाभाविका इत्यर्थः २५ तत्रदृष्टांतमाह तंतोरिति २६ ७ ७ ३९

157
1938

इदानीं कूटस्थे ज्वराभावं कैमुतिकन्यायेन दिदर्शयिषुश्चिदाभासे तावज्ज्वराभावं दर्शयति चिदाभासइति चिदाभासे स्वतः शरीरत्रयगतज्वरसंबंधमंतरेण न कोपि ज्वरो विद्यते कुत इत्यत आह यतइति चितः प्रकाशैकस्वभावस्य विद्वदनुभवसिद्धत्वात्प्रतिबिंबस्य चिदाभासस्य तथात्वमेष्टव्यमिति भावः २७ यदर्थं चिदाभासे ज्वराभाव उपपादितस्तदिदानीं दर्शयति चिदाभासेपीति यदा चिदाभासेपि ज्वरान संभाव्यंते तदा च साक्षिणि संभवंतीति किमु वक्तव्यमिति भावः ननु तर्हि ज्वरामीत्यनुभवस्य का गतिरित्यत आह एवमप्येकतामिति २८ एकतामेन इति संक्षेपेणोक्तमर्थं प्रपंचयति साक्षीति चिदाभासः स्वेन सहितशरीरत्रये साक्षिगतं सत्यत्वमध्यस्य तत्सर्वं

चिदाभासे स्वतः कोपि ज्वरो नास्ति यतश्चितः प्रकाशैकस्वभावत्वमेव दृष्टं न चेतरत् २७ चिदाभासेप्यसंभाव्या ज्वराः साक्षिणि का कथा एवमप्येकतामेनेचिदाभासो ह्यविद्यया २८ साक्षिसत्यत्वमध्यस्य स्वेनोपेते वपुस्त्रये तत्सर्वं वास्तवं स्वस्य स्वरूपमिति मन्यते २९ एतस्मिन् भ्रांतिकालेयं शरीरेषु ज्वरत्स्वथ स्वयमेव ज्वरामीति मन्यते हि कुटुंबिवत् ३० पुत्रदारेषु तप्यत्सु तपामीति वृथा यथा मन्यते पुरुषस्तद्वदाभासोप्यभिमन्यते ३१ विविच्य भ्रांतिमुज्झित्वा स्वमप्यगणयन्सदा चिंतयन् साक्षिणं कस्माच्छरीरमनु संज्वरेत् ३२

ज्वरवत् शरीरत्रयं स्वस्य वास्तवं रूपमिति मन्यत इत्यर्थः २९ एवं भ्रांतिज्ञाने सति किं भवतीत्याह एतस्मिन्निति अयं चिदाभासः अस्यां भ्रांतिवेलायां शरीरानिष्टं ज्वरं स्वात्मन्यारोपयतीत्यर्थः तत्र दृष्टांतमाह कुटुंबिवदिति ३० दृष्टांतं विशदयति पुत्रदारेष्विति ३१ एवमविवेकदशायां चिदाभासस्य भ्रांत्या ज्वरं प्रदर्श्य विवेकदशायां तदभावं दर्शयति विविच्येति चिदाभासः कूटस्थं स्वात्मानं शरीराणि च विविच्य भेदेन ज्ञात्वा इदं सर्वं मम वास्तवं रूपमिति मन्यत इत्युक्तभ्रांतिं परित्यज्य स्वस्याभासरूपत्वज्ञानेन स्वस्मिन्नप्यादरमकुर्वन् स्वस्य निजं रूपं ज्वरादिरहितं साक्षिणं सदा चिंतयन् कस्मात् शरीरमनु संज्वरेत् ज्वरवच्छरीरमनुसृत्य स्वयं कस्मात् संज्वरेन्न संज्वरेदेवेत्यर्थः ३२

भ्रांतिज्ञानतत्वज्ञानयोर्व्वरतद्भावकारणत्वं दृष्टांतप्रदर्शनेनस्पष्टयति अयथेति रज्वादौकल्पितस्य सर्पादेर्ज्ञानंपलायनकारणंभवति आदिशब्देनस्थाणौ कल्पितश्चोरो गृह्यते रज्वादिज्ञानेन सर्पादिबुद्धिनिवृत्तौतदपिपलायनमनुशोचतिरथाकृतं मयेत्यनुशोचतितप्यत इत्यर्थः ३३ साक्षिणंनदाचिंतयन्निस्तुक्तमर्थं दृष्टांतेनस्पष्टयति मिथ्येति यथालोकेमिथ्याभियोगकर्त्तातद्दोषस्यप्रायश्चित्तसिध्यर्थं मिथ्याभियुक्तंपुनः पुनः क्षमापयति एवमयंचिदाभासोपिसांक्षिण्यसंगात्मनिभोक्तृत्वाध्यारोपलक्षणमिथ्याभियोगदोषप्रायश्चित्तार्थंसाक्षिणमात्मानंक्षमापयन्निवशरणंगतः ३४ नवैवदृष्टांतांतरमाह आवृत्तेति यथापापकारिणापुरुषेणावृत्तपापापनुत्यर्थंअ

अयथावस्तुसर्पादिज्ञानहेतुःपलायने रज्जुज्ञानेहिधीध्वस्तौकृतमप्यनुशोचति ३३ मिथ्याभियोगदोषस्य प्रायश्चित्तत्वसिद्धये क्षमापयन्निवात्मानंसाक्षिणंशरणंगतः ३४ आवृत्तपापनुत्यर्थंस्नानाद्यावर्त्तनेयथा आवर्त्तयन्निवध्यानंसदासाक्षिपरायणः ३५ उपस्थकुष्ठिनीवेश्याविलासेषुविलज्जते जानतोग्रेतथाभासः स्वप्रख्यातौविलज्जते ३६ गृहीतोब्राह्मणोम्लेंछैःप्रायश्चित्तंचरन्पुनः म्लेंछैःसंकीर्यतेनैवतथाभासःशरीरकैः ३७ यौवराज्येस्थितोराजपुत्रःसाम्राज्यवांछया राजानुकारीभवतितथासाक्ष्यनुकारितां ३८ ॥

भ्यस्तपापापनोदायविहितंस्नानादिकंप्रायश्चित्तमावर्त्यते पुनः पुनरनुष्ठीयते तथायमपिचिरंसाक्षिणीसंसारित्वारोपणदोषपरिहारायध्यानंपरिवर्त्तयन्निवसदासाक्षिपरायणोभवति ३५ एवंसाक्षिपरत्वं दृष्टांतेरुपवर्ण्य स्वगुणप्रख्यापनेलज्जाकुलत्वं सदृष्टांतमाह उपस्थकुष्ठिनीति ३६ इदानींशरीरत्रयाद्विवेचितस्याचिदाभासस्यपुनस्तैःसहतादात्म्यभ्रमाभावेदृष्टांतमाह गृहीतइति ३७ नकेवलंस्वापराधनिवृत्तयेसाक्ष्यनुसरणंकिंतुमहत्प्रयोजनसिध्यर्थमपीतिसिंहावलोकनन्यायेनसदृष्टांतमाह यौवराज्यइति राजानुकारीभवतिराजेवप्रजारंजनादिगुणवान्भवतीत्यर्थः ३८ ॥ ॥

नन्युवराजस्यराजानुसरणेसाम्राज्यफलंदृश्यतेनैवंसाक्ष्यनुसरणेअतस्तदनुसरणेकथंप्रवर्त्ततेइत्याशंक्याह यइति सयोहवैतत्परमंब्रह्मवेदब्रह्मैवभवतिनास्याब्रह्मवित्कुलेभवतितरतिपाप्मानंगुहाग्रंथिभ्योविमुक्तोमृतोभवतीतिश्रुतौब्रह्मभावादिरूपस्यफलस्यश्रूयमाणत्वात्फलवांछयासाक्ष्यनुसरणेप्रवर्त्तनंयुक्तमित्यर्थः ३९ ननुब्रह्मज्ञानेनब्रह्मभावप्राप्तौचिदाभासत्वमेवविनश्येदतःस्वनाशायकथंप्रवर्त्ततइत्याशंक्याहदेवत्वकामेति यथालोकेदेवत्वप्राप्तिकामामनुष्याःअग्न्यभिप्रयागगंगाप्रवेशादौप्रवर्त्तंते एवंसाक्षिरूपेणावस्थानलक्षणस्याधिकफलस्यविद्यमानत्वाच्चिदाभासत्वापगमहेतौब्रह्मज्ञानेपिप्रवृत्तिर्घटतएवेत्यर्थः ४० ननुतत्वज्ञानेनाभासत्वमपगच्छतिचेत्कथंतत्वविदांजीवत्वव्यवहारइत्याशंक्यप्रारब्धकर्मक्षयपर्यंततदुपपत्तिंसदृष्टांतमाह यावदिति यथाग्न्या

योब्रह्मवेदब्रह्मैवभवत्येवइतिश्रुतिः श्रुत्वातदेकचित्तःसन्ब्रह्मवेत्तिनचेतरत् ३९ देवत्वकामाह्यग्न्यादौप्रविशंतियथा तथा साक्षित्वेनावशेषायस्वविनाशंसवांछति ४० यावत्स्वदेहदाहंसनरत्वंनैवमुंचति यावत्प्रारब्धदेहंस्यान्नाभासत्वविमोचनं ४१ रज्जुज्ञानेपिकंपादिःशनैरेवोपशाम्यति पुनर्मंदांधकारेसारज्जुःक्षिप्तोरगीभवेत् ४२ एवमारब्धभोगोपिशनैःशाम्यतिनोहठात् भोगकालेकदाचित्तुमर्त्योहमितिभासते ४३ नैतावतापराधेनतत्वज्ञानंविनश्यति जीवन्मुक्तिव्रतंनेदंकिंतुवस्तुस्थितिःखलु ४३

दौप्रविष्टःपुरुषःदाहादिनास्वनाशपर्यंतंनरत्वंनरव्यवहारयोग्यत्वंनैवमुंचति एवंप्रारब्धक्षयपर्यंतंचिदाभासत्वव्यवहारोननिवर्त्ततइत्यर्थः ४१ ननुभोक्तृत्वादिभ्रमोपादानस्याज्ञानस्यनिवृत्तत्वात्कथंपुनर्भोगानुवृत्तिः कथंवामर्त्योहमितिविपरीतप्रतीतिरित्याशंक्यदृष्टांतप्रदर्शनेनएतत्संभावयति रज्जुज्ञानइति ४२ दार्ष्टांतिकेयोजयति एवमिति ४३ ननुपुनर्मर्त्यबुध्युदयेतेनतत्वज्ञानंबाध्यतेत्याशंक्याह नैतावतेति कदाचिदहंमर्त्यइत्येवंविज्ञानोदयमात्रेणागमप्रमाणजनिततत्वज्ञानंनबाध्यतेकुतइत्यतआह जीवन्मुक्तीति इदंमर्त्यत्वबुध्यनुकरणलक्षणंजीवन्मुक्तिव्रतंनियमेनानुष्ठेयंनभवतिकिंतुसम्यग्ज्ञानेनभ्रांतिज्ञाननिवृत्तिरित्ययंवस्तुस्वभावःअतःकदाचिन्मर्त्यत्वबुध्युदयेपिपुनस्तत्वज्ञानांतरेणतस्याएवबाध्यत्वमितिभावः ४३ ॥ ॥

159/1938

भवतु रज्जुसर्पादिस्थले विपरीतज्ञाननिवृत्तावपि तत्कार्यकंपाद्यनुवृत्तिः प्रकृतदृष्टांते दशमे दशमस्त्वमसीति वाक्यविचारजन्यज्ञानेन भ्रमनिवृत्तौ तत्कार्यानुवृत्तिर्नोपलभ्यत इत्याशंक्याह दशमोपीति दशमोस्मीति ज्ञानोदये सति शिरस्ताडनपूर्वकं रोदनमात्रं निवर्तते ताडनजन्यव्रणस्तु अनुवर्तत एवेत्यर्थः ४४ ननु ज्ञानोत्तरकालेपि संसारानुवृत्तौ जीवन्मुक्तेः कुतः पुरुषार्थतेत्याशंक्य मुक्तिलाभजन्यहर्षस्य दुःखाच्छादकस्य सत्वात्पुरुषार्थतेति दृष्टांतपूर्वकमाह दशमेति ४५ जीवन्मुक्तिव्रतं नेदमित्युक्तं तत्र व्रतत्वाभावे किमायातमित्यत आह व्रताभावादिति पुनःपुनर्विचारकरणे दृष्टांतमाह रससेवीति यथा रससेवी नरः एकस्मिन्नेव दिने क्षुद्बाधापरिहाराय पुनःपुनर्भुंक्ते तद्वद्ध्यासनिवृत्तये पुनःपुनर्विवेकः क्रियतामित्यर्थः २४६ ज्ञानेनानिवर्त्यस्य प्रारब्धकर्मफलस्य केनचिदपि निवृत्तिरित्याशंक्यता

दशमोपि शिरस्ताडं रुदन्बुध्वा न रोदिति शिरोव्रणस्तु मासेन शनैः शाम्यति नो तदा ४४ दशमामृतिलाभेन जातो हर्षो व्रणव्यथां तिरोधत्ते मुक्तिलाभस्तथा प्रारब्धदुःखितां ४५ व्रताभावाद्यदाध्यासस्तदाभ्यासो विविच्यतां रससेवी दिने भुंक्ते भूयोभूयो यथा तथा ४६ शमयत्यौषधेनायं दशमः स्वं व्रणं यथा भोगेन शमयित्वैतत्प्रारब्धं मुच्यते तथा ४७ किमिच्छन्निति वाक्योक्तः शोकमोक्ष उदीरितः आभासस्य ह्यवस्थेषा षष्ठी तृप्तिस्तु सप्तमी। ४८

उत्पन्नजन्यव्रणस्य औषधेनेव भोगेनैव निवृत्तिरित्याह शमयतीति ४७ अपरोक्षज्ञानशोकनिवृत्याख्ये उभे इमे अवस्थे जीवगे ऋत आत्मानं चेदिति श्रुतिरित्यनेन श्लोकेन आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन्कस्य कामाय शरीरमनुसंज्वरे दित्यस्मिन्मंत्रे परोक्षज्ञानशोकनिवृत्याख्ये जीवावस्थे द्वे अभिहिते इत्युक्तं इदानीं तदभिधानं सूचितजीवस्य सप्तमीं तृप्तिलक्षणामवस्थां व्याख्यातुं ननुकीर्तनपूर्वकं वक्तुमुपक्रमारभते किमिच्छन्निति किमिच्छन्नित्युत्तरार्धेनाभिहितो यः शोकमोक्षः स एतावता ग्रंथसंदर्भेण उदीरितो भिहितो एषा अज्ञानमावृतिर्द्विधा विक्षेपश्च परोक्षधीः अपरोक्षमतिः शोकमोक्षस्तृप्तिर्निरंकुशेत्यनेन श्लोकेनाभिहितासु सप्तसु जीवावस्थासु षष्ठीत्याह आभेति सप्तमी व्याख्यायत इति शेषः ४८ ॥ ॥

२३

अपरोक्षज्ञानजन्यायास्तृप्तेर्निरंकुशत्वं प्रतियोगिप्रदर्शनपुरःसरं प्रतिजानीते सांकुशेति विषयलाभजन्यायास्तृप्तेर्विषयांतरकामनया कुंठितत्वात्सांकुशत्वं अस्यास्तु तदभावान्निरंकुशत्वं तदेव दर्शयति कृतमिति ४९ कृतकृत्यत्वमेवोपपादयति ऐहिकेति अस्य विदुषस्तत्वज्ञानात्पूर्वमिह लोके इष्टप्राप्तये अनिष्टनिवृत्तये च कृषिवाणिज्यादिकं स्वर्गादिसिद्धये यागादिकं मोक्षसाधनज्ञानसिद्धये श्रवणादिकं चेति बहुविधं कर्तव्यमासीत् इदानीं तु सांसारिकफलेच्छाभावात् ब्रह्मानंदसाक्षात्कारस्य सिद्धत्वाच्च न तत्सर्वं कृषियागश्रवणादिकं कृतं कृतप्रायमभूत् अतः परमनुष्ठेयत्वाभावादित्यर्थः २५० एवं कृतकृत्यत्वमुपपाद्य तत्फलभूतां तृप्तिं दर्शयति प्रतियोगिपुरःसरं प्रतियोग्यनुसंधानपूर्वकं यथा भवति तथा एवं वक्ष्यमाणप्रकारेण सर्वदा तृप्यति ५१

सांकुशा विषयैस्तृप्तिरियं तृप्तिर्निरंकुशा कृतं कृत्यं प्रापणीयं प्राप्तमित्येव तृप्यति ४९ ऐहिकामुष्मिकव्रातसिध्यै मुक्तेश्च सिद्धये बहुकृत्यं पुरास्याभूत्तत्सर्वमधुना कृतं २५० तदेतत्कृतकृत्यत्वं प्रतियोगिपुरःसरं अनुसंदधदेवायमेवं तृप्यति नित्यशः ५१ दुःखिनो ज्ञाः संसरंतु काममुत्राद्यपेक्षया परमानंदपूर्णोहं संसरामि किमिच्छया ५२ अनुतिष्ठंतु कर्माणि परलोकयियासवः सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथं ५३ व्याचक्षतां ते शास्त्राणि वेदानध्यापयंतु वा येत्राधिकारिणो मे तु नाधिकारो क्रियत्वतः ५४ निद्राभिक्षास्नानशौचे नेच्छामि न करोमि च द्रष्टारश्चेत्कल्पयंति किं मे स्यादन्यकल्पनात् ५५

तदेवानुसंधानं प्रपंचयति दुःखिनो ज्ञा इत्यादिना कृतकृत्यतया तृप्तः प्राप्तप्राप्यतया पुनरित्यतः प्राक्तनेन ग्रंथेन तत्र तावदैहिकसुखाभिध्यानलक्षण्यं स्वस्य दर्शयति दुःखिन इति ५२ स्वर्गाद्यर्थकर्मानुष्ठातृभ्यो वैलक्षण्यमाह अनुतिष्ठंत्विति ५३ ननु स्वार्थप्रवृत्त्यभावेपि परार्थप्रवृत्तिः किं न स्यादित्याशंक्याधिकाराभावात्सापि नास्तीत्याह व्याचक्षतामिति ५४ ननु स्वदेहभरणार्थं भिक्षाहरणादिकं परलोकार्थं स्नानादिकं च भवता क्रियमाणमुपलभ्यते अतो क्रियत्वमसिद्धमित्याशंक्य तदपि स्वदृष्ट्या नैवास्ति किं त्वन्यैरेव कल्पितमित्याह निद्रेति २५५

161/1938

पं०दशी

२२

अन्यकल्पनयापि सुखास्तीत्याशंक्य तदभावे दृष्टांतमाह गुंजापुंजेति ५६ ननु फलांतरेच्छाभावे कर्मानुष्ठानं माभूत्तत्त्वसाक्षात्का
रायश्रवणादिकं कर्तव्यमेवेत्याशंक्याज्ञानाद्यभावाच्छ्रवणादिकर्तृत्वमपिनास्तीत्याह शृण्वंत्विति अज्ञाततत्वाः अज्ञातब्रह्मात्मै
कत्वलक्षणं तत्त्वंयेस्ते तथाभूताः श्रवणं कुर्वंतु तत्त्वमित्थमन्यथा वेति संशयवंतो मननं कुर्वंतु मम तदुभयाभावान्नोभयत्रवृत्तिरि
त्यर्थः ५७ मास्तु तांश्रवणमनने विपर्ययनिरासार्थं निदिध्यासनं कर्तव्यमित्याशंक्य देहादावात्मत्वबुद्धिलक्षणस्य विपर्यय
स्याभावात्तदपि नानुष्ठेयमित्याह विपर्यस्त इति ५८ ननु विपर्ययाभावे अहं मनुष्यः इति व्यवहारः कथं घटत इत्याशंक्य वा

गुंजापुंजादि दह्येत नान्यारोपितवह्निना नान्यारोपितसंसारधर्मानेवमहं भजे ५६ शृण्वंत्वज्ञानतत्वास्ते
जानन्कस्माच्छृणोम्यहं मन्यंतां संशयापन्ना न मन्येहमसंशयः ५७ विपर्यस्तो निदिध्यासेत्किं ध्यानमविप
र्ययात् देहात्मत्वविपर्यासं न कदाचिद्भजाम्यहं ५८ अहं मनुष्य इत्यादिव्यवहारो विनाप्यमुं विपर्यासं चि
राभ्यस्तवासनातोवकल्पते ५९ प्रारब्धकर्मणि क्षीणे व्यवहारो निवर्तते कर्माक्षये त्वसौ नैव शाम्येद्ध्यान
सहस्रशः ५९ विरलत्वं व्यवहृतेरिष्टं चेद्ध्यानमस्तु ते अबाधिकां व्यवहृतिं पश्यन्ध्यायाम्यहं कुतः ६०
विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः ६१ नित्यानुभवरूपस्य
कोमेत्रानुभवः पृथक् कृतं कृत्यं प्रापणीयं प्राप्तमित्येव निश्चयः ६२
सनाय शाद्भवतीत्याह अहमिति ५९ तर्ह्यस्य व्यवहारस्य निवृत्तिसिद्धये ध्यानं संपाद्यमित्याशंक्य प्रारब्धक्षयमंतरेणास्य निवृ
त्तिर्नास्तीत्याह प्रारब्धेति ५९ ननु प्रारब्धनिमित्तकस्यापि व्यवहारस्य विरलत्वाय ध्यानं कर्तव्यमेवेत्याशंक्य व्यवहारस्याबाधक
त्वदर्शनान्न तन्निवृत्तये ध्यानमनुष्ठेयमित्याह विरलत्वमिति ६० ध्यानस्याकर्तव्यत्वेपि विक्षेपपरिहाराय समाधिः कर्तव्य इत्याशंक्य
विक्षेपसमाधानयोर्मनोधर्मत्वान्न विक्षेपनिवारकेपि समाधौ ममाधिकार इत्याह विक्षेप इति ६१ ननु तथापि समाधिफलमनुभ
वः संपादनीय इत्याशंक्य तस्य मत्स्वरूपत्वान्न संपाद्यत इत्याह नित्येति उपपादितं कृतकृत्यत्वं निगमयति कृतं कृत्यमिति ६२ २२

163/193

एवं सर्वत्र कर्तृत्वानभ्युपगमे नियतरहितं प्रसज्येतेत्याशंक्य प्रारब्धवशात् प्राप्तमनियतरहितत्वमंगीकरोति व्यवहारेति लौकिको
भिक्षाटनादिः शास्त्रीयो जपसमाध्यादिरन्यथापि वा प्रसिद्धाहंसादिर्वा व्यवहारः कर्तृत्वभोक्तृत्वरहितस्य मम प्रारब्धं कर्मानतिक्रम्य
प्रवर्ततामित्यर्थः ६२ एवं वस्तुतत्वमभिधाय प्रौढवादेनाह अथवेति लोकानुग्रहकाम्यया प्राण्यनुग्रहेच्छयेत्यर्थः ६३ शास्त्री
य एव मार्गप्रवर्तनांगीकारे तत्र हि तदभिमानप्रयुक्तो विकारः स्यादित्याशंक्याह देवार्चनेत्यादिना श्लोकद्वयेन तारं प्रणवमाम्नाय

व्यवहारो लौकिको वा शास्त्रीयो वान्यथापि वा ममाकर्तुरलेपस्य यथारब्धं प्रवर्ततां ६२ अथवा कृतकृत्योपि
लोकानुग्रहकाम्यया शास्त्रीयेणैव मार्गेण वर्तेहं का मम क्षतिः ६३ देवार्चनस्नानशौचभिक्षादौ वर्ततां वपुः ता
रं जपतु वाक्तद्वत्पठत्वाम्नायमस्तकं ६३ विष्णुं ध्यायतु धीर्यद्वा ब्रह्मानंदे विलीयतां साक्ष्यहं किंचिदप्यत्र न कुर्वे
नापि कारये ६४ एवं च कलहः कुत्र संभवेत्कर्मिणो मम विभिन्नविषयत्वेन पूर्वापरसमुद्रवत् ६५ वपुर्वा
ग्धीषु निर्बंधः कर्मिणो न तु साक्षिणि ज्ञानिनः साक्ष्यलेपत्वे निर्बंधो नेतरत्र हि ६५ एवं चान्योन्यवृत्तांतानभि
ज्ञौ बधिराविव विवदेतां बुद्धिमंतो हसंत्येव विलोक्य तौ ६६ यं कर्मी न विजानाति साक्षिणं तस्य तत्त्ववित् ब्रह्म
त्वं बुध्यतां तत्र कर्मिणः किं विहीयते ६७ देहवाग्बुद्धयस्त्यक्ता ज्ञानिनानृतबुद्धितः कर्मी प्रवर्तयत्याभिर्ज्ञानि
नो हीयतेत्र किं ६८

मस्तकं वेदांतशास्त्रं ६३ फलितमाह एवं चेति ६४ विभिन्नविषयत्वमेव स्पष्टयति वपुरिति ६५ अथापि यो ज्ञानिकर्मिणोः कलहं
कुर्वीते तौ विद्वद्भिः परिहसनीयावित्याह एवं चेति ६६ कुतः परिहास्यत्वमित्याशंक्य निर्विषयकलहकारित्वादित्याह यमिति कर्मी यं
साक्षिणं कर्मानुष्ठानोपयोगी देहवाग्बुद्धिव्यतिरिक्तं प्रत्यगात्मानं न विजानाति तत्त्वविदा तस्य ब्रह्मत्वे बुद्धे कर्मिणः कर्मानुष्ठानं किं हीयते ६७
ज्ञानिना मिथ्यात्वबुध्या परित्यक्ताभिर्देहवाग्बुद्धिभिः कर्मानुष्ठाने ज्ञानिनो वा किं हीयते अतो निर्विषयककलहकारिणोः परिहसनीयत्व
मित्यर्थः ६८

पंच०शी०

२३

कर्मानुष्ठानं प्रयोजनशून्यत्वात् ज्ञानिनाभ्युपगम्यत इति शंकते प्रवृत्तिरिति उपयोगाभावो निवृत्तावपि समान इति परिहरति नि
वृत्तिरपि निवर्त्तनं बोधहेतुत्वान्नोपयोगाभाव इति शंकते बोधहेतुर्निवृत्तश्चेदिति तर्हि प्रवृत्तिरपि बुभुत्साहेतुत्वादुपयोगवतीत्याह
बुभुक्षेति ६९ ननु बुद्धस्य बुभुत्साभावात्प्रवृत्तेरनुपयोगित्वमिति पुनः शंकते बुद्धश्चेदिति तर्हि बुद्धस्य पुनर्बोधाभावात्तद्धेतुर्निवृ
त्तिरपि बुद्धं प्रत्यनुपयोगिनीत्याह नापीति सकृज्ज्ञातस्य बोधस्य स्थिरत्वाय निवृत्तिरपेक्षत इत्याशंक्य स्थिरत्वं बाधकाभावम

प्रवृत्तिर्नोपयुक्ता चेन्निवृत्तिः क्वोपयुज्यते बोधहेतुर्निवृत्तिश्चेद् बुभुत्सायां तथेतरा ६९ बुद्धश्चेन्न बुभुत्सेत
नाप्यसौ बुध्यते पुनः अबाधादनुवर्त्तेत बोधो न त्वन्यसाधनात् २७० नाविद्यानापि तत्कार्यं बोधं बाधि
तुमर्हति पुरैव तत्त्वबोधेन बाधिते ते उभे यतः ७१ बाधितं दृश्यतामक्षैस्तेन बाधो न दृश्यते जीवन्नाखुर्न
मार्जारं हन्ति हन्यात्कथं मृतः ७२

पेक्ष्यते न साधनांतरमित्याह अबाधादिति वाक्यप्रमाणजन्यज्ञानस्य बलवता प्रमाणेन बाधाभावादनुवृत्तिस्यादेव अतो
न साधनानंतरं तदर्थमनुष्ठेयमित्यर्थः २७० ननु प्रमाणांतरेणाबाधेप्यविद्यया तत्कार्येण कर्त्तृत्वाध्यासेन वा बाधस्या २३
दित्याशंक्याह नाविद्येति पुरैवेति ७१ नन्वविद्याया बाधितत्वेपि तत्कार्यस्य प्रतीयमानस्य बाधितत्वासंभवात्तेन बोधस्य बा
धो भवेदित्याशंक्य उपादाननिवृत्तौ चतस्यापि बाधितत्वान्न तेनापि बाधः शंकितुं शक्यत इत्याह बाधितमिति तत्र दृष्टां
तमाह जीवन्निति आखुर्मूषकः ७२

दैतदर्शनेन तत्त्वबोधस्य बाधाभावं कैमुतिकन्यायप्रदर्शनेन दृढयितुं तदनुकूलं दृष्टांतमाह अपीति यः समर्थः पाशुपतास्त्रेण
विद्धोपि न ममार सोपि किल स निष्फले पुंखितुन्नांगः शल्यरहितपुणाव्यथितदेहः सन् नष्टस्मृतिनाशं प्राप्स्यति तत्र का प्रमाप्रमाणना
स्तीत्यर्थः ७३ दृष्टांतसिद्धमर्थं दार्ष्टांतिके योजयति आदाविति आदौ विद्याभ्याससमये भित्रैर्वृद्धविधैस्तत्कार्यैः प्रमातृत्व
भोक्तृत्वकर्तृत्वादिभिर्जृंभमाणया विवर्द्धमानया विद्यया बोधो युध्वा युद्धं कृत्वा तामजयत् स एवाभ्यासपाटवेन सुदृढो विद्ये
गीमविद्यानिवृत्तौ सत्यां निर्मूलेन तत्कार्येणाध्यासेन कथं वाध्यतां न कथमपि बाध्येत इत्यर्थः ७४ उपपादितमर्थं श्रोतृबु

अपि पाशुपतास्त्रेण विद्धश्चेन्न ममार यः निष्फले पुंखितुन्नांगो नंक्ष्यतीत्यत्र का प्रमा ७३ आदावविद्यया वि
त्रैः स्वकार्यैर्जृंभमाणया युध्वा बोधो जयत्ताम् सुदृढो बाध्यतां कथं ७४ तिष्ठन्तु ज्ञानतत्कार्यशवा बोधेन
मारिताः न भीतिर्बोधसम्राजः कीर्त्तिः प्रत्युत तस्य तैः ७५ य एवमतिशूरेण बोधेन न वियुज्यते प्रवृत्त्या वाभि
वृत्त्या वा देहादिगतयास्य किं ७५ प्रवृत्तावाग्रहो न्याय्यो बोधहीनस्य सर्वथा स्वर्गाय वापवर्गाय यतितव्यं यतो न्
भिः ७८ विद्वांश्चेत्तादृशां मध्ये तिष्ठेत्तदनुरोधतः कायेन मनसा वाचा करोत्येवाखिलाः क्रियाः ७७

ध्यारोहाय रूपकेणाह तिष्ठन्त्विति ७५ भवत्वेवं प्रकृते किमायातमित्यत आह य इति यः पुमानेवमुक्तप्रकारेणातिशूरेणावि
द्यातत्कार्यघातकेन बोधेन ब्रह्मात्मैकत्वज्ञानेन न वियुज्यते न कदापि वियुक्तो भवति अस्य पुंसो देहादिनिष्ठया प्रवृत्त्या वा निवृत्त्या
वा किं न किमपीष्टमनिष्टं वेत्यर्थः ७५ तर्हि ज्ञानिवदज्ञानिनोपि प्रवृत्त्याग्रहो न युक्त इत्याशंक्याह प्रवृत्ताविति तत्रोपपत्तिमा
ह स्वर्गायेति ७६ विदुषप्रसंगेन युक्त इत्युक्तं तर्हि कर्मिणां मध्ये वर्त्तमानेन तेन किं कर्त्तव्यमित्याह विद्वांश्चेदिति विद्वांस्तादृशां
कर्मिणां मध्ये तिष्ठेत्तदनुरोधतः तेषामनुसारेण शरीरादिभिः सर्वाः क्रियाः करोत्येव न तावत्कर्मिणो निवारयेदित्यर्थः ७७

165/1938

कर्मानुष्ठानं प्रयोजनशून्यत्वाज्ज्ञानिनाभ्युपगम्यत इति शंकते प्रवृत्तिरिति उपयोगाभावो निवृत्तावपि समान इति परिहरति नि
वृत्तिरिति निवृत्तेर्बोधहेतुत्वान्नोपयोगाभाव इति शंकते बाधहेतुर्निवृत्तिश्चेदिति तर्हि प्रवृत्तेरपि बुभुक्षाहेतुत्वादुपयोगवतीत्याह
बुभुक्षेति ६९ ननु बुद्धस्य बुभुक्षाभावात्प्रवृत्तेरनुपयोगित्वमिति पुनः शंकते बुद्धश्चेदिति तर्हि बुद्धस्य पुनर्बोधाभावात्तद्धेतुर्निवृ
त्तिरपि बुद्धं प्रत्यनुपयोगिनीत्याह नापीति सकृज्ज्ञातस्य बोधस्य स्थिरत्वाय निवृत्तिरपेक्षितेत्याशंक्य स्थिरत्वं बाधकाभावम

> प्रवृत्तिर्नोपयुक्ता चेन्निवृत्तिः क्वोपयुज्यते बोधहेतुर्निवृत्तिश्चेद्बुभुक्षायां तथेतरा ६९ बुद्धश्चेन्न बुभुक्षेत
> नाप्यसौ बुध्यते पुनः अबाधादनुवर्तेत बोधो न त्वन्यसाधनात् ७० नाविद्या नापि तत्कार्यं बोधं बाधि
> तुमर्हति पुरैव तत्त्वबोधेन बाधिते ते उभे यतः ७१ बाधितं दृश्यतामक्षैस्तेन बाधो न शक्यते जीवन्नाखुर्न
> मार्जारं हन्ति हन्यात्कथं मृतः ७२

पेक्ष्यते न साधनांतरमित्याह अबाधादिति वाक्यप्रमाणजन्यज्ञानस्य बलवता प्रमाणेन बाधाभावादनुवृत्तिः स्यादेव अतो
न साधनानंतरं तदर्थमनुष्ठेयमित्यर्थः ७० ननु प्रमाणांतरेणाबाध्यत्वेऽविद्यया तत्कार्येण कर्तृत्वाध्यासेन वा बाधः स्या
दित्याशंक्याह नाविद्येति पुरैवेति ७१ नन्वविद्याया बाधितत्वेऽपि तत्कार्यस्य प्रतीयमानस्य बाधितत्वासंभवात्तेन बोधस्य बा
धो भवेदित्याशंक्य उपादाननिवृत्तौ च तस्यापि बाधितत्वान्न तेनापि बाधः शंकितुं शक्यत इत्याह बाधितमिति तत्र दृष्टां
तमाह जीवन्निति आखुर्मूषकः ७२

165/1938

द्वैतदर्शनेन तत्त्वबोधस्य बाधाभावं कैमुतिकन्यायप्रदर्शनेन दृढयितुं तदनुकूलं दृष्टांतमाह अपीति यः समर्थः पाशुपतास्त्रेण
विद्धोऽपि न ममार चेत्किल स निष्फलेषुविनिर्भिन्नांगः शल्यरहितेषुणा व्यथितदेहः सन् नंक्ष्यति नाशं प्राप्स्यतीत्यत्र का प्रमा प्रमाणं ना
स्तीत्यर्थः ७३ दृष्टांतसिद्धमर्थं दार्ष्टांतिके योजयति आदाविति आदौ विद्याभ्याससमये चित्रैर्बहुविधैः स्वकार्यैः प्रमातृत्व
भोक्तृत्वकर्तृत्वादिभिर्जृंभमाणया विवर्धमानया विद्यया बोधो युध्वा युद्धं कृत्वा तामजयत स एवाभ्यासपाटवेन सुदृढो द्वैदा
नीमविद्यानिवृत्तौ सत्यां निर्मूलेन तत्कार्येणाध्यासेन कथं बाध्यतां न कथमपि बाध्यत इत्यर्थः ७४ उपपादितमर्थं श्रोतृबु

> अपि पाशुपतास्त्रेण विद्धश्चेन्न ममार यः निष्फलेषुविनिर्भिन्नांगो नंक्ष्यतीत्यत्र का प्रमा ७३ आदावविद्यया चि
> त्रैः स्वकार्यैर्जृंभमाणया युध्वा बोधो जयत्सोद्य सुदृढो बाध्यतां कथं ७४ तिष्ठंत्वज्ञानतत्कार्यशवा बोधेन
> मारिताः न भीतिर्बोधसम्राजः कीर्तिः प्रत्युत तस्य तैः ७५ य एवमतिशूरेण बोधेन न वियुज्यते प्रवृत्त्या वा नि
> वृत्त्या वा देहादिगतयास्य किं ७५ प्रवृत्तावाग्रहो न्याय्यो बोधहीनस्य सर्वथा स्वर्गाय वापवर्गाय यतितव्यं यतो नृ
> भिः ७६ विद्वांश्चेत्तादृशां मध्ये तिष्ठेत्तदनुरोधतः कायेन मनसा वाचा करोत्येवाखिलाः क्रियाः ७७

ध्यारोहाय रूपकेणाह तिष्ठंत्विति ७५ भवत्येवं प्रकृते किमायातमित्यत आह य इति यः पुमानेवमुक्तप्रकारेणातिशूरेणावि
द्यातत्कार्यघातकेन बोधेन प्रत्यात्मैकत्वज्ञानेन न वियुज्यते न कदापि वियुक्तो भवति अस्य पुंसो देहादिनिष्ठया प्रवृत्त्या वा निवृत्त्या
वा किं न किमपीष्टमनिष्टं वेत्यर्थः ७५ तर्हि ज्ञानिवदज्ञानिनोऽपि प्रवृत्तावाग्रहो न युक्त इत्याशंक्याह प्रवृत्ताविति तत्रोपपत्तिमा
ह स्वर्गायेति ७६ विदुष आग्रहो न युक्त इत्युक्तं तर्हि कर्मिणां मध्ये वर्तमानेन तेन किं कर्तव्यमित्याह विद्वांश्चेदिति विद्वांस्तादृशां
कर्मिणां मध्ये तिष्ठेच्चेत्तदनुरोधतः तेषामनुसारेण शरीरादिभिः सर्वाः क्रियाः करोत्येव न तावत्कर्मिणो निवारयेदित्यर्थः ७७

अस्यैवतत्वबुभुत्सूनांमध्येवस्थितस्य कृत्यमाह एषमध्यइति एषविद्वान्बुभुत्सूनांमध्येयदातिष्ठेत्तदाएषांबुभुत्सूनां बोधायतत्वज्ञानजननायताःक्रियाःदूषयन्स्वयमपित्यजतु ७८ कुतएवंकर्तव्यमित्याह अविद्वदिति अज्ञान्यनुसारेण ज्ञानिनोवर्तनमुचितंकृपालुत्वात्तेषामनुकंपनीयत्वाच्चेतिभावः एवंकुतइत्यतआह स्तनंधयेति स्तनंधयाः स्तनपानकर्तारः शिशवइत्यर्थः ७९ पितुःस्तनंधयानुसारित्वमेवदर्शयति अधिक्षिप्तइति २८० दार्ष्टांतिकेयोजयति निंदतइति विद्वान् अज्ञैर्निंदितः स्तूयमानोवास्वयंननिंदतिनस्तौतिकिंत्वेषामज्ञानांयथाबोधउपजायतेतथाचरेत् ८१ एवमाचरणेनिमित्त

एषमध्येबुभुत्सूनांयदातिष्ठेत्तदापुनः बोधायैषांक्रियाःसर्वादूषयंस्त्यजतुस्वयं ७८ अविद्वदनुसारेणवृत्तिर्बुद्धस्ययुज्यते स्तनंधयानुसारेणवर्ततेतत्पितायतः ७९ अधिक्षिप्तस्ताडितोवाबालेनस्वपितानदा नक्लिश्नातिनकुप्येतबालंप्रत्युतलालयेत् २८० निंदितःस्तूयमानोवाविद्वानज्ञैर्ननिंदति नस्तौतिकिंतुतेषांस्याद्यथाबोधस्तथाचरेत् ८१ येनायंनटनेनात्रबुध्यतेकार्यमेवतत् अज्ञप्रबोधान्नैवान्यत्कार्यमस्त्यत्रनद्विदः ८२ कृतकृत्यतयातृप्तप्राप्तप्राप्यतयापुनः तृप्यन्नेवंस्वमनसामन्यतेसौनिरंतरं ८३

माह येनेति अयमज्ञानीअत्रास्मिन्लोकेविदुषायेनयादृशेननटनेनाचरणेनबुध्यतेतत्वमवगच्छतितदाचरणंतेनकर्तव्यमेव तर्हितद्वदेवकार्यांतरमपिप्रसज्येतेत्यतआह अज्ञेति यतस्तद्विदस्तत्वविदःअत्रलोकेज्ञप्रबोधादन्यत्कर्तव्यं नैवास्त्यतस्तदनुसरणेनतत्वबोधनंकर्तव्यमित्यर्थः ८२ इतःवर्णयिष्यमाणयोस्तात्पर्यमाह कृतकृत्येति असौविद्वान् पूर्वोक्तप्रकारेणकृतकृत्यतयाकृतंकृत्यंजातंयेनासौकृतकृत्यस्तस्यभावस्तत्तातयातृप्तः सन्वक्ष्यमाणप्रकारेणप्राप्तप्राप्यतयाप्राप्तंप्राप्यंयेनसःप्राप्तप्राप्यस्तस्यभावस्तत्तातयातृप्यन्नतृप्तोभवन्स्वमनसानिरंतरमेवंमन्यते ८३ २५

किमन्यतइत्यतआह धन्योहंधन्योहमित्यादिना धन्यःकृतार्थःआदरार्थेवीप्सानित्यमनवरतंस्वात्मानंस्वस्यनिजंरूपंदेशाद्यनवच्छिन्नंप्रत्यगात्मानमंजसासाक्षाद्यतोवेद्मिजानाम्यतोधन्यः एवमात्मज्ञानलाभनिमित्तांतुष्टिमभिधायतत्फललाभनिमित्तांतांदर्शयति धन्यइति ब्रह्मानंदःब्रह्मभूतानंदःमेस्पष्टंविभातिस्पष्टंयथाभवतितथास्फुरतीत्यर्थः ८४ एवमिष्टप्राप्तौतुष्टिमभिधायानिष्टनिवृत्त्यापितुष्यतीत्याह धन्योहमिति अद्यइदानींदुःखंदुःखस्वरूपंसंसारंनवीक्षेनपश्याम्यतःकृतार्थइत्यर्थः दुःखाप्रतीतिकारणमाह धन्योहमिति अनेकवासनाजालमज्ञानंक्वापिपलायितंनष्टमित्यर्थः ८५ अज्ञाननिवृत्तिफलंकृतकृत्य

धन्योहंधन्योहंनित्यंस्वात्मानमंजसावेद्मि धन्योहंधन्योहंब्रह्मानंदोविभातिमेस्पष्टं ८४ धन्योहंधन्योहंदुःखंसांसारिकंनवीक्षेद्य धन्योहंधन्योहंस्वस्याज्ञानंपलायितंक्वापि ८५ धन्योहंधन्योहंकर्तव्यंमेनविद्यतेकिंचित् धन्योहंधन्योहंप्राप्तव्यंसर्वमद्यसंपन्नं ८६ धन्योहंधन्योहंतृप्तेर्मेकोपमाभवेल्लोके धन्योहंधन्योहंधन्योधन्यःपुनःपुनर्धन्यः ८७ अहोपुण्यमहोपुण्यंफलितंफलितंदृढं अस्यपुण्यस्यसंपत्तेरहोवयमहोवयं ८८ अहोशास्त्रमहोशास्त्रमहोगुरुरहोगुरुः अहोज्ञानमहोज्ञानमहोसुखमहोसुखं ८९ तृप्तिदीपमिमंनित्यंयेनसंदधतेबुधाः ब्रह्मानंदेनिमज्जंतस्तेतृप्यंतिनिरंतरं २९० इतितृप्तिदीपः ७:

त्वंप्राप्तप्राप्यत्वंचदर्शयति धन्यइति ८६ इदानींकृतकृत्यत्वमित्यादिनाजातायास्तृप्तेर्निरतिशयत्वमाह धन्यइति इतःपरंवक्तव्याभावात्तुष्टिरेवपरिस्फुरतीतिदर्शयतिधन्यइति ८७ अस्यसर्वस्यकारणभूतपुण्यपुंजपरिपाकमनुस्मृत्यतुष्यतीत्याह अहोपुण्यमिति एवंविधपुण्यसंपादकमात्मानंअनुस्मृत्यतुष्यति अस्येति ८८ इदानींसम्यक्ज्ञानसाधनंशास्त्रंतदुपदेष्टारमाचार्यमनुस्मृत्यतुष्यति अहोशास्त्रमिति पुनश्चशास्त्रजन्यंज्ञानंतत्सुखंचानुस्मृत्यसंतुष्यति अहोज्ञानमिति ८९ ग्रंथाभ्यासफलमाह तृप्तिदीपमिति २९० इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेणरामकृष्णाख्यविदुषाविरचितापंचदशीपदतृप्तिदीपव्याख्यासमाप्तः सप्तमोध्यायः ७ ७

169/1938

॥अथकूटस्थदीप प्रारंभः श्रीराम॥प्रक०८

श्रीगणेशाय नमः ॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ॥ कुर्वे कूटस्थदीपस्य व्याख्यां तात्पर्यदीपिकां ॥ १ ॥ अत्र मु
मुक्षोर्मोक्षसाधनस्य ब्रह्मात्मैकत्वज्ञानस्य त्वंपदार्थशोधनपूर्वकत्वात् त्वंपदार्थशोधनपरं कूटस्थदीपाख्यं ग्रंथमारभमा
णो भाष्यार्थोऽस्य ग्रंथस्य वेदांतप्रकरणत्वेन तदीयैरेव विषयादिभिस्तद्वत्तासिद्धिमभिप्रेत्य त्वंपदलक्ष्यवाच्यौ कूटस्थजीवौ
सदृष्टांतं भेदेन निर्दिशति स्वादित्येति स्वादित्यदीपिते स्वे आदित्यः स्वादित्यः प्रसिद्धः सूर्य इत्यर्थः तेन च तत्संबंध्यालो
कोऽलक्ष्यते तेन दीपिते प्रकाशिते कुड्ये दर्पणादित्यदीप्तिवत् दर्पणेषु निपत्य पर्यायेणैव कुड्यसंबद्धैरादित्यरश्मिभिस्त
त्प्रकाशवानिव कूटस्थभासितः कूटस्थेनाविकारिचैतन्येन भासितः प्रकाशितो देहस्थधीस्थजीवेन बुद्धिस्थचिदाभासेन

स्वादित्यदीपिते कुड्ये दर्पणादित्यदीप्तिवत् ॥ कूटस्थभासितो देहो धीस्थजीवेन भास्यते ॥ १ ॥ अनेकदर्प
णादित्यदीप्तीनां बहुसंधिषु ॥ इतरा व्यज्यते तासामभावेऽपि प्रकाशते ॥ २ ॥ चिदाभासविशिष्टानां तथाने
कधियामसौ ॥ संधिं धियामभावं च भासयन् प्रविविच्यतां ॥ ३ ॥ घटैकाकारधीस्था चिद्घटमेवावभासयेत् ॥ घ
टस्य ज्ञातता ब्रह्मचैतन्येनावभास्यते ॥ ४ ॥

भास्यते प्रकाश्यते अनेन सामान्यतो विशेषतश्च कूटस्थावभासकादित्यप्रकाशादयमिव देहावभासकचैतन्यद्वयमस्तीति प्रति
ज्ञातं भवति ॥ १ ॥ ननु न दर्पणादित्यदीप्तिव्यतिरेकेण स्वादित्यदीप्तिर्नोपलभ्यत इत्याशंक्य तामभ्यस्तो विभज्य दर्शयति अनेके
तिया अनेका बहुदर्पणजन्याः कुड्ये तत्र तत्र मंडलाकारा विशेषप्रभा दृश्यंते तासां मध्ये मध्ये इतरा सामान्यप्रकाशरूपा स्वादित्यप्र
भा व्यज्यते अभिव्यक्तोपलभ्यते तासां दर्पणजन्यप्रभाणामभावे दर्पणापगमादिना सत्वे च स्वयं सर्वत्र प्रकाशते ॥ २ ॥ दृष्टांतसि
द्धमर्थं दार्ष्टांतिके योजयति चिदाभासेति तथा तेनैव प्रकारेण चिदाभासविशिष्टानां चित्प्रतिबिंबयुक्तानां अनेकधियामनेका
सां बुद्धिवृत्तीनां घटज्ञानादिशब्दवाच्यानां संधिं मध्यं तत्र गतं तापदादौ धियानामासां पेव बुद्धिवृत्तिनाभावं च सुषुप्त्यादौ भासयन् प्र
काशयन् असौ कूटस्थः प्रविविच्यतां ताभ्यो भेदेन ज्ञायतामित्यर्थः ॥ ३ ॥ इदानीं देहांतः कूटस्थचिदाभासयोर्भेदप्रदर्शनाय देहा
द्बहिरपि चिदाभासब्रह्मणोर्विभज्य दर्शयति घटेति घटैकाकारधीस्था चित् घटस्यैकस्याकार इवाकारो यस्याः सा घटैकाका

गतत्वविद्याघाकुञ्जीवर्तमानः ४

171/1938

चिदाभासः घटमेवावभासयेत् तस्य घटस्य ज्ञातता ज्ञाततारूपो धर्मो घटो ज्ञात इति व्यवहारहेतुर्यः स घटकल्पनाधिष्ठानेन ब्रह्मचैतन्येनसा
धनभूतेनावभास्यते प्रकाश्यत इत्यर्थः ॥ ४ ॥ ननु ज्ञाततावभासकचैतन्येनैव घटप्रतीतिसंभवात् बुद्धिः किमर्थेत्याशंक्य घटस्य ज्ञा
ततादिभेदमभिप्रेत्याह अज्ञातत्वेनेति बुभुत्सयात् पुरा अयं घटो ब्रह्मणैवाज्ञातत्वेन प्रकाशितो बुभुत्सातोऽस्य ज्ञातत्वेन
ब्रह्मणैव प्रकाश्यत इति स्थाने च भेदः नान्य इत्यर्थः ॥ ५ ॥ नन्वेकस्यैव घटस्य ज्ञातताज्ञातत्वलक्षणं द्वैरूप्यं कथं संभवतीत्याशंक्य
तदवबोधनाय ज्ञातताज्ञाततयोर्ज्ञाताज्ञातयोः स्वरूपं तावद्दर्शयति चिदाभासांतधीवृत्तिः चिदाभासश्चित्प्रतिबिंबः सोऽन्तेषु
भागे यस्याः सा धीवृत्तिर्ज्ञानमुच्यते बोधो धीबुद्धिरित्याचार्यैरभिधानात् तत्र दृष्टांतो लोहांतकुंतवदिति जाड्यं स्वतः स्फूर्तिरहित
त्वमज्ञानमित्युच्यते एताभ्यां पर्यायेण व्याप्तः सर्वतः संबद्धः कुंभो ज्ञात इति अज्ञात इति चोच्यत इत्यर्थः ॥ ६ ॥ नन्वज्ञानस्य कुंभस्या

अज्ञातत्वेन ज्ञातोऽयं घटो बुभुत्सया पुरा ॥ ब्रह्मणैवोपरिष्टात्तु ज्ञातत्वेनेत्यसौ भिदा ॥ ५ ॥ चिदाभासांतधीवृत्तिर्ज्ञा
नं लोहांतकुंतवत् ॥ जाड्यमज्ञानमेताभ्यां व्याप्तः कुंभो द्विधोच्यते ॥ ६ ॥ अज्ञातो ब्रह्मणा भास्यो ज्ञातः कुंभस्तथा न किं ॥
ज्ञातत्वजननेनैव चिदाभासपरिक्षयः ॥ ७ ॥ आभासहीनया बुद्ध्या ज्ञातत्वं नैव जन्यते ॥ तादृग्बुद्धेर्विशेषः को मृदादेः स्यात्

ज्ञानव्याप्तत्वादस्तु ब्रह्मावभास्यत्वं ज्ञानव्याप्तस्य तु ज्ञातस्य कुंभस्य कुतो ब्रह्मचैतन्यावभास्यत्वमित्याशंक्य अज्ञानस्य अज्ञा
तताजननवद्ज्ञानस्यापि ज्ञातताजननमात्रोपक्षीणत्वाद् ज्ञातकुंभवत् ज्ञातस्यापि ब्रह्मावभास्यत्वं भवतीत्याह अज्ञात इ
ति यथा अज्ञातकुंभो ब्रह्मणा भास्यस्तथा ज्ञातकुंभो न किं ब्रह्मावभास्यो भवति किंतु भवत्येवेत्यर्थः कुत इत्यत आह ज्ञातत्वेति
॥ ७ ॥ नन्वज्ञातताजननायाज्ञानमिव ज्ञातताजननायापि बुद्धिरेवालं किमनेन चिदाभासेनेत्याशंक्य चिदाभासरहिताया
बुद्धेर्घटादिवत्प्रकाशरूपत्वेन ज्ञातताजननं न संभवतीत्याह आभासेति ॥ ८ ॥ श्रीरामजयति श्रीजगदंब

प॰र॰ चिदाभासरहितबुद्धिव्याप्तस्य घटस्य ज्ञातत्वाभावं दृष्टांतप्रदर्शनेन स्पष्टयति ज्ञातेति लोके कुत्रचिदपि घटः मृदादिरूपेण रूप
२ रूपत्वाल्लिप्तो ज्ञात इति नोच्यते यथा चिदाभासरहितबुद्धिव्याप्तस्यापि कुंभस्य ज्ञातत्वं नाभ्युपगंतव्यमिति भावः ९ फलितमा
ह ज्ञातत्वमिति यतः केवलायाः बुद्धेर्ज्ञातत्वजननासमर्थत्वमतः कुंभे चिदाभासलक्षणस्य फलस्योत्पत्तिरेव ज्ञातत्वं नाम प्र
सिद्धमित्यर्थः ननु तथापि चिदाभासो न कल्पनीयः ब्रह्मचैतन्यस्यैव फलस्य सद्भावादित्याशंक्याह न फलमिति ब्रह्मचैतन्यं
फलं घटादिस्फुरणं न भवतीति कुत इत्यत आह मानादिति मानात्प्रागपि प्रमाणप्रवृत्तेः पूर्वमपि विद्यमानत्वात् फलस्य तु न
उत्तरकालीनत्वनियमादिति भावः १० नन्विदं परागर्थप्रमेयेष्वित्यादिसुरेश्वरवार्तिकविरुद्धमित्याशंक्य तद्विवक्षां नभि

ज्ञात इत्युच्यते कुंभो मृदा लिप्तो न कुत्रचित् धीमात्रव्याप्तकुंभस्य ज्ञातत्वं नेष्यते तथा ९ ज्ञातत्वं नाम कुं
भे तु चिदाभासफलोदयः न फलं ब्रह्मचैतन्यं मानात्प्रागपि सत्त्वतः १० परागर्थप्रमेयेषु या फलत्वेन संम
ता संवित्सैवेह मेयोऽर्थो वेदांतोक्तिप्रमाणतः ११ इति वार्तिककारेण चित्सादृश्यं विवक्षितं ब्रह्मचित्फ
लयोर्भेदः सहस्री विश्रुतो यतः १२

अस्यार्थं वोद्धुमित्यपरिहरति परागर्थेति अस्य चायमर्थः परागर्था बाह्या घटादयः पदार्थास्तेषु प्रमेयेषु प्रमाणविषयेषु
सत्सु या प्रमाणफलत्वेनाभ्युपेता संविदस्ति सैवेह अस्मिन्वेदांतशास्त्रे वेदांतोक्तिप्रमाणतो वेदांतवाक्यलक्षणप्रमाणेन मेयो
ऽर्थो ज्ञातव्योऽर्थः ११ इत्यनेन वार्तिकेन ब्रह्मचैतन्यसदृशश्चिदाभासः प्रमाणफलत्वेन विवक्षितो न ब्रह्मचैतन्यमिति २
भावः वार्तिककाराणामीदृशी विवक्षेति कुतोऽवगम्यत इत्याशंक्य तद्गुरुभिः श्रीमदाचार्यैरुपदेशसाहस्र्यां ब्रह्मचैत
न्यचिदाभासयोर्भेदस्य प्रतिपादितत्वादित्याह ब्रह्मचिदिति ब्रह्म चित् फलं च ब्रह्मचित्फले तयोरिति विग्रहः १२

एवं च सति प्रकृते किमायातमित्यत आह आभास इति यस्मात् ब्रह्मचित्फलयोर्भेदः प्रसिद्धः तस्मात् घटे उदित उत्प
न्न आभासश्चिदाभासस्तु घटे ज्ञातत्वं जनयेदुत्पादयेत् ज्ञातत्वं पुनर्ज्ञातत्ववत् ब्रह्मणैव भास्यं भवति हि प्रसिद्धमित्यर्थः
१३ एवं ब्रह्मचिदाभासयोर्वैरमुपपादितं विषयप्रदर्शनेन स्पष्टयति धीवृत्येति चिता ब्रह्मचैतन्येनेत्यर्थः चिदाभास
स्य कुंभमात्रनिष्ठफलरूपत्वात्तेनाभासेन स घट एक एव स्फुरेत् भासेतेत्यर्थः १४ कुंभस्य चिदाभासब्रह्मोभयभास्यत्वे लिं
गमाह ॥ चैतन्यमिति अतो घटस्य ब्रह्मचिदाभासोभयभास्यत्वात् कुंभे ज्ञातत्वेन द्विगुणं चैतन्यं भाति इदमेव घटज्ञानता
वभासकं चैतन्यं तार्किकैर्नामांतरेण व्यवह्रियत इत्याह अन्ये इति यथोदितं यथोक्तमेतत् ब्रह्मचैतन्यं अन्ये तार्किका

आभास उदितस्तस्मात् ज्ञातत्वं जनयेत् घटे तत्पुनर्ब्रह्मणा भास्यमज्ञातत्ववदेव हि १३ धीवृत्त्याभासकुं
भानां समूहो भास्यते चिता कुंभमात्रफलत्वात्स एक आभासतः स्फुरेत् १४ चैतन्यं द्विगुणं कुंभे ज्ञातत्वेन स्फु
रत्यतः अन्येऽनुव्यवसायाख्यमाहुरेतद्यथोदितं १५ घटोऽयमित्यसावुक्तिराभासस्य प्रसादतः विज्ञातो घ
ट इत्युक्तिर्ब्रह्मानुग्रहतो भवेत् १६ आभासब्रह्मणी देहाद्बहिर्यद्वद्विवेचिते तद्वदाभासकूटस्थौ विविच्येतां
वपुष्यपि १७ स्वमात्रं भासयेत्तत्र सोऽहं नान्यत्कदाचन एवमाभाससहिता वृत्तयः स्वस्वभासिकाः १९ क्रमाद्वि
च्छिद्य विच्छिद्य जायंते वृत्तयोऽखिलाः सर्वा अपि विलीयंते सुप्तिमूर्छासमाधिषु २०

अनुव्यवसायाख्यं ज्ञानांतरं प्राहुरिति योजना १५ अयं घट इति ज्ञातो घट इति व्यवहारभेदादपि चिदाभासब्रह्मणोर्भेदोऽ
वगंतव्य इत्याह घटोऽयमिति १६ देहाद्बहिश्चिदाभासब्रह्मणी विविच्येते तथान्तर्देहान्तश्चिदाभासकूटस्थौ विवेचनीया
वित्याह आभासेति १७ ननु देहाद्बहिश्चिदाभासव्याप्य घटाकारवृत्तिवदांतरविषयगोचरवृत्त्यभावात्कथं तद्व्यापकश्चि
दाभासोऽभ्युपगम्यत इत्याशंक्य विषयगोचरवृत्त्यभावेऽप्यहमादिवृत्तिसद्भावात्तद्व्यापकश्चिदाभासोऽभ्युपगंतुं शक्यत इति स
दृष्टांतमाह अहमिति १८ अहमादिवृत्तीनामेव चिदाभासभास्यत्वं दृष्टांतप्रपंचनेन स्पष्टयति स्वमात्रमिति १९ एवं चिदा
भासयुक्तानां वृत्तीनां कूटस्थस्वरूपप्रसादयितुं तदुपयोगितं तत्स्वभावमसंदर्शयति क्रमादिति २०

173/1938

पं·र·
३

भक्त्वेवंसमाध्यारोह निविलयोः ननेकथंकूटस्थोवगम्यतइत्याशंक्यतत्स्वभावसाक्षित्वेनासाववगम्यतइत्याह संधयइति
वृत्तिसंधयोतत्स्वभावाश्चयेनचैतन्येनावभासंतेसकूटस्थोवगंतव्यइत्यर्थः २१ एवंसतिकिंफलितमित्यत आह घटइति
बाह्येघटेयथाधर्माश्रावभासकश्चिदाभासः घटस्यज्ञाततावभासकश्चैतन्येचेतिचैतन्यद्वैगुण्यंतथांतरेऽहंकारादिवृ
त्तिष्वपिकूटस्थचैतन्यंतत्स्वभासकश्चिदाभासश्चेतिद्विगुणंचैतन्यमस्ति तत्रोपपत्तिमाह ततइति यतोद्विगुणंचैतन्यमस्ति
ततः संधितः संधिभ्यस्तत्रवृत्तिषुवैशद्यमधिकंदृश्यतइतिशेषः २२ ज्ञातताज्ञातातेनतस्तोघटवद्वृत्ति २२ नन्वत्रापिघटा
दिष्विवज्ञातताज्ञाततावभासकत्वेनकूटस्थः किंनेष्यतइत्याशंक्यतत्रज्ञाततायभावादेवेत्याह ज्ञाततेति तत्रोपपत्तिमाह

संधयोखिलवृत्तीनामभावाश्चावभासिताः निर्विकारेणयेनासौकूटस्थइतिचोच्यते २१ घटेद्विगुणचैतन्यं
यथाबाह्येतथांतरे वृत्तिष्वपिततस्तत्रवैशद्यंसंधितोधिकं २२ ज्ञातताज्ञातातेस्तोघटवद्वृत्तिषुक्वचित्
स्वस्यस्वेनागृहीतत्वात्ताभिश्चाज्ञाननाशनात् २३ द्विगुणीकृतचैतन्येजन्मनाशानुभूतितः अकूटस्थंतदन्य
तुकूटस्थमविकारितः २४ अंतःकरणतद्वृत्तिसाक्षीत्यादावनेकधा कूटस्थएवसर्वत्रपूर्वाचार्यैर्विनिश्चितः २५

स्वस्येति ज्ञानाज्ञानव्याप्तिभ्यांज्ञातताज्ञातातेभवतः वृत्तीनांतुस्वप्रकाशत्वेनज्ञानव्याप्तिर्नास्तिताभिर्वृत्तिभिःस्वोसत्तिमा
त्रेणस्वगोचराज्ञानस्यनिवर्तितत्वादज्ञानस्यव्याप्तिरपिनास्तीतिभावः २३ ननुकूटस्थचिदाभासयोरुभयोरपिचित्त्वेसमा
नेएकस्यकूटस्थत्वमपरस्यअकूटस्थत्वमित्येतत्कुतइत्याशंक्यचिदाभासनिष्ठयोर्जन्मनाशयोरनुभूयमानत्वादस्यअकूट
स्थत्वपरस्यविकारित्वेप्रमाणाभावात्कूटस्थत्वमित्याह द्विगुणीति २४ चिदाभासव्यतिरिक्तकूटस्थाभ्युपगमः स्वकपोल· २३
कल्पितइत्याशंक्याचार्यैः कूटस्थस्योपपादितत्वान्मैवमित्याह अंतःकरणेति अंतःकरणतद्वृत्तिसाक्षिचैतन्यविग्रहः आ
नंदरूपः सत्यः सनुकिंनात्मानंप्रपद्यसइत्यादाविसर्थः २५ ৩ ४ ० ० ৩

175
1938

कूटस्थातिरिक्तश्चिदाभासोपिवर्णितइत्याह आत्माभासेति आत्माचाभासश्चाश्रयश्चात्माभासाश्रयाश्चेतिद्वंद्वःसमा
सः मुखाभासाश्रयाइत्यत्रापितथामुखंप्रसिद्धमाभासोमुखप्रतिबिंबः आश्रयोदर्पणादिश्चेतित्रयंतथाप्रत्यक्षेणावगम्यतेए
वमात्माकूटस्थआभासःश्चिदाभासः आश्रयोंतःकरणादितित्रयोपिशास्त्रयुक्तिभ्यामवगम्यंतइत्यर्थः अत्राभासशब्देन
कूटस्थव्यतिरिक्तश्चिदाभासोवर्णितइतिभावःमनसःसाक्षीबुद्धेःसाक्षीतिबुद्धिसाक्षिणःप्रतिपादकंशास्त्रं रूपंरूपंप्रतिरू
पोबभूवेतिचिदाभासप्रतिपादकं विकारित्वाविकारित्वादिरूपायुक्तिःपूर्वमेवोक्तितिभावः २६ तत्रचिदाभासमाक्षिपति
बुद्धीति स्वस्मिन्कल्प्यमानयाबुध्यावच्छिन्नकूटस्थएवघटद्वाराघटाकाशइवबुद्धिद्वारालोकांतरेगमनागमनेकर्तुंशक्तोति

आत्माभासाश्रयश्चैवंमुखाभासाश्रयायथा गम्यंतेशास्त्रयुक्तिभ्यामित्याभासश्चवर्णितः २६ बुध्यवच्छिन्न
कूटस्थोलोकांतरगमागमौ कर्तुंशक्तोघटाकाशइवाभासेनकिंवद २७ शृण्वसंगःपरिच्छेदमात्राज्जीवोभ
वेन्नहि अन्यथाघटकुड्यादैरवच्छिन्नस्यजीवता २८ नकुड्यसदृशीबुद्धिःस्वच्छत्वादितिचेत्तथा अस्तुनाम
परिच्छेदेकिंस्वाच्छ्येनभवेत्तव २९ प्रस्थेनदारुजन्येनकांस्येजन्येनवानहि विक्रेतुस्तंदुलादीनांपरिमाणंविशि
ष्यते ३० परिणामोविशेषेपिप्रतिबिंबोविशिष्यते कांस्यादौनतुतथाबुद्धावप्याभासोभवेद्बलात् ३१ ॥

अतश्चिदाभासकल्पनायांगौरवमितिभावः २७ असंगस्यकूटस्थस्यबुध्यवच्छेदमात्रेणजीवत्वंनघटते अन्यथातिप्र
संगादितिपरिहरति शृण्वसंगइति २८ बुद्धिकुड्ययोःस्वाच्छ्यास्वाच्छ्याभ्यांवैषम्यंशंकते नेतिउक्तंस्वच्छत्वंपरिच्छेद
प्रयोजकंनभवतीत्याह तथाअस्त्विति २९ उक्तमर्थंदृष्टांतेनस्पष्टयति प्रस्थेनेति दारुकांस्यजन्ययोःप्रस्थयोःस्थितेस्त
ण्डुलेतंदुलपरिमाणेन्यूनाधिकभावहेतुनभवतइत्यर्थः ३० कांस्यप्रस्थेतंदुलपरिमाणाधिक्याभावेपिप्रतिबिंबलक्षण
माधिक्यमस्तीत्याशंक्यतर्हिबुद्धावपिचिदाभासोभवतेवांगीकृतस्यादित्याह परिमाणाविशेषइति ३१ ৩

प्रतिबिंबाभीकारेचिदाभासः कथमंगीकृतः स्यादित्याशंक्य प्रतिबिंबाभासशब्दाभ्यामभिधेयस्यार्थस्यैकत्वादित्याह इयमिति प्रतिबिंबस्याभासत्वं कथमित्याशंक्याभासलक्षणयोगादित्याह बिंबलक्षणेनेति हियस्मात्कारणात् प्रतिबिंबो बिंबलक्षणेरहितो बिंबवदवभासते अतो हेतोर्बिंबाभासइतिभावः ३२ आभासलक्षणयोगित्वमेवस्पष्टयति ससंगत्वेति एतस्यचिदाभासस्यससंगत्वविकारित्वाभ्यां बिंबभूतासंगाविकारिचैतन्यलक्षणहीनत्वं स्फुरणरूपत्वे बिंबवदभासनमित्यर्थः हेतुलक्षणरहिताहेतुवदवभासमानाहेत्वाभासाइतिवदित्यर्थः ३३ इत्थं चिदाभासस्याप्रयोजकतां निराकृत्यइदानीं तस्यबुद्धेः पृथक्सत्त्वंसाधयितुं पूर्वपक्षमाह नहीति यथामृदिसत्यामेवभवतःघटोनमृदोभिद्यतेतद्वदिति

इयत्ताभासनताभासः प्रतिबिंबस्तथाविधः बिंबलक्षणहीनः सन् बिंबवद्भासनेसहि ३२
ससंगत्वविकाराभ्यां बिंबलक्षणहीनता स्फूर्तिरूपत्वमेतस्यबिंबवद्भासनंविदुः ३३ नहिधीभावभाविन्वादाभासोस्तिधियःपृथक्
इतिचदल्पमेवोक्तं धीरप्येवंस्वदेहतः ३४ देहेमृतेपिबुध्यैश्वेछास्त्राद्दस्तितथासति बुद्धिरन्यश्चिदाभास
प्रवेशाश्रुतिषुश्रुतः ३५ धीयुक्तस्यप्रवेशश्चेन्नैतरेयेधियःपृथक् आत्माप्रवेशसंकल्पप्रविष्टइतिगीयते
३६ कथंन्विदंसाक्षदेहंमद्रतेस्यादितीरणात् विदार्यमूर्धसीमानंप्रविष्टःसंसरत्ययं ३७ श्रीराम॥

भावः नन्वेवंतर्हि देहातिरिक्तारपिनसिध्येदितिप्रतिबंध्यापरिहरति अल्पमिति ३४ प्रतिबंदीमोचनंशंकते देहेम्रतइति देहव्यतिरिक्ताया बुद्धेः सविज्ञानोभवतीत्यादिश्रुतिसिद्धत्वात्तास्तत्वमितिभावः ननुश्रुतिबलाद्देहातिरिक्ताबुद्धिरभ्युपगम्यतेचेत्तर्हि प्रवेशश्रुतिबलाद्बुद्ध्यतिरिक्तः चिदाभासोप्यभ्युपेयइत्याह तथासतीति ३५ ननुबुध्युपाधिकस्यैवप्रवेशश्रुत्यतेनेतरस्येतिशंकते धीयुक्तस्येति ऐतरेयश्रुतौबुद्ध्यतिरिक्तस्यैवप्रवेशश्रवणान्मैवमितिपरिहरति ऐतरेयइति ३६ तांश्रुतिमर्थतःपठति कथंन्विति अयंपरमात्मासाक्षदेहमक्षाणिचदेहाश्चाक्षदेहास्तैःसहवर्ततइतिसाक्षदेहमिदंजडजातंमदृतेचेतनंमांविहायकथंनुस्यानकथमपिनिर्वहेदितिविदार्यमूर्धसीमानंकपालत्रयमध्यदेशंविदार्यसमन्निधिमात्रेणभित्वा प्रविष्टः सन्संसरतिजाग्रदादिकमनुभवतीत्यर्थः ३७ श्रीरामजयरामजयजयराम॥ ॥ ४

नन्वसंगस्यात्मनःप्रवेशोप्ययुक्तइतिशंकते कथंप्रविष्टइति इदंचोद्यं सृष्टावपिसमानमित्याह सृष्टिरिति सृष्टिकर्तुर्मायिकत्वान्नदोषइत्याशंक्यायंपरिहारः प्रविष्टस्यापिसमानइत्याह मायिकत्वमिति अनयोर्मायिकत्वेहेतुः समइत्याह विनाशइति ३८ प्रज्ञानघनएवैतेभ्योभूतेभ्यःसमुत्थायतान्येवानुविनश्यतिनप्रेत्यसंज्ञास्तीति औपाधिकरूपस्यविनाशत्वप्रतिपादिकांश्रुतिंदर्शयति समुत्थायेति एषप्रज्ञानघनआत्माएतेभ्योदेहेंद्रियादिरूपेभ्यः पंचभूतकार्येभ्योनिमित्तभूतेभ्यः उपाधिभ्यः समुत्थायजीवत्वाभिमानंप्राप्यतान्येवदेहादीनिविनश्यंतमनुविनश्यतितेषुविनश्यत्सुतत्कृतंजीवत्वाभिमा

कथंप्रविशेसंगश्चेत्सृष्टिर्वास्यकथंवद मायिकत्वंतयोस्तुल्यंविनाशश्चसमस्तयोः ३८
समुत्थायैष्वभूतेभ्यस्तान्येवानुविनश्यति सुस्पष्टमितिमैत्रेय्यैयाज्ञवल्क्यउवाचहि ३९
अविनाश्ययमात्मेतिकूटस्थःप्रविवेचितः मात्रासंसर्गइत्येवमसंगत्वस्यकीर्तनात् ४०
जीवापेतंवावकिलशरीरंम्रियतेनसः इत्यत्रनविमोक्षार्थः किंतुलोकांतरेगतिः ४१

नंजहातिएवंप्रकारेणसोपाधिकरूपस्यविनाशित्वं याज्ञवल्क्योमैत्रेय्याउवाचउक्तवानित्यर्थः ३९ अविनाशीवारेयमात्मानुच्छित्तिधर्मेतिश्रुत्याकूटस्थस्तत्तोविभिन्नः प्रदर्शितइत्याह अविनाशीति मात्रासंसर्गस्त्वस्यभवतीतिश्रुत्याविनाशित्वेहेतुमसंगत्वंचोक्तवानित्याह मात्रेति मीयंतइतिमात्रादेहादयस्ताभिरस्यात्मनोअसंसर्गोपिभवतीत्यर्थः ४०
ननुजीवापेतंवावकिलइदंम्रियतेनजीवोम्रियतइतिश्रुत्याअस्यऔपाधिकस्याप्यविनाशित्वंप्रतिपादितमित्याशंक्यतस्याःश्रुतेर्देहांतरप्राप्तिविषयतयानात्यंतिकनाशाभावपरत्वमित्याह जीवापेतमिति जीवापेतं जीवेनरहितं जीवेनत्युक्तमितियावत् वावएवजीवोनम्रियतइत्यर्थः ४१ ॥७॥ ॥७॥ ॥७॥ ॥७॥

येनसकृन्मितियावत् तावदेवजीवो न म्रियत इत्यर्थः ४१ ननु जीवस्य विनाशित्वे ऽहं ब्रह्मास्मीति विनाशी ब्रह्मनाश
स्य ज्ञानं न घटत इति शंकते नाहमिति विनाशी स जीवोऽहं ब्रह्मेति ब्रह्मरूपेणात्मानं बुध्येत न जानीयात् छिन्नाद्यवि
नाशिनोरेकत्वविरोधादिति चेन्मुख्यसामानाधिकरण्याभावेपि बाधायां सामानाधिकरण्यसंभवात् जीवभावबाधे
न ब्रह्मभावो बगंतुं शक्यत इत्याह ननुदिति ४२ बाधसामानाधिकरण्येन वाक्यार्थप्रतिपत्तिप्रकारो वार्तिककारैः सदृष्टान्तोभि

नाहं ब्रह्मेति बुध्येत स विनाशीति चेन्ननु । सामानाधिकरण्यस्य बाधायामपि संभवात् ४२
योयं स्थाणुः पुमानेष पुंधिया स्थाणुधीरिव । ब्रह्मास्मीति धियाऽशेषा ह्यहंबुद्धिर्निवर्तते ४३
नैष्कर्म्यसिद्धावप्येवमाचार्यैः स्पष्टमीरितं । सामानाधिकरण्यस्य बाधार्थत्वमतोऽस्तु तत् ४४

हितइतीममर्थं तद्वाक्योदाहरणपूर्वकं दर्शयति योयं स्थाणुरिति सामानाधिकरण्यस्य बाधार्थत्वं स्थाणुरेष पुमानि
त्यस्मिन्वाक्ये पुरुषत्वबोधेन स्थाणुत्वबुद्धिर्निवर्तते यथा एवमहं ब्रह्मास्मीति बोधेनाहंबुद्धिः कर्ताहमस्मीत्येव
मादिरूपा सर्वापि निवर्तत इति ४३ नैष्कर्म्येति एवमुक्तेन प्रकारेणाचार्यैर्वार्तिककारैर्नैष्कर्म्यसिद्धौ सामाना
धिकरण्यस्य बाधार्थत्वं स्फुटमीरितमिति फलितमाह अतोस्त्विति अतः कारणात् ब्रह्माहमस्मीति वा
क्ये तत्सामानाधिकरण्यस्य बाधार्थत्वमस्त्वित्यर्थः ४४

॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

नन्वेवमपि श्रुतिषु बाधायां सामानाधिकरण्यं न क्वापि दृष्टमित्याशंक्य सर्वं खल्विदं ब्रह्मेत्यत्र बाधायां सामानाधिकरण्यं द
ष्टमतोऽत्रापि न दुष्यतीत्याह सर्वं ब्रह्मेति ४५ ननु तर्हि विवरणाचार्यैर्बाधासामानाधिकरण्यं कुतो निराकृतमि
त्याशंक्य तत्र ब्रह्मशब्देन कूटस्थस्य विवक्षितत्वादित्याह सामानाधिकरण्यस्येति ४६ कूटस्थत्वविवक्षयेत्युक्तमर्थं
विवृणोति शोधित इति शोधितो बुद्ध्यादिभ्यो विवेचितस्त्वंपदलक्ष्यो यः कूटस्थो वक्ष्यमाणलक्षणस्तस्य ब्रह्मरूपतो
त्सत्यादिलक्षणब्रह्मरूपतां वक्तुं विवरणादिषु बाधासामानाधिकरण्यनिरासपूर्वकं मुख्यसामानाधिकरण्यमुक्तमि

सर्वं ब्रह्मेति जगता सामानाधिकरण्यवत् । अहं ब्रह्मेति जीवेन सामानाधिकृतिर्भवेत् ४५ सामानाधि
करण्यस्य बाधार्थत्वं निराकृतं । प्रयत्नतो विवरणे कूटस्थत्वविवक्षया ४६ शोधितस्त्वंपदार्थो यः
कूटस्थो ब्रह्मरूपतां । तस्य वक्तुं विवरणे कूटस्थत्वविवक्षया) न तथोक्तमितरत्र च ४७ देहेन्द्रियादिषु
क्तस्य जीवाभासभ्रमस्य या । अधिष्ठानचितिः सैषा कूटस्थोऽत्र विवक्षिता ४८ जगद्भ्रमस्य सर्वस्य य
दधिष्ठानमीरितं । त्रय्यन्तेषु तदत्र स्याद्ब्रह्मशब्दविवक्षितं ४९ ॥ श्रीमद्भगवान् सहाय

मित्यर्थः ४७ इदानीं कूटस्थब्रह्मणोरैक्यं संभावयितुं कूटस्थशब्देन विवक्षितमर्थमाह देहेति आदिशब्देन मनआदयो
गृह्यन्ते एवं च देहेन्द्रियादियुक्तस्य शरीरद्वययुक्तस्य जीवाभासभ्रमस्य चिदाभासरूपभ्रमस्य याधिष्ठानचितिर्यदधिष्ठा
नचैतन्यमस्मिन्नत्र वेदान्तेषु कूटस्थत्वेन विवक्षितमित्यर्थः ४८ ब्रह्मशब्दस्य चार्थमाह जगदिति कृत्स्नजगत्कल्प
नाधिष्ठानं यच्चैतन्यं वेदान्तेषु निरूपितं तदत्र ब्रह्मशब्देन विवक्षितमित्यर्थः ४९ श्रीवरदमूर्तिर्जयति ४७॥

ननु जीवभ्रमाधिष्ठानं चैतन्यं कूटस्थ इत्युक्तमनुपपन्नं जीवस्यारोपितत्वासिद्धेरित्याशंक्य तस्यारोपितत्वं केभ्युतिकन्यायेन साधयति एतस्मिन्निति जगदेकदेशत्वं चानेन जीवेनात्मनानुप्रविश्येत्यादिश्रुतिसिद्धं ५० ननु जगदधिष्ठानचैतन्यस्यैकत्वात्तत्त्वंपदार्थयोर्भेदाभावेन तत्त्वंपदार्थयोः पौनरुक्त्यमित्याशंक्य तयोरौपाधिको भेदो वास्तवमैक्यमित्याह जगदिति जगदेकदेशा इति च अख्यायस्य समारोप्यस्य तन्तथा ज्ञाना चैकवचनं ५१ ननु दिशाभासस्य शुक्तिकारजतादिवदधिष्ठानारोप्योभयधर्मवत्त्वानुपलंभात् कथमारोपितत्वमित्याशंक्याह कर्तृत्वादीनिति बुद्ध्युपाधिद्वारा समारोप्यमाणान् कर्तृ

एतस्मिन्नेव चैतन्ये जगदारोप्यते यदा तदा तदेकदेशस्य जीवाभासस्य का कथा ५० जगतदेकदेशाख्य समारोप्यस्य भेदतः तत्त्वंपदार्थौ भिन्नौ वस्तुतस्त्वेकता मितः ५१ कर्तृत्वादीन् बुद्धिधर्मान् स्फूर्त्याख्यां चात्मरूपतां दधद्विभाति पुरत आभासो ऽतो भ्रमो भवेत् ५२ का बुद्धिः को ऽयमाभासः को वात्मात्र जगत्कथं इत्यनिर्णयतो मोहः सो ऽयं संसार उच्यते ५३ बुद्ध्यादीनां स्वरूपं यो विविनक्ति स तत्त्ववित् स एव मुक्त इत्येवं वेदान्तेषु विनिश्चयः ५४

त्वभोक्तृत्वप्रमातृत्वादीन् स्फुरणलक्षणमात्मरूपत्वं च दधत् पुरतो भाति स्पष्टं प्रतिभासते अत आभासः कल्पित इत्यर्थः ५२ अस्य भ्रमस्य किं कारणमित्याकांक्षायां बुद्ध्यादिस्वरूपापरिज्ञानमेवेत्याह का बुद्धिरिति तस्य निवर्तनीयत्वायानर्थहेतुमाह सो ऽयमिति ५३ अस्य किं निवर्तकमित्याकांक्षायां बुद्ध्यादिस्वरूपविवेक एव निवर्तक इत्यभिप्रेत्य तद्वानेव ज्ञानी तत एवानर्थनिवृत्तिरित्याह बुद्ध्यादीनामिति ५४ ॥ ॥ ॥

एवं बन्धमोक्षयोरविवेकमूलत्वे सत्यद्वैतवादे कस्य बन्धः कस्य वा मोक्ष इत्येवमादिरूपास्तार्किकैः क्रियमाणाः कुतर्कमूलाः परिहासविशेषाः खंडनोक्तयुक्तिभिस्तेषां निरुत्तरत्वापादनेन परिहरणीया इत्याह एवमिति ५५ एवं श्रुतियुक्तिभ्यो कूटस्थं बुद्ध्यादिभ्यो विविच्य दर्शयित्वा पुराणेष्वपि तद्विवेकः कृत इत्याह रत्नेरित्यादिश्लोकत्रयेण कामादिवृत्तिसत्त्वे सत्तां तत्साक्षित्वेन तदुदयात्पूर्वं तत्प्रागभावसाक्षित्वेन जिज्ञासायां सत्यां तत्साक्षित्वेन ततः पूर्वमज्ञो ऽस्मीत्यनुभूयमानाज्ञानसाक्षित्वेन शिव एव तिष्ठति ५६ सत्यासत्यस्य जगत आलंबनत्वेनाधिष्ठानत्वेन सत्यः जडस्य सर्वस्य साधकत्वेनावभासकत्वात् चिद्रूपः सर्वदा प्रेमाविषयत्वादानंदरूपः ५७ सर्वार्थावभासकत्वेन सर्वसंबंधित्वात्संपूर्ण इत्युच्यते अ

एवं च सति बंधस्यात्र कस्येत्यादिकुतर्कजाः विडंबना दृढं खड्गाः खंडनोक्तिप्रकारतः ५५ रतेः साक्षितया रतेः प्रागभावस्य च साक्षितः बुभुत्सायां तथाज्ञो ऽस्मीत्याभासाज्ञानवस्तुतः ५६ असत्यालंबनत्वेन सत्यः सर्वजडस्य तु साधकत्वेन चिद्रूपः सदा प्रेमास्पदत्वतः ५७ आनंदरूपः सर्वार्थसाधकत्वेन हेतुना सर्वसंबंधवत्त्वेन संपूर्णः शिवसंज्ञितः ५८ इति शैवपुराणेषु कूटस्थः प्रविवेचितः जीवेशत्वादिरहितः केवलः स्वप्रभः शिवः ५९

न्वेरनुमितिप्रकारं विमतः शिवः रत्यादिभ्यो भिद्यते रत्यादिसाक्षित्वात् यद्रत्यादिसाक्षि न भवति यथा रत्यादि विमतः सत्यो न चितुमर्हति मिथ्याधिष्ठानत्वात् असत्यरजताधिष्ठानशुक्तिवत् विमतः चिद्रूपः जडमात्रावभासकत्वात् चिद्रूपं न भवति न सत् प्रेमास्पदमपि न भवति यथा घटादिः विमतः परिपूर्णः सर्वसंबंधित्वात् गगनवत् सर्वसंबंधित्वं च सर्वार्थसाधकत्वेन विमतः सर्वसंबंधवान् सर्वावभासकत्वात् यः सर्वसंबंधवान्न भवति स सर्वावभासको ऽपि न भवति यथा दीपादिरिति ५८ उदाहृतपुराणवाक्यस्य तात्पर्यमाह इतीति इत्येवं प्रकारेण सूतसंहितादिषु पुराणेषु जीवेश्वरत्वादिकल्पनारहितः केवलो ऽद्वितीयः स्वप्रभः स्वयंप्रकाशचैतन्यरूपः शिवः कूटस्थो विवेचित इत्यन्वयः ५९

पं.द.
७

जीवेशत्वादिरहितत्वं कुत इत्याशंक्य श्रुत्या तयोर्मायिकत्वप्रदर्शनादित्याह मायेति जीवेशावाभासेन करोति माया चा
विद्या च स्वयमेव भवतीति श्रुतिः मायाविद्याधीनयोश्चिदाभासयोर्मायिकत्वं प्रतिपादयतीति भावः मायिकत्वेन तयोर्दे
हादिभ्यो वैलक्षण्यं न स्यादित्याशंक्य पार्थिवत्वाविशेषेपि काचकुंभस्य घटादिभ्यो वैलक्षण्यमिवानयोरपि स्यादित्याह स्व
च्छाविति ६० ननु घटकाचकुंभारंभकयोर्मृद्विशेषयोर्भेदात्तद्वैलक्षण्यमुचितं जगज्जीवेश्वरभेदहेतोर्मायाया एकत्वा
त्तयोर्जगतो वैलक्षण्यमनुचितमित्याशंक्य अन्नजन्ययोर्देहमनसोर्यथा वैलक्षण्यं तद्वदित्याह अन्नेति ६१ भवतु का
चादिवत्स्वच्छत्वं चित्त्वं तु कुत इत्याशंक्यानुभवादित्याह चिद्रूपेति चिद्रूपत्वेन प्रकाशनमपि मायिकयोरनुपपन्नमित्याशं

मायाभासेन जीवेशौ करोतीति श्रुतत्वतः मायिकावेव जीवेशौ स्वच्छौ तौ काचकुंभवत् ६० अन्नजन्ये मनो दे
हात्स्वच्छं यद्वत्तथैव तौ मायिकावपि सर्वस्मादन्यस्मात्स्वच्छतां गतौ ६१ चिद्रूपत्वं च संभाव्यं चित्त्वेन च प्र
काशनात् सर्वकल्पनशक्ताया मायाया दुष्करं नहि ६२ अस्मन्निद्रापि जीवेशौ चेतनौ स्वप्नगौ सृजेत् म
हामाया सृजत्येतावित्याश्चर्यं किमत्र ते ६३ सर्वज्ञत्वादिकं चेशे कल्पयित्वा प्रदर्शयेत् धर्मिणं कल्प
यत्यस्याः को भारो धर्मकल्पने ६४ कूटस्थेप्यतिशंका स्यादिति चेन्मातिशंक्यतां कूटस्थमायिकत्वे तु प्रमां

क्य न स्याद्दुर्घटकारित्वादुपपन्नमित्याह सर्वेति ६२ उक्तमर्थं कैमुतिकन्यायेन द्रढयति अस्मदिति ६३ ईश्वर
स्यापि मायिकत्वेन स्वजीववदसर्वज्ञत्वादिकं स्यादित्याशंक्य सर्वज्ञत्वादिकमपि मायैव कल्पयिष्यतीत्याह सर्व ७
ज्ञत्वेति नचोपपत्तिमाह धर्मिणमिति ६४ ननु जीवेशयोरिव कूटस्थस्यापि मायिकत्वं प्रसज्येतेति शंक्यते
कूटस्थ इति प्रमाणाभावान्मैवमिति परिहरति मेति ६५

कूटस्थस्य वास्तवत्वेपि प्रमाणं नोपलभ्यत इत्याशंक्य श्रुतयः सर्वा अपि प्रमाणमित्याह वस्तुत्वमिति अत्र कूटस्थस्य
पारमार्थिकत्वे प्रतिपक्षभूतमन्यद्वस्तु किंचन न सहंत इत्यर्थः ६६ ननु कूटस्थस्य जीवेशयोश्च वास्तवत्वावास्तवत्वसा
धने श्रुतय एव प्रवृत्ते न तर्कैः किंचिदपि साध्यत इत्याशंक्य मुमुक्षूणां श्रुत्यर्थविशदीकरणाय प्रवृत्तत्वात्तर्कोप
न्यास इत्याह श्रुत्यर्थमिति ६७ ततः किमत्यत आह तस्मादिति मुमुक्षूणां श्रुत्यर्थः कीदृशोनुसंधेय इत्याह श्रु
त्याविद्यादिना श्रुतिषु जीवेशयोर्मायिकत्वं ६८ ईक्षणादिप्रवेशांतायाः सृष्टेः ईश्वरकर्तृत्वं जाग्रत्स्वप्नसुषुप्ति
बंधमोक्षलक्षणस्य संसारस्य जीवकर्तृत्वं ६९ कूटस्थस्यासंगत्वादिकं मृतिजन्मादिलक्षणस्य व्यवहारस्यात

वस्तुत्वं घोषयंत्यस्य वेदांताः सकला अपि सपत्नरूपं वस्त्वन्यन्न सहंतेत्र किंचन ६६ श्रुत्य
र्थं विशदीकुर्मो न तर्काद्वच्मि किंचन तेन तार्किकशंकानामत्र कोवसरो वद ६७ तस्मात्कुत
र्कं संत्यज्य मुमुक्षुः श्रुतिमाश्रयेत् श्रुतौ तु माया जीवेशौ करोतीति प्रदर्शितं ६८ ईक्षणादि
प्रवेशांता सृष्टिरीशकृता भवेत् जाग्रदादिविमोक्षांतः संसारो जीवकर्तृकः ६९ असंग एव
कूटस्थः सर्वदा नास्य कश्चन भवत्यतिशयस्तेन मनस्येवं विचार्यतां ७० न निरोधो न चोत्प
त्तिर्न बद्धो न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ७१

भ्यासत्वं च प्रतिपादितं अतो मुमुक्षुरिममर्थं सर्वदा विचारयेदित्याशयः ७० कूटस्थस्य जन्माद्यतिशयाभा
वः कुतोवगम्यत इत्याशंक्य श्रुतिवाक्यादित्यभिप्रेत्य तद्वाक्यं पठति ७१ न निरोध इति ७१ राम राम

181/1938

ननु तर्हि श्रुतिषु तत्र तत्र जीवेश्वरादिस्वरूपप्रतिपादनं किमर्थमित्याशंक्यावाङ्मनसगोचरस्यात्मनो अवबोधना
येत्याह अवाङ्मनसइति ७२ ननु तत्त्वस्यैकरूपस्य श्रुतिबोध्यत्वे श्रुतिषु विगानं कुतो दृश्यत इत्याशंक्य न तत्त्वे विगा
नमस्ति अपि तु साधनप्रकारे तदपि बोध्यपुरुषचित्तवैषम्यानुसारेणेत्युरेश्वराचार्यैरुक्तमित्याह यथायथेति ७३

अवाङ्मनसगम्यं तं श्रुतिर्बोधयितुं सदा जीवमीशं जगद्वापि समाश्रित्य प्रबोधयेत् ७२ यथा यथा भ
वेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि सा सैव प्रक्रियेह स्यात्साध्वीत्याचार्यभाषितं ७३ श्रुतितात्पर्यमख
िलमबुद्ध्वा भ्राम्यते जडः विवेकी त्वखिलं बुद्ध्वा तिष्ठत्यानंदवारिधौ ७४ मायामेघो जगन्नीरं व
र्षत्वेष यथा तथा चिदाकाशस्य नो हानिर्न वा लाभ इति स्थितिः ७५ इमं कूटस्थदीपं योनुसंधत्ते नि
रंतरं स्वयं कूटस्थरूपेण दीप्यतेसौ निरंतरं ७६

श्रुत्यर्थस्यैकरूपत्वेन प्रतिपादकानामेव कुतो विप्रतिपत्तिरित्याशंक्य श्रुतितात्पर्यबोधशून्यानामेव विप्रतिपत्ति
र्न तु तद्विदामित्याह श्रुतितात्पर्यमिति ७४ तर्हि विवेकिनो निश्चयः कीदृश इत्याकांक्षायामाह मायेति ७५ ग्रं
थाभ्यासफलमाह इममिति ७६ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिं
करेण रामकृष्णाख्येन विदुषा विरचिता कूटस्थदीपतात्पर्यदीपिका समाप्तिमगमत् अष्टमोध्यायः ८ ८

॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥

183
1938

॥ अथ ध्यानदीपः ॥ प्रक॰ ९

185/1938

श्रीगणेशायनमः॥ ॥नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ क्रियतेध्यानदीपस्यव्याख्यासंक्षेपतोम
या १ इहतावद्देशेनब्रह्मनित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसंपन्नस्यमुमुक्षोःश्रवणमनननिदिध्यासना
नुष्ठानवतस्तत्त्वंपदार्थविवेचनपूर्वकंमहावाक्यार्थापरोक्षज्ञानेनब्रह्मभावलक्षणोमोक्षोभवतीतिप्रतिपादितं न
न्वश्रुतोपनिषत्कस्यापिबुद्धिमांद्यादिनाकेनचित्प्रतिबंधेनवाक्यार्थविषयापरोक्षप्रमित्यनुत्पत्तौसत्यांतदुत्पादनद्वारा
मोक्षफलकोपासनानिर्दिदर्शयिषुरादौतावत्सदृष्टांतंब्रह्मतत्त्वोपासनयापिमोक्षोभवतीतिप्रतिजानीते संवादी
ति यथासंवादिभ्रमेणप्रवृत्तस्याभिप्रेतार्थलाभोभवति एवंब्रह्मतत्त्वोपासनयापिमोक्षोस्त्यतः तापनीयोपनिष

संवादिभ्रमवद्ब्रह्मतत्त्वोपास्त्यापिमुच्यते उत्तरेतापनीयेतः श्रुतोपास्तिरनेकधा १ श्री॥
मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः मिथ्याज्ञानाविशेषेपिविशेषोर्थक्रियांप्रति २ ॥

द्यनेकप्रकारेणब्रह्मतत्त्वोपासनाश्रुतावुक्तात्यर्थः संवादिभ्रमंविवेक्तुंदृष्टांतंप्रपंचयितुंसंवादिभ्रमप्रतिपादकंवार्तिकं
पठति मणिप्रदीपेति मणिश्चप्रदीपश्चमणिप्रदीपौतयोःप्रभेमणिप्रदीपप्रभेतयोरितिविग्रहः मणिप्रभायांदीपप्र
भायांचमणिबुद्धिःसामिथ्याज्ञानमेवातस्मिंस्तद्बुद्धित्वात् अथापिमणिप्रभायांचयामणिबुद्धिःसाअर्थक्रियाकारि
णीमणिप्रभायांमणिबुद्ध्याभिधावतःपुरुषस्यमणिलाभोभवति इतरस्यतुनास्तीत्यर्थक्रियायांवैषम्यमस्तीत्यर्थः २
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पं·र·
२

वार्त्तिकं व्याचष्टे दीपोपवरकस्यांतरित्यादिना श्लोकत्रयेण कस्मिंश्चिन्मंदिरे अपवरकस्यांतर्दीपस्तिष्ठति तस्या
प्रभा बहिर्द्वारप्रदेशे वर्त्तुलाकारेणोपलभ्यते तथान्यस्मिन्मंदिरे अपवरकस्यांतःस्थितस्य रत्नस्य प्रभा बहिर्द्वार
प्रदेशे दीपप्रभेव रत्नसमानोपलभ्यते ३ तथाविधं प्रभाद्वयं दूरतो दृष्ट्वा अयं मणिरिति बुध्वा द्वौ पुरुषावभिधाव
तं कुरुतस्तयोर्द्वयोरपि प्रभाविषये आयमानं मणिज्ञानं भ्रांतमेव ४ अथापि दीपप्रभायां मणिबुद्धिं कृत्वा धावता
पुरुषेण मणिर्नोपलभ्यते मणेः प्रभायां मणिबुध्या धावता मणिर्लभ्यतेव ५ भवत्वेवं वार्त्तिकार्थः प्रकृते किमा

दीपोपवरकस्यांतर्वर्त्तते तत्प्रभा बहिः दृश्यते द्वार्यथान्यत्र तद्वद्दृश्या मणेः प्रभा ३ दूरे
दूरे प्रभाद्वयं दृष्ट्वा मणिबुध्याभिधावतोः प्रभायां मणिबुद्धिस्तु मिथ्याज्ञानं द्वयोरपि ४ न ल
भ्यते मणिर्दीपप्रभां प्रत्यभिधावता प्रभायां धावतावश्यं लभ्येतैव मणिर्मणेः ५ दीपप्रभा
मणिभ्रांतिर्विसंवादिभ्रमः स्मृतः मणिप्रभामणिभ्रांतिः संवादिभ्रम उच्यते ६ बाष्पं धूमत
या बुध्वा तत्रांगारानुमानतः वह्निर्यदृच्छया लब्धः स संवादिभ्रमो मतः ७

यानमित्यत आह दीपप्रेति यादीपप्रभायां मणिभ्रांतिरस्ति स विसंवादिभ्रम इति स्मृतो विद्वद्भिर्मणिलाभलक्षणार्थ
क्रियारहितत्वात् या मणिप्रभायां मणिबुद्धिरस्ति सा तु मणिलाभलक्षणार्थक्रियावत्त्वात् संवादिभ्रम इत्युच्यत इत्य
र्थः ८ एवं प्रत्यक्षविषये संवादिभ्रमं दर्शयित्वा अनुमानविषयेपि तं दर्शयति बाष्पमिति कस्मिंश्चित्प्रदेशे स्थितं बाष्पं धू
मत्वेन निश्चित्य तस्मिन्प्रदेशे अयं प्रदेशो अग्निमान् धूमवत्त्वादित्यनुमानाय प्रवृत्तेन पुरुषेण दैवगत्या यदृच्छया अग्निस्त
त्रोपलभ्येत तदा बाष्पविषयं भ्रमज्ञानं संवादिभ्रमो मतः ७

आगमविषयेपि तं दर्शयति गोदावर्युदकमिति गोदावर्युदकस्यापि विशुद्धिहेतुत्वमागमसिद्धमतस्तत्प्रोक्षणाद्विप्र
विशुद्धिरस्त्येव अथापि गोदावर्युदके या गंगोदकबुद्धिः सा भ्रांतिरेव ८ उदाहरणांतरमाह ज्वरेणाप्त इति ज्वरेण सन्नि
पातं प्राप्तः पुरुष इदं नारायणस्मरणं मम स्वर्गसाधनमिति ज्ञानं मंत्ररत्नापि संनिपातप्रयुक्तभ्रमवशात् साधारणपु
रुषवत् यावदेवादि वा नारायणं स्मरन् मृतः स्वर्गमवाप्नोत्येव हरिर्हरति पापानि दुष्टचित्तैरपि स्मृत इति अरकुत्सपुत्र
मघवान् यत्ताभिको पि नारायणेति म्रियमाण उपैति मुक्तिमित्यादिपुराणवचनेभ्यः अत्रापि नारायणनाम्नः पुत्र

गोदावर्युदकं गंगोदकं मत्वा विशुद्धये संप्रोक्ष्य शुद्धिमाप्नोति स संवादिभ्रमो मतः ८ ज्वरेणा
प्तः सन्निपातं भ्रांत्या नारायणं स्मरन् मृतः स्वर्गमवाप्नोति स संवादिभ्रमो मतः ९ प्रत्यक्षस्यानु
मानस्य तथा शास्त्रस्य गोचरे उक्तन्यायेन संवादिभ्रमाः संति हि कोटिशः १० अन्यथा मृत्तिका
दारुशिलाः स्युर्देवताः कथं अग्नित्वादिधियोपास्याः कथं वा योषिदादयः ११ अयथावस्तुविज्ञा
नात् फलं लभ्यत ईप्सितं काकतालीयतः सोयं संवादिभ्रम उच्यते १२

नामत्वज्ञानं भ्रांतिरेव ९ एवं त्रिविधसंवादिभ्रमोदाहरणेन सिद्धमर्थमाह प्रत्यक्षस्येति १० विपक्षे बाधप्रद
र्शनेनोक्तमर्थं द्रढयति अन्यथेति अन्यथा संवादिभ्रमाभावे मृदादयः फलसिद्धये देवतात्वेन ध्यानभावयुः स्व
तो देवतात्वाभावादित्यर्थः बाधकांतरमाह अग्नित्वादिति पंचाग्निविद्यायां योषा वाव गौतमाग्निः पुरुषो वाव गौ
तमाग्निः पृथिवी वाव गौतमाग्निः पर्जन्यो वाव गौतमाग्निरसौ वाव लोको गौतमाग्निरित्यादिवाक्यैर्योषित्पुरुषपृथि
वीपर्जन्यद्युलोकानामग्नित्वेनोपासनं ब्रह्मलोकावाप्तिफलकं न भवेदित्यर्थः आदित्यं ब्रह्मेत्युपासीत आदित्यो
ब्रह्मेत्यादेशः इत्येवमादयो ग्राह्याः ११ इदानीं वक्ष्यमाणार्थे रूपपादितं संवादिभ्रमं बुद्धिस्थं कार्ये संक्षिप्य दर्शयति अ
यथावस्त्विति विहितादविहिताद्वा यस्माद्यथावस्तुविज्ञानादीप्सितमभिलषितं फलं काकतालीयतो दैवगत्या लभ्यते
सोयं संवादिभ्रम इत्यर्थः १२

पं॰द॰
२

ननु ब्रह्मतत्त्वोपासनस्यायथावस्तुविषयस्य कथं सम्यग्ज्ञानसाध्यमुक्तिफलप्रदत्वमित्याशंक्य संवादिभ्रमवदेवेत्याह
स्वयंभ्रम इति १३ ननु ब्रह्मतत्त्वं ज्ञात्वोपासनं क्रियतेऽज्ञात्वा वा आद्ये उपासनावैयर्थ्यं मोक्षसाधनस्य ज्ञानस्यै
व विद्यमानत्वात् द्वितीये विषयापरिज्ञानादुपासनमेव न घटत इति आशंक्याह वेदान्तेभ्य इति अयमभिप्रायः
ब्रह्मात्मैकत्वापरोक्षज्ञानस्य मोक्षसाधनस्यानुत्पन्नत्वान्नोपासनावैयर्थ्यं शास्त्रात्परोक्षतयावगम्यत्वात् ब्रह्मण
उपासनाविषयत्वमिति १४ उपास्यब्रह्मतत्त्वगोचरस्य परोक्षज्ञानस्य किंरूपमित्याकांक्षायामाह प्रत्यगिति प्र

स्वयंभ्रमोऽपि संवादी यथा सम्यक्फलप्रदः ब्रह्मतत्त्वोपासनापि तथा मुक्तिफलप्रदा १३ वेदान्तेभ्यो
ब्रह्मतत्त्वमखण्डैकरसात्मकं परोक्षमवगम्यैतदहमस्मीत्युपासते १४ प्रत्यग्व्यक्तिमनुल्लिख्य शा
स्त्राद्विष्ण्वादिमूर्तिवत् अस्ति ब्रह्मेति सामान्यज्ञानमत्र परोक्षधीः १५ चतुर्भुजाद्यवगतावपि मू
र्तिमनुल्लिखन् अक्षैः परोक्षज्ञान्येव न तदा विष्णुमीक्ष्यते १६

त्यग्व्यक्तिं बुद्ध्यादिसाक्षिणमात्मानमनुल्लिख्याविषयीकृत्य शास्त्रात् सत्यज्ञानादिवाक्यजातात् ब्रह्मास्तीत्येवं सा
मान्याकारेण जायमानं ज्ञानं अत्रास्यामुपासनायां परोक्षज्ञानं विवक्षितमित्यर्थः तत्र दृष्टान्तः विष्ण्वादिमूर्तिप्रतिपाद
कशास्त्रजन्यज्ञानवदित्यर्थः १५ ननु शास्त्रेण विष्ण्वादिमूर्तेश्चतुर्भुजत्वादिविशेषप्रतीतौ तज्ज्ञानस्यापि कुतः
परोक्षत्वमित्याशंक्याह चतुर्भुजादीति शास्त्रेण चतुर्भुजत्वादिविशेषप्रतीतावपि चक्षुरादिभिर्विष्ण्वादिमूर्तिम
विषयीकुर्वन्पुरुषः परोक्षज्ञान्येव तत्रोपपत्तिमाह न तदा विष्णुमीक्षत इति तदोपासनाकाले विष्णुमुपास्यं नेक्षते
नेन्द्रियैर्विषयीकरोतीत्यर्थः १६

187/1938

ननु विष्ण्वादिगोचरस्य ज्ञानस्य व्यक्त्युल्लेखित्वाभावात् भ्रमत्वमित्याशंक्य प्रमाणेन जनित्वान्न भ्रमत्वमित्याह
परोक्षत्वेति परोक्षज्ञानत्वं भ्रान्तिज्ञानत्वे कारणं न भवति किंतु विषयासत्यत्वं इह तु प्रमाणभूतेन शास्त्रेणैव यथा
र्थभूताया विष्ण्वादिमूर्तेरवभासनान्न भ्रमत्वमित्यर्थः १७ ननु सच्चिदानन्दव्यक्त्युल्लेखित्वाद्ब्रह्मतत्त्वज्ञानस्य शा
स्त्रजन्यस्यापि कुतः परोक्षत्वेत्याशंक्य परोक्षत्वप्रयोजकं प्रत्यक्त्वोल्लेखित्वाभावादित्याह सच्चिदानन्देति सत्यं ज्ञान
मनन्तं ब्रह्म नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनः सद्धिदं सर्वं सत्त्वदिति चिद्धिदं सर्वं प्रकाशते इत्यादिशास्त्रा

परोक्षत्वापराधेन भवेन्नातत्त्ववेदनं प्रमाणेनैव शास्त्रेण सत्यमूर्तेर्विभासनात् १७
सच्चिदानन्दरूपस्य शास्त्राज्ज्ञानेऽप्यनुल्लिखन् प्रत्यञ्चं साक्षिणं तत्तु ब्रह्म साक्षान्न वीक्षते १८
शास्त्रोक्तेनैव मार्गेण सच्चिदानन्दनिश्चयात् परोक्षमपि तज्ज्ञानं तत्त्वज्ञानं न तु भ्रमः १९

सच्चिदानन्दरूपस्य ब्रह्मणो ज्ञानेऽपि प्रत्यञ्चं साक्षिणमनुल्लिखन् तस्य ब्रह्मणः प्रत्यगात्मरूपत्वमजानानस्त
द्ब्रह्म साक्षान्न वीक्षते नैव पश्यति १८ कथं तर्हि तथाविधब्रह्मगोचरस्य ज्ञानस्य तत्त्वज्ञानत्वमित्याशंक्यागम
प्रमाणजन्यत्वादित्याह शास्त्रेति तत् ज्ञानं परोक्षमपि शास्त्रोक्तेनैव प्रकारेण ब्रह्मणः सच्चिदानन्दरूप
निश्चायकत्वात् सम्यग्ज्ञानमेव न भ्रम इत्यर्थः १९

प॰२
४

ननु सम्यग्ज्ञानादि वाक्यैर्ब्रह्मणः सच्चिदानंदरूपत्वमिव नत्वमस्यादिवाक्यैः प्रत्यग्रूपत्वमपि तस्य बोध्यत एव अतः शास्त्रजन्यस्यापि ज्ञानस्य प्रत्यग्ब्रह्मकत्वविषयत्वादपरोक्षमेवेत्याशंक्याह यद्यपि वेदांतेषु महावाक्यैर्ब्रह्मप्रत्यगात्मत्वेनैवोपदिष्टं तथाप्येतन्न प्रत्यक्षरूपत्वं अन्वयव्यतिरेकाभ्यां तत्त्वंपदार्थविवेकशून्यस्य दुर्बोधं यतो दुर्गमं यथमनः केवलाद्वाक्यान्नापरोक्षज्ञानमुत्पद्यत इत्यर्थः २० ननु सम्यग्ज्ञानस्य प्रमाणवस्तुपरतंत्रत्वात् प्रमाणस्य

ब्रह्मयद्यपि शास्त्रेषु प्रत्यक्त्वेनैव वर्णितं महावाक्यैस्तथाप्येतद्दुर्बोधमविचारिणः २०
देहाद्यात्मत्वविभ्रांतौ जाग्रत्यां नहठात्पुमान् ब्रह्मात्मत्वेन विज्ञातुं क्षमतेमंदधीत्वतः २१
ब्रह्ममात्रं सुविज्ञेयं श्रद्धालोः शास्त्रदर्शिनः अपरोक्षद्वैतबुद्धिः परोक्षाद्वैतबुध्यनुत् २२

तत्त्वमस्यादिवाक्यरूपस्य सद्भावाद्ब्रह्मणश्च प्रत्यगात्मैक्यलक्षणस्य विद्यमानत्वात् कुतो विचारमंतरेण दुर्बोधत्वमित्याशंक्याह देहादीति ब्रह्मात्मैकत्वापरोक्षज्ञानविरोधिनो देहेंद्रियादिष्वात्मत्वभ्रमस्य विचारनिवर्त्यस्य सद्भावान्निरंतरमेव विचारोपेक्ष्य इत्यर्थः २१ ननु तर्हि देहेंद्रियादिगोचरस्यैव भ्रमस्य सद्भावाद्द्वितीयब्रह्मगोचरं परोक्षज्ञानमपि नोदीयादित्याशंक्यापरोक्षद्वैतभ्रमस्य परोक्षाद्वैतज्ञानाविरोधित्वाच्छ्रद्धावतः पुंसः शास्त्रात्परोक्षज्ञानमुत्पद्यत एवेत्याह ब्रह्ममात्रमिति ब्र

184
1938

परोक्षद्वैतबुद्धिर्यतः परोक्षाद्वैतबुध्यनुत् अतो ब्रह्ममात्रं सुविज्ञेयमिति योजना २२ अपरोक्षभ्रमस्य परोक्षसम्यग्ज्ञानाविरोधित्वे दृष्टांतमाह अपरोक्षेति विरोधाभावमेवोदाहरणैर्दर्शयति प्रतिमादिष्विति २३ केचन विप्रतिपद्यमाना उपलभ्यंत इत्याशंक्याह अश्रद्धालोरिति कुत इत्यत आह श्रद्धालोरेवेति सर्वेषु वैदिकानुष्ठानेषु श्रद्धालोरेव श्रद्धावत एवाधिकारित्वादित्यर्थः २४ एतावता परोक्षज्ञाने किमायातमित्यत आह सत्यदासइति उक्तमर्थं लोकानुभावेन द्रढयति २५ ननु तर्हि शास्त्रेषु कुतः विचाराः क्रियंत इत्याशंक्यानुष्ठेययोः कर्मो

अपरोक्षशिलाबुद्धिर्नपरोक्षेशतां नुदेत् प्रतिमादिषु विष्णुत्वे कोवाविप्रतिपद्यते २३ अश्रद्धालोरविश्वासो नोदाहरणमर्हति श्रद्धालोरेवसर्वत्र वैदिकेष्वधिकारतः २४ सकृदाप्तोपदेशेन परोक्षज्ञानमुद्भवेत् विष्णुमूर्त्युपदेशो हि नमीमांसामपेक्षते २५ कर्मोपास्ती विचार्येते अनुष्ठेयाविनिर्णयात् बहुशाखाविप्रकीर्णं निर्णेतुं कः प्रभुर्नरः २५ निर्णीतार्थः कल्पसूत्रैर्ग्रथितस्तावतास्तिकः विचारमंतरेणापि शक्तो नुष्ठातुमंजसा २७

पासनयोः संदेहसंभवान्निर्णयाय विचाराः क्रियंत इत्याह कर्मोपास्तीति संदेहसंभवमेवोपपादयति बहुशाखेति अनेकासु शाखासु तत्र तत्र चोदितं कर्म उपासनं वा एकत्र समाहृत्य निर्णेतुमस्मदादिर्नरः कः प्रभुः समर्थः न कोपीत्यर्थः २६ ननु तर्हि नुनरेव तत्त्वमेव कर्मोपासनयोः प्राप्तमित्याशंक्याह निर्णीत इति जैमिन्यादिभिः पूर्वाचार्यैर्निश्चितोर्थः अनुष्ठानप्रकारः कल्पसूत्रैः संगृहीतोस्ति तावतानेर्ग्रथितत्वैनेवैतेषु विश्वासवान्पुरुषः विचारं विनापि कर्म सम्यगनुष्ठातुमंजसा २७

४

ननु तत्रोपासना विचाराभावात् तदनुष्ठानं न संभवेदित्याशंक्याह उपास्तीनामिति आर्षग्रंथेषु आत्मवासिष्ठा
दिमंत्रकल्पेषु उपासनाप्रकारो वर्णितः ततो विचारासमर्था मनुष्याः कल्पेषूक्तं तदुपासनं गुरुमुखादवग
त्यानुतिष्ठंतीति भावः २८ ननु तर्हि इदानींतनैरपि ग्रंथकर्तृभिर्वेदवाक्यविचारः कुतः क्रियत इत्याशंक्य स्वबु
द्धिपरितोषायैव क्रियते नानुष्ठानसिद्ध्य इत्याह वेदेति ननु ब्रह्मोपासनवत् ब्रह्मसाक्षात्कारस्याप्युपदेश
मात्रादेव सिद्धिः किं न स्यादित्याशंक्याह ब्रह्मेति आप्तोपदेशमात्रेणोपासनानुष्ठानोपयोगिपरोक्षज्ञानमुत्प

उपास्तीनामनुष्ठानमार्षग्रंथेषु वर्णितं विचाराक्षममर्त्याश्च तच्छ्रुत्वोपासते गुरौ २८ वेदवा
क्यानि निर्णेतुमिच्छन् मीमांसतां जनः आप्तोपदेशमात्रेण ह्यनुष्ठानं हि संभवेत् २९ ब्रह्मसाक्षा
त्कृतिस्त्वेवं विचारेण विना नृणां आप्तोपदेशमात्रेण न संभवति कुत्रचित् ३० परोक्षज्ञानमश्रद्धा
प्रतिबध्नाति नेतरत् अविचारोऽपरोक्षस्य ज्ञानस्य प्रतिबंधकः ३१ विचार्याप्यपरोक्षेण ब्रह्मात्मा
नं न वेत्ति चेत् आपरोक्ष्यावसानत्वाद्भूयो भूयो विचारयेत् ३२

द्यते अपरोक्षज्ञानं तु विचारमंतरेण न जायत इत्युक्तं ३० तत्र कारणमाह परोक्षेति यतः अविश्वास एव परो
क्षज्ञानं प्रतिबध्नाति नाविचारोऽतस्तच्चिरंतोऽसकृदुपदेशादेव परोक्षज्ञानजन्मोपपद्यते अविचारप्रतिबद्धस्या
परोक्षज्ञानस्य तु विचाराद्दारालच्चिरस्तिमंतरेणोत्पत्तिर्न संभवति अतो विचारः कर्तव्य इति भावः ३१ ननु विचारे कृ
तेऽपि यदाऽपरोक्षज्ञानं न जायते तदा किं कर्तव्यमित्यत आह विचार्यापीति तत्त्वंपदार्थौ सम्यग्विचार्यापि वाक्यार्थं ब्र
ह्मात्मैकत्वमपरोक्षतया न जानाति चेत्तदापि पुनः पुनर्विचार एव कर्तव्योऽपरोक्षज्ञानादन्यस्याभावादिति भावः ३२

ननु भूयो भूयो विचारेणापि इह साक्षात्कारानुदये सति विचारो व्यर्थः स्यादित्याशंक्याह विचारयन्निति ३३ नन्वि
दं कुतोऽवगतमित्याशंक्य ब्रह्मसूत्रकृता व्यासेनैहिकमप्रस्तुतप्रतिबंधे तद्दर्शनादित्यस्मिन्सूत्रेऽभिधानादित्याह
इह वामुत्रेति सति प्रतिबंधे इह जन्मनि ज्ञानानुत्पत्तौ श्रुतिं दर्शयति शृण्वंत इति ३४ इह जन्मनि श्रवणादिकर्तुः
जन्मांतरेऽपरोक्षज्ञानं भवतीत्यत्रापि गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वेत्यादिकां श्रुतिमर्थतः प
ठति गर्भेति इह जन्मन्यनुत्पन्नस्य ज्ञानस्य कालांतरोत्पत्तौ दृष्टांतमाह यद्वदिति ३५ दृष्टांतं विवृणोति बहुवा

विचारयन्नामरणं नैवात्मानं लभेत चेत् जन्मांतरे लभेतैव प्रतिबंधक्षये सति ३३ इह वामुत्र वा
विद्येत्येवं सूत्रकृतोदितं शृण्वंतोऽप्यत्र बहवो न विद्युरिति च श्रुतिः ३४ गर्भ एव शयानः सन् वामदे
वोऽवबुद्धवान् पूर्वाभ्यस्तविचारेण यद्वदध्ययनादिषु ३५ बहुवारमधीतेऽपि तदा नायाति चेत्पु
नः दिनांतरे नधीत्यैव पूर्वाधीतं स्मरेत्पुमान् ३६ कालेन परिपच्यंते कृषिगर्भादयो यथा तद्वदा
त्मविचारोऽपि शनैः कालेन पच्यते ३७ पुनः पुनर्विचारेऽपि त्रिविधप्रतिबंधतः न वेत्ति तत्त्वमित्येतद्वा
र्तिके सम्यगीरितं ३८ कुतस्तज्ज्ञानमिति चेत्तद्धि बंधपरिक्षयात् असावपि च भूतो वा भावी वा वर्त

रमिति ३६ आदिशब्देन परिगृहीतानि दृष्टांतांतराण्याह कालेनेति दार्ष्टांतिके योजयति तद्वदिति ३७ बहु
वारं विचारितेऽपि तत्त्वे प्रतिबंधवशात् साक्षात्कारो न जायत इत्येतद्वार्तिककारैरपि निरूपितमित्याह पुनः पुनरिति ३८
तान्येव वार्तिकान्युदाहरति कुतस्तन्नु ज्ञानमित्यादिभिः तस्य त्रिजन्मभिरित्यंतेन तत्र तावत्प्रथममनुत्पन्नस्य ज्ञा
नस्येदानीमुत्पत्तौ कारणं पृच्छति कुत इति उत्तरमाह तद्धि बंधेति बंधप्रतिबंधस्तस्य परीक्षयादित्यर्थः सो
ऽपि प्रतिबंधो भूतो भावी वा वर्तमानश्चेति त्रिविध इत्याह असाविति ३९. श्रीकृष्णायनमः

१९१/1938

प·द·
६

मवसेयं त्रिविधप्रतिबंधस्ततः किमित्यत आह अधीतेति अत एव प्रतिबंधसद्भावादेवेत्यर्थः सति प्रतिबंधे ज्ञानं नोदेतीत्येतद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरंतो न विंदेयुः एवमेवेमाः सर्वाः प्रजा अहरहर्ब्रह्मलोकं गच्छंत्य एतं ब्रह्मलोकं न विंदंत्यनृतेन हि प्रत्यूढा इत्यनया श्रुत्या प्रदर्शितमित्याह हिरण्येति ४० नन्वतीतस्य प्रतिबंधकत्वं न दृष्टमित्याशंक्याह अतीतेनेति अयमर्थः कश्चिद्यतिः पूर्वं गार्हस्थ्यदशायां कस्यांचिन्महिष्यां स्नेहं कृत्वा पश्चात् संन्यासानंतरं श्रवणे प्रवृत्तोपि तेनैव स्नेहेन जनितात्प्रतिबंधात् तत्त्वं गुरुणोप

अधीतवेदवेदार्थोऽप्यत एव न मुच्यते हिरण्यनिधिदृष्टांतादिदमेव हि दर्शितं ४० अतीतेनापि महिषीस्नेहेन प्रतिबंधतः भिक्षुस्तत्त्वं न वेदेति गाथा लोके प्रगीयते ४१ अनुसृत्य गुरुस्ते हं महिष्यां तत्त्वमुक्तवान् ततो यथावद्वेदैष प्रतिबंधस्य संक्षयात् ४२ प्रतिबंधो वर्तमानो विषयासक्तिलक्षणः प्रज्ञामांद्यं कुतर्कश्च विपर्ययदुराग्रहः ४३

दिष्टमपि न ज्ञातवानित्येवंविधा गाथा लोके प्रगीयते तेन पुराणादिषु पठ्यत इत्यर्थः ४१ तर्हि तथाविधस्य तस्य कथं ज्ञानोत्पत्तिरित्यत आह अनुसृत्येति गुरुस्तस्य तत्त्वोपदेशानर्हीयमहिषीस्नेहमनुसृत्य तस्यामेव महिष्यां तत्त्वं त्वमसि इत्युपाधिकं ब्रह्मोक्तवान् ततः सोपि महिषीस्नेहलक्षणप्रतिबंधकापगमने गुरूपदिष्टं तत्त्वं यथावच्छास्त्रोक्तप्रकारेणैव ज्ञातवानित्यर्थः ४२ एवमतीतप्रतिबंधं प्रदर्श्य वर्तमानं तं दर्शयति प्रतिबंध इति वर्तमानः प्रतिबंधश्चित्तस्य विषयासक्तिरूपः एकः प्रज्ञामांद्यं बुद्धेस्तैक्ष्ण्याभावः कुतर्कश्च शुष्कतार्किकत्वेन श्रुत्यर्थस्यान्यथोहनं विपर्ययदुराग्रहः विपर्यये आत्मनः कर्तृत्वादिधर्मयुक्तत्वज्ञानलक्षणे दुराग्रहो युक्तिरहितोभिनिवेशः एतेषामन्यतमस्यापि सत्त्वे तत्त्वं
नोदेतीत्यर्थः ४३ ५

अस्यापि प्रतिबंधस्य केन निवृत्तिरित्यत आह शमाद्यैरिति शमादयः शांतो दांत उपरतिस्तितिक्षुः समाहितो भूत्वेति श्रुत्युक्ताः शमादयः श्रवणादयः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुत्या अभिहिता एतैः साधनैस्तत्र तत्र तस्य तस्य प्रतिबंधस्य निवर्तने उचितैर्योग्यैस्तस्मिन्प्रतिबंधे क्षयं नीते सति विनाशिते सति अतः प्रतिबंधापगमादेव स्वस्य प्रत्यगात्मनो ब्रह्मत्वं प्राप्नोतीत्यर्थः ४४ इदानीं भाविप्रतिबंधं दर्शयति आगामीति आगामिप्रतिबंधो जन्मांतरे हेतुः प्रारब्धशेष इत्यर्थः तस्य च भोगमंतरेण निरसनाभावात्

शमाद्यैः श्रवणाद्यैश्च तत्र तत्रोचितैः क्षयं नीतेस्मिन्प्रतिबंधेतः स्वस्य ब्रह्मत्वमश्नुते ४४ आगामिप्रतिबंधश्च वामदेवे समीरितः एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभिः ४५ योगभ्रष्टस्य गीतायामतीते बहुजन्मनि प्रतिबंधक्षयः प्रोक्तो न विचारोप्यनर्थकः ४६ प्राप्य पुण्यकृतां लोकानात्मतत्त्वविचारतः शुचीनां श्रीमतां गेहे साभिलाषोभिजायते ४७

त्रिवृत्तौ कालनियमो नास्तीत्याह एकेनेति स च एकेन जन्मना क्षीणो वामदेवस्येति शेषः भरतस्य त्रिजन्मभिः क्षीण इत्यनुषज्यते ४५ नन्वेकेन त्रिजन्मभिरिति नियतकालत्वं भवतोप्यत इत्याशंक्याह योगेति योगभ्रष्टस्तत्त्वसाक्षात्कारपर्यंतविचाररहित इत्यर्थः तर्हि तत्त्वविचारो निष्फलः स्यादित्याशंक्याह न विचार इति प्रतिबंधनिरसनेन चरमे वापरोक्षज्ञानलक्षणफलसद्भावादिति भावः ४६ गीतायां प्रतिपादितमर्थं दर्शयति प्राप्येत्यादिना न तो याति परां गतिमित्यंतेन योगभ्रष्ट आत्मतत्त्वविचारबलादेव पुण्यकृतां पुण्यकारिणां लोकान्स्वर्गविशेषान्प्राप्य तत्र बहुकालं फलमनुभूय तद्भोगावसाने साभिलाषश्चेदस्मिन्लोके शुचीनां मातृतः
पितृतः शुद्धानां श्रीमतां कुले भिजायते ४७

193/1938

पं॰द॰ ९

पक्षांतरमाह अथवेति निस्पृहः स्वयमतिविरक्तश्चेत् ब्रह्मतत्त्वविचारादेव धीमतां आत्मतत्त्वनिश्चयविचारवतां योगिनां चित्तैकाग्र्यवतां कुले भवति जायत इत्यर्थः पूर्वस्मात्पक्षात्को विशेष इत्याह तद्धीति हि यस्मात्कारणात्तद्योगिकुले जन्म दुर्लभमल्पपुण्येनालभ्यमित्यर्थः ४८ तच्च दुर्लभत्वमुपपादयति तत्रेति हि यस्मात्कारणात्तत्र तस्मिन् जन्मनि पौर्वदेहिकं पूर्वदेहभवं तं बुद्धिसंयोगं तत्त्वविचारगोचरबुधिसंबंधं ग्रंथार्थग्रहं लभते प्राप्नोति न केवलं बुद्धिसंबंधमात्रलाभः किंतु ततः पूर्वस्मादप्यत्यादूर्ध्वं यतते ब्र

अथवा योगिनामेव कुले भवति धीमतां निस्पृहो ब्रह्मतत्त्वस्य विचारात्तद्धि दुर्लभं ४८

तत्र तं बुद्धिसंयोगं लभते पूर्वदेहिकं यतते च ततो भूयः स्तस्मादेतद्धि दुर्लभं ४९ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोपि सः अनेकजन्मसंसिद्धस्ततो याति परां गतिं ५० ब्रह्मलोकाभिवांछायां सम्यक् सत्यां निरुध्य तां विचारयेद्य आत्मानं न तु साक्षात्करोत्ययं ५१ ॥

धिकं प्रयत्नं करोति तस्मादेतज्जन्म दुर्लभमित्यर्थः ४९ भूयोभ्यासे कारणमाह पूर्वेति योगभ्रष्टस्तेन पूर्वाभ्यासेनैवावशोपि अस्वाधीनोपि ह्रियते आकृष्यते एवमनेकेषु जन्मसु कृतेन प्रयत्नेन संसिद्धस्तत्त्वज्ञानसंपन्नस्ततस्तस्मात्तत्त्वज्ञानात्परां गतिं मुक्तिं याति प्राप्नोतीत्यर्थः ५० आगामिप्रतिबंधांतरं दर्शयति ब्रह्मलोके प्राप्तीच्छायां हृदायां सत्यां तां निरुध्य आत्मानं विचारयेत्तस्य साक्षात्कारो नैव जायत इत्यर्थः ५१ ७

५ ५ ५ ५ ५ ५ ५ ५

ननु तर्हि तस्य कदापि मुक्तिर्न स्यादित्याशंक्याह वेदांतेति वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ते ब्रह्मलोके तु परांतकाले परामृतात् परिमुच्यंति सर्वे ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृतात्मानः प्रविशंति परं पदमित्यादि शास्त्रवशात् ब्रह्मलोकप्राप्त्यनंतरं तत्त्वसाक्षात्कारस्य ब्रह्मणा सह मुक्तिर्भविष्यतीत्यर्थः ५२ एवं तत्त्वविचारे क्रियमाणे प्रतिबंधवशाद्ब्रह्मसाक्षात्कारो न जायत इत्यभिधाय तीव्रपापिनां सोपि विचारो दुर्लभ इत्याह केषामिति तत्र प्रमाणमाह श्रवणायेति यः प

वेदांतविज्ञानसुनिश्चितार्था इति शास्त्रतः ब्रह्मलोके स कल्पांते ब्रह्मणा सह मुच्यते ५२

केषांचित्स विचारोपि कर्मणा प्रतिबध्यते श्रवणायापि बहुभिर्यो न लभ्य इति श्रुतेः ५३

अत्यंतबुद्धिमांद्याद्वा सामग्र्या वाप्यसंभवात् यो विचारं न लभते ब्रह्मोपासीत सोनिशं ५४

निर्गुणब्रह्मतत्त्वस्य न ह्युपास्तेरसंभवः सगुणब्रह्मणीवात्र प्रत्ययावृत्तिसंभवात् ५५

अवाङ्मनसगम्यं तन्नोपास्यमिति चेत्तदा अवाङ्मनसगम्यस्य वेदनं न च संभवेत् ५६

परमात्मा बहुभिः पुरुषैः श्रवणायापि श्रोतुमपि न लभ्यः दुर्लभ इत्यर्थः ५३ एतावता सति प्रतिबंधे न तत्त्वसाक्षात्कारस्तत्साधनभूतो विचारश्च न संभवतीत्यभिधाय इदानीं विचारासमर्थेन पुरुषार्थार्थिना किं कर्तव्यमित्यपेक्षायां विचाराक्षमस्य ब्रह्मोपासनं कर्तव्यमिति वक्तुं प्राक् प्रतिज्ञातं तदुपपादयति अत्यंतेति सामग्र्यसंभवो नाम तदुपदेष्टुर्गुरोरभावः अथवा तस्य देशकालादेर्वा असंभवस्तस्मादित्यर्थः ५४ ननु निर्गुणब्रह्मतत्त्वस्य गुणरहितत्वात्तदुपासनं न घटत इत्याशंक्योपासनस्य प्रत्ययावृत्तिरूपत्वात् सगुणब्रह्मणीव निर्गुणेपि तत्संभवतीत्याह निर्गुणेति ५५ ननु निर्गुणस्य ब्रह्मणो वाङ्मनोगोचरत्वाभावान्नोपास्यत्वमित्याशंक्य वेदनपक्षेप्यसंभवः समान इत्याह अवाङ्मनस इति ५६

195/1938

पं·र· ८

ननुब्रह्मावाङ्मनसगोचरमित्येवंज्ञातुंशक्यंइत्याशंक्यएवमेवोपासितुमपिशक्यमित्याह वागादीति
५७ ब्रह्मणउपास्यत्वेसगुणत्वंप्रसज्येतेत्याशंक्यवेद्यत्वेपितत्सगुणत्वंस्यादित्याह सगुणत्वमिति त
त्सगुणत्वमित्यर्थः ननुलक्षणाद्दत्याश्रयणाभावेद्यत्वेसगुणत्वप्रसंगइत्याशंक्यउपासनमपितथैवक्रि
यतामित्याह वेद्यंचेदिति ५८ ननुब्रह्मणउपास्यत्वंश्रुत्यानिषिध्यतेइतिशंकते ब्रह्मविद्धीति यन्मन
सानमनुतेयेनाहुर्मनोमतंतदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासतइतिश्रुतिरुपास्यब्रह्मत्वंनिषेधतीत्यर्थः

वागाद्यगोचराकारमित्येवंयदिवेत्त्यसौ वागाद्यगोचराकारमित्युपासीतनोकुतः ५७
सगुणत्वमुपास्यत्वाद्यदिवेद्यत्वतोपितत् वेद्यंचेल्लक्षणावृत्त्यालक्षणंसमुपास्यतां ५८
ब्रह्मविद्धितदेवत्वंनत्विदंयदुपासते इतिश्रुतेरुपास्यत्वंनिषिद्धंब्रह्मणोपियत् ५९
विदितादन्यदेवेतिश्रुतेर्वेद्यत्वमस्यन यथाश्रुत्यैववेद्यंचेत्तथाश्रुत्याप्युपास्यतां ६०
अवास्तवीवेद्यताचेदुपास्यत्वंतथानकिं इतिवाितिवेद्यताचेउपास्यतेपितत्समं ६१

त्वंपदवाच्यनसगम्यंतदेवब्रह्मविद्धीदमिति यत्पासतेपुरुषास्तत्रविश्वीतियोजना ५९ उपास्यत्वव
द्वेद्यत्वस्यापितन्निषेधःसमानइत्याह विदितादिति अन्यदेवतद्विदितादथोऽविदितादधीति ब्रह्मणोवे
द्यत्वमपिनिवारयतीत्यर्थः विदितात्ज्ञातादित्यर्थः विदिताविदिताभ्यामन्यत्ब्रह्मेतिश्रुतिःप्रतिपादयं ८
तीतिचेत्तर्हितथैवतज्ज्ञानीयादित्याशंक्योपासनेप्येतत्समानमित्यत आह यथेति ६० ननुवेद्यत्वंब्रह्म
णोवास्तवंनभवतीतिआशंक्योपास्यत्वमपितथेत्याह अवास्तवीति ननुवेदनपक्षेदन्तेब्रह्माकारत्वमस्ति
नोपासनेइत्याशंक्यशब्दजन्यतदाकारत्वमुभयत्रसमानमित्याह वृत्तीति ६१ ॥ ५ ॥

युक्तिश्चन्यद्उपास्त्यंभंस्तुत्वस्येपिसमानइत्याह कालइति ननुनिर्गुणोपासनेकासुश्रुतिषुउपलभ्यमानत्वान्नैव
मित्याह मानाभावइति ६२ बह्वश्रुतिषुदर्शनादित्युक्तमर्थंविवृणोति उत्तरेति तापनीयोपनिषदितावदेवाहवैप्रजा
पतिमब्रुवन्नणोरणीयांसमिममात्मानमोकारंव्याचक्ष्वेत्यादिनाबहुधानिर्गुणोपासनमभिधीयते शैव्यप्रश्नप्र
श्नोपनिषदियंचमप्रश्नेयःपुनरेतंत्रिमात्रेणोमित्यनेनैवाक्षरेणपरंपुरुषमभिध्यायीतेति काठकेकठवल्ल्यांसर्वे
वेदायत्पदमामनंतीत्युपक्रम्यएतदेवाक्षरंब्रह्मएतदालंबनंश्रेष्ठमित्यादिनाप्रणवोपासनमुच्यते मांडूक्योपनिष

कालेभक्तिरुपास्तीचेत्तकस्तेदेयस्तदीरय मानाभावोनवाच्योस्यांबहुश्रुतिषुदर्शनात् ६२
उत्तरस्मिंस्तापनीयेशैव्यप्रश्नेथकाठके मांडूक्यादौचसर्वत्रनिर्गुणोपास्तिरीरिता राम् ६३
अनुष्ठानप्रकारोस्याःपंचीकरणईरितः ज्ञानसाधनमेतत्स्यान्नेतलकेनात्रवारितं श्रीगोविंद ६४
नानुतिष्ठतिकोप्येतदितिचेन्मानुतिष्ठतु पुरुषस्यापराधेनकिमुपास्तिःप्रदुष्यति रामराम ६५

दिओमित्येतदक्षरमिदंसर्वमित्यादिनाबहुधाप्रपानात्तुरीयोपासनमेवविधीयतइत्यर्थः आदिशब्देनतैत्ति
रीयमुंडकादयोगृह्यंते ६३ ननुनिर्गुणोपासनंकथमनुष्ठेयमित्यत आह अनुष्ठानेति नन्वेतदुपासनंज्ञा
नसाधनमेवनमुक्तिसाधनमित्याशंक्य ब्रह्मतत्त्वोपास्यापिमुच्यत इति वदतामस्माकमनुकूलमित्या
ह ज्ञानसाधनमिति ६४ ॥ ५ ५ ५ ५ ॥
ननुसगुणोपासनमेवसर्वैरनुष्ठीयतेननिर्गुणोपासनमिति आशंक्यतस्यप्रमाणसिद्धस्यापलापोनयुक्त
इत्याहनानुतिष्ठतीति ६५ ५ ५ ५ ५ ॥

197
1938

प्रमाणसिद्धस्यानुष्ठानाभावेनापरित्याज्यत्वे दृष्टांतमाह इतइति अयमभिप्रायः यथा सगुणोपासनेभ्यः का
लांतरभाविफलेभ्यो वश्यादिकारिमंत्रेषु ऐहिकफलप्रदत्वमतिशयं बुध्वा मूढा नाम मन्यत्र जपादौ प्रवृत्तावपि वि
वेकिभिः सगुणोपासनं न परित्यज्यते यथा वानीयमानुष्ठानापेक्षेभ्यस्तेभ्योपि मंत्रेभ्यः कृष्यादावतिशयं नि
श्चयं मत्वा मूढतराणां तत्र प्रवृत्तावपि तन्मंत्रानुष्ठानं न परित्यज्यते तथा सांसारिकफलप्रदानां निर्गुणोपासनानु
ष्ठानाभावेपि न मुमुक्षुभिर्निर्गुणोपासनं त्यज्यत इति ६६ एवं प्रासंगिकं परिसमाप्य प्रकृतमनुसरति निश्चित्ये

इतोप्यतिशयं मत्वा मंत्रान्वश्यादिकारिणः मूढा जपंतु तेभ्योतिमूढा कृषिमुपासतां ६६
निश्चं तु मुख्याः प्रकृता निर्गुणोपास्तिरीर्यते विधेक्यात्सर्वशाखास्थानगुणानत्रोपसंहरेत् ६७
आनंदादेर्विधेयस्य गुणसंघस्य संहृतिः आनंदादयइत्यस्मिन्सूत्रे व्यासेन वर्णिता ६८ राम्

ति सर्ववेदांतप्रत्ययं चोदनाद्यविशेषादित्युक्तन्यायेन निर्गुणोपासनस्यैकत्वात् ताकृताकृशाखासुश्रुतानु
पास्यगुणानेकत्रोपसंहृत्योपासनं कर्तव्यमित्याह विधेति ६७ ते च गुणा द्विप्रकाराः विधेया निषेध्याश्चेति
तत्रानंदो ब्रह्मविज्ञानमानंदं ब्रह्म नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरंजनो विभुरद्वय आनंदः परः प्रत्यगेकरस
इत्यादयो ये विधेयगुणास्तेषामुपसंहार आनंदादयः प्रधानस्येत्यस्मिन्नधिकरणे भिहित इत्याह आनंदादे १
रिति ६८ ॥ ७ ७ ७ ७ ७ ७

199
1938

अक्षरस्य ब्रह्मणो धीर्येभ्यस्तादृशानां स्थूलादि निषेधानामवरोधोन्यत्राप्युपसंहारः प्रपंचमात्रनिषेधेन ब्रह्म
प्रतिपादनस्य सर्वशाखासु समानत्वात् तस्य चाक्षरस्य प्रतिपाद्यतया सर्वत्र भावात् यथा जामदग्न्ये अहीने पुरो
डाशीनीषूपसत्सु चोदितासु पुरोडाशप्रदानमंत्राणामग्नेर्वेहोत्रं वेरध्वरमित्येवमादीनामुत्पन्नवेदोत्पन्नानामध्व
र्युभिः संबंधो भवति अध्वर्युकर्तृकत्वात् पुरोडाशप्रदानस्य प्रधानतंत्रत्वात् अंगानामेवमिहाप्यक्षरतंत्र
त्वात् तद्विशेषाणां यत्र क्वचिदुत्पन्नानामक्षरेण सर्वत्र संबंधः तदुक्तं प्रथमे कांडे गुणमुख्यव्यतिक्रमे

अस्थूलादेर्निषेध्यस्य गुणसंघस्य संहृतिः तथा व्यासेन सूत्रेस्मिन्नुक्ताक्षरधियां त्विति
६९ निर्गुणब्रह्मतत्त्वस्य विद्यायां गुणसंहृतिः न युज्यते सुपालंभो व्यासं प्रत्येव मां न तु ७०
हिरण्यश्मश्रुसूर्यादिमूर्तीनामनुदाहृतेः अविरुद्धं निर्गुणत्वमिति चेनुष्यतां त्वया ७१

तत्तदर्थत्वान्मुख्येन वेदसंयोग इत्यत्र येनाक्षरं स्थूलमनण्वह्रस्वं यत्तदद्रेश्यमग्राह्यमशब्दमस्पर्शमरूपमव्यय
मित्यादयो निषेध्यगुणास्तत्र तत्र श्रुतास्तेषामुपसंहारोक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपस
दवत्तदुक्तमित्यस्मिन्नधिकरणेभिहित इत्याह अस्थूलादेरिति ६९ ननु निर्गुणब्रह्मविद्यायां न गुणोपसंहा
र एव युज्यते निर्गुणविद्यात्वविरोधादित्याशंक्य सूत्रकारेणैवमभिहितस्योपसंहारस्यास्माभिरभिधीयमान
त्वात् अस्मान्प्रतीदं चोद्यमनुचितमित्याह निर्गुणेति ७० हिरण्यश्मश्रुत्वादिगुणविशिष्टमूर्तीनां अनभिधाना
दिदं निर्गुणोपासनमेवेति चेत् तर्हि न विरोध इत्याह हिरण्यश्मश्रु इति हिरण्यश्मश्रुसूर्यादिमूर्तीनां हिरण्यम
यानि श्मश्रूणि यस्यासौ हिरण्यश्मश्रुः तथाविधः सूर्यो हिरण्यश्मश्रुसूर्यः आदित्यपाले हिरण्यश्मश्रुसूर्यादय
स्तेषां मूर्तयो हिरण्यश्मश्रुसूर्यादिमूर्तयस्तासामिति विग्रहः ७१ ॥ ॥ ॥

पं·र·
१०

नन्वानंदादीनामस्थूलादीनांच गुणानामुपास्यतत्वेंतः प्रवेशाभावात्कुणविशिष्टत्वेन कथमुपास्यत्वमित्या
शंक्य तेषांतत्वांतः प्रवेशाभावेपि तेषां लक्षकत्वसंभावात्तैर्लक्षितं ब्रह्मोपास्यमित्याह गुणानामिति ७२ त
थोपासनप्रकारमेव दर्शयति आनंदादिरिति अत्रास्मच्छ्रुतिषु यो अखंडैकरसः आत्मा आनंदादिभिश्च
गुणैर्लक्षितः सोहमस्मीत्येवमुपासते मुमुक्षव इति शेषः ७३ नन्वेवं सति विद्योपासनयोः कुतो भेद इत्या
शंक्य वस्तुतंत्र कर्तृतंत्रत्वाभ्यां भेद इत्याह बोध इति ७४ वेलक्षण्यांतरसिद्धये बोधस्य हेत्वादिकं दर्शय

गुणानां लक्षकत्वेन न तत्वेंतः प्रवेशनं इति चेदस्त्वेवमेव ब्रह्मतत्वमुपास्यतां ७२ आनंदादि
भिरस्थूलादिभिश्चात्मात्र उक्षितः अखंडैकरसः सोहमस्मीत्येवमुपासते ७३ बोधोपास्त्यो
र्विशेषः क इति चेदुच्यते शृणु वस्तुतंत्रो भवेद्बोधः कर्तृतंत्रमुपासनं ७४ विचाराज्जायते बो
धोऽनिच्छा यं न निवर्तयेत् सोत्पत्तिमात्रात्संसारे दहत्यखिलसत्यतां ७५ तावता कृतकृत्यः
सन्नित्यतृप्तिमुपागतः जीवन्मुक्तिमनुप्राप्य प्रारब्धक्षयमीक्षते ७६

ति विचाराज्जायत इत्यादिना श्लोकद्वयेन विचाराद्वस्तुतत्वविचाराद्बोधो जायते किंच विचाराज्जायमानं
यं बोधमनिच्छा बोधो माभूदित्येवंरूपा न निवर्तयेन्न निवारयेत् उत्पद्यमानश्च बोधः स्वजन्ममात्रात्सं
सारेखिलस्य प्रपंचस्य सत्यतां दहति नाशयति ७५ तावतात्मज्ञानोत्पत्तिमात्रेणे निरतिशयं सुखं प्रा १०
प्नोतीत्यर्थः ७६ ॥७॥ ॥७॥ ॥७॥ ॥७॥

201
1938

उपासनायाश्च बोधाद्वैलक्षण्यांतरसिद्धये तद्दर्शयति आप्तेति आप्तस्य गुरोरुपदेशमुपास्यस्वरूपप्रतिपादकवा
क्यजातं विश्वस्य विश्वासं कृत्वाऽविचारयन्नुपास्यतत्वं प्रत्ययैरन्यैर्विजातीयघटादिविषयैरनंतरितद्वृत्तिभिरव्य
वहितवृत्तिभिश्चिंतयेदिति ७७ कियत्कालं चिंतयेदित्याशंक्याह यावदिति ७८ उपासकस्य तद्रूपत्वाभिमान
मुदाहरणप्रदर्शनेन स्पष्टीकरोति ब्रह्मचारीति कश्चित्संवर्गत्वगुणविशिष्टप्राणोपासको ब्रह्मचारी भिक्षाहर
णार्थमागत्याभिप्रतारि नाम्नो राज्ञः पुरतो महात्मानश्चतुरो देव एकः कः सो जग्गार भुवनस्य गोपा तं कापेय नाभि

आप्तोपदेशं विश्वस्य श्रद्धालुरविचारयन् चिंतयेत्प्रत्ययैरन्यैरनंतरितवृत्तिभिः ७७ यावच्चिं
त्यस्वरूपत्वाभिमानः स्वस्य जायते तावद्विचिंत्य पश्चाच्च तथैवामृति धारयेत् ७८ ब्रह्मचारी
भिक्षमाणो युतः संवर्गविद्यया संवर्गरूपतां चित्ते धारयित्वाह्यभिक्षत ७९ पुरुषस्येच्छया
कर्तुमकर्तुं कर्तुमन्यथा शक्योपास्तिरतो नित्यं कुर्यात्प्रत्ययसंततिं ८० वेदाध्यायी ह्यप्रम
तोऽधीते स्वप्नेपि वासितः जपितानुजपत्येव तथाध्याता पि वासयेत् ८१ कृत्स्न॰ ॥

पश्यंति मर्त्याः अभिप्रतारिन् बहुधा वसंतमिति मंत्रेण स्वात्मनः संवर्गरूपत्वं चित्ते धृतं प्रकटीकृतवानि
ति छांदोग्ये श्रूयत इत्यर्थः ७९ आमृति धारणे निमित्तं दर्शयन्ननिच्छा यन्न निवर्तयेदित्युक्ताद्बोधधर्माद्वैल
क्षण्यमाह पुरुषस्येति उपास्तिः पुरुषस्योपासकस्येच्छया कर्तुमन्यथा वा प्रकारांतरेण वा कर्तुं शक्या अतः
पुरुषस्येच्छाधीनत्वादुपासनं सर्वदा कुर्यादित्यर्थः ८० एवं सदा चिंतने किं भवतीत्यत आह वेदाध्यायीति
अप्रमत्तो वेदाध्यायी सदाध्ययनशीलः जपिता सदा जपशीलो वा वासितः दृढवासनया स्वप्नादिष्वध्यय
नं जपं वा करोति एवमुपासकोपि वासनादार्ढ्यात् स्वप्नादावपि ध्यायतीत्यर्थः ८१ ॥ श्रीसांब॰ ॥

पं·द· स्वप्नादावपिध्यानानुवर्तनेकारणमाह विरोधीति वासनावेशात्संस्कारपाटवात् भावनां ध्यानं ८२ न
९९ नु प्रारब्धकर्मवशाद्विषयाननुभवतः कथं नैरंतर्येण भावनासिद्धिरित्याशंक्यास्थातिशयेसति विषयव्य
सनिवद्भावनासिद्धिः स्यादित्याह भुंजान इति ८३ दृष्टांतं विवृणोति परव्यसनिनीनारीति ८४ परसंगा
स्वादनेगृहकृत्यविच्छेदः स्यादित्याशंक्याह परसंगमिति ८५ आपातेनैव वर्तत इत्युक्तमर्थं विवृणोति गृह

विरोधिप्रत्ययं सत्कान्नैरंतर्येण भावयन् लभते वासनावेशात् स्वप्नादावपि भावनां ८२ भुंजानो
पि निजारब्धमास्थातिशयतोनिशं ध्यातुं शक्तो न संदेहो विषयव्यसनी यथा ८३ परव्यसनि
नीनारी व्यग्रापि गृहकर्मणि तदेवास्वादयत्यंतः परसंगरसायनं ८४ परसंगं स्वादयंत्या अपि
नो गृहकर्म तत् कुंठीभवेदपि तेन दापातेनैव वर्तते ८५ गृहकृत्यव्यसनिनी यथा सम्यक्क
रोति तत् परव्यसनिनी तद्वत्करोत्येव सर्वथा ८६ एवं ध्यानैकनिष्ठोपि लेशाल्लौकिकमा
चरेत् तत्त्ववित्त्वविरोधित्वाल्लौकिकं सम्यगाचरेत् ८७ मायामयः प्रपंचोयमात्मा चैतन्यरूप
धृक् इति बोधे विरोधः को लौकिकव्यवहारिणः ८८ अपेक्षते व्यवहृतिर्न प्रपंचस्य वस्तु
तां नत्त्वविद्योपमर्दाति व्यवहारोस्य नो कुतः ८९ मनोवाक्कायतद्बाह्यपदार्थाः साधना
नि तान् तत्त्वविन्नोपमर्दाति व्यवहारोस्य नो कुतः ९०

कृत्येति ८५ दार्ष्टांतिके योजयति एवं ध्यानेति ननु तत्त्वविदपि लौकिकव्यवहारं किं लेशेनाचरति किं वा सम्यगि ९९
ति विषयव्यवहारस्य तत्त्वज्ञानाविरोधित्वात् सम्यगेवाचरतीत्याह तत्त्वविदिति ८७ अविरुद्धत्वमेव दर्श
यति मायामय इति ८८ विरोधाभावमेव प्रपंचयति अपेक्षत इति ८९ कानि तानि व्यवहारसाधनानी
त्यत आह मनो इति बाह्याः पदार्थाः गृहक्षेत्रादयस्तान् मन आदीन् तत्त्वज्ञानी न निवारयति अतोस्य ज्ञानिनो
व्यवहारः कुतो न भवति भवत्येवेत्यर्थः ९०

203
1956

ननु विषयानुपमर्दनेपि तत्त्वविदाचित्तोपमर्दनं कार्यमित्याशंक्य तथाकरणे तत्त्ववित्त्वं न स्यादित्याह उपमर्द्ना
तीति ननु तत्त्वविदाचित्तं नोपमृद्यत इत्येतत् कुतः दृष्टमित्याशंक्याह न बुद्धिमिति घटतत्त्वस्य वेदिता ज्ञाता बुद्धिम
र्दयन् पीडयन् नैकाग्र्यं कुर्वन् पुरुषो न दृष्टो नोपलब्ध इत्यर्थः ९१ ननु घटस्य स्थूलत्वेन स्पष्टत्वात्तद्दर्शने चित्तपीडनं
नापेक्ष्यते आत्मनस्तु न तथात्वात् तज्ज्ञाने तदपेक्ष्यत इत्याशंक्य तस्य स्वप्रकाशत्वेन घटादपि स्पष्टतरत्वाच्चित्तनिरो
धनं नैवापेक्ष्यत इत्याह सकृदिति ९२ ननु आत्मनः स्वप्रकाशत्वेपि न श्वरया बुद्ध्या तदेव तत्त्वज्ञानं स्यात

उपमर्दाति चित्तं चेद्ध्याता सौ न तु तत्त्ववित् न बुद्धिं मर्दयन् दृष्टो घटतत्त्वस्य वेदिता ९१
सकृत्प्रत्ययमात्रेण घटश्चेद्भासते तदा स्वप्रकाशोयमात्मा किं घटवच्च न भासते ९२
स्वप्रकाशतया किं ते तद्बुद्धिस्तत्त्ववेदनं बुद्धिश्च क्षणनाश्येति चोद्यं तुल्यं घटादिषु ९३
घटादौ निश्चिते बुद्धिर्नश्यत्येव यदा घटः इष्टो नेतुं तदा शक्य इति चेत् सममात्मनि ९४
निश्चित्य सकृदात्मानं यदापेक्षा तदैव तं वक्तुं मंतुं तथा ध्यातुं शक्तोत्येव हि तत्त्ववित् ९५
उपासक इव ध्यायन् लौकिकं विस्मरेद्यदि विस्मरत्येव सा ध्यानाद्विस्मृतिर्न तु वेदनात् ९६

त्याश्च क्षणिकत्वेन अत्मा णि पुनः पुनरवस्थानमपेक्षत इत्याशंक्येदं चोद्यं घटादिष्वपि समानमित्याह स्वप्रका
शतयेति ९३ घटादिज्ञानस्य क्षणिकत्वेपि सकृदात्मानं यदा निश्चितस्य घटस्य सर्वदा व्यवहर्तुं शक्यत्वात्
त्रचितस्थैर्यसंपादनमप्रयोजकमित्याशंक्येदमात्मन्यपि समानमित्याह घटादाविति ९४ सममात्मनीत्यु
क्तमर्थं विवृणोति निश्चित्येति ९५ ननु तत्त्वविदप्युपासकवदात्मानुसंधानवशाज्जगदनुसंधानरहि
तो दृश्यत इत्याशंक्य सोनुसंधानाभावो ध्यानप्रयुक्तो न वेदनप्रयुक्त इत्याह उपासक इति ९६ ताम्

पं॰र॰ १२

ननुतत्वविदामपिमुक्तिसिद्धयेप्रत्यग्ध्यानंकर्तव्यमित्याशंक्यज्ञानादेवतुकैवल्यंप्राप्यतेयेनमुच्यते तमेवविदित्वातिमृत्युमेतिनान्यःपंथाविद्यतेयनायज्ञात्वादेवंमुच्यतेसर्वपापैरित्यादिश्रुतस्तस्यसद्भावान्नमोक्षायध्यानंकर्तव्यमित्याह ध्यानमिति ९७ तत्वविदोध्यानानभ्युपगमेतिप्रसंगःस्यादित्याशंक्यप्रसंगस्यदुर्निरूपत्वान्नैवमितिपरिहरति तस्यतदावहिःप्रवृत्तिःस्यात् इत्याशंक्याबाधकत्वात्प्रवृत्तेःसाभ्युपेयतेत्याह तत्वविदिति ९८ बहिःप्रवृत्त्यभ्युपगमेतिप्रसंगःस्यादित्याशंक्यप्रसंगस्यदुर्निरूपत्वान्नैवमितिपरिहरति

ध्यानंत्वैच्छिकमेतस्यवेदनान्मुक्तिसिद्धितः ज्ञानादेवतुकैवल्यमितिशास्त्रेषुडिंडिमः ९७
तत्वविद्यदिनध्यायेत् प्रवर्तेततदाबहिः प्रवर्ततांसुखेनायंकोबाधस्यप्रवर्तते ९८
अतिप्रसंगइतिचेत्प्रसंगंतावदीरय प्रसंगोविधिशास्त्रंचेन्नतत्तत्वविदंप्रति ९९
वर्णाश्रमवयोवस्थाभिमानोयस्यविद्यते तस्यैवचनिषेधाश्चविधयःसकलाअपि १००
वर्णाश्रमादयोदेहेमाययापरिकल्पिताः नात्मनोबोधरूपस्यसेवंतस्यविनिश्चयः १

अतिप्रसंगइति नप्रसंगोदुर्निरूप्योविधिशास्त्रस्यप्रसंगशब्देनविवक्षितत्वात् इतिचेन्नतस्याज्ञानिविषयत्वेनतत्वविद्विषयत्वाभावादित्याह प्रसंगइति विधिशास्त्रमित्युपलक्षणंनिषेधशास्त्रस्यापि ९९ विधिशास्त्रस्याविद्वद्विषयत्वमेवदर्शयति वर्णेति १०० ननुतत्वविदोपिदेहधारित्वेनवर्णाश्रमाद्यभिमानित्वमस्तीत्याशंक्याह वर्णाश्रमेति १ ॥ ५ ५ ५ ५ १२

ननुतत्वविन्निश्चयस्तावतिष्ठतुशास्त्रंतुतस्यकर्तव्यंप्रतिपादयतीत्याशंक्यातदर्पितस्यकर्तव्याभावमेवबोधयतीत्याह समाधिमिति योहृदयेनतुध्याअस्तसर्वास्थः अस्ताः परित्यक्ताः अशेषाः आसक्तिविशेषायस्यसतथाविधः अतएवोत्तमाशयः उत्तमः आशयोअभिप्रायोनिर्मलंज्ञानंयस्यसतथोक्तः समुक्तएवअतःसमाधिमथकर्माणीत्यन्वयः २ विदुषःकर्तव्यंनास्तीत्यत्रवचनांतरमुदाहरति नैष्कर्म्येणेति नैष्कर्म्यंकर्मराहित्यंतेनकर्मत्यागेनेत्यर्थःसमाधानंसमाधिःजप्यंजपः ३ ननुविदुषापिवासनानिरासायध्यानंकर्तव्यमित्याशंक्यसम्यक्ज्ञानिनोवासने

समाधिमथकर्माणिमाकरोतुकरोतुवा हृदयेनास्तसर्वास्थोमुक्तएवोत्तमाशयः २ नैष्कर्म्येण
नतस्यार्थस्तस्यार्थोस्तिनकर्मभिः नसमाधानजप्याभ्यांयस्यनिर्वासनंमनः ३ आत्मासंगस्त
तोन्यत्स्यादिंद्रजालंहिमायिकं इत्यचंचलनिर्णीतेकुतोमनसिवासना ४ एवंनास्तिप्रसंगो
पिकुतोस्यातिप्रसंजनं प्रसंगोयस्यतस्यैवशंक्यतेतातिप्रसंजनं ५ विध्यभावान्नबालस्यह
प्यतेतिप्रसंजनं स्यात्कुतोतिप्रसंगोस्यविध्यभावेसमेसति ६ नकिंचिद्वेत्तिबालश्चेत्
सर्ववेत्त्येवतत्ववित् अल्पज्ञस्यैवविधयःसर्वेस्युर्नान्ययोर्द्वयो ७ श्रीराधावल्लभ ॥

वनास्तीत्याह आत्मेति ४ भवत्वेवंप्रकृतेकिमायातमित्यतआह एवमिति कस्यतर्ह्यतिप्रसंगइत्यतआह प्रसंगइति ५ एवंकुत्रदृष्टमित्यतआह विध्यभावादिति दार्ष्टांतिके योजयति स्यादिति ६ बालस्यविध्यभावेप्रयोजकमज्ञत्वमत्रतुविदुषइत्याशंक्यतस्याज्ञत्वाभावेपिविध्यभावेप्रयोजकंसर्वज्ञत्वमस्तीत्याह नकिंचिदिति नाहिविध्यधिकारःकस्येत्याशंक्याह अल्पज्ञस्येति ७ ५ ५ ५ ५ ५

205
195

पं॰ द॰ ननु आसादिवच्छापानुग्रहसामर्थ्यं यस्य स एव तत्त्वविन्नान्य इति शंकते शापेति परिहरति तत्रेति तत्र हेतु

१२ माह शापादिसामर्थ्यमिति ८ ननु आसादीनां तत्त्वविदामपि शापादिसामर्थ्यं दृश्यत इत्याशंक्य तेषां न तत्त्व

तत्त्वज्ञानफलं अपितु तपः फलमित्याह आसादेरिति ननु तर्हि तपसा अस्तु विज्ञितास त्वेति श्रुतेस्तपोरहितस्य

तत्त्वज्ञानमपि न घटत इत्याशंक्य शापादिकारणादन्यस्य तपसः सत्त्वान्नैवमित्याह शापेति ९ तर्हि तेषां आसा

दीनां तत्त्वज्ञानित्वं शापादिकारणत्वं च कथं दृश्यत इत्याशंक्य उभयविधतपसः संभवादित्याह द्वयमिति १०

शापानुग्रहसामर्थ्यं यस्यासौ तत्त्वविद्यदि तच्छापादिसामर्थ्यफलं स्यात्तपसो यतः ८ आसा
देरपि सामर्थ्यं दृश्यते तपसो बलात् शापादिकारणादन्यत्तपो ज्ञानस्य कारणं ९ द्वयं यस्यास्ति
तस्यैव सामर्थ्यं ज्ञानयोरिति एकैकं तु तपः कुर्वन्नेकैकं लभते फलं १० सामर्थ्यहीनो निंद्यश्चे
द्यतिर्विधिविवर्जितः निंद्यते यत्नतोप्यन्यैरनिशं भोगलंपटैः ११ भिक्षावस्त्रादि रक्षेयुर्य्येते भो
गलुब्धये अहो यतित्वमेतेषां वैराग्यभरमंथरं १२ वर्णाश्रमपराः मूढा निंदंति सुख्यते यदि दे
हात्ममतयो बुद्धं निंदंत्याश्रमभागिनः १३॥

ननु यः शापादिसामर्थ्यरहितस्तस्य विध्यभावेपि विहितानुष्ठानाभिर्निंद्यत्वं स्यादित्याशंक्य तेषामपि विषयत्वं

परैर्निंद्यत्वं स्यादित्याह सामर्थ्यहीन इति ११ एतेपि भोगलुब्धत्वं विषयासंपादयेयुरित्याशंक्य तदा तेषां

यतित्वमेव हीयेत इत्यभिप्रायेणोपहसति भिक्षेति १२ विषयलंपटैः पामरैश्च क्रियमाणया निंदया क्रिया १३

पराणां विशिष्टानां हानिनास्तीत्युच्यते चेत्तर्हि देहाभिमानिभिः क्रियापरैः क्रियमाणया निंदया तत्त्वविदोपि

न हानिरित्याह वर्णाश्रमेति १३ ७ ॥ ७ ॥ ७ ॥ ॥

प्रासंगिकं परिसमाप्य प्रकृतमनुसरति तदित्थमिति तत् तस्मात्कारणादित्थमुक्तेन प्रकारेण तत्त्वविज्ञाने सति

साधनानुमर्दनाल्लौकिकव्यवहारसाधनानां मनआदीनामविलापनाल्लौकिकं राज्यादिराज्यपरिपालनादिकर्मज्ञा

ज्ञानिनासम्यगाचरितुं शक्यमित्याह १४ ननु तत्त्वविदः प्रपंचमिथ्यात्वज्ञानेन तत्त्वैर्थ्यैव नो हीयादिति चेत्तर्हि स्व

कर्मानुसारेण वर्तमानमित्याह मिथ्यात्वेति १५ इदानीमुपासकस्यातो वैषम्यं दर्शयति उपासक इति तत्रोप

पत्तिमाह यत इति यतः कारणात्तस्य ब्रह्मत्वं ध्यानेनैव कृतं न प्रमाणेन प्रमितमतो ध्यायिना सदा ध्यानं कर्तव्यमि

तदित्थं तत्त्वविज्ञाने साधनानुपमर्दनात् ज्ञानिनाचरितुं शक्यं सम्यग्राज्यादि लौकिकं १४ मि
थ्यात्वबुद्ध्या तत्रेच्छा नास्तिचेत्तर्हि मास्तु तत् ध्यायन्वाथ व्यवहरन्यथारब्धं वसत्वयं १५ उपासक
स्तु सततं ध्यायन्नेव वसेत् यतः ध्यानेनैव कृतं तस्य ब्रह्मत्वं विष्णुतादिवत् १६ ध्यानोपादानकं य
त्तध्यानाभावे विलीयते वास्तवी ब्रह्मता नैव ज्ञानाभावे विलीयते १७ ततोभिज्ञापकं ज्ञानं न नि
त्यं जनयत्यरः ज्ञापकाभावमात्रेण नहि सत्यं विलीयते १८

त्यर्थः तत्र दृष्टांतः विष्णुतादिवदिति यथा स्वस्मिन् ध्यानेन संपादितस्य विष्णुत्वादेः पारमार्थिकत्वं नास्ति तद्वदि

त्यर्थः १६ ध्यानसंपादितस्यापि तस्य पारमार्थिकत्वं किं न स्यादित्याशंक्य ध्यानसंपादितस्य वाध्येनुत्वादेर्ध्यानापा

येपगमदर्शनान्नैवमित्याह ध्यानेनेति ज्ञानेन प्रकाशितस्य ब्रह्मत्वस्य न तथैव लक्षण्यमाह वास्तवीति हेतुगर्भितु

गर्भितं विशेषणं यतो ब्रह्मत्वं वास्तवं अतो ज्ञापकज्ञानाभावे सति नैव विलीयते १७ वास्तवत्वादेव ज्ञानेन नैव जन्य

त इत्याह ततइति यतो ब्रह्मत्वं नित्यं ततो ज्ञानं तस्याभिज्ञापनकमेव बोधकमेव जननकमित्यर्थ तत्रोपपत्तिमति

रेकमुखेनाह ज्ञापकेति अयमभिप्रायः ब्रह्मत्वं यदि ज्ञानजन्यं स्यात्तर्हि ज्ञाननाशे स्वयं विलीयेत न च विलीयते अतो

न जन्यत इत्यर्थः १८ रामजी ॥

207/1938

पं·र·
२४

ननु शान्तिवदुपासकस्यापि ब्रह्मत्वं वास्तवमस्त्येवेति शंकते अस्त्येवेति असत्यमिदमुत्कृष्टत्वस्याभिप्रायेणाह पामराणामिति १९ पामरादीनां विद्यमानमपि तत् ब्रह्मत्वमज्ञातत्वान्न पुरुषार्थोपयोगीत्याशंक्य अज्ञातत्वेनापुरुषार्थोपयोगित्वमुपासकस्यापि समानमित्याह अज्ञानादिति ननु तर्ह्युपासनं किमर्थमभिधीयत इत्याशंक्येतरानुष्ठानेभ्यः श्रेष्ठत्वाभिप्रायेणोक्तमिति दृष्टांतपूर्वकमाह उपवासादिति २० इतरानुष्ठानात् श्रेष्ठमेव दर्शयति पामराणामिति २१ उत्तरोत्तरश्रेष्ठे कारणमाह यावदिति निर्गुणोपासनस्य सर्वश्रेष्ठे कारणमाह ब्रह्मज्ञायत इति २२

अस्त्येवोपासकस्यापि वास्तवी ब्रह्मतेति चेत् पामराणां तिरश्चां च वास्तवी ब्रह्मता न किं १९
अज्ञानादपुमर्थत्वमुभयत्रापि तत्समं उपवासाद्यथा भिक्षा वरं ध्यानं तथान्यतः २० पामराणां
व्यवहृते वरं कर्माद्यनुष्ठितिः ततोपि सगुणोपास्तिर्निर्गुणोपासनं ततः २१ यावद्विज्ञानसामी
प्यं तावच्छ्रैष्ठ्यं विवर्धते ब्रह्मज्ञानायनं साक्षान्निर्गुणोपासनं शनैः २२ यथा संवादिविभ्रांतिः फ
लकाले प्रमायते विद्यायनं तथोपास्तिर्मुक्तिकाले तिपालैकैः २३ मूर्तिध्यानस्य मंत्रादेरपिका
रणता यदि अस्तु नाम तथाप्यत्र प्रत्यासत्तिर्विशिष्यते २५ संवादिभ्रमतः पुंसः प्रवृत्तस्यान्य
मानतः प्रमेति चेत्तथोपास्तिर्मान्तरे कारणायतां २४

उक्तमर्थं दृष्टांतप्रदर्शनपूर्वकं द्रढयति यथेति २३ ननु विभ्रांतिः स्वयमेव न प्रमा भवति किंतु तया प्रवृत्तस्य संदि
यार्थसंनिकर्षात् प्रमा जायत इति शंकते संवादीति अस्तु तर्हि निर्गुणोपासनमपि निदिध्यासनरूपं सद्वाक्यजन्या
परोक्षज्ञाने कारणं भविष्यतीत्याह तथेति २४ नन्वेवं सति मूर्तिध्यानादेरपि चित्तैकाग्र्यसंपादनद्वारा अपरो २४
क्षज्ञानसाधनत्वं स्यादिति चेत् तदप्यंगीक्रियत इत्याह मूर्तीति तर्हि निर्गुणोपासने को विशेषस्तत्राह तथापीति
प्रत्यासत्तिः सामीप्यं ज्ञानं प्रतीति शेषः २५ ७

प्रत्यासत्तिप्रकारमेव दर्शयति निर्गुणेति निर्गुणोपासनं परिपक्वं भवति तदा सविकल्पकसमाधिः स्यात् ततः
सविकल्पकसमाधेर्निरोधाख्यो यस्तस्यापि निरोधे सर्वनिरोधाद्निर्बीजः समाधिरिति सूत्रोक्तलक्षणो निर्विक
ल्पकः समाधिः सोऽनायासेन लभ्यते २६ भवत्वेवं निर्विकल्पकलाभस्ततः किमित्यत आह निरोधलाभ इति
ततोपि किमित्यत आह पुनःपुनरिति अस्मिन्नसंगे वस्तुनि पुनःपुनर्वासिते भाविते सति शास्त्रान्तत्वमस्यादि
लक्षणात् तत्त्वधीस्तत्त्वज्ञानमहं ब्रह्मास्मीत्येवमाकारं जायेत उत्पद्येत २७ तत्त्वज्ञानस्वरूपमेव विशदयति नि

निर्गुणोपासनं पक्वं समाधिः स्याच्छनैस्ततः यः समाधिर्निरोधाख्यः सोनायासेन लभ्यते २६
निरोधलाभे पुंसोंतरसंगं वस्तु विशिष्यते पुनःपुनर्वासिते स्मिन् वाक्याज्जायेत तत्त्वधीः २७
निर्विकारासंगनित्यस्वप्रकाशैकपूर्णताः बुद्धौ सदिति शास्त्रोक्ता आरोहंत्यविवादतः २८
योगाभ्यासस्त्वेतदर्थोऽमृतबिंद्वादिषु श्रुतः एवं च दृष्टद्वारापि हेतुत्वादन्यतो वरं २९
उपेक्ष्य तीर्थयात्राजपादीनेव कुर्वतां पिंडं समुत्सृज्य करं लेढीति न्याय आपतेत् ३०

र्विकारेति २८ ननु निर्विकल्पकसमाधिवशादपरोक्षज्ञानमुदेतीत्यत्र किं प्रमाणमित्याशंक्यामृतबिंद्वादि
श्रुतयः प्रमाणमित्याह योगाभ्यासेति फलितमाह एवमिति एवं च सति निर्गुणोपासनस्याप्यपरोक्षज्ञा
नप्रत्यासत्तिसंभवे सति दृष्टद्वारापि निर्विकल्पकसमाधिलाभद्वारेणापि शब्दाद्दृष्टद्वारापि हेतुत्वात् ज्ञान
साधनत्वादन्यतः सगुणोपासनादिभ्यो वरं श्रेष्ठमित्यर्थः २९ एवं निर्गुणोपासनस्यापरोक्षज्ञानसाधनत्वे
सिद्धे सति तत्परित्यज्यान्यत्र प्रवृत्तानां वृथाश्रमः स्यादिति लौकिकन्यायप्रदर्शनेनाह उपेक्ष्येति ३०

209
193

पं॰ र॰
९५

नन्वात्मतत्त्वविचारं परित्यज्य निर्गुणोपासनं कुर्वतामप्यर्थं न्यायः समानं इत्याशंक्यांगीकरोति उपासकानामिति
तर्हि निर्गुणोपासनं कुतः प्रतिपाद्यत इत्यत आह तस्मादिति यस्मादुक्तन्यायप्रसंगस्तस्माद्विचारासंभवे यो
गडुपासनमुक्तमित्यर्थः ३१ बहुव्याकुलचित्तानां विचारासंभवे कारणमाह बह्विति यतो विचारेण
संभवति अतो योगः कर्तव्य इत्याह योग इति मुख्यत्वे कारणमाह धीदर्पस्तेन नश्यतीति तेन योगेनय
तो धीदर्पो नश्यति अतो मुख्य इत्यर्थः ३२ एवं व्याकुलचित्तानां योगस्य मुख्यत्वमभिधाय तद्रहितानां

उपासकानामप्येवं विचारत्यागतो यदि बाढं तस्माद्विचारस्यासंभवे योग ईरितः ३१ बहुव्याकु
लचित्तानां विचारात्तत्त्वधीर्नहि योगो मुख्यस्ततस्तेषां धीदर्पस्तेन नश्यति ३२ अव्याकुलधियां
मोहमात्रेणाच्छादितात्मनां सांख्यनामा विचारः स्यात् मुख्यो सद्वृत्ति सिद्धिदः ३३ तत्कारणं सां
ख्ययोगाभिपन्नमिति हि श्रुतिः यस्तु श्रुतेर्विरुद्धः स आभासः सांख्ययोगयोः ३४ यत्सांख्यैः
प्राप्यते स्थानं तद्योगैरपि गम्यते एकं सांख्यं च योगं च यः पश्यति स पश्यति ३४ राम

नन्वात्मतत्त्वविचारं परित्यज्य तत्र प्रवृत्तानां रथाश्रमः स्यादिति तोकिकन्याय प्रदर्शनेनाह निर्गुणोपा
सनं कुर्वतामप्यर्थं न्यायः समान इत्याशंक्यांगीकरोति उपासकानामिति तर्हि निर्गुणोपासनं कुतः प्रतिपा
द्यत इत्यत आह तस्मादिति यस्मादुक्तन्यायप्रसंगस्तस्माद्विचारासंभवे योग॥ विचार एव मुख्य इत्याह अव्या
कुलेति सांख्यनामा विचारः सांख्यशास्त्रशास्त्रतत्त्वविचारो मुख्य कुत इत्यत आह सद्वृत्तीति ३३ योगसांख्ययोरुभयोरपि त
त्त्वज्ञानद्वारा मुक्तिसाधनत्वे गीतावाक्यं प्रमाणयति यत्सांख्यैरिति यः सांख्यं च योगं च फलत एकं पश्यति स ज्ञात्वार्थं सम्यक् पश्य
तीत्यर्थः ३४ न केवलं गीतावाक्यं किंतु न्यायत्वेन श्रुतिरप्यस्तीत्याह तत्कारणमिति ननु सांख्ययोगयोस्तत्त्वज्ञानसाधनत्वेनां
गीकारे तच्छास्त्र प्रतिपादितानां तत्त्वानामपि त्वाकार्यत्वं स्यादित्याह यस्त्विति आभासो बाध्यत इत्यर्थः ३५

ननूपासनं कुर्वाणस्य तत्त्वज्ञानाभावात् कथं मरणे सति मोक्षो न सिध्येदित्याशंक्याह उपासनमिति ३६ मरणा
वसरे ज्ञानान्मुक्तिलाभे प्रमाणमाह यं यं वापीति यस्मिन्स्तत्त्वे प्राणमायाति प्राणः स्तेजस्या युक्तः सहात्म
ना यथा संकल्पितं लोकं नयतीति वाक्यार्थ इत्यर्थः ३७ ननु दाहृताभ्यां श्रुतिस्मृति वाक्याभ्यामंसप्रत्ययतो भा
विजन्माभिधीयते न ज्ञानान्मुक्तिरित्याशंक्य मुख्यतस्तथाभिधानमंगीकरोति अंसप्रत्ययत इति कथं तर्हि मरण
काले ज्ञानान्मोक्षो भवतीत्यत्र ईशाक्यदयं प्रमाणत्वेनोपन्यस्तमित्याशंक्याह तथासतीति तथासति असंप्र

उपासनं नातिपक्वमिह यस्य परंत्वसः मरणे ब्रह्मलोकेवा तत्त्वं विज्ञाय मुच्यते ३५ यं यं वापि
स्मरं भावं त्यजत्यंते कलेवरं तत्तमेवैति यच्छ्रितः तेन यातीति शास्त्रतः ३७ अंसप्रत्ययतो
नूनं भाविजन्म तथा सति निर्गुणप्रत्ययोपि स्यात्सगुणोपासने यथा ३८ नित्यनिर्गुणरू
पं तन्नाममात्रेण जायते अर्थतो मोक्ष एवैष संवादी भ्रमवन्मतः ३९

त्यया भाविजन्म निश्चये सति सगुणोपासकस्य यथा मरणावसरे पूर्वाभ्यासवशात् सगुणब्रह्माकारः प्रत्ययो
जायते एवं निर्गुणोपासकस्यापि निर्गुणब्रह्मगोचरः प्रत्ययो जायते जनिष्यत इत्यर्थः ३८ ननु निर्गुणप्रत्यया
भ्यासवशाद्धि निर्गुणब्रह्मप्राप्तिरेव भवेन्न मुक्तिरित्याशंक्य ब्रह्मप्राप्तिमुक्त्योः शब्दमात्रेण भेदो नार्थत इत्याह
नित्यनिर्गुणेति तद्ब्रह्म नित्यमिति निर्गुणमिति नाममात्रेणोच्यते नामतोर्थतस्त्वेष मोक्ष एव स्वरूपावस्थितिर्मुक्ति
रित्यभिधानादिति भावः तत्र दृष्टान्तमाह संवादीति यथा संवादि भ्रमो नाममात्रेण भ्रम इत्युच्यते वस्तु तत्त्व
त्वज्ञानमेव तद्वदित्यर्थः ३९

पं·र· ननुनिर्गुणोपासनस्य मानसक्रियारूपस्य मुक्तिसाधनत्वाभिधानं विरुद्ध मित्याशंक्य तज्ज्ञानस्य ज्ञानस्य मोक्ष
१६ साधनत्वाभिधानान्न विरोध इत्याह तदिति तत्र दृष्टांतमाह अविमुक्त इति यथा अविमुक्त सगुण ब्रह्मोपास
न सामर्थ्यात् तारक ब्रह्म विद्या जायते एवं निर्गुणोपासनात् निर्गुण ब्रह्म ज्ञानं जायत इत्यर्थः ४० ननु निर्गुणोपा
पासनस्य मोक्षः फलमित्यत्र किं प्रमाण मित्याशंक्याह सोकाम सोकामो निष्काम आत्मकाम आप्तकामो न तस्य प्रा
णा उत्क्रामंत्यत्रैव समवलीयंते ब्रह्मैव सन् ब्रह्माप्येति अशरीरो निरिंद्रियो ह्यप्राणो ह्यमनाः सच्चिदानंद मात्रः स
राट् भवति य एवं वेद चिन्मयो ह्ययमोंकारश्चिन्मयमिदं सर्वं तस्मात्परमेश्वर एवैक मेव तद्भवत्येतदमृतमभय

तत्सामर्थ्याज्जायते धीर्मूलाविद्या निवर्तिका अविमुक्तोपासनेन तारक ब्रह्म बुद्धिवत् ४०
सोकामो निष्काम इति ह्यशरीरो निरिंद्रियः अभयं हीति मुक्तत्वं तापनीये फलं श्रुतं ४१
उपासनस्य सामर्थ्याद्विद्योत्पत्तिर्भवेत्ततः नान्यः पंथा इति ह्येतच्छास्त्रं नैव विरुध्यते ४२

मेतद्ब्रह्माभयति य एवं वेदेति रहस्य मित्यादि वाक्यैस्तापनीयोपनिषदि निर्गुणोपासनस्य मोक्षः फलत्वेन श्रु
त इत्यर्थः ४१ ननूपासनयापि मुक्तिः स्यात् चेत् नान्यः पंथा विद्यते ऽयनायेति श्रुति विरोध इत्याशंक्य वि
द्याव्यवधानेन मोक्ष प्रदत्वाभिधानान्न विरोध इत्याह उपासनस्येति ४२

५ ५ ५ ५ ५ ५ १६

213
1938

मरणे ब्रह्मलोके वा तत्त्वं विज्ञाय मुच्यत इत्युक्तार्थे श्रुतिं प्रमाणयति निष्काम इति तत्र सोकामो निष्काम इत्या
दि तापनीयं वाक्यं पूर्वमेवोदाहृतं १४३ इदानीं शैब्य प्रश्नोपनिषद्वाक्य मर्थतः पठति य उपास्त इति यः
पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुष मभिध्यायीत स तेजसि सूर्ये संपन्नो यथा पादोदरस्त्वचा
विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिश
यं पुरुषमीक्षत इति सकामस्य ब्रह्मलोक प्राप्तिः श्रूयत इत्यर्थः ननु शैब्य प्रश्ने सकामस्य ब्रह्मलोकं गतिरिति

निष्कामोपासनान्मुक्तिस्तापनीये समीरिता ब्रह्मलोकः सकामस्य शैब्य प्रश्ने समीरितः ४३
य उपास्ते त्रिमात्रेण ब्रह्मलोके स नीयते स एतस्माज्जीवघनात्परं पुरुषमीक्षते ४४ अप्रती
काधिकरणोक्त क्रतुन्यायई रितः ब्रह्मलोकं फलं तस्मात् सकामस्येति वर्णितं ४५ निर्गुणो
पास्ति सामर्थ्यात् तत्र तत्त्व मवेक्षते पुनरावर्तते नायं कल्पांते तु विमुच्यते ४६

नपर्नायत इत्याशंक्य तत्र तत्त्व साक्षात्कारश्च श्रूयत इत्याह स एतस्मादिति ब्रह्मलोकं गतः स उपासकः एत
स्माज्जीवघनात् जीव समष्टिरूपाद्धिरण्यगर्भात् परमुत्कृष्टं पुरुषं निरुपाधिक चैतन्य रूपं परमात्मानं ईक्षते साक्षा
त्करोति १४४ किं चाप्रतीकालंबनान्नयतीति बादरायणः उभयथा ऽदोषात्तत्क्रतुश्चेत्यत्र कामानुसारेण फल प्राप्तिर्भ
वतीति प्रतिपादितं तस्मादपि सकामस्य ब्रह्मलोक गतिरित्युक्तेत्याह अप्रतीकेति ४५ तर्हि सकामस्य तत्त्वज्ञानं
कुतो जायत इत्याशंक्याह निर्गुणेति इमं मानवमावर्तं नावर्तंते न स पुनरावर्तते न स पुनरावर्तत इति ब्रह्मणा सह ते
सर्वे इत्यादि श्रुतिस्मृतिसद्भावात्तत्र तस्य पुनः संसार प्राप्तिः किंतु मुक्तिरेवेत्याह पुनरावर्तत इति ४६ राम

पं·द·
९७

इदानीं प्रणवोपासनप्रसंगात्तद्बुद्धिस्थं तद्वैविध्यं दर्शयति प्रणवेति ४७ द्वैविध्ये प्रमाणमाह परापरेति एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेतीति उभयरूपत्वं प्रतिपादितमित्यर्थः ४८ कठवल्ल्यामपि तथोक्तमित्याह एतदालंबनमिति ४९ उक्तमर्थमुपसंहरति इह वेति ५० विचारात्तत्त्वज्ञानसंपादनासमर्थस्य निर्गुणब्रह्मध्यानेऽधिकार इत्ययमर्थ आत्मगीतायां सम्यगभिहित इत्याह अर्थोऽयमिति ५१ आत्मगीतावाक्यान्येवोदाहरति साक्षादिति १५२

प्रणवोपास्तयः प्रायो निर्गुणा एव वेदगाः क्वचित्सगुणतापुक्ता प्रणवोपासनस्य हि ४७ परापरब्रह्मरूप ॐकार उपवर्णितः पिप्पलादेन मुनिना सत्यकामाय पृच्छते ४८ एतदालंबनं ज्ञात्वा यो यदिच्छति तस्य तत् इति प्रोक्तं यमेनापि पृष्टेन नचिकेतसे ४९ इह वा मरणे वास्य ब्रह्मलोकेऽथवा भवेत् ब्रह्मसाक्षात्कृतिः सम्यगुपासीनस्य निर्गुणं ५० अर्थोऽयमात्मगीतायामपि स्पष्टमुदीरितः विचाराक्षम आत्मानमुपासीतेति संततं ५१ साक्षात्कर्तुमशक्तोऽपि चिंतयेन्मामशंकितः कालेनानुभवारूढो भवेयं फलितो ध्रुवं ५२ यथागाधनिधेर्लब्धौ नोपायः खननं विना मल्लाभेऽपि तथा स्वात्मचिंतां मुक्त्वा न चापरं ५३ देहोपलमपाकृत्य बुद्धिकुद्दालकात्पुनः खात्वा मनोभुवं भूयो गृह्णीयान्मां निधिं पुमान् ५४

ध्यानस्य सम्यग्ज्ञानोपायत्वे दृष्टांतमाह यथागाधनिधेरिति दार्ष्टांतिके योजयति मल्लाभ इति ५३ व्यतिरेकेणोक्तमर्थमन्वयमुखेनाह देहोपलमिति ५४

॥ ५९ ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

ज्ञाने समर्थस्य ध्यानेऽधिकार इत्यत्र वाक्यांतरं पठति अनुभूतेरिति ध्यानाद्धि ब्रह्मप्राप्तौ कैमुतिकन्यायमाह अपीति उपासकस्य पूर्वमविद्यमानमपि देवत्वादिकं ध्यानात्प्राप्यते किमु स्वरूपत्वेन नित्यप्राप्तं सर्वात्मकं ब्रह्म ध्यानात्प्राप्यत इति किमु वक्तव्यमित्यर्थः ५५ ब्रह्मध्यानफलस्य प्रत्यक्षसिद्धत्वादपि ध्यानं कर्तव्यमित्याह ५६

अनुभूतेरभावेऽपि ब्रह्मास्मीत्येव चिंत्यतां अप्यसत्प्राप्यते ध्यानान्नित्याप्तं ब्रह्म किं पुनः ५५
अनात्मबुद्धिशैथिल्यं फलं ध्यानाद्दिने दिने पश्यन्नपि न चेद्ध्यायेत्कोऽपरोऽस्मात्पशुर्वद ५६
देहाभिमानं विध्वस्य ध्यानादात्मानमद्वयं पश्यन्मर्त्योऽमृतो भूत्वा ह्यत्र ब्रह्म समश्नुते ५७
ध्यानदीपमिमं सम्यक् परामृशति यो नरः मुक्तसंशय एवायं ध्यायति ब्रह्म संततं ५८

॥ इति ध्यानदीपः ॥

इदानीमुपपादितमर्थं संक्षिप्य दर्शयति देहाभिमानमिति मरणशीले देहेऽहमित्यभिमानपरित्यागानुत्सयमप्रमत्तो भूत्वा अत्रास्मिन्नेव शरीरे स्वस्य निजरूपं सच्चिदानंदचिद्रूपं ब्रह्म प्राप्नोति ५७ ध्यानदीपानुसंधानफलमाह ध्यानदीपमिति ५८ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदुषा विरचितं ध्यानदीपव्याख्यानं समाप्तं १५८ श्रीजगदंबार्पणमस्तु ॥

215
1938

पु. १८

[illegible]

१८

217/193

॥ अथनाटकदीपप्रारंभः॥ गजानन प्रसन॥ प्रक. १०

पं. ८.

॥श्रीगणेशाय नमः॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ अर्थो नाटकदीपस्य मया संक्षिप्य वक्ष्यते॥१॥ चिकीर्षितस्य ग्रंथस्य निःप्रत्यूह परिपूरणाय अभिमतदेवतानत्यनुस्मरणलक्षणं मंगलमाचरन् मंदाधिकारिणामनायासेन निष्प्रपंचब्रह्मात्मैकत्वप्रतिपत्तिसिद्धये॥ अध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यते॥ शिष्याणां बोधसिध्यर्थं तत्वज्ञैः कल्पितक्रमः॥ इति न्यायमनुसृत्यात्मन्यध्यारोपं तावदाह॥ परमात्मेति॥ पूर्वं सृष्टेः॥ प्रागद्वयानंदपूर्णः सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं विज्ञानमानंदं ब्रह्म पूर्णमदः पूर्णमित्यादिश्रुतिप्रसिद्धः स्वगतादिभेदशून्यः परमानंदरूपः परिपूर्णः परमात्मा स्वमायया मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति श्रुत्युक्तया स्वनिष्ठया मायाशक्त्या स्वयमेव जगद्भूत्वा तदात्मानं स्वयमकुरुत स च त्यच्चाभवदिति श्रुतेः स्वयमेव जगदाकारतां प्राप्य॥ जीवरूपतः प्राविशत् तत्सृष्ट्वा तदेवानुप्राविशदित्यादिश्रुतेः जीवरूपेण प्रविष्टवानित्यर्थः॥१॥ ननु परमात्मन एवैकस्य सर्वशरीरेषु प्रविष्टत्वे पूज्यपूजकादिभावेन प्रयुक्त उक्तमाधमभावो विरुध्ये

परमात्माद्वयानंदपूर्णः पूर्वं स्वमायया॥ स्वयमेव जगद्भूत्वा प्राविशज्जीवरूपतः॥१॥ विष्ण्वाद्युत्तमदेहेषु प्रविष्टो देवता भवत्॥ मर्त्याद्यधमदेहेषु स्थितो भजति देवतां॥२॥ अनेकजन्मभजनात्स्वविचारं चिकीर्षति॥ विचारेण विनष्टायां मायायां शिष्यते स्वयं॥३॥ अद्वयानंदरूपस्य सद्वयत्वं सुदुःखिता॥ बंधः प्रोक्तः स्वरूपेण स्थितिर्मुक्तिरितीर्यते॥४॥

तेत्याशंक्याह विष्ण्वादीति॥ नायं स्वाभाविक उत्तमाधमभावः किंतु शरीरोपाधिनिबंधनो तो न विरोध इति भावः॥२॥ इत्थमात्मन्यध्यारोपं संक्षेपेण प्रदर्श्य तत्साधनं तदपवादं संक्षिप्य दर्शयति॥ अनेकेति॥ अनेकजन्मभजनादनेकेषु जन्मस्वनुष्ठितानां कर्मणां ब्रह्मणि समर्पणरूपात् भजनात् स्वविचारं स्वस्यात्मनो ब्रह्मरूपस्य ज्ञानसाधनं श्रवणादिकं चिकीर्षति कर्तुमिच्छति ततः स्वविचारेण विचारजनितज्ञानेन मायायां स्वस्याद्वयानंदत्वादिरूपाच्छादिकायामज्ञानाविद्यादिशब्दवाच्यायां विनष्टायां निरस्तायां सत्यां स्वयमद्वयानंदपूर्णः परमात्मैवावशिष्यते॥३॥ ननु तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते इत्यादिश्रुतिभिर्बंधनिवृत्तिलक्षणस्य मोक्षस्य ज्ञानफलत्वाभिधानात्॥ परमात्मावशेषणस्य तत्फलत्वाभिधानमनुपपन्नमित्याशंक्याह॥ अद्वयानंदेति॥ अद्वितीये ब्रह्मणि वास्तवस्य मोक्षस्य बंधस्य वा दुर्निरूपत्वाद् दुःखित्वादिभ्रम एव बंधः स्वरूपावस्थितिलक्षणा तन्निवृत्तिरेव मोक्षः॥ अतो न श्रुतिविरोध इति॥४॥ हेरंबाय नमः॥ ॥ १

ननु कर्मणैव हि संसिद्धिमास्थिता जनकादय इति॥ स्मृतेर्मोक्षस्य कर्मसाधनत्वावगमात् किमनेन विचारजनितज्ञानेनेत्यत आह॥ अविचारेति॥ विचारप्रागभावोपलक्षिताज्ञानकृतस्य बंधस्य तु विचारजन्यज्ञानादन्यतो निवृत्तिर्न उपपद्यते॥ उदाहृतस्मृतौ च संसिद्धिशब्देन चित्तशुद्धिरेवाभिधीयते॥ न मोक्ष इति भावः॥ विचारेण बंधनिवृत्तिरुक्ता किं विषयेण विचारेणेत्यत आह तस्मादिति॥ तत्साक्षात्कारपर्यंतं सर्वदा विचारं कुर्यादित्यर्थः॥५॥ तत्र जीवस्वरूपं तावन्निरूपयति॥ अहमिति॥ यश्चिदाभासविशिष्टोऽहंकारो व्यवहारदशायां देहादावहमित्यभिमन्यते॥ असौ कर्ता कर्तृत्वादिधर्मविशिष्टो जीव इत्यर्थः तस्य किं करणमित्याकांक्षायामाह॥ तस्य साधनं मन इति॥ कामादिवृत्तिमानंतःकरणभागो मनः॥ करणस्य क्रियाव्याप्तत्वात्तत्क्रियां दर्शयति॥ तस्य क्रिये इति॥६॥ अनयोः स्वरूपं विषयं च विविच्य

अविचारकृतो बंधो विचारेण निवर्तते॥ तस्माज्जीवपरात्मानौ सर्वदैव विचारयेत्॥५॥ अहमित्यभिमंता यः कर्तासौ तस्य साधनं॥ मनस्तस्य क्रिये अंतर्बहिर्वृत्ती क्रमोत्थिते॥६॥ अंतर्मुखाहमित्येषा वृत्तिः कर्तारमुल्लिखेत्॥ बहिर्मुखेदमित्येषा बाह्यं वस्त्विदमुल्लिखेत्॥७॥ इदमो ये विशेषाः स्युर्गंधरूपरसादयः॥ असांकर्येण तान्भिंद्यात् घ्राणादींद्रियपंचकं॥८॥ कर्तारं च क्रियां तद्व्यावृत्तविषयानपि॥ स्फोरयेदेकयत्नेन योऽसौ साक्षत्र चिद्वपुः॥९॥

दर्शयति॥ अंतर्मुखेति॥ इदमित्येषेति॥ बहिर्वृत्तेः स्वरूपाभिनयः अविशिष्टेन विषयप्रदर्शनं बाह्यं देहाद्बहिर्वर्तमानं इदंतया निर्दिश्यमानं वस्तूल्लिखेत् विषयीकुर्यादित्यर्थः॥७॥ ननु मन एव सर्वव्यवहारसिद्धौ चक्षुरादि वैयर्थ्यं प्रसज्येतेत्याशंक्याह॥ इदम इति॥ मन इदमिति॥ सामान्यमात्रं गृह्णातेन तु न हि शेषो गंधादिरतस्तद्ग्रहणे घ्राणादिकमुपयुज्यत इत्यर्थः॥८॥ एवं सोपकरणं जीवस्वरूपं निरूप्य परमात्मानं निरूपयति॥ कर्तारमिति॥ कर्तारं पूर्वोक्तमहंकाररूपं क्रियामहमिदमात्मकमनोवृत्तिरूपां व्यावृत्तविषयानपि व्यावृत्तानन्योन्यविलक्षणान् घ्राणादिग्राह्यान् गंधादीन् विषयांश्च एकयत्नेन युगपदेव यश्चिद्वपुश्चिद्रूप एव सन् स्फोरयेत् प्रकाशयेत्॥ असावत्र वेदांतशास्त्रे साक्षीत्युच्यत इत्यर्थः॥९॥

219
1938

साक्षिण एकयत्नेन सर्वस्फोरकमभिनीय दर्शयति॥ ईक्षे शृणोमीति॥ ईक्षे रूपमहं पश्यामीत्येवं द्रष्टृदर्शनदृश्यलक्षणां त्रिपुटीमेकयत्ने
न भासयते॥ एवं शृणोमीत्यादावपि योऽयं युगपदविकारित्वेनानेकावभासकत्वे दृष्टांतमाह॥ नृत्यशालास्थदीपवदिति॥१०॥ दृष्टां
तं स्पष्टयति॥ नृत्येति॥ अविशेषेण प्रभ्वादिविषयविशेषावभासनाय रथ्यादिविकारमंतरेणेति यावत्॥११॥ दार्ष्टांतिके योजयति॥ अ
हमिति॥ सुषुप्त्यादावहंकाराद्यभावेऽपि न साक्षितया भात्येवेत्यर्थः॥१२॥ ननु प्रकाशरूपायां बुद्धावहंकारादिसर्ववस्त्ववभासकत्वसंभवा
त्किं तदतिरिक्तसाक्षिकल्पनयेत्याशंक्याह॥ निरंतरमिति कूटस्थे निर्विकारे साक्षिणि ज्ञप्तिरूपतः स्वप्रकाशत्वेनान्यरूपतया निरंतरं भा
समाने सदा स्फुरति सति इयं बुद्धिस्तद्भासा तस्य साक्षिणः स्वरूपचैतन्येन भास्यमाना प्रकाशमाना नैव अनेकधा घटोऽयं पटोऽयमित्यादि

ईक्षे शृणोमि जिघ्रामि स्वादयामि स्पृशाम्यहं॥ इति भासयते सर्वं नृत्यशालास्थदीपवत्॥१०॥ नृत्यशालास्थितो दीपः
प्रभुं सभ्यांश्च नर्तकीं॥ दीपयेदविशेषेण तदभावेऽपि दीप्यते॥११॥ अहंकारं धियं साक्षी विषयानपि भासयेत्॥ अहंकारा
द्यभावेऽपि स्वयं भात्येव पूर्ववत्॥१२॥ निरंतरं भासमाने कूटस्थे ज्ञप्तिरूपतः॥ तद्भासा भास्यमानेयं बुद्धिर्नृत्यत्यनेकधा॥१३॥
अहंकारः प्रभुः सभ्या विषया नर्तकी मतिः॥ तालादिधार्यक्षाणि दीपः साक्ष्यवभासकः॥१४॥ स्वस्थानसंस्थितो
दीपः सर्वतो भासयेद्यथा॥ स्थिरस्थायी तथा साक्षी बहिरंतः प्रकाशयेत्॥१५॥

ज्ञानाकारेण नृत्यति विक्रियत इत्यर्थः॥ अयं भावः॥
यतो बुद्धेर्विकारित्वाज्जडत्वाच्च न स्फूर्तिरादित्यमतस्तदतिरिक्तः सर्वावभासकः साक्ष्यभ्युपगंतव्य इति॥१३॥ उक्तमर्थं श्रोतृबुद्धिसौक
र्याय नाटकत्वेन निरूपयति॥ अहंकार इति॥ विषयभोगसाकल्यवैकल्याभिमानप्रयुक्तहर्षविषादवत्त्वात्तस्याभिमानि प्रभुतुल्य
त्वमहंकारस्य॥ परिसरवर्तित्वेऽपि विषयाणां तद्ग्राहित्वात्सभ्यपुरुषसाम्यं नानाविधविकारवत्त्वात्॥ नर्तकीसाम्यं धियः धीविक्रियाणा
मनुकूलव्यापारवत्त्वात्तालादिधारिसमानत्वमिंद्रियाणामेतत्सर्वावभासकत्वात्साक्षिणो दीपसादृश्यमस्तीति द्रष्टव्यं॥१४॥ न
नु साक्षिणोऽप्यहंकाराद्यवभासकत्वेन तत्संबंधापगमागमरूपविकारवत्त्वं स्यादित्याशंक्याह॥ स्वस्थानेति दीपो यथागमनादिवि
कारशून्यः स्वदेशावस्थित एव सन्स्वसंनिहिताखिलरूपपदार्थानवभासयति एवं साक्ष्यपीति भावः॥१५॥ ॥५॥ ॥७॥ ॥

221
1938

ननु साक्षिणो बहिरंतरवभासकत्वाभिधानमनुपपन्नं॥ अपूर्वमनपरमनंतरमबाह्यमिति श्रुत्या तस्य बाह्यांतरविभागाभावाभिधानादित्या
शंक्याह॥ बहिरिति॥ कस्य बाह्यत्वं कस्य चांतरत्वमित्यत आह॥ विषया इति॥१६॥ ननु स्थिरस्थायी तथा साक्षी बहिरंतः प्रकाशयेदिति॥ अवि
कारिणः सतो बहिरंतरवभासकत्वोक्तिरयुक्ता॥ अहं घटं पश्यामीत्यत्राहमित्यंतरहंकारसाक्षितया प्रथमतो भासकस्यानंतरं घटं पश्यामीति॥
घटाकारवृत्तिस्फुरणरूपेण बहिर्निर्गमानुभवादित्याशंक्याह॥ अंतःस्थेति॥ इदं ध्येयाहंकर्तेनदेहांतरावस्थिता बुद्धिः रूपादिग्रहणाय चक्षु
रादिद्वारा बहिर्यानि निर्गच्छति॥ तथा च तस्मिंश्चांचल्यं तद्भासके साक्षिण्यारोप्यते॥ अतो न वास्तवं साक्षिणश्चांचल्यमिति भावः॥१७॥ भा
सके भास्यचांचल्यारोपः क्व दृष्ट इत्याशंक्याह॥ गृहांतरगत इति॥ गवाक्षात् गृहांतरगतः स्वल्प आतपोऽचल एव वर्तते तत्र तस्मिन्नातपे पुरु

बहिरंतर्विभागोऽयं देहापेक्षो न साक्षिणि॥ विषया बाह्यदेशस्था देहस्यांतरहंकृतिः॥१६॥ अंतःस्था धीः सहैवाक्षैर्बहिर्याति पु ॥२॥
नः पुनः॥ भास्यबुद्धिस्थचांचल्यं साक्षिण्यारोप्यते वृथा॥१७॥ गृहांतरगतः स्वल्पो गवाक्षादातपोऽचलः॥ तत्र हस्ते नर्त्यमाने नृत्यतीवा
तपो यथा॥१८॥ निजस्थानस्थितः साक्षी बहिरंतर्गमागमौ॥ अकुर्वन्बुद्धिचांचल्यात्करोतीव तथा तथा॥१९॥ न बाह्यो नांतरः साक्षी बुद्धे
र्देशौ हि तावुभौ॥ बुद्ध्याद्यशेषसंशांतौ यत्र भात्यस्ति तत्र सः॥२०॥ देशः कोऽपि न भासेत यदि तर्ह्यस्त्वदेशभाक्॥ सर्वदेशप्रकॢप्त्यैव सर्वगत्वं

षेण हस्तेन नर्त्यमाने इतस्ततश्चाल्यमाने यथा आतपो नृत्यतीव चलतीव चलत्यतेन तु चलतीत्यर्थः॥१८॥ दार्ष्टांतिकमाह॥ निजस्थानेति॥१९॥ नि
जस्थानस्थितत्वेन किं॥ बाह्यदेशादिर्वा स्थमेवेत्यनेनेत्याह॥ न बाह्य इति॥ तत्र हेतुमाह॥ बुद्धेरिति॥ नहि किं विवक्षितमित्यत आ
ह॥ बुद्ध्यादीनि॥ आदिशब्देनेंद्रियादयो गृह्यंते संशांतिशब्देन नस्तत्त्युपरतिर्विवक्षिता॥२०॥ ननु सर्वव्यवहारोपरतौ देश एव नोपल
भ्यते॥ कुतस्तत्स्थित्वमुच्यत इत्याशंक्य स्वाभिप्रायमाविष्करोति॥ देश इति॥ देशादिकल्पनाधिष्ठानस्य स्वातिरिक्तदेशापेक्षा नास्ती
ति भावः॥ ननु देशाद्यभावेऽसंत्वे सर्वगतत्वसर्वसाक्षितादि कि विरुध्येतेत्यत आह॥ सर्वदेशेति॥ स्वाभाविकमेव किं न स्यादित्यत आह
॥ ननु स्वत इति॥ अद्वितीयत्वादसंगत्वाच्चेति भावः॥२१॥ ॥श्रीराम॥ ॥जयराम॥ ॥जयजयराम॥ ॥कृष्ण॥

सर्वगतत्ववत्सर्वमात्मत्वमपिनवास्तवमित्याह॥अंतर्बहीति॥२२॥तथावस्तुषुयोजयेदित्येतत्प्रपंचयति॥यद्यदिति॥नर्हिकिंतस्यनिजंरू
पमित्यतआह॥स्वतइति॥२३॥अवाङ्मनसगोचरत्वेमुमुक्षुणानग्राह्येतेतिशंकते॥कथंताहृङ्मयाग्राह्यत्वमिष्टमेवेत्याह॥मैवेति॥नन्वा
त्मनोग्राह्यत्वाभावेविचारेणविनष्टांशमात्मावशिष्यतेस्वयमित्युक्तंपरमात्मावशेषणंनसिध्येदित्यतआह॥सर्वग्रहइति॥स्वात्मानि
रिक्तस्यदृष्टस्यमिथ्यात्वनिश्चयेनतत्सतीत्युपशांतौसत्यांतमेवसत्यतयावशिष्यतइतिभावः॥२४॥यद्यप्युक्तन्यायेनस्वात्मापरिशिष्यते॥
तथापितत्परोक्षायकिंचित्प्रमाणमपेक्षितमित्यतआह॥नतत्रेति॥तत्रहेतुमाह॥स्वप्रकाशेति॥नन्वात्मनःस्वप्रकाशतयास्वतः॥

अंतर्बहिर्वासर्वंवायंदेशंपरिकल्पयेत्॥बुद्धिःस्तद्देशगःसाक्षीतथावस्तुषुयोजयेत्॥२२॥यद्यद्रूपादिकल्प्येतबु
ध्यात्तत्तत्प्रकाशयन्॥तस्यतस्यभवेत्साक्षीस्वतोवाग्बुध्यगोचरः॥२३॥कथंताहृङ्मयाग्राह्यइतिचेन्मैवगृह्यतां
॥सर्वग्रहोपसंशांतौस्वयमेवावशिष्यते॥२४॥नतत्रमानापेक्षास्तिस्वप्रकाशस्वरूपतः॥ताहृग्व्युत्पत्त्यपेक्षाचेच्छ्रुतिंपठ
गुरोर्मुखात्॥२५॥यदिसर्वग्रहत्यागोशक्यस्तर्हिधियंव्रज॥शरणंतदधीनोंतर्बहिर्वैषोनुभूयतां॥२६॥इतिनाटकदीपः

स्फूर्तौमानंनापेक्ष्यतइतिव्युत्पत्तिसिद्धयेमानमपेक्षितमित्याशंक्यश्रुतिरेवात्रप्रमाणमित्याह॥ताहृगिति॥२५॥एवमुत्तमाधिका
रिणःआत्मानुभवोपायमभिधायमंदाधिकारिणस्तंदर्शयति॥यदीति॥बुद्धिशरणत्वेकिंफलमित्यतआह॥तदधीनइति॥बु
ध्यायद्यत्परिकल्प्यतेबाह्यमांतरंवातस्यतस्यसाक्षित्वेनतदधीनःपरमात्मातथैवानुभूयतामित्यर्थः॥२६॥ ॥
इतिश्रीमद्विद्यारण्यमुनिवर्यविरचितेपंचदशीप्रकरणेनाटकदीपव्याख्यायांदशमोध्यायःसमाप्तः॥ ॥१०॥ ॥
॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ३

A 221/1938

॥इतिनाडकदीपसमाप्तः॥

अथयोगानंदःप्रारंभः श्रीः प्र० ११

223
1438

पं॰ द॰ ब्र॰ नं॰ १

श्रीगणेशायनमः नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ब्रह्मानंदाभिधंग्रंथंव्याकुर्वेबोधसिद्धये १ चिकीर्षितस्यग्रंथ
स्यनिष्प्रत्यूहपरिपूरणायपरिपंथिकल्मषनिवृत्तयेभिलषितदेवतातत्वानुसंधानलक्षणंमंगलमाचरन्श्रोतृप्रवृत्तिसि
द्धयेसप्रयोजनमभिधेयमाविष्कुर्वन्ग्रंथारंभंप्रतिजानीते ब्रह्मानंदमिति निर्विशेषपरंब्रह्मसाक्षात्कर्तुमनीश्वराः
येमंदास्तेनुकंप्यंतेसविशेषनिरूपणैरितिसविशेषब्रह्मस्वरूपाणांदेवतानांतत्वस्यनिर्विशेषब्रह्मस्वरूपत्वाभिधानात् ब्र
ह्मणश्चानंदोब्रह्मेत्यादिभिश्रुतिभिरानंदरूपताभिधानाद्ब्रह्मानंदमित्यानंदरूपस्यब्रह्मणोवाचकशब्दप्रयोगेणय
द्धिमनसाध्यायतितद्वाचावदतीतिश्रुत्युक्तन्यायेनब्रह्मानुसंधानलक्षणंमंगलाचरणंसिद्धंब्रह्मणश्चसर्ववेदांत

ब्रह्मानंदंप्रवक्ष्यामि ज्ञातेतस्मिन्नशेषतः
ऐहिकामुष्मिकानर्थव्रातंहित्वासुखायते १

प्रतिपाद्यत्वात्तत्प्रकरणरूपस्यास्यग्रंथस्यापितदेवविषयइति ब्रह्मशब्दप्रयोगेणविषयश्चापिसूचितः ऐहि
कामुष्मिकानर्थव्रातंहित्वासुखायतइतिउत्तरार्धेनानिष्टनिवृत्तीष्टप्राप्तिरूपंप्रयोजनद्वयंमुखतएवोक्तं
ब्रह्मानंदंब्रह्मचासावानंदश्चब्रह्मानंदः वाच्यवाचकयोरभेदोपचारात्तत्प्रतिपादकोग्रंथोपिब्रह्मानंदस्तंप्र
वक्ष्यामितस्मिन्प्रतिपाद्यप्रतिपादकरूपेब्रह्मानंदेज्ञातेवगतेसतिऐहिकामुष्मिकानर्थव्रातंऐहिकानांइहलोक
भवानांदेहपुत्रादिष्वहंममाभिमानप्रयुक्तानांआध्यात्मिकादितापानांआमुष्मिकाणामसुष्मिन्परलोकेभवानां
चतेषामनर्थानांव्रातंसमूहं अशेषतः निःशेषंयथाभवतितथाहित्वापरित्यज्यसुखायतेसुखरूपंब्रह्मैवभवति १ १

225/1938

ब्रह्मज्ञानस्यानिष्टनिवृत्तीष्टप्राप्तिहेतुत्वेबहूनिश्रुतिस्मृतिवाक्यानिप्रमाणानिसंतीतिप्रदर्शयितुकामस्तावद्ब्र
ह्मविदाप्नोतिपरंश्रुतंह्येवमेभगवद्दृशेभ्यस्तरतिशोकमात्मविदितिसोहंभगवःशोचामितंमांभगवान्शोकस्य
पारंतारयत्विति वाक्यद्वयमर्थतःपठति ब्रह्मविदिति ब्रह्मवेत्तीति ब्रह्मवित् परमुत्कृष्टमानंदरूपंब्रह्मप्राप्नोति
आत्मविदात्मशब्दवाच्यंदेशकालवस्तुपरिच्छेदशून्यंआत्मानंवेत्तीत्यात्मवित् शोकंस्वसंसृष्टंपुरुषंशोचयती
तिशोकस्तंमोहमूलःसंसारस्तंतरतिअतिक्रामति नन्वदाहृतेतैत्तिरीयकश्रुतिवाक्येब्रह्मज्ञानस्यपरप्राप्तिहेतु

ब्रह्मवित्परमाप्नोतिशोकंतरतिचात्मवित् रसो
ब्रह्मरसंलब्ध्वानंदीभवतिनान्यथा २ ॥

त्वेवावभासतेनानंदप्राप्तिहेतुत्वेत्याशंक्यानंदप्राप्तिहेतुत्वप्रतिपादनपरंरसोवैसःरसंह्येवायंलब्ध्वानंदीभव
तीतितदीयमेववाक्यमर्थतःपठतिरसइतिसत्यंज्ञानमनंतंब्रह्मतस्माद्वाएतस्मादात्मनआकाशःसंभूतइति
प्रकरणादौब्रह्मात्मशब्दाभ्यामभिहितोयआत्मासोरसःआनंदरूपइत्यर्थःरसमानंदरूपंब्रह्मलब्ध्वाब्रह्माह
मस्मीतिज्ञानेनप्राप्यानंदीभवतीत्यपरिच्छिन्नातिरतिशयसुखवान्भवति उक्तमर्थंव्यतिरेकप्रदर्शनेनद्रढ
यति नान्यथेति अन्यथा ब्रह्मात्मैकत्वज्ञानंविहायसाधनांतरानुष्ठानेननानंदीभवतीत्यर्थः २ ॥

एवमन्वयमुखेनेष्टप्राप्त्यनिष्टनिवृत्तिप्रतिपादनपराणि वाक्यानि प्रदर्श्य अन्वयव्यतिरेकाभ्यां अनर्थनिवृत्तिप्रदर्शनप
२ रं यदा ह्येवैष एतस्मिन्नदृश्येनात्म्येनिरुक्तेनिलयनेभयं प्रतिष्ठां विंदते अथ सो भयंगतो भवति यदा ह्येवैष एतस्मिंनु
दरमंतरं कुरुते अथ तस्य भयं भवती ति वाक्यद्वयमर्थतोनुक्रामति प्रतिष्ठामिति अस्य चायमर्थः यदायस्मिन्का
लेहीति विद्वत्प्रसिद्धिप्रदर्शनपरो निपातः एवेति अयमेवानर्थनिवृत्त्युपायो नान्य इति नियमार्थः एष मुमु
क्षुरेतस्मिन् विद्वदनुभवगम्ये अदृश्ये इंद्रियगोचरे अनात्म्ये अनात्मीयस्वरूपतया स्वकीयत्वरहिते अनि
रुक्ते निरुक्तं निर्वचनं शब्देनाभिधानं यत्र नास्ति तदनिरुक्तं तस्मिन् अनिलयने निलीयतेस्मिन्निति निलयनं

प्रतिष्ठां विंदते स्वस्मिन्यदा स्यादथ सोभयः कुरु
ते स्मिन्नंतरं चेदथ तस्य भयं भवेत् २ ॥

माधारः स न विद्यते तस्य तस्मिन् स्वमहिम्नि स्थित इत्यर्थः अभयं द्वितीयाद्वै भयं भवतीति श्रुतेः भयशब्देनात्र भ
यहेतुर्भेदो लक्ष्यते न विद्यते भयं भेदो यथा भवति तथा प्रतिष्ठां प्रकर्षेण संशयविपर्ययराहित्येन स्थितिः ब्रह्माह
मस्मीत्यवस्थानं प्रतिष्ठा तां विंदते गुरुप्रसादसत्यादिना श्रवणादिकं कृत्वा लभते अथ तदानीमेव स एवं विद्वान् २
भयं भयरहितं मोक्षरूपं अद्वितीयं ब्रह्म गतः प्राप्तो भवति ब्रह्म वेद ब्रह्मैव भवतीति श्रुतेः यदायस्मिन्नेव काले एष
पूर्वोक्त एतस्मिन्नदृश्यत्वादिगुणके प्रत्यगभिन्ने ब्रह्मणि उ इति निपातोपि शब्दार्थः उ अरं अल्पमपि अंतरं भेदं उपास्योपा
सकादिलक्षणं कुरुते पश्यति धातूनामनेकार्थत्वादथ तदानीमेव तस्य भेददर्शिनो भयं संसारप्रयुक्तं दुःखं भवति ३

227
1938

भेददर्शिनां भयं भवतीत्येतद्दृढीकर्तुं ब्रह्मात्मैकत्वज्ञानरहितानां वाय्वादीनां भयप्रदर्शनपरं भीषास्माद्वातः पवत इत्या
गममंत्रमर्थतः पठति वायुरिति वाय्वादयो जगन्नियामकत्वेन प्रसिद्धाः पंचापि देवता अतीतेजन्मनि धर्ममि
श्रापूर्तलक्षणं विज्ञानं तोपि ज्ञानपूर्वकं अनुष्ठितवंतो प्यंतरं प्रत्यक् ब्रह्मणो भेदं कृत्वा स्मात् ब्रह्मणो भीत्या स्मिन् वा
य्वादिजन्मनि चरंति स्वस्वव्यापारेषु सदा प्रवर्तते हिशब्देन भयादस्याग्निस्तपति भयात्तपति सूर्यः भयादिंद्रश्च
वायुश्च मृत्युर्धावति पंचम इति कठश्रुतौ यमेनोक्तां प्रसिद्धिं दर्शयति ४ ननु तरति शोकमात्मविदित्यादिषू
दाहृतेषु वाक्येषु ब्रह्मानंदज्ञानस्यानर्थनिवृत्तिहेतुत्वं स्पष्टं नावभासत इत्याशंक्य तथा प्रतिपादनपरं वाक्य

वायुः सूर्यो वह्निरिंद्रो मृत्युर्जन्मांतरेंतरं कृत्वा धर्मं विजानंतो प्यस्माद्भीत्याचरंति हि ४ आनंदो
ब्रह्मणो विद्वान् न बिभेति कुतश्चन एवमेव तपेन्नैषा चिंता कर्माग्निसंभृता ५ ॥ ॥

मुदाहरति आनंदमिति राहोः शिर इति वद्भेदव्यपदेश औपचारिकः ब्रह्मणः स्वरूपभूतमानंदं विद्वान् परोक्ष
तया जानन् पुरुषः कुतश्चन कस्मादपि ऐहिकभयहेतोर्व्याघ्रादेः पारलौकिकभयहेतोः पापादेर्वा न बिभेति भयं न प्राप्नोति
ननु तत्वविदः पापादेर्भयं नास्तीत्येतत्कुतोवगम्यत इत्याशंक्य तत् प्रतिपादकमेतं ह वाव न तपति किमहं
साधु नाकरवं किमहं पापमकरवमिती ति वाक्यमर्थतः पठति एतमिति कर्माग्निसंभृता पुण्यपापरूपं कर्मैवा
ग्निः करणाकरणाभ्यामग्निवत्संतापहेतुत्वात्तेन संपादिता संभृता एषा पुण्यं नाकरवं कस्मात्पापं तु कृतवान् कुत
इत्येवंरूपा चिंता एतमेव तत्वविदमेव न तपेन्न संतापयेत् नान्यमविद्वांसं स तु तया चिंतया सदा संतप्यत इत्यर्थः ५

पुण्यपापयोरतापकत्वे हेतुप्रदर्शनपरं स य एवंविद्वानेते आत्मानं स्पृणुते उभे ह्येवैष एते आत्मानं स्पृणुत इति वाक्यद्वय मर्थतः पठति एवमिति सर्वोपायः कश्चित्पुमानेवमुक्तेन स यश्चायं पुरुषे यश्चासावादित्ये स एक इत्यनेन प्रकारेण विद्वान् जानन्वर्तते स एते पुण्यपापे हित्वेत्यध्याहारः आत्मानं ब्रह्माभिन्नं प्रत्यञ्चं स्पृणुते प्रीणयति सदा स्मरेदित्यर्थः यतः पुण्यपापयोर्मिथ्यात्वानुसंधानेन हानं कृतमतस्तद्विषया चिंतैव नास्ति कुतस्तन्निमित्तकस्ताप इत्यभिप्रायः किंच एष विद्वानेते पूर्वोक्ते उभे पुण्यपापरूपे कर्मणी देहेंद्रियादिप्रवृत्त्या जनिते स्वात्मरूपेणैव इदं सर्वं यदयमात्मेत्यादिवाक्योक्तप्रकारेण पश्यति जानातीत्यर्थः अतः स्वात्माभिन्नत्वादप्यतापकत्वमिति भावः ६ ननु नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीत्यादिशास्त्रसद्भावादनादौ संसारे बहुजन्मोपार्जितेषु पुण्यपापलक्षणेषु कर्मस्वसंख्यातेषु प्रसिद्धत्वेनात्मतयानुसंधानायोग्येषु

एवंविद्वान् कर्मणी हित्वात्मानं स्मरेत्सदा कृते च कर्मणी स्वात्मरूपेणैवैष पश्यति ६ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे ७ ॥

सत्सु कथं तद्विषया चिंता न भवेदित्याशंक्य सनिदानानां तेषां तत्त्वज्ञानेन विनाशितत्वान्न चिंताजनकत्वमित्यभिप्रायेण हृदयग्रंथ्यादिनिरासपरं मुंडकादिश्रुतिषु स्थितं वाक्यं पठति भिद्यत इति परावरे परमपि हैरण्यगर्भादिकं पदं यस्मात् अपरं निकृष्टं यस्मात्तस्मिन् परमात्मनि दृष्टे साक्षात्कृते अस्य साक्षात्कारवतो हृदयस्य बुद्धेश्चिदात्मनश्च ग्रंथिवद्दृढसंश्लेषरूपत्वाद्ग्रंथिरन्योन्याध्यासः भिद्यते विदीर्यते विनश्यतीत्यर्थः सर्वसंशयाः आत्मा देहादिव्यतिरिक्तो न वा व्यतिरिक्तोपि कर्तृत्वादिधर्मयोगी न वा अकर्तृत्वे तस्य ब्रह्मणो भेदोस्ति न वा अभेदेपि तत्त्वज्ञानं कर्मादिसहितं मुक्तिसाधनं केवलं वेत्यादयश्छिद्यंते द्वैधीक्रियंते तत्त्वतः साक्षात्कृतस्य वस्तुनः संशयविपर्ययविषयत्वादर्शनादिति भावः कर्माणि संचितानि पुण्यापुण्यलक्षणानि क्षीयंते स्वनिदानाज्ञानविनाशेन विनश्यंतीति ७ ॥ ३

ननु कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः एवं त्वयि नान्यथेतोस्ति न कर्म लिप्यते नरे विद्यां चाविद्यां च यस्तद्वेदोभयं सह अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत इत्यादिश्रुतेः कर्मणैव हि संसिद्धिमास्थिता जनकादयः यथान्नं मधुसंयुक्तं मधु चान्नेन संयुतं एवं तपश्च विद्या च संयुक्तं भेषजं महदित्यादिस्मृतेश्च केवलस्य वा ज्ञानसमुच्चितस्य वा कर्मणो मुक्तिहेतुत्वं स्यादित्याशंक्योदाहृतवाक्यस्थालेपशब्दस्य पापनिवृत्तिपरत्वात् आस्थिता इति शब्दस्य पापनिवृत्तिपरत्वात् संसिद्धिशब्देन च ज्ञानसाधनचित्तशुध्यभिधानाद्विद्याशब्देनोपासनाया विवक्षितत्वान्न कर्मणो मुक्तिसाधनत्वमित्यभिप्रायेण साधनांतरनिषेधपरं तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेयनायेति श्वेताश्व

तमेव विद्वानत्येति मृत्युं पंथा न चेतरः ज्ञात्वा देवं पाशहानिः क्षीणैः क्लेशैर्न जन्मभाक् ८ ॥

तरवाक्यमर्थतः पठति तमेवेति तं पूर्वोक्तं परमात्मानं विद्वानेव मृत्युं संसारमत्येत्यतिक्रामति इतरः समुच्चयरूपः केवलकर्मरूपो वा पंथा मार्गः मोक्षोपायः न च नैव विद्यते ननूदाहृतासु श्रुतिषु अन्वयव्यतिरेकाभ्यामैहिकानिष्टनिवृत्तिरेव प्राधान्येनावभासते नामुष्मिकीत्याशंक्य आमुष्मिकस्यानिष्टस्य भाविजन्मपूर्वकत्वात्तस्य सनिदानस्याभावप्रतिपादकं ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिरिति श्वेताश्वतरवाक्यमर्थतः पठति ज्ञात्वेति देवं स्वप्रकाशं प्रत्यगभिन्नं ब्रह्म ज्ञात्वापरोक्षतयानुभूय स्थितस्य कामक्रोधादीनां सर्वेषां पाशानां हानिर्भवति तैः पाशशब्दाभिधेयैः रागादिभिः क्लेशैः क्षीणैः नष्टैः भाविजन्महेतुकर्मारंभायोगाज्जन्म न प्राप्नोतीत्यर्थः ८

ननु शोकसंतरणादिफलं श्रूयत एव नानुभूयते ज्ञानिनामपि दुःखानिष्टप्राप्तिपरिहारार्थं प्रवृत्तिदर्शनादित्याशंक्य दृढापरोक्ष
ज्ञानिनां तदभावप्रतिपादनपरमध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति कठश्रुतिवाक्यमर्थतः पठति
४ देवमिति धैर्यवान् ब्रह्मचर्यादिसाधनसंपन्नः देवं चिदानंदादिलक्षणं मत्वावगम्यात्रैवास्मिन् जन्मनि हर्षशोकौ जहा
ति एतमेव तपन्नेषा चिंता कर्माग्निसंभूतेत्युक्तार्थविशेषप्रदर्शनपरं नैनं कृताकृते तपत इत्यादि जाबाल्यब्राह्म
णवाक्यमर्थतः पठति नैनमिति पूर्वमकृतं पुण्यं कृतं च पापं तत्त्वविदः तापहेतुर्न भवतीत्युक्तं इह तु कृतमकृ
तं वा पुण्यं पापं वा तथाविधं तापकं न भवतीत्युच्यत इति विशेषः तथा हि तापो नाम चित्तविकारविशेषः पुण्यं कृतं

देवं मत्वा हर्षशोकौ जहात्यत्रैव धैर्यवान् नैनं कृताकृते पुण्यपापे तापयतः क्वचित् ९ ॥
इत्यादिश्रुतयो बह्व्यः पुराणैः स्मृतिभिः सह ब्रह्मज्ञानेनार्थहानिमानंदं चाप्यघोषयन् १०

सद्धर्षलक्षणं विकारमुत्पादयति अकृतं विषादं पापं पुनस्तद्विपरीत्येन अकृतं हर्षमुत्पादयति कृतं विषादं त
त्त्वविदस्तूभे अपि उभयविधविकारहेतू न कदाचिद्भवतः अविक्रियब्रह्मरूपत्वाज्ज्ञानादित्यभिप्रायः ९ नन्वि ४
यं त्येव वाक्यानि प्रमाणानि नेत्याह इत्यादीति आदिशब्देनेह चेदवेदीदथ सत्यमस्ति न चेदिहावेदी महती विनष्टिः
य एतद्विदुरमृतास्ते भवंति अथेतरे दुःखमेवापियंति तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत् निचाय्य तं मृत्युमुखा
त्प्रमुच्यत इत्याद्याः श्रुतयो गृह्यंते सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि संपश्यन्नात्मजीवैक्यं स्वाराज्यमधिगच्छति क्षे
त्रज्ञस्यात्मविज्ञानाद्धि शुद्धिः परमा मतेत्यादिपुराणस्मृतिवचनैः सह प्रमाणानीत्यर्थः उदाहृतानां श्रुतिस्मृतिवाक्यानां सर्वेषां
तात्पर्यमाह ब्रह्मज्ञान इति १०

231/1958

ननु ब्रह्मानंद इत्यानंदस्य ब्रह्मपदेन विशेषणादानंदांतरमस्तीत्यवगम्यते स कतिविधः कीदृशो वानंद इत्याकांक्षायां तद्भेदप्रदर्श
नपूर्वकं ब्रह्मानंदविवेचनं प्रतिजानीते आनंद इति ब्रह्मानंदो विद्यानंदो विषयानंद इत्यनेन प्रकारेणास्य त्रैविध्यमवगंतव्यं
तत्रेतरयोरानंदयोर्ब्रह्मानंदमूलत्वादादावध्यायत्रयेण ब्रह्मानंदो विभज्य प्रदर्श्यत इत्यर्थः ११ तत्रादौ तावत्तैत्तिरीयश्रु
तिपर्यालोचनायामानंदरूपं ब्रह्मावगम्यत इत्यभिप्रायेण भृगुवल्ल्या अर्थं संक्षेपेण प्रदर्शयति भृगुरिति भृगुनामकः पुत्रः
पितुः वरुणाच्छ्रुत्वा ब्रह्मलक्षणं यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व
तद्ब्रह्मेत्येवं श्रुत्वान्नमयादिकोशेषु तल्लक्षणासंभवेन तेषामब्रह्मत्वं निश्चित्यानंदमयकोशे पंचमावयवत्वेन ब्रह्म पुच्छं प्रति

आनंदस्त्रिविधो ब्रह्मानंदो विद्यासुखं तथा विषयानंद इत्यादौ ब्रह्मानंदो विविच्यते ११ ॥
भृगुः पुत्रः पितुः श्रुत्वा वरुणाद्ब्रह्मलक्षणं अन्नप्राणमनोबुद्धीस्त्यक्त्वानंदं विजज्ञिवान् १२
आनंदादेव भूतानि जायंते तेन जीवनं तेषां लयश्च तत्रातो ब्रह्मानंदो न संशयः १३ ॥

इति श्रुतं बिंबभूतमानंदं ब्रह्मलक्षणयोजनया ब्रह्मत्वेन ज्ञातवानित्यर्थः १२ कथमानंदे तल्लक्षणं योजितवानित्याशंक्य
तद्योजनाप्रकारदर्शनपरं आनंदाद्ध्येव खल्विमानि भूतानि जायंते आनंदेन जातानि जीवंति आनंदं प्रयंत्यभिसंविशं
तीति वाक्यमर्थतः पठति आनंदादिति ग्राम्यधर्मनिमित्तकादानंदादेव भूतानि प्राणिनो जायंते उत्पद्यंते तेन विषयभो
गादिनिमित्तकेनानंदेन जीवनं प्राप्नुवंति तेषां प्राणिनां लयश्च तत्र तस्मिन् सुषुप्तिकालीने स्वस्वरूपभूते आनंद एव भ
वति सुषुप्तावानंदातिरेकेण कस्याप्यनुभवाभावादत आनंदो ब्रह्मैव सर्वानुभवसिद्धत्वान्नात्र संशयः कर्तव्य इति भावः १३

५

एवं तैत्तिरीयश्रुतिपर्यालोचनया ब्रह्मण आनंदरूपतां प्रदर्श्य छांदोग्यश्रुतिपर्यालोचनयापि तां दिदर्शयिषुः सनत्कुमारनार
दसंवादरूपे सप्तमाध्याये स्थितस्य भूमरूपब्रह्मप्रतिपादकस्य यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भू
मेत्यादिवाक्यस्यार्थं संक्षेपेणाह भूतोत्पत्तेरिति भूतानामाकाशादीनां तत्कार्याणां जरायुजांडजादीनां चोत्पत्तेः पूर्वं त्रिपुटी
द्वैतवर्जनात् त्रयाणां ज्ञातृज्ञानज्ञेयरूपाणां पुटानामाकाराणां समाहारस्त्रिपुटी सैव द्वैतं तस्य वर्जनादभावात् भूमा देशतः
कालतो वस्तुतो वापरिच्छेदः अनन्यः परमात्माभावान यने द्रव्यानयनमिति न्यायाद्भूमैवासीदित्यध्याहारः तदेव द्वैतवर्जन
मुपपादयति ज्ञातृज्ञानेति वक्ष्यमाण ज्ञात्रादिरूपा त्रिपुटी प्रलयकाले नास्तीत्येतत्सर्ववेदांतसंमतमिति हि शब्दं प्र

भूतोत्पत्तेः पुरा भूमा त्रिपुटीद्वैतवर्जनात् ज्ञातृज्ञानज्ञेयरूपा त्रिपुटी प्रलये हि नो १४ ॥
विज्ञानमय उत्पन्नो ज्ञाता ज्ञानं मनोमयः ज्ञेयाः शब्दादयो नैतत्त्रयमुत्पत्तितः पुरा १५ ॥
त्रयाभावे तु निर्द्वैतः पूर्ण एवानुभूयते समाधिसुप्तिमूर्छासु पूर्णः सृष्टेः पुरा तथा १६ ॥

युंजानस्याशयमभिप्रायः १४ इदानीं ज्ञात्रादिस्वरूपं दर्शयति विज्ञानेति परमात्मन उत्पन्नो बुध्युपाधिको जीवो विज्ञान ५
मयो ज्ञाता मनसि प्रतिबिंबितं मनोमयशब्दवाच्यं चैतन्यं ज्ञानं शब्दस्पर्शादयो ज्ञेयाः प्रसिद्धाः इदं त्रयं कार्यत्वादु
त्पत्तितः पुरा कारणव्यतिरेकेण नास्तीत्यर्थः १५ फलितमाह त्रयेति ज्ञात्रादित्रयाभावे द्वैतरहितः पूर्ण एवात्मानुभूयते
कुत्रानुभूयत इत्यत आह समाधीति विद्वदनुभवप्रदर्शनाय समाधिग्रहणं सर्वानुभवद्योतनाय सुप्तिमूर्छयोरुदाहरणं सु
प्तोत्थितस्य द्वैतादर्शनस्मरणान्यथानुपपत्त्या निर्द्वैतस्य तदनुभवितुः सिद्धिरिति भावः भवतु सुप्त्यादावद्वैतसिद्धिः प्रल
ये किमायातमित्यत आह पूर्ण इति यथा सुप्त्यादौ परिच्छेदकाभावात् पूर्णः तथा सृष्टेः पुरापि तदभावात् पूर्ण इत्यर्थः १६

भूम्नो ब्रह्मणः पूर्णत्वं आनंदरूपत्वं च कुत आयातमित्याशंक्य अन्वयव्यतिरेकाभ्यां भूम्नः सुखरूपत्वप्रदर्शनपरं यो वै भूमा तत्सुखं
नाल्पे सुखमस्तीति वाक्यमर्थतोनुक्रामति यो भूमेति यः पूर्वोक्तो भूमा स सुखरूप एवाद्वितीये दुःखहेतोरभावादल्पे
परिच्छिन्ने तस्यैव विवरणं त्रेधा विभेदिनीति हेतुगर्भितं विशेषणं सुखं तत्र न विद्यत इत्यर्थः एवं कस्मै केनाभिहितमि
त्यत आह सनत्कुमार इति नारदस्य शिष्यत्वे कारणमाह अतिशोकिन इति अतिशयितोधिकः शोको यस्येति अतिशो
कीतस्मै १७ तस्यातिशोकित्वे हेतुमाह सपुराणानिति नारदः पुराणैः सहवर्तंत इति सपुराणाः पंचवेदास्तान्विविधानि
च शास्त्राणि विदित्वाप्यात्मज्ञानरहितत्वेनातिशयेन शोकं प्राप्तः १८ ननु वेदशास्त्रविषयज्ञानस्य शोकनिवर्तकत्वे

यो भूमा स सुखं नाल्पे सुखं त्रेधा विभेदिनि सनत्कुमारः प्राहैवं नारदायातिशोकिने १७ ॥
सपुराणान्पंचवेदाञ्छास्त्राणि विविधानि च ज्ञात्वाप्यनात्मवित्त्वेन नारदोतिशुशोच हि १८ ॥
वेदाभ्यासात्पुरा तापत्रयमात्रेण शोकिता पश्चात्त्वभ्यासविस्मारभंगगर्वैश्च शोकिता १९ ॥
सोहं विद्वान्प्रशोचामि शोकपारं नयात्र मां इत्युक्ते सुखमेवास्य पारमित्यभ्यधादृषिः २० ॥

नत्र सिद्धस्य कथमतिशोकहेतुत्वमित्यत आह वेदेति तापत्रयेणाध्यात्मिकादिलक्षणेनैव शोकिता शोकोस्यास्तीति शो
की तस्य भावस्तत्ता आसीदित्यध्याहारः पश्चात्त्विति तु शब्दो विशेषद्योतनार्थः अभ्यासः पाठाद्यावर्तनं विस्मारः पठि
तस्य विस्मरणं भंगः स्वतोधिकेन तिरस्कारः गर्वोन्यनदर्शनेन स्वाधिक्यबुद्धिः एतैश्च कारणैः शोकित्वं १९ नन्वेवं
सर्वज्ञस्यापि नारदस्यातिशोकित्वं ज्ञातमिति कुतोवगतमित्याशंक्य सोहं भगवः शोचामीति तदीयादेव वाक्यादवगतमि
त्यभिप्रेत्य तं मां भगवाञ्छोकस्य पारं तारयत्विति तन्निवृत्त्युपाये तेन पृष्टे सति सनत्कुमारो भूमशब्दवाच्यं सुखरूपं ब्रह्मै
व ज्ञायमानं शोकनिवृत्त्युपाय इति सुखं त्वेव विजिज्ञासितव्यमित्यारभ्योक्तग्रंथसंदर्भेणोक्तवानित्याह सोहमिति २०

233
1938

पं० द० ग्र० नं०

६

ननु स्वर्गादिजन्येषु सुखेषु बहुषु सत्सु नात्यैव सुखमस्तीत्युक्तिरनुपपन्नेति चेन्न तेषां स्वर्गादीनां दुःखानुषंगेण विषसंपृक्ता
न्नवद् दुःखरूपत्वस्य मुनिनाभिप्रेतत्वादित्याह सुखमिति २१. द्वैते सुखाभावमंगीकृत्याद्वैतेपि तमाशंकते नन्विति
अत्रानुपलब्धिं प्रमाणयति अस्ति चेदिति अद्वैते सुखं यदि विद्यते तर्हि विषयसुखादिवदुपलभ्येत नोपलभ्यते तो
नास्तीत्यर्थः ननूपलभ्यत एवेत्याशंक्य मानं प्रत्याह तथा चेति अनुभवस्यानुभवित्रनुभाव्यसापेक्षत्वाद्द्वैतहानिरिति
भावः २२. अद्वैतस्य सुखाधिकरणत्वनिषेधमंगीकरोति सिद्धांती मास्त्विति तत्र हेतुमाह किंत्विति हि यस्मात्

सुखं वैषयिकं शोकसहस्रेणावृतं त्वतः दुःखमेवेति मत्वाह नात्यैवास्ति सुखमित्यसौ २१ ॥
ननु द्वैते सुखं माभूदद्वैतेप्यस्ति नो सुखं अस्ति चेदुपलभ्येत तथा च त्रिपुटी भवेत् २२ ॥
मास्त्वद्वैते सुखं किंतु सुखमद्वैतमेव हि किं मानमिति चेन्नास्ति मानाकांक्षा स्वयंप्रभे २३ ॥
स्वप्रभत्वे भवद्वाक्यं मानं यस्माद्भवानिदं अद्वैतमभ्युपेत्यास्मिन् सुखं नास्तीति भाषते २४ ॥
नाभ्युपैम्यहमद्वैतं त्वद्वचोनूद्य दूषणम् वच्मीति चेत्तदा ब्रूहि किमासीद्द्वैततः पुरा २५ ॥

६

कारणादद्वैतमेव सुखं अतः सुखाधिकरणं न भवतीत्यर्थः अद्वैतं सुखमित्यत्र किं प्रमाणमित्याशंकानुवादपूर्वकं त
स्य स्वप्रकाशत्वात् प्रमाणप्रश्न एवानुपपन्न इत्याह किं मानमिति २३. ननु स्वप्रकाशत्वे किं प्रमाणमित्याशंक्य त्वदी
यमेव वचनं प्रमाणमित्याह स्वप्रभत्व इति तदुपपादयति यस्मादिति यतः कारणाद्भवता प्रमाणनैरपेक्ष्येणाद्वै
तमभ्युपेत्य सुखमेवाक्षिप्यते ततः स्वप्रभत्वमित्यर्थः २४ न मयाद्वैतमभ्युपगम्यते किंतु त्वदुक्तमद्वैतमनूद्य दूष्य
ते तावता न सिद्धिरिति शंकते नाभ्युपैमीति विकल्पासहत्वाद्द्वैतानभ्युपगमोनुपपन्न इति मन्वानः पृच्छति तदेति २५.

किंशब्दसूचितं विकल्पं दर्शयति किमद्वैतमिति तृतीयं पक्षं निराकरोति अंतिम इति द्वैताद्वैतविलक्षणस्य रूपस्य लोके दर्शनाद
िति भावः द्वितीयं पक्षं निराकरोति न द्वितीय इति तत्र हेतुमाह द्वैतस्य तदानीमनुत्पन्नत्वादिति भावः अतः प्रथमः पक्षः परिशि
ष्यत इत्याह शिष्यत इति २६. ननु केन प्रकारेणाद्वैतं युक्त्यैव सिध्यति नानुभवेनेति चोदयति अद्वैतेति अद्वैतसिद्धिर्यु
क्त्यैवेति उक्तं विकल्पासहत्वादनुपपन्नमिति मन्वानो युक्तिं विकल्पयति सिद्धांती वदेति विकल्पस्य न्यूनतां निराकरोति
कोट्यंतरमिति २७ प्रथमं पक्षं सोपहासं निराकरोति नानुभूतिरिति अद्वैतसिद्धिर्युक्त्यैवेति वदतानुभूतिस्तावन्नाभ्युप
गता युक्तिश्च दृष्टांतप्रदर्शनमंतरेण न किंचित्साधयत्यतो न दृष्टांत इत्युक्तिरयुक्तेति भावः द्वितीये विकल्प उभयवादिसंप्रतिपन्नो

किमद्वैतमुत द्वैतमन्यो वा कोटिरंतिमः अप्रसिद्धो न द्वितीयोनुत्पत्तेः शिष्यतेग्रिमः २६ ॥
अद्वैतसिद्धिर्युक्त्यैव नानुभूत्येति चेद्वद निर्दृष्टांता सदृष्टांता वा कोट्यंतरमत्र नो २७ ॥
नानुभूतिर्न दृष्टांत इति युक्तिस्तु शोभते सदृष्टांतत्वपक्षे तु दृष्टांतं वद मे मतं ॥ २८ ॥
अद्वैतः प्रलयो द्वैतानुपलंभेन सुप्तिवत् इति चेत्सुप्तिरद्वैतेत्यत्र दृष्टांतमीरय २९ ॥
दृष्टांतः परसुप्तिश्चेद्दृष्टोते कौशलं महत् यः स्वसुप्तिं न वेत्त्यस्य परसुप्तौ तु का कथा ३० ॥

दृष्टांतो वक्तव्य इत्याह सदृष्टांतत्वेति २८ तर्हि दृष्टांतेनैवाद्वैतं साधयामीति शंकते पूर्ववादी अद्वैत इति प्रलयो द्वैतरहितो
भवितुमर्हति द्वैतानुपलब्धिमत्वात् यो यो द्वैतानुपलब्धिमान् स स द्वैतरहितः यथा स्वाप इति नन्वेवं साधयतस्तव सुप्ति
र्दृष्टांतः परसुप्तिर्वा आद्ये तस्याः परं प्रत्यप्रसिद्धत्वेन तत्सिद्धये दृष्टांतांतरं वक्तव्यमित्याह सुप्तिरिति २९. ननु तस्याः पर
सुप्तिरिव दृष्टांत इति द्वितीयविकल्पमाशंकते दृष्टांत इति परसुप्तेस्तवाप्रसिद्धत्वेन तथा दृष्टांतीकरणमनुपपन्नमिति सोप
हासमाह सिद्धांती अहो इति ननु यो भवान् सुप्तेरनुभवगम्यत्वानंगीकारेण स्वसुप्तिमपि न वेत्ति तस्य तव परसुप्तौ का
कथा परसुप्तिज्ञानं न भवतीति किमु वक्तव्यमिति भावः ३०

2335
1938

पं० ८० ग्रं० नं०

नन्वनुमानात्परः सुप्तिसिद्धिरिति शंकते निश्चेष्टत्वादिति विमतः परः सुप्तो भवितुमर्हति प्राणादिमत्वे सति निश्चेष्टत्वा
त् मद्वदित्यनुमानादित्यर्थः एवं तर्हि तव सुप्तेः स्वप्रकाशत्वं परिशिष्यत इत्याह सिद्धांती तदेति तदा तर्हि मां प्रति स्वां सु
षुप्तिमुदाहर्तुर्दार्ष्टांतीकर्तुस्तेतव सुषुप्तेः स्वप्रभत्वं स्वप्रकाशत्वं बलात्सुषुप्त्युदाहरणसामर्थ्यादेव भवेत् ३१ कथं ब
लादिव नित्याशंक्याह नेति सुप्तिग्राहकाणींद्रियाणि न संति तेषां स्वकारणे विलीनत्वात् दृष्टांतश्च संप्रतिपन्नो नास्ति
परसुप्तेरप्रसिद्धत्वस्योक्तत्वात् तथापि तां सुषुप्तिमंगीकरोषि एवं च सति साधनैर्विना ज्ञानसाधनमंतरेणापि भानं प्रका
शनमिति यदिदमेव स्वप्रकाशत्वं सुषुप्त्या इत्यर्थः तत्रायं प्रयोगः विमता सुषुप्तिः स्वप्रकाशा असत्स्वपि ज्ञानसाधनेषु

निश्चेष्टत्वात्परः सुप्तो यथाहमिति चेत्तदा उदाहर्तुः सुषुप्तेस्ते स्वप्रभत्वं बलाद्भवेत् ३१ नेंद्रियाणि न दृष्टांतस्त
थाप्यंगीकरोषि तां इदमेव स्वप्रभत्वं यज्ञानं साधनैर्विना ३२ स्यान्मद्वैतस्वप्रभत्वे वद सुप्तौ सुखं कथं शृणु दुःखं
तदा नास्ति ततस्ते शिष्यते सुखं ३३ अंधः संनप्यनंधः स्याद्विद्धो विद्धोथ रोग्यपि अरोगीति श्रुतिः प्राहतच्च सर्वे ज
ना विदुः ३४

नावदित्यर्थः ३२ इत्थं प्रलयस्य
प्रकाशमानत्वात् सांख्याभिमतात्मवत् प्राभाकराभिमतसंवेदनवत् शाक्याभिमतस्वात्मवदित्यर्थः ३२ इत्थं प्रलयस्य
दृष्टांतत्वेनोदाहृतायाः सुषुप्तेरद्वैतत्वं स्वप्रभत्वं च प्रसाध्य तत्र सुखप्रसाधनाय पूर्वपक्षिण आकांक्षामुत्थापयति स्यामिति
सुखप्रतियोगिनो दुःखस्य तदानीमसत्त्वात्सुखमेव परिशिष्यत इत्याह शृण्विति सुखदुःखयोः प्रकाशतमसोरिव पर
स्परविरोधित्वात् दुःखाभावे सुखमेवाभ्युपेयमिति भावः ३३ सुप्तौ दुःखाभावे किं मानमित्याकांक्षायां श्रुत्यनुभवाविति
ह अंध इति तस्मा द्वा एनं सेतुं तीर्त्वांधः सन् अनंधो भवति विद्धः सन्नविद्धो भवत्युपतापी सन्ननुपतापी भवतित स्य
ध्यापीदं भगवतः शरीरमंधं भवत्यनंधः स भवतीत्यादिश्रुतिर्देहाभिमानप्रयुक्तांधत्वादीन् दोषान् सुप्तौ निवारयतीत्या
ध्यादिना पीड्यमानस्यापि सुप्तौ तत दुःखानुभवो नास्तीत्येतत्सर्वजनप्रसिद्धं चेत्यर्थः ३४ ७

ननु यत्र दुःखाभावस्तत्र सुखमित्यस्याः व्याप्तेर्लोष्टादौ व्यभिचार इति शंकते न दुःखेति दुःखाभावमात्रेण सुखं कल्पयि
तुं न शक्यते लोष्टशिलादिषु दुःखाभावस्य सुखदुःखयोरभावस्य दर्शनादित्यर्थः दृष्टांतदार्ष्टांतिकयोर्वैषम्यान्मैवमिति
परिहरति वचो दृष्टांतवचनं विषमं दार्ष्टांतिकाननुसारीत्यर्थः ३५ दृष्टांतस्याननुकूलत्वमेवोपपादयति सुखेति अन्य
निष्ठयोः दुःखसुखयोरूहनं यथाक्रमं सुखदैन्यविकाशाभ्यां लिंगाभ्यां कर्तव्यं अयं दुःखी विषण्णवदनत्वात् संप्रतिपन्नव
त् अयं सुखी प्रसन्नवदनत्वात् संप्रतिपन्नवत् इत्यर्थः भवत्वेवं लोके प्रकृते किमायातमित्यत आह दैन्येति लोष्टादौ मुख
दैन्यादिलिंगाभावात् दुःखसुखयोरूहनमेव न संभवति अतस्तत्र दुःखाभावोपि न निश्चेतुं शक्यत इत्यर्थः ३६

न दुःखाभावमात्रेण सुखं लोष्टशिलादिषु द्वयाभावस्य दृष्टत्वादिति चेद्विषमं वचः ३५ मुखदैन्यवि
काशाभ्यां परदुःखसुखोहनं दैन्याद्यभावतो लोष्टे दुःखाद्यूहो न संभवेत् ३६ स्वकीयसुखदुःखे तु
नोहनीये ततस्तयोः भावो वेद्योनुभूत्यैव तदभावोपि नान्यतः ३७ तथा सति स्वसुप्तौ च दुःखाभावोनु
भूतितः विरोधिदुःखराहित्यात्सुखं निर्विघ्नमिष्यतां ३८

इदानीं परकीयसुखदुःखाभ्यां स्वकीयसुखदुःखयोर्वैषम्यं दर्शयति स्वकीयेति स्वनिष्ठयोस्तु सुखदुःखयोरनुभ
वसिद्धत्वान्नानुमेयत्वं यतस्ततस्तयोर्भावः सद्भावो यथानुभूत्यैव वेद्यः प्रत्यक्षेणावगम्यते तथा तदभावोपि तयोः सुख
दुःखयोः अभावोप्यन्यतोन्यस्मादनुमानादेर्नावगम्यते किंतु प्रत्यक्षेणैवेत्यर्थः ३७ फलितमाह तथा सतीति तथा सति
स्वकीयस्य दुःखादेरनुभवगम्यत्वे सति स्वसुप्तौ स्वकीयसुप्तावपि विद्यमानो दुःखाभावोनुभवेनैव सिद्धः ततोपि किं त
त्राह विरोधीति सुप्तौ सुखविरोधिनो दुःखस्याभावात्तन्निर्विघ्नं बाधरहितं सुखमिष्यतामभ्युपेयतां ३८

237/1958

पं० द०

८ शय्यादिसुखसाधनसंपादनान्यथानुपपत्यापि सुप्तौ सुखमस्तीत्यवगम्यत इत्याह महत्तरेति तत्र तस्यां सुप्तौ सुखं नभ
वेच्चेन्महत्तरप्रयासेन बहुवित्तव्ययशरीरपीडनादिना मृदुलं शय्यादिकं शिपुमंचादिसाधनं सुखसाधनं कुतः कस्मात्कारणा
त्संपाद्यतेन कुतोपीत्यर्थः ३९ अर्थापत्तेरन्यथोपपत्तिं शंकते दुःखेति एतच्छय्यादिसाधनसंपादनं दुःखनिवृत्तिफलकं न
नियतमिति परिहरति रोगिणइति रोगादिदुःखे सति तन्निवृत्तये तद्भवतु तदभावे तु निवर्त्यदुःखाभावात् तत्संपाद
नं सुखार्थमेवेत्यवगम्यत इत्यर्थः ४० ननु सौषुप्तसुखस्य शय्यादिसाधनजन्यत्वे आत्मस्वरूपत्वं व्याहन्येतेति शंकते
तर्हीति किं निद्रागमनात्पूर्वकालीनस्य विषयजन्यत्वमुच्यते उत निद्राकालीनस्येति विकल्प्याद्यमंगीकरोति भवत्वि

महत्तरप्रयासेन मृदुशय्यादिसाधनं कुतः संपाद्यते सुप्तौ सुखं चेत्तत्र नो भवेत् ३९ दुःखनाशार्थमेवैतदि
ति चेद्रोगिणस्तथा भवत्वरोगिणस्त्वेतत्सुखार्थमेवेति निश्चितं। ४० तर्हि साधनजन्यत्वात्सुखं वैषयिकं भवे
त् भवत्वेवात्र निद्रायाः पूर्वं शय्यासनादिजं ४१ निद्रायां तु सुखं यत्तु तज्जन्यते केन हेतुना सुखाभिमुखधी
रादौ पश्चान्मज्जेत्परे सुखे ४२ जाग्रद्व्यापृतिभिः श्रान्तो विश्रम्याथ विरोधिनि अपनीते स्वस्थचित्तोनुभवेद्विष
ये सुखं ४३

ति ४१ द्वितीयं निराकरोति निद्रायामिति सुषुप्तौ शय्याद्यनुसंधानाभावात् तज्जन्यं चेत्तस्य न भवतीति भावः ननु निद्रा
यां भजन्यं सुखं यद्यस्ति तर्हि तद्विषयसुखवत् कुतो नानुभूयत इत्याशंक्यानुभवितुस्तदा तस्मिन्निमग्नत्वान्न विषयसुख ८
वत् तदनुभव इत्यभिप्रायेणाह सुखेति आदौ निद्रायाः पूर्वस्मिन्काले जीवः सुखाभिमुखधीः शय्यादिजन्यसुखाभिमुखा
बुद्धिर्यस्य न तथोक्तस्तथाविधो भवति पश्चान्निद्राकाले परे उत्कृष्टे सुखे स्वरूपसुखे निमज्जेद्विलीनो भवेत् ४२ संक्षेपेणोक्त
मर्थं श्लोकत्रयेण प्रपंचयति जाग्रदिति जीवः जाग्रद्व्यापृतिभिः जागरणावस्थायाः क्रियमाणैर्व्यापारविशेषैः श्रान्तो विश्र
म्य मृदुशय्यादौ शयनं कृत्वा अथानंतरं विरोधिव्यापारजनितदुःखे अपनीते निवारिते सति स्वस्थचित्तः अव्याकुलमनाभू
त्वा शय्यादौ विषये जायमानं सुखमनुभवेत् साक्षात्कुर्यात् ४३

विषयसुखं कीदृशमित्याकांक्षायां तत्स्वरूपं दर्शयन् परे सुखे निमज्जननिमित्तत्वेन तदनुभवेपि श्रमं दर्शयति आत्माभिमुखेति
अनागतविषयसंपादनादिना दुःखमनुभूय तन्निवृत्तये मृदुशय्यादौ शयानस्य बुद्धिरंतर्मुखा भवति तस्यां च बुद्धिवृत्तौ सरूप
भूत आनंदः स्वाभिमुखे दर्पणे मुखमिव प्रतिबिंबति एष हि विषयानंदो त्रापि अस्यामपि वेलायां एवं विषयानंदमनुभूय अनु
भवित्रनुभवानुभाव्यलक्षणया त्रिपुट्या श्रमं प्राप्नुयात् ४४ ततः किं तत्राह तच्छ्रमस्येति तस्य त्रिपुटीदर्शनजनितस्य
श्रमस्य अपनोदाय स एव जीवः परमात्मात्मन्यानंदरूपे ब्रह्मणि धावेत् शीघ्रं गच्छेत् गत्वा च तेन ब्रह्मणैक्यं तादात्म्यं गत्वा स
ता सोम्य तदा संपन्नो भवतीति श्रुतेः स्वयमपि तत्रत्यस्तस्यां सुषुप्तौ स्थितो ब्रह्मानंदो भवेत् ४५ अस्मिन्नुपपादिते सौषु

आत्माभिमुखधीवृत्तौ स्वानंदः प्रतिबिंबति अनुभूयैनमत्रापि त्रिपुट्या श्रान्तमाप्नुयात् ४४ तच्छ्रमस्यापनु
त्त्यर्थं जीवो धावेत्परात्मनि तेनैक्यं प्राप्य तत्रत्यो ब्रह्मानंदः स्वयं भवेत् ४५ दृष्टान्ताः शकुनिश्येनः कुमारश्च म
हानृपः महाब्राह्मण इत्येते सुप्त्यानंदे श्रुतीरिताः ४६ शकुनिः सूत्रबद्धः सन् दिक्षु व्याप्त्य विश्रमं अलब्ध्वा
बंधनस्थानं हस्तस्तंभाद्युपाश्रयेत् ४७

प्त आनंदे शकुन्यादयो बहवो दृष्टान्ताः श्रुत्युक्ता विद्यंत इत्याह दृष्टान्ता इति शकुन्यादिभिः पंचभिर्दृष्टान्तैः सुप्तावानंदोपपादने
न तत्र सुखं नास्तीति मतं निराकृतं ४६ तत्र तावत्स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा
बंधनमेवोपाश्रयत एवमेव खलु सोम्य तन्मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपाश्रयते प्राणबंधनं हि
सोम्य मन इत्यस्य दृष्टान्तदार्ष्टान्तिकप्रतिपादनपरस्य छांदोग्यश्रुतिवाक्यस्यार्थं संक्षेपेण दर्शयति श्लोकद्वयेन शकुनिरित्या
दिना हस्तादौ कस्मिंश्चिदाधारे सूत्रेण बद्धः शकुनिः पक्षी आहारादिग्रहणाय दिक्षु प्राच्यादिषु व्यापारं कृत्वा तत्र विश्रमं विश्र
म्यते अस्मिन्निति विश्रमः आधारस्तमलब्ध्वा बंधनस्थानं हस्तादिकमेव यथाश्रयेत् ४७

239
1938

पं॰ द॰ तथा जीवोपाधिभूतं मनोपि पुण्यापुण्यफलयोः सुखदुःखयोरनुभवाय स्वप्नजाग्रदवस्थयोस्तत्र तत्र भ्रांत्वा भोगप्रदे कर्म ग्रं॰ न॰
णि क्षीणे सति स्वोपादाने ज्ञाने विलीयते तल्लये च तदुपहितो जीवः परमात्मैव भवतीत्यर्थः ४८ इदानीं श्येनदृष्टांतप्रपंचनप
१ रस्य तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रांतः संहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरुष एतस्मा अं
ताय धावति यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यतीत्यस्य बृहदारण्यवाक्यस्यार्थं संक्षिप्याह श्येन इ
ति यथाकाशे सर्वतः प्रचरन् श्येन एतन्नामा पक्षी गगने संचारनिमित्तश्रमपरिहाराय शायितुं शयनं कर्तुं नीडैकलं
पटः कुलायैकाभिलाषवान् व्रजेच्छीघ्रं गच्छेत् तद्वदेव जीवो मनउपाधिकश्चिदाभासोपि ब्रह्मानंदैकाभिलाषवान्
जीवोपाधिर्मनस्तद्वद्धर्माधर्मफलाप्तये स्वप्नजाग्रतिच भ्रांत्वा क्षीणे कर्मणि लीयते ४८ श्येनो वेगेन नीडैक
लंपटः शायितुं व्रजेत् जीवः सुप्त्यै तथा धावेत् ब्रह्मानंदैकलंपटः ४९ अतिबालस्तनं पीत्वा मृदुशय्या
गतो हसन् रागद्वेषाद्यनुत्पत्तेरानंदैकस्वभावभाक् ५० महाराजः सार्वभौमः संतृप्तः सर्वभोगतः मानुषा
नंदसीमानं प्राप्यानंदैकमूर्तिभाक् ५१ महाविप्रो ब्रह्मवेदी कृतकृत्यत्वलक्षणां विद्यानंदस्य परमां काष्ठां
प्राप्यावतिष्ठते ५२
पायशीघ्रं गच्छेद् हृदयाकाशमिति शेषः ४९ स यथा कुमारो वा महाराजो वा महाब्राह्मणो वातिघ्नीमानंदस्य गत्वा शयीतै
वमेवैष एतच्छेत इति कुमारादिदृष्टांतत्रयप्रदर्शनपरं बृहदारण्यकब्राह्मणगतं वाक्यं श्लोकत्रयेण व्याचष्टे अतिबाल
इत्यादिना यथा स्तनंधयः शिशुरागलस्तनं पीत्वा मृदुशय्यागिनी तल्पे शायितः स्वकीयादिज्ञानशून्यत्वेन रागादिरहि
तः सन् सुखमूर्तिः खलु तिष्ठते ५० यथा सार्वभौमो राजा विशारदबुद्धित्वेपि सर्वैर्मानुषानंदैर्युक्तत्वात् स्वार्थयाभावेन रा
गादिरहितआनंदमूर्तिरेवावतिष्ठते ५१ यथा वा महाविप्रो महाब्राह्मणः प्रत्यगभिन्नब्रह्मसाक्षात्कारवानहं कृतकृत्य
इत्येवंरूपां विद्यानंदस्य परमां सीमां जीवन्मुक्ततां प्राप्तः परमानंदस्वरूप एवातिष्ठते तथा सुप्तोप्यानंदरूपस्तिष्ठतीति शे
षः ५२

241
1938

नन्वेते कुमारादयस्त्रय एव किमिति दृष्टांतीकृताः नान्य इति आशंक्य दृष्टांतत्रयोदाहरणतात्पर्यमाह मुग्धेति विवेकशून्यानां
मध्ये तिबालः सुखी विवेकिषु सार्वभौमः अतिविवेकिषु आनंदात्मसाक्षात्कारवानेव इतरे तु सर्वदा रागादिमत्वाद्दुःखि
न इति न दृष्टांतीकृता इत्यर्थः ५३ भवंत्वेते सुखिनः प्रकृते किमायातमित्याशंक्य दार्ष्टांतिकश्रुतिवाक्यस्य तात्पर्यमाह कु
मारादिवदिति कुमारादिवत् कुमारादयो यथा आनंदभाज एवमयमपि सुषुप्तः ब्रह्मानंदैकतत्परः ब्रह्मानंदैकभागीत्यर्थः
ब्रह्मानंदैकपरत्वयुक्तिप्रदर्शनपरं तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमेवमेवायं पुरुषः प्राज्ञेनात्मनासंप
रिष्वक्तो न बाह्यं किंचन वेद नांतरमिति ज्योतिर्ब्राह्मणगतं वाक्यमर्थतोनुक्रामति स्त्रीति यथा लोके प्रियया स्त्रिया लिंगितः का

मुग्धबुद्धातिबुद्धानां लोके सिद्धा सुखात्मता उदाहृता नामन्ये तु दुःखिनो न सुखात्मकाः ५३ कुमारादिवदेवा
यं ब्रह्मानंदैकतत्परः स्त्रीपरिष्वक्तवद्वेद न बाह्यं नापि चांतरं ५४ बाह्यं रथ्यादिकं वृत्तं गृहकृत्यं यथांतरं त
था जागरणं बाह्यं नाडिस्थः स्वप्न आंतरः ५५ पिता पि सुप्तावपितेत्यादौ जीवत्ववारणात् सुप्तो ब्रह्मैव नो जीवः सं
सारित्वासमीक्षणात् ५६

मी बाह्याभ्यंतरविषयज्ञानशून्यत्वात्सुखमूर्तिर्भवति तथा सुप्तोप्राज्ञेन परमात्मनैक्यं गतो जीवो बाह्यादिविषयज्ञाना
भावात् आनंदरूप एव भवति ५४ अत्र दृष्टांतदार्ष्टांतिकवाक्यस्थयोर्बाह्याभ्यंतरशब्दयोर्विवक्षितमर्थं क्रमेण दर्शयति बा
ह्यमिति वृत्तं वृत्तांतः नाडीस्थः जाग्रद्वासनया नाडीमध्ये प्रतीयमानः प्रपंचः स्वप्न इत्युच्यते ५५ जीवः सुप्तो ब्रह्मानंदरूपेणै
वावतिष्ठत इत्यत्र युक्तिप्रदर्शनपरया अत्र पितापिता भवतीत्यादिकायाः श्रुतेस्तात्पर्यमाह पितापीति अत्र सुप्तो अध्या
सिकानां पितृत्वादिजीवधर्माणां श्रुत्यैव निवारितत्वात् जीवत्वाप्रतीतौ ब्रह्मत्वेनैव शिष्यत इत्यर्थः ५६ ६७

पं० ८० नतुपितृत्वाद्यभिमानाभावेपिसुखित्वादिसंसारः किंनस्यादित्याशंक्यसंसारस्यदेहाभिमानमूलत्वात्तदभावेनतदभावइतिमत्वा अ० मं०
१० नन्वत्र पितृत्वादिति ५७ ननुदाहृता
नन्वत्प्रतिपादकंतीर्णोहितदासर्वाञ्छोकान्हृदयस्यभवतीतिममानंतरवाक्यंतात्पर्यतोव्याचष्टे पितृत्वादिति ५७ नन्वदाहृता
भिःश्रुतिभिर्नसुखत्राभिर्मुखताभिधीयमानोपलभ्यतइत्याशंक्यतथाभिधानपरंकैवल्यश्रुतिवाक्यंअर्थतःपठति सुषुप्तीति स
कुले जाग्रदादिलक्षणेप्रपंचेविलीनेस्वोपादानभूतायांतमःप्रधानायांप्रकृतौविलयंगतेसतितमसातयाप्रकृत्याआवृतआच्छादि
तोजीवःसुखरूपंब्रह्मोपैतीतिस्याःश्रुतेरर्थः ५८ नकेवलमयंश्रुतिसिद्धोर्थः किंतुसर्वानुभवसिद्धोपीत्याह सुखमिति
सुषुप्तादुत्थितःपुरुषःएतावंतंकालंसुखमहमस्वाप्संनकिंचिदवेदिषमित्येवंनिद्राकालीनेसुखाज्ञानेपरामृशतिस्मरति अ

पितृत्वाद्यभिमानोयःसुखदुःखाकरःसहि तस्मिन्नपगतेतीर्णःसर्वाञ्छोकान्भवत्ययं ५७ सुषुप्तिकालेस
कुलेविलीनेतमसावृतः सुखरूपमुपैतीतिब्रूतेह्याथर्वणीश्रुतिः ५८ सुखमस्वाप्समत्राहंनैवकिंचिदवेदिषं
इतिसुप्तेःसुखाज्ञानेपरामृशतिचोत्थितः ५९ परामर्शोनुभूतेस्तीत्यासीदनुभवस्तदा चिदात्मत्वात्स्वतोभा
तिसुखमज्ञानधीस्ततः ६०

तोपिसुषुप्तौसुखमस्तीतिअवगम्यते ५९ ननुपरामर्शस्याप्रमाणत्वात्कथंतद्बलात्सुखसिद्धिरित्याशंक्यतस्याप्रामाण्येपि १०
तन्मूलभूतानुभवबलात्तत्सिद्धिरित्यभिप्रायेणाह परामर्षइति परामर्शःस्मरणज्ञानंअनुभूतएवविषयेभवतिनाननुभूते
विषयइत्यस्माद्धेतोस्तदासुप्तौअनुभवआसीदित्यवगम्यते ननुसुप्तौमनःसहितानांज्ञानकरणानांविलीनत्वात्कथमनुभव
सिद्धिरित्याशंक्यकिंसुखानुभवसाधनंनास्तीत्युच्यतेज्ञानानुभवसाधनंवानाद्यःस्वप्रकाशचिद्रूपत्वेनसुखस्यकरणान
पेक्षत्वात्नद्वितीयःस्वप्रकाशसुखबलादेवतदावरकाज्ञानप्रतीतिसिद्धेरित्यभिप्रायेणाह चिदात्मत्वादिति ततःस्व
प्रकाशसुखादज्ञानधीरज्ञानस्यप्रतीतिर्भवतीति ६० ६२ ६२ ६२

ननुसौषुप्तसुखस्यस्वप्रकाशसुखत्वेपिअस्यानंदःस्वयंभवेदित्युक्तंब्रह्मरूपत्वंनसंभवतिमानाभावादित्याशंक्यविज्ञानमानंद
मित्यादिबृहदारण्यवाक्यसद्भावान्मैवमित्याह ब्रह्मेति ६१ नन्वनुभवस्मरणयोरेकाधिकरणत्वनियमात्सुखमहमस्वाप्संनकिं
चिदवेदिषमितिचसौषुप्तसुखाज्ञानयोर्विज्ञानमयशब्दवाच्येनजीवेनस्मर्यमाणत्वात्तस्यैवसुखाद्यनुभवितृत्वंवक्तव्यमित्या
शंक्यतदुपाधेर्विज्ञानस्याज्ञानकार्यस्याज्ञानेविलीनत्वान्मैवमित्यभिप्रायेणाह यदज्ञानमिति नकिंचिदवेदिषमितिस्मरणा
न्यथानुपपत्त्यागम्यमानंयदज्ञानमस्तितत्रतस्मिन्नज्ञानेतौप्रमातृप्रमाणत्वेनप्रसिद्धौविज्ञानमनोमयौलीनौविज्ञानत्वाद्याकारंप
रित्यज्यकारणरूपेणावस्थितौ अतस्तदुपाधिकस्यनानुभवितृत्वमितिभावः तत्रोपपत्तिमाह तयोर्हीति हियस्मात्कारणा

ब्रह्मविज्ञानमानंदमितिवाजसनेयिनः पठंत्यतःस्वप्रकाशंसुखंब्रह्मैवनेतरत् ६१ यदज्ञानंतत्रलीनौतौवि
ज्ञानमनोमयौ तयोर्हिविलयावस्थानिद्राज्ञानंचसैवहि ६२ विलीनघृतवत्पश्चात्स्याद्विज्ञानमयोघनः वि
लीनावस्थआनंदमयशब्देनकथ्यते ६३

त्तयोर्विज्ञानमनोमययोर्विलयावस्थानिद्रेत्युच्यते विज्ञानविरतिःसुषुप्तिरित्यभिधानात् तर्हिनिद्रायामेवविलीनावितिव
क्तव्यमित्याशंक्याह अज्ञानंचेति सैवनिद्राविद्भिरज्ञानमितिव्यवह्रियतइत्यर्थः ६२ ननुतर्हिसौषुप्तसुखाद्यनुभव
कालेसतोविज्ञानमयस्यप्रबोधेकथंतत्स्मर्तृत्वमित्याशंक्यविलयावस्थायामपितत्स्वरूपनाशाभावाद्विलयावस्थोपाधिम
दानंदमयरूपेणानुभवितृत्वंविज्ञानमयशब्दवाच्यघनीभावोपाधिमत्वेनस्मर्तृत्वंचएकस्यघटतइत्यभिप्रायेणाह विली
नेति यथाग्निसंयोगादिनाविलीनंघृतंपश्चाद्धिम्यादिसंबंधवशात्घनीभवत्येवंजाग्रदादिभोगप्रदस्यकर्मणःक्षयवशान्नि
द्रारूपेणविलीनमंतःकरणंपुनर्भोगप्रदकर्मवशात्प्रबोधेविज्ञानाकारेणघनीभवत्यतः तदुपाधिकात्मापिविज्ञानमयो
घनःस्यात्सएवपूर्वंविलयावस्थोपाधिकःसन्नानंदमयइत्युच्यते ६३ ६२ ६२

243
1438

११ विलीनावस्थ आनंदमय इत्युक्तमेवार्थं स्फुटीकरोति सुप्तीति सुप्तेः पूर्वस्मिन्नव्यवहिते क्षणे या अंतर्मुखा बुद्धिवृत्तिः स्वरूप
विलीनावस्था आनंदमय इत्युक्तमेवार्थं स्फुटीकरोति सुप्तेः पूर्वस्मिन्नव्यवहितेक्षणे या अंतर्मुखा बुद्धिवृत्तिः स्वरूप
भूत सुखप्रतिबिंबयुक्ता भवति ततोऽनंतरं तत्प्रतिबिंबसहिता सैव वृत्तिर्निद्रारूपेण विलीना आनंदमय इत्यभिधीयते ६४
एवमानंदमयस्वरूपं प्रदर्श्य तस्यैव प्रबोधकाले विज्ञानमयरूपेण स्मर्तृत्वसिद्ध्ये तदानीं सुखानुभवमुपपादयति अंत
र्मुख इति सुखप्रतिबिंबसहितांतर्मुखधीवृत्तिजनितसंस्कारसहिताज्ञानोपाधिकोयआनंदमयस्तदा सुषुप्तौ ब्रह्मसुखं
स्वरूपभूतं सुखं चिदाभाससहिताभिरज्ञानादुत्पन्नाभिः सुखादिगोचरादिवृत्तिभिः सत्वपरिणामविशेषैर्भुंक्ते नुभ
वति ६५ ननु तर्हि जागरण इव तदानीं सुखमनुभवामीत्यभिमानः कुतो न स्यादित्याशंक्याविद्यावृत्तीनां बुद्धिवृत्तिवत्स्पष्ट

सुप्तिपूर्वक्षणे बुद्धिवृत्तिर्या सुखबिंबिता सैव तद्बिंबसहिता लीनानंदमयस्ततः ६४ अंतर्मुखो य आनंदम
यो ब्रह्मसुखं तदा भुंक्ते चिद्बिंबयुक्ताभिरज्ञानोत्पन्नवृत्तिभिः ६५ अज्ञानवृत्तयः सूक्ष्मा विस्पष्टा बुद्धिवृ
त्तयः इति वेदांतसिद्धांतपारगाः प्रवदंति हि ६६ मांडूक्यतापनीयादिश्रुतिष्वेतदतिस्फुटं आनंदमयभो
क्तृत्वं ब्रह्मानंदस्य भोग्यता ६७ एकीभूतः सुषुप्तस्थः प्रज्ञानघनतां गतः आनंदमय आनंदभुक् चेतोमयवृत्ति
भिः ६८

ताभावादित्यभिप्रायेणाह अज्ञानेति इदं कुतोवगतमित्यत आह इतीति ६६ ननु आनंदमयो ब्रह्मानंदं सूक्ष्माभिरविद्या ११
वृत्तिभिर्भुंक्त इत्यत्र किं मानं इत्यत आह मांडूक्येति एतच्छब्दार्थमाह आनंदमयेति ६७ इदानीं सुषुप्तस्थान एकीभूतः
प्रज्ञानघन एवानंदमयो ह्यानंदभुक् चेतोमुख इति मांडूक्यादिश्रुतिगतं वाक्यमर्थतः पठति एकीभूत इति सुषुप्तं सुषुप्तिः
तत्रातिष्ठतीति सुषुप्तस्थः सुषुप्त्यभिमानीत्यर्थः आनंदमय आनंदप्रचुर आनंदभुक् स्वरूपभूतमानंदं भुंक्त इत्या
नंदभुक् चेतोमयवृत्तिभिः चेतः चैतन्यं तन्मयास्तत्प्रचुराश्चित्प्रतिबिंबसहिता इत्यर्थः ताश्च वृत्तयस्ताभिरा
नंदभुगिति योजना ६८ ॥ ॥

245 / 1938

तद्वाक्यगतस्यैकीभूत इति पदस्यार्थमाह विज्ञानेति य आत्मा पुरा जागरणावस्थायां विज्ञानमयमुख्यैः स वा अयमात्मा
ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथ्वीमय आपोमयो वायुमय आकाशमयस्तेजोमयोतेजो
मयः काममयोकाममयः क्रोधमयोक्रोधमय इत्यादिश्रुत्युक्तैः रूपैराकारविशेषैर्युक्तोभूत्स एवाधुना लयेन विज्ञान
मयाद्युपाधिविलयेनैकतामेकाकारतां प्राप्तो गतो भवति तत्र दृष्टांतमाह बहुतंदुलेति बहुतंदुलजनितपिष्टव
दित्यर्थः ६९ अथ प्रज्ञानघनशब्दार्थमाह प्रज्ञानानीति पुरा पूर्वं जाग्रदादौ प्रज्ञानशब्दवाच्यघटादिगोचराः याबु
द्धिवृत्तयो भवन्नथ सुषुप्तिकाले घटादिविषयाभावे सति घनोभवच्चिद्रूपेणैकरूपोभूत् अत्र दृष्टांतमाह घनत्वमि

विज्ञानमयमुख्यैर्यो रूपैर्युक्तः पुराधुना स लयेनैकतां प्राप्तो बहुतंदुलपिष्टवत् ६९ प्रज्ञानानि पुरा बु
द्धिवृत्तयोथ घनोभवत् घनत्वं हिमबिंदूनामुदग्देशे यथा तथा ७० तद्घनत्वं साक्षिभावं दुःखाभावं प्रचक्ष
ते लौकिकास्तार्किका यावत् दुःखवृत्तिविलोपनात् ७१ अज्ञानबिंबिता चित्स्यान्मुखमानंदभोज
ने भुक्तं ब्रह्मसुखं त्यक्त्वा बहिर्यात्यथ कर्मणा ७२

ति ७० इदानीं प्रज्ञानघनशब्दार्थनिरूपणप्रसंगादागतं किंचिदाह तद्घनत्वमिति यदिदं वेदांतेषु साक्षित्वेनाभिधीयमानं प्र
ज्ञानघनत्वमस्ति तदेव लौकिकाः शास्त्रसंस्काररहिताः तार्किकावैशेषिकादयः शास्त्रिणश्च दुःखाभावं प्रचक्षते दुःखाभाव
इत्याहुः कुत इत्यत आह यावदिति यावत्यो दुःखवृत्तयस्तासां सर्वासां विलयादित्यर्थः ७१ पूर्वोदाहृतश्रुतिवाक्यगतचेतो
मुखशब्दार्थमाह अज्ञानेति आनंदभोजने सौषुप्तब्रह्मानंदस्वादने मुखं साधनमज्ञानबिंबिता चित्स्यादज्ञानवृत्तौ प्रति
बिंबितं चैतन्यमेव भवेत् ननु सुषुप्तावानंदमयरूपेण जीवेन ब्रह्मसुखं चेद्भुज्यते तर्हि तत्परित्यज्य कुतो जागरणं दुःखा
लयं गच्छेदित्यत आह भुक्तमिति पुण्यापुण्यकर्मपाशबद्धत्वात्तेन प्रेरितो जीवः साक्षात्कृतमपि ब्रह्मानंदं परित्यज्याथ ब
हिर्याति जागरणादिकं गच्छतीत्यर्थः ७२

१२

एतत्कुतोवगम्यतइत्याशंक्य पुनश्च जन्मांतरकर्मयोगात्सएवजीवः स्वपितिप्रबुद्धः इतिकैवल्यश्रुतिवाक्यादितिमन्वानस्तद्वा
क्यमर्थतःपठंस्तदभिप्रायमाह कर्मेति ७३ सचैवब्रह्मानंदोनुभूयतइत्यत्रलिंगंचाह किंचिदिति प्रबुद्धस्यजागरणंप्राप्तस्या
पिकिंचित्कालंस्वल्पकालपर्यंतंसुषुप्तावनुभूतस्यब्रह्मानंदस्यवासनासंस्कारोनुगच्छेदनुगच्छति कुतएतदवगम्यतइ
त्यतआह यतइति यतःकारणात्प्रबोधादौनिर्विषयःविषयानुभवरहितोपिसुखीतूष्णीमास्तेतोवगम्यतइत्यर्थः
७४ तर्हितथैवतूष्णींकुतोनावतिष्ठतइत्यतआह कर्मभिरिति कर्मभिःपूर्वोक्तैःचोदितःसर्वोपिप्राणीपश्चात्त्वाविधानि
दुःखान्यनुसंधानःशनैर्ब्रह्मानंदंविस्मरति ७५ इतोपिब्रह्मानंदेनविप्रतिपत्तिःकार्येत्याहप्रागिति प्रत्यहंमनुष्याणांनि

कर्मजन्मांतरेभूद्यत्तद्योगाद्बुध्यतेपुनः इतिकैवल्यशाखायांकर्मजोबोधईरितः ७३ किंचित्कालंप्रबुद्धस्यब्रह्मा
नंदस्यवासना अनुगच्छेद्यतस्तूष्णीमास्तेनिर्विषयःसुखी ७४ कर्मभिःप्रेरितःपश्चान्नानादुःखानिभावयन् श
नैर्विस्मरतिब्रह्मानंदमेषोखिलोजनः ७५ प्रागूर्ध्वमपिनिद्रायाःपक्षपातोदिनेदिने ब्रह्मानंदेनृणांतेनप्रा
ज्ञोस्मिन्विवदेतकः ७६ ननुतूष्णींस्थितौब्रह्मानंदश्चेद्भातिलौकिकाः अलसाश्चरितार्थाःस्युःशास्त्रेणगुरुणात्रकिं ७७
बाढंब्रह्मेतिविद्युश्चेत्कृतार्थास्तावतैवते गुरुशास्त्रेविनात्यंतंगंभीरंब्रह्मवेत्तिकः ७८

द्रायाःप्रागूर्ध्वमपिनिद्रारंभेनिद्रावसानेचब्रह्मानंदेस्नेहोस्तियतोनिद्रादौमृदुशय्यादिसंपादयंति तदवसानेचतंपरित्यक्तुं १२
अशक्तास्तूष्णीमासतेतेनकारणेनास्मिन्नानंदेकोबुद्धिमान्विवदेतनकोपीत्यर्थः ७६ चोदयति नन्विति गुरुशुश्रूषा
दिलभ्यस्यब्रह्मानंदानुभवस्यतूष्णींस्थितिमात्रलभ्यत्वेगुरुशुश्रूषादिपूर्वकंश्रवणादिकंवृथास्यादित्यर्थः ७७ अयंब्र
ह्मानंदइतिज्ञानेसतिभवत्येवकृतार्थतातदेवगुरुदेवशुश्रूषादिकमंतरेणनसंभवतीत्याह बाढमिति अत्यंतंगंभीरं
दुरवगाहमवाङ्मनसगम्यंसर्वज्ञंसर्वांतरंसर्वात्मरूपंब्रह्मगुरुशास्त्रेविहायान्येनाप्युपायेनकोजानीयान्नकोपीत्यर्थः ७८

ननुत्वद्वाक्यादेवब्रह्मानंदंजानतोपिममनकृतार्थतोपलभ्यतइत्याशंकानुवादपूर्वकंसोपहासमुत्तरमाह जानामीति ७९
तमेवदृष्टांतंदर्शयति चतुर्वेदेति कश्चित्चतुर्वेदविदेकस्मैचिदिदंबहुधनंदातव्यमित्येवंविधंवाक्यंश्रुत्वावेदाश्चत्वार
इत्येतस्मादेववाक्यादहंवेद्मिअतोमेदीयतामितिवक्तितद्वत्भवानपीत्यर्थः ८० ननुवेदाश्चत्वारइतियोवेदसवेदगतां
संख्यामेवविंदनतुवेदानांस्वरूपमितिचोदयति संख्येति साम्येनसमाधत्ते नहीति एवंचतुर्वेदाभिज्ञंमन्यस्त्वत्वमप्य
शेषंसंपूर्णंयथाभवतितथाब्रह्मनवेत्सिनैवजानासि ८१ ननुसंख्यातिरिक्तवेदस्यस्वरूपभेदइवस्वगतादिभेदशू
न्यआनंदरूपेब्रह्मणिअज्ञायमानस्यांशस्याभावादसंपूर्णज्ञानित्वोपालंभोनघटतइति चोदयति अखंडेति ८२

जानाम्यहंत्वदुक्त्याद्यकुतोमेनकृतार्थता शृण्वत्रत्वादृशावृत्तंग्राम्यंमन्यस्यकस्यचित् ७९ चतुर्वेदविदेदेयमितिशृण्व
न्नवोचत वेदाश्चत्वारइत्येवंवेद्मिमेदीयतांधनं ८० संख्यामेवैषजानातिनतुवेदानशेषतः यदितर्हित्वमप्येवंना
शेषंब्रह्मवेत्सिहि ८१ अखंडैकरसानंदेमायातत्कार्यवर्जिते अशेषत्वसशेषत्ववार्तावसरएवकः ८२ शब्दानेव
पठस्याहोतेषामर्थंचपश्यसि शब्दपाठेर्थबोधस्तेसंपाद्यत्वेनशिष्यते ८३ अर्थेव्याकरणाद्बुद्धेसाक्षात्कारोव
शिष्यते स्यात्कृतार्थत्वधीर्यावत्तावद्गुरुमुपास्वभो ८४

ब्रह्मज्ञानेप्यशेषत्वादिकंदर्शयितुंब्रह्मजानामीतिवदंतंविकल्प्यपृच्छति किमखंडैकरसमद्वितीयंसच्चिदानंदरूपमित्यादि
शब्दानेवपठसिअहोअथवातेषांशब्दानांअर्थंस्वगतादिभेदशून्यत्वादिकंचपश्यसिजानासि इतिविकल्पार्थः आद्यप
क्षेसावशेषत्वंदर्शयति शब्दानिति ८३ द्वितीयेपिदर्शयति अर्थइति व्याकरणादिष्वुपलक्षणंनिगमादेः व्याकरणादि
नापरोक्षज्ञानेसंपादितेपिसंशयादिनिरासेनापरोक्षीकरणंअवशिष्यते तर्हिकदासंपूर्णत्वंज्ञानस्येत्याशंक्यतदवधिं
दर्शयतिस्यादिति यदाकृतार्थत्वबुद्धिरुत्पद्यतेतदाज्ञानस्यसंपूर्णतावगंतव्येत्यर्थः ८४ ६२

एवं प्रासंगिकं परिसमाप्य प्रकृतमेवानुसरति आस्तामिति यत्रयत्र यस्मिन्यस्मिन्काले तूष्णींभावादौ विषयानुभवमंतरेण सु
खं भवति तत्रतत्र सुखस्य विषयजन्यत्वाभावात्तामान्याहंकारावृत्तत्वाच्च वासनानंदत्वमवगंतव्यमित्यर्थः ८५ एवं ब्रह्मानं
१२ दवासनानंदौ दर्शयित्वा इदानीमानंदत्रैविध्यनियमनाय आत्माभिमुखधीवृत्तावित्यत्रोक्तमेव विषयानंदं पुनरनुवदति विष
ये ष्विति यदा यदा स्रगादिविषयलाभात्तदिच्छोपरमो भवति तदा तदा मनस्यंतर्मुखे सति तस्मिन्यः स्वात्मानंदः प्रतिबिंबि
तो भवत्ययं विषयानंद इत्यर्थः ८६ फलितमाह ब्रह्मानंद इति उक्तप्रकारेण स्वप्रकाशतया सुषुप्तौ प्रतिभासमानो यो ब्रह्मा
नंदो यश्च तूष्णींस्थितौ विषयानुभवमंतरेण प्रतीयमानो वासनानंदो योप्यभीष्टविषयलाभादंतर्मुखे मनसि प्रतिबिंबितो

आस्तामेतद्यत्र यत्र सुखं स्याद्विषयैर्विना तत्र सर्वत्र विध्येतां ब्रह्मानंदस्य वासनां ८५ विषयेष्वपि लब्धेषु
तदिच्छोपरमे सति अंतर्मुखमनोवृत्तावानंदः प्रतिबिंबति ८६ ब्रह्मानंदो वासना च प्रतिबिंब इति त्रयं
अंतरेण जगत्यस्मिन्नानंदो नास्ति कश्चन ८७

विषयानंदः एतत्त्रितयातिरेकेणास्मिन् जगति न कश्चिदानंदोस्ति ननु आनंदस्त्रिविधो ब्रह्मानंदो विद्यासुखं तथा विषया
नंद इत्यनेन प्रकारेणानंदत्रैविध्यमुक्तमिदानीं ब्रह्मानंदो वासना च प्रतिबिंब इति त्रयं इति तद्विलक्षणमानंदस्य त्रैविध्य
मुच्यते ततः पूर्वोत्तरविरोधः किं च यावद्यावदहंकारो विस्मृतोभ्यासयोगतः तावत्तावत्सूक्ष्मदृष्टेर्निजानंदोनुमीयत इति १२
तारकं पुमान् उदासीनकाले प्यानंदवासनां उपेक्ष्य मुख्यमानंदं भावयत्येव तत्पर इति चोक्तप्रकारद्वयातिरिक्तौ निजानंद
मुख्यानंदावभिधीयेते तथा द्वितीयाध्याये मंदप्रज्ञं तु जिज्ञासुमात्मानंदेन बोधयेदित्यात्मानंदस्ततोन्योभिधीयते योगा
नंदः पुरोक्तो यः इत्यत्र योगानंदोपि कश्चिदवभासते ब्रह्मानंदाभिधे ग्रंथे तृतीयाध्याय ईरितः अद्वैतानंद एव स्यादित्यत्र
अद्वैतानंदश्चान्यमवगच्छामः अतः अंतरेण जगत्यस्मिन्नानंदो नास्ति कश्चनेत्युक्तिर्विरुद्धेति चेन्नैवं विद्यानंदस्य वि

षयानंदवत् अंतःकरणवृत्तिविशेषत्वेन विषयानंदेंतर्भावस्य विषयानंदवद्विद्यानंदो धीवृत्तिरूपक इत्युत्तरग्रंथे धीवृत्तिरू
पत्वाभिधानेन विवक्षितत्वात् निजानंदमुख्यानंदात्मानंदयोगानंदाद्वैतानंदानां तु ब्रह्मानंदादनतिरिक्तत्वाच्च तथा हि
यावद्यावदहंकार इत्युदाहृते श्लोके योगलक्षणोपायगम्यतया योगानंदत्वेन विवक्षितस्य निजानंदस्यैव न द्वैतं भासते
नापि निद्रा तत्रास्ति यत्सुखं स ब्रह्मानंद इत्याह भगवानर्जुनं प्रतीत्यस्मिन्नुत्तरश्लोक एव ब्रह्मानंदत्वाभिधानान्निजा
नंदो ब्रह्मानंदान्नभिद्यते तथा मुख्यानंदोपि ब्रह्मानंद एव तथा च विषयानंदो वासनानंद इत्ययं आनंदो जनयन्नास्ते
ब्रह्मानंदः स्वयंप्रभ इत्यत्र जन्यत्वेनामुख्यभूतयोर्विषयानंदवासनानंदयोर्जनकत्वेनाभिहितस्य ब्रह्मानंदस्यैव
तादृक्पुमानुदासीनकालेपीत्युदाहृत एव श्लोके आनंदवासनां उपेक्ष्य मुख्यानंदं भावयत्येव तत्पर इति मुख्यानंद
त्वाभिधानात् आत्मानंदाद्वैतानंदयोस्तु ब्रह्मानंदत्वं योगानंदः पुरोक्तो यः स आत्मानंद इष्यतामिति तृतीयाध्या
यादौ प्रथमाध्याये योगानंदतया विवक्षितस्य ब्रह्मानंदस्यैव योगानंदशब्देनानुवादपूर्वकमात्मानंदतामभिधा
य कथं ब्रह्मत्वमेतस्य सद्वयस्येति चेदिति प्रश्नपूर्वकमाकाशादिशरीरांतमित्यादिना द्वितीयस्य ब्रह्मत्वप्रतिपाद
नादवगंतव्यं तस्मात् ब्रह्मानंदो वासना च प्रतिबिंब इत्युक्तत्रैविध्यं सुस्थं ननु तर्हि नन्वेवं वासनानंदात् ब्रह्मा
नंदादपीतरं वेत्तु योगी निजानंदमित्यत्र निजानंदस्य ब्रह्मानंदवासनानंदाभ्यां भेदेन निर्देशो न युज्यत इति न शंक
नीयं एकस्यैव ब्रह्मानंदस्य जगत्कारणत्वोपाधिसाहित्यराहित्यभेदेन भेदव्यपदेशोपपत्तेः तथा हि ब्रह्मानंदनि
रूपणावसरे आनंदादेव भूतानि जायंत इत्यादिना जगत्कारणत्वाभिधानेन ब्रह्मानंदस्य समायत्वमवगम्यते निर्मायस्य
जगत्कारणत्वानुपपत्तेः निजानंदनिरूपणकालेपि यावद्यावदहंकार इत्यादिना सकारणस्याहंकारस्य विलय
प्रतिपादनात् निजानंदस्य निर्मायत्वमिति सर्वमनवद्यं ८७ ७२ ७२

नन्वस्मिन्नध्याये ब्रह्मानंदविवेचनस्यैव प्रस्तुतत्वादितरानंदद्वयप्रतिपादनं प्रकृतासंगतमित्याशंक्य तयोर्ब्रह्मानंदजन्यत्वेन तद्बोधोपयोगित्वान्न प्रकृतासंगतमित्यभिप्रायेणाह तथाचेति तथाच एवमानंदत्रैविध्ये सति यः स्वयं प्रकाश आनंदो विषयानंदवासनानंदौ जनयति स ब्रह्मानंदो वेदितव्य इत्यर्थः ८८ वृत्तानुकीर्तनपूर्वकमुत्तरग्रंथमवतारयति श्रुतीति श्रुतिभिः सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेतीत्यादिभिरुदाहृताभिर्युक्तिभिः सुखमहमस्वाप्समित्यादिपरामर्शान्यथानुपपत्त्यादिभिरनुभूत्या च अर्थापत्तिकल्पितेन सौषुप्तानुभवेन च सुषुप्तिकाले स्वप्रकाशो ब्रह्मानंदः साधित इतः परमन्यदा जागरणावस्थायामपि यो ब्रह्मानंदावगमोपायो वक्ष्यते तच्छृण्वित्यर्थः ८९ प्रतिज्ञातमेव ब्रह्मानंदावगमो- १४

> तथाच विषयानंदो वासनानंद इत्यमू आनंदौ जनयन्नास्ते ब्रह्मानंदः स्वयंप्रभः ८८ श्रुतियुक्त्यनुभूतिभ्यः स्वप्रकाश
> चिदात्मके ब्रह्मानंदे सुप्तिकाले सिद्धे सत्यन्यदा शृणु ८९ य आनंदमयः सुप्तौ स विज्ञानमयात्मतां गत्वा स्वप्नं
> प्रबोधं वा प्राप्नोति स्थानभेदतः ९० नेत्रे जागरणं कंठे स्वप्नः सुप्तिर्हृदंबुजे आपादमस्तकं देहं व्याप्य जाग-
> र्ति चेतनः ९१ देहतादात्म्यमापन्नस्तप्तायःपिंडवत्ततः अहं मनुष्य इत्येवं निश्चित्यैवावतिष्ठते ९२ ॥

पायं दर्शयितुं तदुपोद्घातत्वेन सनिमित्तां जीवस्यावस्थाद्वयप्राप्तिं दर्शयति य इति सुप्तौ सुषुप्तिकाले विलीनावस्थ आनंदमयशब्देन कथ्यत इत्युक्तो य आनंदमयः स विज्ञानशब्दाभिधेयबुध्युपाधिमत्त्वेन विज्ञानमयतां प्राप्य स्थानभेदतः वक्ष्यमाणस्थानविशेषयोगेन स्वप्नं जागरणं वा कर्मानुसारेण गच्छति ९० इदानीं जाग्रदाद्यवस्थोपयोगीनि स्थानानि दर्शयति नेत्र इति नेत्रशब्दस्य कृत्स्नदेहोपलक्षणत्वमभिप्रेत्य नेत्रे जागरणमित्यंशस्यार्थमाह आपादेति चेतनो जीवः ९१ देहं व्याप्येत्यनेन विवक्षितमर्थं दृष्टांतप्रदर्शनेन स्पष्टयति देहेति तत्र प्रमाणमाह तत इति यतो मनुष्यत्वादिजातिमता देहेन तादात्म्यं प्राप्तः ततोऽहं मनुष्य इत्येवं निश्चित्य संशयादिरहितज्ञानेन गृहीत्वैवावतिष्ठते ९२ ॥

देहतादात्म्याभिमानहेतुकान्येवावस्थांतराणि दर्शयति उदासीन इति तत्र सुखित्वदुःखित्वयोः कर्मजन्यत्वज्ञानाय देहविशेषणभूतयोः सुखदुःखयोः कर्मैकहेतुत्वं दर्शयति सुखदुःखे इति ९३ तयोश्च सुखदुःखयोर्निमित्तभेदात् द्वैविध्यमाह बाह्येति नन्वौदासीन्यं कदा स्यादित्यत आह सुखेति व्यक्तिभेदविवक्षया बहुवचनं ९४ यदर्थं जाग्रदाद्युपन्यस्तं तदिदानीं दर्शयति नकापीति सर्वोपि जनः इदानीं मम कापि चिंता गृहादिविषया नास्त्यतः सुखं यथा भवति तथा तिष्ठामीति वदन्नौदासीन्यकाले स्वरूपानंदस्फूर्तिभाक् ततो जागरणावस्थायामपि निजानंदावभासनमस्तीत्यवगंतव्यमित्यभिप्रायः ९५ ननु औदासीन्ये अवभासमानस्य निजानंदत्वे तस्य ब्रह्मानंदत्वात् पूर्वोक्तवासनानंदता न स्यात् इत्याशंक्य अहंकारसामा-

> उदासीनः सुखी दुःखीत्यवस्थात्रयमेत्यसौ सुखदुःखे कर्मकार्ये त्वौदासीन्यं स्वभावतः ९३
> बाह्यभोगान्मनोराज्यात् सुखदुःखे द्विधा मते सुखदुःखांतरालेषु भवेत्तूष्णीमवस्थितिः ९४
> नकापि चिंता मेऽस्त्यद्य सुखमास इति ब्रुवन् औदासीन्ये निजानंदभानं वक्त्यखिलो जनः ९५
> अहमस्मीत्यहंकारसामान्याच्छादितत्वतः निजानंदो न मुख्योऽयं किंतु सोऽतस्य वासना ९६
> नीरपूरितभांडस्य बाह्ये शैत्यं न तज्जलं किंतु नीरगुणस्तेन नीरसत्तानुमीयते ॥ ९७

न्याच्छन्नत्वान्न ब्रह्मानंदतेति परिहरति अहमिति देवदत्तोऽहमित्यादिविशेषशून्येनास्मीत्येवंरूपेणाहंकारसामान्येनाच्छन्नत्वान्नायं मुख्य इत्यर्थः तर्हि तस्य किंरूपतेत्यत आह किंत्विति ९६ मुख्यानंदातिरिक्तवासनानंदसद्भावे दृष्टांतमाह नीरेति जलपूर्णकुंभस्य बहिर्भागे स्पर्शनेनोपलभ्यमानं यच्छैत्यमस्ति तत्तावज्जलं न भवति इवत्वानुपलंभात् किं तर्हि तदित्यत आह किंत्विति नीरगुणत्वं कथमवगम्यत इत्यत आह तेनेति विमतं घटे उपलभ्यमानं शैत्यं जलजन्यं भवितुमर्हति शैत्यत्वात् जले उपलभ्यमानशैत्यवदिति ९७

पं० ८० भवत्वेवं नीरानुमापकत्वं शैत्यस्य प्रकृते किमायातमित्याशंक्य तद्दृष्टान्तानंदस्यापि मुख्यानंदानुमापकत्वमायातमित्याह ग्रं० न०
१५ यावदिति अभ्यासयोगतः ज्ञानमात्मनि महति नियच्छेत् यच्छेच्छांत आत्मनीति श्रुत्यभिहितनिरोधसमाध्यभ्यासयोगेन
यावद्यावदहमादिवृत्तिविलयवशात् चित्तस्य सूक्ष्मता जायते तावत्तावन्निजानंदाभिव्यक्तिर्भवतीत्यनुमीयते अयमत्र प्रयो
गः अहंकारसंकोचविशेषविशिष्टक्षणे सुखिती यादिक्षणः पक्षः सपूर्वस्मात्क्षणादधिकनिजानंदाविर्भाववानहंकारसंको
चविशेषयुक्तकालत्वादहंकारसंकोचयुक्ताद्यक्षणवदिति ९८ बुद्धिसौक्ष्म्यस्य कोवधिरित्याकांक्षायां साक्षात्कारो वधि
रित्याह सर्वेति नहि हंसा निर्द्वंद्वस्यादित्यत आह अलीनत्वादिति सर्ववृत्तिविलयेप्यंतःकरणस्वरूपविलयाभावान्नैयंनि

यावद्यावदहंकारो विस्मृतोभ्यासयोगतः तावत्तावत्सूक्ष्मदृष्टेर्निजानंदोनुमीयते ९८ सर्वात्मना विस्मृतः सन्सूक्ष्म
तां परमां व्रजेत् अलीनत्वान्न निद्रा पततो देहोपि नो पतेत् ९९ नह्येतं भासते नापि निद्रात न्नास्ति यत्सुखं सब्रह्मानंद
इत्याह भगवानर्जुनं प्रति १०० शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् १

द्रा बुद्धेः कारणात्मनावस्थानं सुषुप्तिरित्याचार्यैरुक्तत्वादित्यर्थः अंतःकरणस्वरूपविलयाभावे लिंगमाह ततइति यत्र १५
सुख्यादावहंकारविलयस्तत्र देहपातो दृष्टइह तु तदभावाद्विलीनइति गम्यते ९९ फलितमाह नह्येतमिति यस्मिन्का
ले द्वैतभानं नास्ति निद्रापि नागच्छति तस्मिन्काले उपलभ्यमानं यत्सुखमस्ति सब्रह्मानंद इत्यर्थः अयं ब्रह्मानंद इति कु
तोवगम्यते इत्याशंक्य कृष्णवाक्यादित्याह इत्याहेति गीताषष्ठाध्याय इति शेषः १०० तच्चैकैः श्लोकैरुक्तवानित्याशंक्य
तान् श्लोकान् पठत्यर्थक्रमानुसारेण शनैरिति अयमर्थः धृतिगृहीतया धैर्ययुक्तया बुध्या साधनभूतया शनैः शनैः न
सहसा उपरमेत् मन उपरतिं कुर्यात् कियत्पर्यंतमित्यत आह आत्मेति मनश्चात्मसंस्थं आत्मनि संस्था सम्यक्स्थितिः
आत्मैवेदं सर्वं न ततोन्यत्किंचिदस्तीत्येवंरूपा यस्य तदात्मसंस्थं तथाविधं कृत्वा न किंचिदपि चिंतयेत् एष योगस्य परमो वधिः १

एतत्संपादने प्रवृत्तो योगी प्रथमं किं कुर्यादित्यत आह यत इति चंचलं स्वभावदोषात् अत एवास्थिरं एकत्र विषये आनयत
मेवंविधं मनो यतो यतो यस्माद्यस्माच्छब्दादेर्निमित्तान्निश्चरति निर्गच्छति ततस्ततस्तस्माच्छब्दादेः सकाशान्नियम्य तेषां श
ब्दादीनां मिथ्यात्वादिदोषदर्शनेनाभासीकृत्य वैराग्यभावनापूर्वकं निरुध्य एतन्मनो आत्मन्येव वशं नयेत् आत्मवश्यतामा
पादयेत् एवं योगमभ्यसतः अभ्यासबलादात्मन्येव मनः प्रशाम्यति २ मनः प्रशांतौ किं भवतीत्यत आह प्रशांतेति शांत
रजसं प्रक्षीणमोहादिक्लेशरजसं अत एव प्रशांतमनसं प्रकर्षेण अत्यर्थं शांतं विक्षेपशून्यं मनो यस्य तं ब्रह्मभूतं ब्रह्मैवेदं
सर्वमिति निश्चयवत्तया जीवन्मुक्तमकल्मषं अधर्मादिवर्जितं एनं योगिनं उत्तमं क्षयित्वसातिशयित्वादिदोषरहि

यतो यतो निश्चरति मनश्चंचलमस्थिरं ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् २
प्रशांतमनसं ह्येनं योगिनं सुखमुत्तमं उपैति शांतरजसं ब्रह्मभूतमकल्मषं ॥ ३
यत्रोपरमते चित्तं निरुद्धं योगसेवया यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ४
सुखमात्यंतिकं यत्तद्बुद्धिग्राह्यमतींद्रियं वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ५

तं सुखमुपैति उपागच्छति ३ संगृहीतार्थप्रपंचन परां स्वादीयानेव श्लोकान्पठति यत्रेत्यादित्रीन् चित्तं यत्र यस्मिन्नेव काले
योगसेवया योगानुष्ठानेन सर्वस्माद्विषयान्निवारितं सदुपरमते उपरतिं गच्छति किंच यत्र यस्मिन्नेव काले आत्मना समाधिप
रिशुद्धेनांतःकरणेनात्मानं परं चैतन्यं ज्योतिःस्वरूपं पश्यन्नुपलभ्यमानः स्वस्मिन्नेव तुष्यति तुष्टिं भजते न विषयेष्वित्य
र्थः ४ किंच यत्र यस्मिन्नेव काले आत्मनि स्थितोयं योगी आत्यंतिकं अत्यंतमेव भवतीत्यात्यंतिकं अनंतं बुद्धिग्राह्यं इं
द्रियनिरपेक्षया बुध्या ग्रह्यमाणमतींद्रियं इंद्रियगोचरातीतमविषयजनितं यत्तदीदृशं सुखं वेत्ति अनुभवति किंच
आत्मनि स्थितोयं तत्त्वतस्तस्मादात्मस्वरूपात् न चलति न प्रच्यवते ५ ६७ ६७

किंचयमात्मलाभंलब्ध्वाप्राप्यापरंलाभंलाभांतरंततोधिकंनमन्यते आत्मलाभान्नपरंविद्यतइतिस्मृतेः किंचयस्मिन्नात्मतत्वस्थि
तोगुरुणापिमहतापिदुःखेनशस्त्रनिपातादिलक्षणेनप्रह्लादवन्नविचाल्यते ६ इदानीमुपपादितंयोगंनिगमयति तं
विद्यादिति शनैःशनैरित्यादिनायावद्भिर्विशेषणैर्विशिष्टआत्मावस्थाविशेषोयोगउक्तः तंदुःखसंयोगवियोगंदुःखैः संयोगो
दुःखसंयोगः तेनवियोगः तंविपरीतलक्षणयायोगसंज्ञितंयोगइत्येवंसंज्ञायस्येति तंयोगसंज्ञितंविद्यात् जानीयात् एवंवि
धयोगानुष्ठानेकिंचित्कर्तव्यताविशेषमाह सइति सपूर्वोक्तोयोगोनिश्चयेनाध्यवसायेन अनिर्विण्णचेतसानिर्वेदरहितेन
चित्तेनयोक्तव्योनुष्ठेयः ७ इदानीमुक्तमर्थमुपसंहरति युंजन्निति विगतकल्मषोविगतपापोयोगांतरायवर्जितोयोगीसदात्मा

यंलब्ध्वाचापरंलाभंमन्यतेनाधिकंततः यस्मिन्स्थितेनदुःखेनगुरुणापिविचाल्यते ६ तंविद्यादुःखसंयोगवि
योगंयोगसंज्ञितं सनिश्चयेनयोक्तव्योयोगोनिर्विण्णचेतसा ७ युंजन्नेवंसदात्मानंयोगीविगतकल्मषः सुखेन
ब्रह्मसंस्पर्शमत्यंतंसुखमश्नुते ८ उत्सेकउदधेर्यद्वत्कुशाग्रेणैकबिंदुना मनसोनिग्रहस्तद्वद्भवेदपरिखेदतः ९
इदमथस्यराजर्षिः शाकायन्योमुनिःसुखं प्राहमैत्राख्यशाखायांसमाध्युक्तिपुरःसरं १० ॥

नमेवंयथोक्तेनप्रकारेणयुंजन्ननुसंदधानःसुखेनानायासेनब्रह्मसंस्पर्शंब्रह्मणासंस्पर्शोयस्यसुखस्यतद्ब्रह्मसंस्पर्शंब्रह्मस्वरूप १६
भूतमितियावदत्यंतमविनश्वरंनिरतिशयसुखमश्नुतेप्राप्नोतीत्यर्थः ८ अनिर्वेदेनक्रियमाणोयोगाभ्यासः फलपर्यंतोभवतीत्येत
त्सदृष्टांतमाह उत्सेकइति कुशाग्रेणोद्धृतेनैकेनबिंदुनाक्रियमाणउदधेरुत्सेकउद्धृत्यबहिःसेचनंपरिखेदाभावेसतियद्वत्का
लांतरेभवेदेवतद्वन्मनसोनिग्रहोपिश्रमराहित्येनक्रियमाणःकालांतरेसिध्येत् इदंचवसिष्ठोपाख्यानेमनसिनिधायोक्तं ९ न
केवलमयमर्थोगीतायामभिहितः किंतुमैत्रायणीयशाखायामपीत्याह इदमिति मैत्रायणीयनामकेयजुःशाखाभेदेशाकायन्यना
मकःकश्चिदृषिःस्वशिष्यत्वेनोपसन्नस्यबृहद्रथाख्यस्यराजर्षेः अयत्नसुखंसमाध्यभिधानपूर्वकंयथाभवतितथोक्तवान् १०

केनप्रकारेणोक्तवानित्याशंक्यतत्प्रतिपादकांस्तदीयान्मंत्रान्पठति यथेति निरिंधनोदग्धकाष्ठोवह्निःस्वयोनौस्वकारणेते
जोमात्रेउपशाम्यति ज्वालादिरूपंविशेषाकारंपरित्यज्यतेजोमात्ररूपेणयथावतिष्ठतेतथातेनैवप्रकारेणचित्तमंतःकरण
मपिवृत्तिक्षयात्निरोधसमाध्यभ्यासेनराजसादिसकलवृत्तिनाशात् स्वकारणेसत्वमात्रेउपशाम्यतिसत्वमात्रावशिष्टंभवतीत्य
र्थः ११ ततःकिमित्यतआह स्वयोनाविति सत्यआत्मनिविषयेकामोयस्यास्तीतिसत्यकामीतस्यअतएवस्वयोनावुपशांत
स्यउपशांतत्वादेवइंद्रियार्थविमूढस्यविमुखस्यशब्दादिज्ञानशून्यस्यमनसःकर्मवशमनुगच्छंतीतिकर्मवशानुगाःससाध
नाःसुखदुःखादयोअनृताःमायिकत्वज्ञानेनमिथ्याभूताःस्युरित्यर्थः १२ ननुचित्तोपशांतौजगन्मिथ्याभवतीत्येतदनु
पपन्नंतदुपादानत्वाभावात्तस्येत्याशंक्याह चित्तमिति यद्यपिस्वरूपेणचित्तोपादानकंजगन्नभवतितथापितस्यभोग्य

यथानिरिंधनोवह्निःस्वयोनावुपशाम्यति तथावृत्तिक्षयाच्चित्तंस्वयोनावुपशाम्यति ११
स्वयोनावुपशांतस्यमनसःसत्यकामिनः इंद्रियार्थविमूढस्यानृताःकर्मवशानुगाः १२
चित्तमेवहिसंसारस्तत्प्रयत्नेनशोधयेत् यच्चित्तस्तन्मयोमर्त्योगुह्यमेतत्सनातनं ॥ १३

त्वंचित्तकारणकमेव हिशब्देनात्रसर्वानुभवंप्रमाणयति सुषुप्त्यादौचित्तविलयेभोगादर्शनादितिभावः यतश्चित्तात्मकःसं
सारोतःचित्तमेवप्रयत्नेनाभ्यासवैराग्यादिलक्षणेनशोधयेत् रजस्तमोराहित्येनएकाग्रंकुर्यात् नन्वात्मविमुक्तयेआत्मैवशो
धनीयोनचित्तमिति भाशंक्याह यच्चित्तइति मर्त्यइत्युपलक्षणंदेहमात्रस्ययोदेहीयच्चित्तोयस्मिन्पुत्रादिविषयेचित्तवान्
भवतिसतन्मयस्तदात्मकएवतत्साकल्यवैकल्ययोरात्मन्येवसमारोपणादेतत्सनातनमिदमनादिसिद्धंगुह्यंरहस्यं एतदुक्तं
भवतिस्वभावतःशुद्धस्यात्मनोयतश्चित्तसंपर्कादेवसंसारित्वंध्यायतीवलेलायतीवेतिश्रुतेः अतःचित्तस्यशोधनेनआत्मनःसं
सारनिवृत्तिः १३

पं० द० ब्र० न०

१७ नन्वनादिभवपरंपरोपार्जितसुखदुःखप्रदपुण्यपापकर्मणोः सतोश्चित्तशोधनेनापि कथमात्मनः संसारनिवृत्तिर्भविष्य
तीत्याशंक्य चित्तप्रसादोपलक्षितब्रह्मानुसंधानेन सकलकर्मक्षयोपपत्तेर्मैवमिति परिहरति चित्तस्य हीति हिशब्देन त
थैवेषीकातूलमग्नौ प्रोतं प्रदूयतैवं हास्य सर्वे पाप्मानः प्रदूयंते उपपातकेषु सर्वेषु पातकेषु महत्सु च प्रविश्य रजनीपादं ब्रह्म
ध्यानं समाचरेत् इत्यादिश्रुतिस्मृतिप्रसिद्धिं द्योतयति ततः किमित्यत आह प्रसन्नेति प्रसन्न आत्मा चेतो यस्य स तथोक्तः
आत्मनि स्वरूपभूते द्वितीयानंदलक्षणे ब्रह्मणि स्थित्वा तदेवाहमिति निश्चयेन दृश्यजातं परिहृत्य चिन्मात्ररूपेणावस्था

चित्तस्य हि प्रसादेन हंति कर्म शुभाशुभं प्रसन्नात्मात्मनि स्थित्वा सुखमक्षयमश्नुते १४
समासक्तं यथा चित्तं जंतोर्विषयगोचरे यद्येवं ब्रह्मणि स्यात्तत्को न मुच्येत बंधनात् १५
मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च अशुद्धं कामसंकल्पाच्छुद्धं कामविवर्जितं १६
मन एव मनुष्याणां कारणं बंधमोक्षयोः बंधाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतं १७

य अक्षयमविनाशि यत्सुखं स्वरूपभूतं तदश्नुते १४ प्रसन्नात्मात्मनि स्थित्वेत्युक्तमेवार्थं दृष्टांतोक्तिपुरःसरं द्रढयति १८
समासक्तमिति प्राणिनश्चित्तं विषय एव गोचरो विषयगोचरः इंद्रियप्रचारभूमिः तस्मिन्यथा स्वभावतः सम्यगासक्तं
भवति तदेव चित्तं ब्रह्मणि प्रत्यगभिन्ने परमात्मनि यद्येवमासक्तं स्यात् तर्हि कः संसारान्न मुच्येत सर्वोपि मुच्यत एवेत्यर्थः
१५ उक्तं द्रढयितुं मनसो वांतरभेदमाह मनो हीति तत्र कारणमाह अशुद्धमिति काम इत्युपलक्षणं क्रोधादेरपि १६
द्विविधस्यैव तस्यैव तस्य क्रमेण संसारमोक्षयोर्हेतुतां दर्शयति मन इति १७ छ छ

प्रसन्नात्मात्मनि स्थित्वा सुखमक्षयमश्नुत इत्युक्तमेवार्थं श्रुतिः स्वयमेव प्रपंचयति समाधीति आत्मनि प्रत्यक्स्वरूपे नि
वेशितस्य समाधिनिर्धूतमलस्य समाधिना प्रत्यक् ब्रह्मणोरैक्यगोचरप्रत्ययावृत्त्या निर्धूतमलस्य निःशेषेण निवारितरज
स्तमोमलस्य चेतसस्तस्मिन् समाधौ यत्सुखमुत्पद्यते तदा समाधावुत्पन्नं तत्सुखं गिरा वाचा वर्णयितुं न शक्यते अलौ
किकसुखत्वादित्यर्थः किंतु स्वयं तत् स्वरूपभूतं सुखं अंतःकरणेनैव गृह्यते १८ नन्वस्यैव समाधेर्दुर्लभत्वात् कथमनेन
ब्रह्मानंदनिश्चयसंभव इत्याशंक्याह यद्यप्यसाविति अस्य समाधेः संततस्यासंभवेपि क्षणिकस्य तस्य संभवात्तेनैवायमा
नंदो निश्चेतुं शक्यत इत्यर्थः १९ तन्वात्मदर्शनाय श्रवणादौ प्रवृत्ता अपि केचिदानंदनिश्चयशून्या बहिर्मुखा एव वर्तंत इ

समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं भवेत् न शक्यते वर्णयितुं गिरा तदा स्वयं तदंतःकर
णेन गृह्यते १८ यद्यप्यसौ चिरं कालं समाधिर्दुर्लभो नृणां तथापि क्षणिको ब्रह्मानंदं निश्चाययत्यसौ १९
श्रद्धालुर्व्यसनी योत्र निश्चिनोत्येव सर्वथा निश्चिते तु सकृत्तस्मिन्विश्वसित्यन्यदाप्ययं २० ता
दृक्पुमानुदासीनकालेप्यानंदवासनां उपेक्ष्य मुख्यमानंदं भावयत्येव तत्परः २१

त्याशंक्य श्रद्धादिरहितानां तथात्वेपि श्रद्धादिमतां तन्निश्चयो भवत्येवेत्याह श्रद्धालुरिति व्यसने सर्वथा संपादयिष्यामी
त्याग्रहः तद्वान्व्यसनी अत्र समाधौ सर्वथा अवश्यं ततः किमित्यत आह निश्चिते त्विति यस्मिन्ब्रह्मानंदे सकृदेकदा क्षणि
कसमाधौ निश्चिते सति अयं सकृन्निश्चयवान् अन्यदापि इतरस्मिन् कालेपि विश्वसिति आनंदोस्तीति विश्वासं करोति
२० ततोपि किं तत्राह तादृगिति तादृक् पुमान् श्रद्धादिपुरःसरं सकृन्निश्चयवान् पुरुषः औदासीन्यदशायामपि उपल
भ्यमानां पूर्वोक्तामानंदवासनां उपेक्ष्य तत्परः मुख्यानंदे तात्पर्यवान् भूत्वा तमेव भावयति २१ छ

25
1938

पं. २० एवं व्यवहारकालेपिनिजानंदं भावयतीत्यत्र दृष्टांतमाह परेति २२ दार्ष्टांतिके योजयति एवमिति २३ धीरशब्दार्थमाह ग्रं. न.
१८ धीरत्वमिति इंद्रियाणां विषयाभिमुख्येन पुरुषाकर्षणसामर्थ्येपिस्वरूपसुखानुसंधानेछया सर्वाणींद्रियाणिन्यक्कृ
त्यआनंदानुसंधानएव प्रवर्तमानत्वं धीरत्वमित्यर्थः २४ विश्रांतिशब्दस्य विवक्षितमर्थं सदृष्टांतमाह भारवाहीति यथा
लोके भारं वहन् पुरुषः श्रमहेतुं शिरसि स्थितं भारं परित्यज्य श्रमरहितो वर्तते तथा संसारव्यापारपरित्यागे सति श्रमरहित
आसमिति जायमानाया बुद्धिः सा विश्रमशब्देनोच्यत इत्यर्थः २५ इदानीं फलितमर्थमाह विश्रांतिमिति परमां निरतिशयां
विश्रांतिमुक्तलक्षणां प्राप्तः पुरुषः स्वस्यौदासीन्यदशायां यथा परमानंदास्वादनेतात्पर्यवान् भवति एवं सुखदुःखहेतुप्रा

परव्यसनिनी नारी व्यग्रापि गृहकर्मणि तदेवास्वादयत्यंतः परसंगरसायनं २२ एवं तत्वे परे शुद्धे धीरो
विश्रांतिमागतः तदेवास्वादयत्यंतर्बहिर्व्यवहरन्नपि २३ धीरत्वमक्षप्राबल्येप्यानंदास्वादवांछया
तिरस्कृत्याखिलाक्षाणि तच्चिंतायां प्रवर्तनं २४ भारवाही शिरोभारं मुक्त्वास्ते विश्रमं गतः संसारव्याप
तित्यागे तादृक् बुद्धिस्तु विश्रमः २५ विश्रांतिं परमां प्राप्तस्त्वौदासीन्ये यथा तथा सुखदुःखदशा
यां च तदानंदैकतत्परः २६ अग्निप्रवेशहेतौ धीः शृंगारे यादृशी तथा धीरस्योदेति विषयेनुसंधानविरोधि
नि २७

प्तिकालेपि तदनुसंधानं परित्यज्य निजानंदास्वादन एव तात्पर्यवान् भवतीत्यर्थः २६ ननु दुःखस्य प्रतिकूलत्वेन तदनुसंधा
नेछाभावेपि वैषयिकसुखस्यानुकूलत्वेन पुरुषैरर्थ्यमानत्वात्तदनुसंधाने छाकुतो न भवेदित्याशंक्य तस्य विषयसंपादनादि
द्वारा अनीवबहिर्मुखत्वापादनेन निजानंदानुसंधानविरोधित्वात्तदिछापि विवेकिनो न जायत इति दृष्टांतप्रदर्शनपूर्वकमाह
अग्नीति शीघ्रं देहविमोचनेछायां दृढतरायां सत्यां तद्धेतुभूते कारणे अलंकारादौ यथाग्निप्रवेष्टुः वैरस्यबुद्धिरुत्पद्यते एवं
वैराग्यादिसाधनसंपन्नस्य विवेकिनो ब्रह्मानुसंधानविरोधिनि विषयसुखेपीत्यर्थः २७ ७

मान् हि रोधिविषयसुखेछाप्रयत्नमौलभ्येनाबहिर्मुखत्वहेतौ विषये किं भवतीत्यत आह अविरोधीति २८ दृष्टांतविरणोति
एकैवेति यथाकाकस्य दृष्टिः दृश्यते अनमेति दर्शनसाधनं चक्षुरिंद्रियं एकमेव वामदक्षिणनेत्रयोर्गोलकयोः पर्यायेण गम
नागमने करोति एवं विवेकिनो बुद्धिरप्यानंदद्वय इत्यर्थः २९ दार्ष्टांतिके प्रपंचयति भुंजान इति तत्ववित् विषयान् भुंजा
नः तज्जन्यं विषयानंदं उपनिषद्वाक्यादवगतब्रह्मानंदं च लौकिकवैदिकावुभौ विषयानंदब्रह्मानंदौ द्विभाषावेदीव जानीया
दित्यर्थः ३० ननु दुःखानुभवदशायां उद्वेगे सति कथं निजानंदानुभवः इत्याशंक्याह दुःखप्राप्ताविति यतो यस्मात्का
रणात् विवेकी हि द्वके लौकिकवैदिकयोरुभयोरपि व्यवहारयोर्वर्तनो दुःखप्राप्तावपि पूर्ववत् भज्ञानदशायामिव नतस्यो

अविरोधिसुखे बुद्धिः स्वानंदे च गमागमौ कुर्वत्यास्ते क्रमादेषा काकाक्षिवदितस्ततः २८ एकैव दृष्टिः काक
स्य वामदक्षिणनेत्रयोः यात्यायात्येवमानंदद्वये तत्वविदो मतिः २९ भुंजानो विषयानंदं ब्रह्मानंदं च तत्ववि
त् द्विभाषाभिज्ञवद्विद्यादुभौ लौकिकवैदिकौ ३० दुःखप्राप्तौ च नोद्वेगो यथा पूर्वं यतो द्विदृक् गंगामग्ना
र्धकायस्य पुंसः शीतोष्णधीर्यथा ३१ इत्थं जागरणे तत्वविदो ब्रह्मसुखं सदा भाति तद्वासनाजन्ये स्व
प्ने तद्भासते तथा ३२ अविद्यावासनाप्यस्तीत्यतस्तद्वासनोत्थिते स्वप्ने मूर्खवदेवैषः सुखं दुःखं च वीक्षते ३३

द्वेगः विवेकेन तदानंदाबाध्यमानत्वात्ततो दुःखानुभवकालेपि निजानंदानुसंधानं न विरुध्यत इत्यर्थः युगपदुभयानुसं
धाने दृष्टांतमाह गंगेति ३१ फलितमाह इत्थमिति तदा सुखदुःखानुभवदशायां तूष्णीं स्थितौ चेत्यर्थः न केवलं जाग
रण एव तद्भानं किंतु स्वप्नावस्थायामपीत्याह तद्वासनेति हेतुगर्भं विशेषणं जाग्रद्वासनाजन्यत्वात् स्वप्नस्य तत्रापि
तद्ब्रह्मसुखं तथा जाग्रदवस्थायामिव भासत इत्यर्थः ३२ ननु स्वप्नस्यानंदानुभववासनाजन्यत्वे सत्यानंद एव भासेतेत्या
शंक्याह अविद्यावासनेति न केवलमानंदवासनाबलादेव स्वप्नो जायते किंत्वविद्यावासनाबलादप्यतस्तद्वासनाजन्यत्वात
ज्ञस्येव सुखदुःखाद्यनुभवो भवतीत्यर्थः ३३

259
1958

पं० द० एतावता ग्रंथसंदर्भेण उक्तमर्थं निगमयति ब्रह्मानंदेति ब्रह्मानंदनामके अध्यायपंचकात्मके ग्रंथे अस्मिन् प्रथमाध्याये ब्र० न०
सुषुप्त्यवस्थायामौदासीन्यकालेपि समाध्यवस्थायां च सुखदुःखदशायां च स्वप्रकाशचिद्रूपब्रह्मानंदस्य प्रकाशक यो
११ ग्यनुभवरूपं प्रत्यक्षमुक्तमित्यर्थः इदं चोपलक्षणं आगमादीनां तेषामप्यत्र प्रदर्शितत्वात् ३५ इति पंचदशी
ब्रह्मानंदः समाप्तः ७ अथ ब्रह्मानंदांतर्गतमात्मानंदनामकं द्वितीयाध्यायमारभते तदेवं प्रथमाध्या
ये विवेकिनो योगेन निजानंदानुभवप्रकारं प्रदर्श्य मंदस्य जिज्ञासो रात्मानंदशब्दवाच्यत्वं पदार्थविवेचनमुखेन

ब्रह्मानंदाभिधे ग्रंथे ब्रह्मानंदप्रकाशकं योगिप्रत्यक्षमध्याये प्रथमेस्मिन्नुदीरितं ३५
इति ब्रह्मानंदे योगानंदो नाम प्रथमः १ ७ नन्वेवं वासनानंदात् ब्रह्मानंदा
दपीतरं वेत्तु योगी निजानंदं मूढस्यात्रास्ति का गतिः १ धर्माधर्मवशादेष जाय
तां म्रियतामपि पुनः पुनर्देहलक्षैः किं नो दाक्षिण्यतो वद २ अस्ति वो नु जिघृक्षु
त्वाद्दाक्षिण्येन प्रयोजनं तर्हि ब्रूहि स मूढः किं जिज्ञासुर्वा पराङ्मुखः ३ ॥ ११

ब्रह्मानंदानुभवप्रकारप्रदर्शनाय शिष्यप्रश्नमवतारयति नन्वेवमिति १ शिष्येणैवं पृष्टो गुरुः इति मूढस्याविद्याधिकार एव नास्ति इ
त्याह धर्मेति एषोतिमूढो नादौ संसारे तीतेषु जन्मसु अनुष्ठितसुकृतदुष्कृतवशात् नानाविधदेहस्वीकारेण पुनः पुनर्जायतां म्रिय
तां इत्यर्थः २ सर्वानुग्राहकत्वादाचार्येण तस्यापि काचन गतिर्वक्तव्येति शिष्य आह अस्तीति वो युष्माकं अनुजिघृक्षुत्वात् अनुग्रहीतु
मिच्छावो नु जिघृक्षवस्तेषां भावस्तत्त्वं तस्मात् शिष्योद्धरणेच्छायुक्तत्वाद्दाक्षिण्यतस्तदुद्धरणलक्षणं प्रयोजनमस्तीत्यर्थः एवं शिष्य
वचनमाकर्ण्य गुरुस्तं विकल्प्य पृच्छति तर्हीति यदि मूढस्य काचन गतिर्वक्तव्या तर्हि मूढः किं रागी विरक्तो वा वदेति ३ ॥

[redacted]

पं० द० उपेति विमुखाय तत्त्वज्ञानविमुखाय बहिर्मुखायेत्यर्थः यथोचितं यथायोग्यं ब्रह्मलोकादिकामस्य उपास्तिं ब्रूयात् स्वर्गादि
२० कामस्य तत्कर्म ब्रूयादित्यर्थः रागी चेत् रागानुसारेण कर्म वोपासनं वा वक्तव्यमिति प्रथमे परिहारमाह जिज्ञासुत्वेपि सोतिवि
वेकी मंदप्रज्ञो वेति विकल्प्यातिविवेकिनः पूर्वाध्यायोक्तप्रकारेण योगेन ब्रह्मसाक्षात्कारमभिप्रेत्य मंदप्रज्ञस्य तद्दर्शनोपायमाह मं
देति यो मंदप्रज्ञः मंदा जडा प्रज्ञा बुद्धिर्यस्य स मंदप्रज्ञः तं मंदप्रज्ञं ज्ञातुमिच्छुः जिज्ञासुः तमात्मानंदेन आत्मानंदविवेचनमुखेन
बोधयेत् ४ एवं केन को बोधित इत्यत आह बोधयामासेति याज्ञवल्क्यनामको मुनिः शाखाविशेषप्रवर्तकः कश्चिदृषिः
मैत्रेयीमेतन्नामिकां निजप्रियां स्वभार्यां न वा अरे पत्युरर्थे पतिः प्रियइति न वा अरे पत्युः कामाय पतिः प्रियो भवतीत्यादि प्रकारे

उपास्तिं कर्म वा ब्रूयाद्विमुखाय यथोचितं मंदप्रज्ञं तु जिज्ञासुमात्मानंदेन बोधयेत् ४ बोधयामास मैत्रेयीं याज्ञव
ल्क्यो निजप्रियां न वा अरे पत्युरर्थे पतिः प्रिय इतीरयन् ५ पतिर्जाया पुत्रवित्ते पशुब्राह्मणबाहुजाः लोका
देवा वेदभूतेसर्वं चात्मार्थतः प्रियं ६ पत्याविच्छा यदा पत्न्यास्तदा प्रीतिं करोति सा क्षुदनुष्ठानरोगाद्यैस्तदा
नेच्छति तत्पतिः ७

णेरयन् ब्रुवन् बोधयामास बोधितवानित्यर्थः ५ उत्तरत्र परप्रेमास्पदत्वेन परमानंदयिष्यतामिति वाक्येन परप्रेमास्पदत्वेन हेतुना
त्मनः परमानंदरूपतां सिसाधयिषुः आदौ परप्रेमास्पदत्वहेतुसमर्थनाय तावदुदाहृतवाक्यस्योपलक्षणपरतामभिप्रेत्य तत्प्रकरणस्थ
सकलपर्यायवाक्यतात्पर्यमाह पतिरिति पतिजायादिकं भोग्यजातं भोक्तुः शेषत्वात् भोक्तुः संबंधेनैव प्रियं न स्वरूपेणेत्यभिप्रायः ६
इदानीं पूर्वोदाहृतस्य न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवतीत्यस्य वाक्यस्य तात्पर्यार्थं विभ
ज्य दर्शयति पत्याविति यदा यस्मिन् काले पत्न्याः जायायाः पत्यौ भर्तरि विषये इच्छा कामो भवति तदा सा पत्नी पत्यौ प्रीतिं स्नेहं क
रोति यदा तु पतिः क्षुधादिना इच्छाभावहेतुना युक्तो भवति चेत् तदा तां नेच्छति न कामयते ७ ७ ७

पं॰ ८॰ एवंचसतिकिंफलितमित्यतआह नपत्युरिति जायया क्रियमाणाया प्रीतिःसापत्युरर्थेपत्युःप्रयोजनायनकिंतुजायातांपत्यौ ग्रं॰ नं॰
२॰ प्रीतिंस्वार्थंएवस्वप्रयोजनायैवकरोति नवाअरेजायायैकामायजायाप्रियाभवत्यात्मनस्तुकामायजायाप्रियाभवतीत्यादिन
वाअरेसर्वस्यकामायसर्वंप्रियंभवति आत्मनस्तुकामायसर्वंप्रियंभवतीत्यंतानांवाक्यानांतात्पर्यंक्रमेणविभज्यदर्शयति प
तिश्चेत्यादिना पतिश्चभर्तापिस्वप्रयोजनायैवजायायांप्रीतिंकरोति नजायाप्रीतयेइत्यर्थः ८ नन्वेकैककामनयाप्र
वृत्तौप्रीतिःस्वार्थाभवतुयुगपदुभयेछयाप्रवृत्तौतुप्रीतिरुभयार्थतास्यादित्याशंक्याह अन्योन्येति एवमुक्तेनप्रकारेणस्वेछ
यैवस्वकामनापूरणेछयैवप्रवर्तनमुभयोरपीतिशेषः ८ स्वेछायाःप्रवर्तनत्वमेवदर्शयति श्मश्र्विति पित्राक्रियमाणं

सा प्रीतिःस्वार्थएवकरोतितां पतिश्चात्मनएवार्थेनजायार्थेकदाचन ८ अन्योन्यप्रेरणेप्येवंस्वेछयै
वप्रवर्तनं ८ श्मश्रुकंटकवेधेनबालेरुदतितत्पिता चुंबत्येवनसाप्रीतिर्बालार्थेस्वार्थएवसा ९
निरिछमपिरत्नादिवित्तंयत्नेनपालयन् प्रीतिंकरोतिसस्वार्थेवित्तार्थत्वंनशंकितं १० अनिछति
बलीवर्दे विवाहयिषतेबलात् प्रीतिःसावणिगर्थैवबलीवदर्थिताकुतः ११ ॥ ॥

पुत्रमुखादिचुंबनंनपुत्रप्रीत्यर्थंतस्यश्मश्रुकंटकवेधेनरोदनकर्तृत्वादतस्तत्पितुःस्वतुष्ट्यर्थमेवेत्यवगंतव्यमित्यर्थः ९ २०
चेतनेषुपतिजायापुत्रेषुक्रियमाणायाःप्रीतेःस्वार्थत्वपरार्थत्वसंदेहसंभवादचेतनत्वेनेछामात्ररहितस्यवित्तविषयस्य
तछंकैवनास्तीत्यभिप्रेत्यनवाअरेवित्तस्यकामायेत्यादिवाक्यस्यतात्पर्यमाह निरिछमिति १० चेतनत्वेपिवहनादीछार
हितपशुविषयस्यनवाअरेपशूनामित्यस्यवाक्यस्यतात्पर्यमाह अनिछतीति बलीवर्देअनडुहिअनिछतिभारंवोढुमुछा
मकुर्वत्यपिबलाद्विवाहयिषतेवाहयितुंकामयतेतत्रवहनादिविषयायाःप्रीतेःवणिगर्थत्वेवनबलीवर्दार्थतेत्यर्थः ११ ॥

नवाअरेब्रह्मणःकामायेतिवाक्यतात्पर्यमाह ब्राह्मण्यमिति ब्राह्मण्यनिमित्तयापूजयाब्राह्मणोहमस्मीत्यभिमानवानेवतुष्यति
नजडाजातिरित्यर्थः १२ नवाअरेक्षत्रस्येत्यादिवाक्यस्यतात्पर्यमाह क्षत्रियइति राज्योपभोगनिमित्तंसुखंक्षत्रियत्वजाति
मतएवनक्षत्रियत्वजातेरित्यर्थः इदंक्षत्रियोदाहरणंवैश्याद्युपलक्षणार्थमित्याह वैश्येति १३ नवाअरेलोकानांकामायेति
वाक्यस्यतात्पर्यमाह स्वर्गेति लोकद्वयोपादानंकर्मोपासनालक्षणंसाधनद्वयंसंपाद्यसकललोकोपलक्षणार्थं १४
किंच ईशेति पापनष्टयेपापनिवृत्तयेइत्यर्थः तत्पूजनेननिःपापदेवार्थत्वंतःपापरहितानांदेवानांनप्रयोजनायकिंतु
स्वार्थंपूजाकर्तुःप्रयोजनाय १५ किंच ऋगादयइति दौर्ब्राह्मण्यंब्रात्यत्वंतच्चदौर्ब्राह्मण्यंमनुष्यत्वावांतरजातिरूपंतद्

ब्राह्मण्यमेस्तिपूज्योहमितितुष्यतिपूजया अचेतनायाजातेर्नोसंतुष्टिःपुंसएवसा १२ क्षत्रियोहंतेनराज्यं
करोमीत्यत्रराजता नजातेर्वैश्यजात्यादौयोजनायेदमीरितं १३ स्वर्गलोकब्रह्मलोकौस्तांममेत्यभिवांछनं लो
कयोर्नोपकारायस्वभोगायैवकेवलं १४ ईशविष्ण्वादयोदेवाःपूज्यंतेपापनष्टये नतन्निःपापदेवार्थंस्वार्थंतत्त
पयुज्यते १५ ऋगाद्योध्यधीयंतेदौर्ब्राह्मण्यानवाप्तये नतत्प्रसक्तंवेदेषुमनुष्येषुप्रसज्जते १६ भूम्या
दिपंचभूतानिस्थानतृट्पाकशोषणैः हेतुभिश्चावकाशेनवांछंत्येषांनहेतवे १७ स्वामिभृत्यादिकं
सर्वंस्वोपकारायवांछति नतत्कृतोपकारस्तुतस्यतस्यनविद्यते १८ ॥ ॥

इतिपुवेदेषुनप्रसज्जतेइत्यर्थः १६ किंचभूम्यादीति सर्वेप्राणिनोवस्थानप्रदानतृणनिवारणपाककरणार्द्रशोषणावकाश
प्रदानाख्यैर्हेतुभिर्निमित्तैःपृथिव्यादीनिभूतानिवांछंत्यपेक्षंते एषांपृथिव्यादीनांतुहेतवेवस्थानवांछनादीनिनिमित्ता
निनसंत्यतोनस्वयमाकांक्षंतइत्यर्थः १७ इदानींनवाअरेसर्वस्यकामायेत्यस्यवाक्यस्यतात्पर्यमाह स्वामीति भृत्यादिः
सर्वोजनःस्वाम्यादिकंसर्वंस्वोपकारायस्वप्रयोजनायवांछति एवंस्वाम्यादिरपि १८ ७ ७

261
1938

पं० ८०

ननुश्रुतावेवं बहूदाहरणप्रदर्शनं किमर्थं कृतमित्यत आह सर्वेति इच्छापूर्वकेषु सर्वेष्वपि भोजनादिव्यवहारेष्वेवमात्मनस्तु कामा
य सर्वं प्रियं भवतीत्युक्तेन प्रकारेणानुसंधातुमनुसंधानाय ईदृशं पतिजायादिषु प्रीतिप्रदर्शनरूपमुदाहरणबाहुल्यमुक्तमिति
२१ शेषः तेन कारणेन स्वां स्वसंबंधिनीं मतिं बुद्धिं वासयेत् सर्वस्यापि स्वशेषत्वावगमेन स्वात्मनः प्रियतमत्वानुसंधानवतीं कुर्या
दित्यर्थः १९. नन्वात्मशेषत्वेन सर्वस्य प्रियत्वोक्तेरात्मनः प्रियत्वमुक्तमनुपपन्नं विकल्पैः क्रियमाणे प्रीतेरेवदुर्निरूपत्वादि
त्यभिप्रायेण प्रीतिस्वरूपं पृच्छति अथेति अथशब्दः प्रश्नार्थः यान्यात्मनि प्रीतिः श्रूयते इयं प्रीतिः का किं रागरूपा किं
वा श्रद्धारूपा उत भक्तिरूपा यद्वेच्छारूपेति किंशब्दार्थः चतुर्ष्वपि पक्षेषु प्रीतेः सर्वविषयत्वं न संभवतीत्याह रागइति

सर्वव्यवहृतिष्वेवमनुसंधातुमीदृशं उदाहरणबाहुल्यं तेन स्वां वासयेन्मतिं १९. अथ केयं भवेत्प्रीतिः
श्रूयते यानिजात्मनि रागो वध्वादिविषये श्रद्धा यागादिकर्मणि २० भक्तिः स्याद्गुरुदेवादाविच्छा स्या
प्राप्तवस्तुनि तर्हि स्तु सात्विकी वृत्तिः सुखमात्रानुवर्तिनी २१. प्राप्ते नष्टेपि सद्भावादिच्छातो व्यतिरिच्यते
सुखसाधनतोपाधेरन्नपानादयः प्रियाः २२.

रागश्चेद्वध्वादिष्वेव स्यान्न यागादिषु श्रद्धा चेद्यागादिष्वेव स्यान्न वध्वादिषु २० भक्तिश्चेद्गुर्वादिष्वेव स्यान्नेतरेषु इच्छा
दप्राप्तवस्तुविषयैव स्यान्नेतरविषया अतो न सर्वविषयत्वं प्रीतेरित्यर्थः उक्तप्रकारचतुष्टयातिरिक्तं पक्षं आशंक्यो २१
त्तरमाह तर्हीति तर्हि प्रीतेरागादिरूपत्वासंभवे सति सुखमात्रानुवर्तिनी सुखमेव सुखमात्रं अनुसृत्य वर्तते इति सुख
मात्रानुवर्तिनी सुखैकगोचरेत्यर्थः सात्विकी सत्वगुणपरिणामरूपा वृत्तिरंतःकरणवृत्तिः प्रीतिरस्तु २१. ननु तर्हि सा प्री
तिरिच्छैवेत्याशंक्य परिहरति प्राप्तइति इच्छा तावदप्राप्तसुखादिमात्रविषया इयं तु सर्वविषया प्राप्ते लब्धे सुखादौ
नष्टेपि तस्मिन्विषये विद्यमानत्वादत इच्छात इच्छायाः व्यतिरिच्यते भिद्यते इदानीं सुखसाधनभूतेष्वन्नादिष्विवात्म
न्यपि प्रीतिदर्शनादात्मनोप्यन्नादिवत्सुखसाधनत्वं स्यादिति शंकते सुखेति अन्नपानादयः सुखसाधनत्वोपाधिना यथा प्रि
याः दृष्टाः २२.

आत्मेति आत्मापि आनुकूल्यात् प्रियत्वादन्नादिसमोन्नपानादिवत्सुखसाधनं स्यादित्यर्थः अत्रेदमनुमानं सूचितं विमत
आत्मा सुखसाधनं भवितुमर्हति प्रियत्वादन्नादिवदिति अन्नादिषु भोग्यत्वमुपाधिरिति परिहरति अमुनेति अत्रोक्ते
न अमुना सुखसाधनतयानुकूलेनानुकूलयितव्यः कस्यात्मा कोपि स्यात् आत्मातिरिक्तस्य भोक्तुरभावादित्यर्थः ननु स्वयमे
वानुकूलयितव्यः स्यादित्यत आह नैकस्मिन्निति एकस्यैवात्मनो युगपदुपकार्यत्वमुपकारकत्वं नेति धर्मद्वयं विरुध्यत इ
त्यर्थः २३. नन्वन्नादिवत्सुखसाधनत्वाभावेपि सुखवद्धोक्तृशेषतास्यादित्याशंक्य आत्मनो निरतिशयप्रेमास्पदत्वा
न्नैवमिति हरति सुखइति वैषयिके विषयजन्ये सुखे प्रीतिमात्रं प्रीतिरेव न निरतिशया आत्मा त्वतिप्रियो निरतिश

आत्मानुकूल्यादन्नादिसमश्चेदमुनात्र कः अनुकूलयितव्यः स्यान्नैकस्मिन्कर्मकर्तृता २३ सुखे वैषयि
के प्रीतिमात्रमात्मा त्वतिप्रियः सुखे व्यभिचरत्येषा नात्मनि व्यभिचारिणी २४ एकं त्यक्त्वान्यदादत्ते सुखं
वैषयिकं सदा नात्मा त्याज्यो न चादेयस्तस्मिन्व्यभिचरेत्कथं २५ हानादानविहीनेस्मिन्नुपेक्षा चेत्तृणादिव
त् उपेक्षितुः स्वरूपत्वान्नोपेक्ष्यत्वं निजात्मनः २६.

यप्रेमविषयः अतो न विषयजन्यसुखतुल्य इत्यर्थः तत्रोभयत्रोपपत्तिमाह सुखे व्यभिचरतीति सुखे वैषयिके सुखे जायमाने
षा प्रीतिः व्यभिचरति कदाचित्सुखांतरे गच्छति न तस्मिन्नेव नियता वतिष्ठते आत्मनि तु विद्यमाना प्रीतिर्न व्यभिचारिणी वि
षयांतरगामिनी न भवति अतो निरतिशयास्येत्यर्थः २४ सुखगोचरायाः प्रीतेर्व्यभिचारं दर्शयति एकमिति आत्मनि तु तद
भावं दर्शयति नात्मेति अयोग्यत्वादित्यर्थः फलितमाह तस्मिन्निति २५. हानादिविषयत्वाभावेपि आत्मनस्तृणादिवदुपेक्षा
विषयत्वं स्यादिति शंकते हानेति हानं परित्यागः आदानं स्वीकारः उपेक्षा औदासीन्यं आत्मनो हानाद्यविषयत्ववदुपेक्षा
विषयत्वमपि न संभवति अयोग्यत्वादित्यभिप्रायेण परिहरति उपेक्षितुरिति उपेक्षितुः उपेक्षाकर्तुः यो निजात्मा अविना

पं० ६०　　ग्रं० नं०

२२

शिस्वरूपोस्तितस्य स्वस्वरूपत्वादेवव्यतिरिक्त तृणादिवन्नोपेक्ष्यत्वमुपेक्षाविषयत्वं नविद्यतेइतिशेषः २६ ननुहानविष
यत्वं आत्मनोनास्तीत्यत्तमनुपपन्नं द्वेषात्त्याज्यत्वदर्शनादितिशंकते रोगेति यतोमुमूर्षादृश्यते ततआत्मनि द्वेषसंभवाद्वृश्चि
कादिवदात्मापित्याज्यइतियधुच्यतेतिशेषः तत्त्यागस्यात्मव्यतिरिक्तदेहविषयत्वान्नैवमितिपरिहरति तन्नहीति २७
त्यक्तुं मुमुक्षुं योग्यस्योचितस्यदेहस्यात्मनानास्तिकृस्यतर्हिसेत्यतआह त्यक्तुरिति त्यक्तुर्देहत्यागकारिणोदेहातिरिक्तस्य
जीवस्यसा आत्मतेत्यर्थः भवतुत्यक्तुरात्मत्वंप्रकृतेकिमायातमित्यतआह नत्यक्तुरिति अतोनात्मनस्त्याज्यत्वमित्यभि
प्रायः माभूदात्मनि द्वेषोदेहेतूपलभ्यतएवेत्याशंक्याह त्याज्यइति त्याज्यदेहगोचरे द्वेषेसत्यपिकाक्षतिरात्मनः त्यागा

रोगक्रोधाभिभूतानां मुमूर्षावीक्ष्यतेक्वचित् ततोद्वेषाद्भवेत्याज्य आत्मेतियदितन्नहि २७
त्यक्तुं योग्यस्यदेहस्यनात्मतात्यक्तुरेवसा नत्यक्तर्यस्तिसद्वेषस्त्याज्यद्वेषेतुकाक्षतिः २८
आत्मार्थत्वेनसर्वस्यप्रीतिरात्मा ह्यतिप्रियः सिद्धोयथापुत्रमित्रात्पुत्रः प्रियतरस्तथा २९

भाववादिनोममेतिशेषः २८ तदेवंनवा अरेपत्युः कामायेत्यारभ्यात्मनस्तु कामाय सर्वंप्रियंभवतीत्यंतायाः श्रुतेस्तात्प　२२
र्यपर्यालोचनयात्मनः प्रियतमत्वंप्रदर्श्य युक्तितोपितद्दर्शयति आत्मेति सर्वस्यसुखसहितस्यतत्साधनजातस्यपति
जायादेरात्मार्थत्वेनस्वस्योपकारकत्वेनप्रीतेश्चप्रियत्वादपि आत्माउपकार्यः स्वयमतिशयेनप्रियः सिद्धोहि एतदे
वदृष्टांतप्रदर्शनेनस्पष्टयति यथेति लोकेयथापुत्रमित्रात् पुत्रस्यमित्रभृत्वात् पुत्रद्वाराप्रीतिविषयाघज्ञदत्ता
देः सकाशात् पुत्रोदेवदत्तादिरव्यवधानेनप्रीतिविषयत्वात्तस्मादतिशयेनप्रियोभवति पितुर्विष्णुमित्रादेस्तथात्मद
त्तसंबंधित्वेनप्रीतिविषयात् सर्वस्मात्स्वयमतिशयेनप्रियइत्यर्थः २९　　छ　　छ

एवमात्मनिश्रुतियुक्तिभ्यामुपपादितांनिरतिशयांप्रीतिमनुभवप्रदर्शनेनदृढयति मानभूवमिति अहंमाभूवमिति
ननकापिममासत्वमस्तु किंतुसर्वदाभूयासंसदाममसत्तास्तु इत्येवंरूपा आशीः प्रार्थना सर्वस्यप्राणिजातस्य संबंधिनी
दृष्टा सर्वोप्येवमेवप्रार्थयतेइत्यर्थः फलितमाह प्रत्यक्षेति यतः एवंसर्वैः प्रार्थ्यतेअतः आत्मनिनिरतिशयाप्रीतिः
प्रत्यक्षसिद्धेत्यर्थः ३० वृत्तानुकीर्तनपुरःसरंमतांतरं दूषयितुंअनुभाषते इत्यादिभिरिति इतिशब्देनानुभवः
परामृश्यते आदिशब्देनयुक्तिश्रुती इत्यादिभिरनुभवयुक्तिश्रुतिलक्षणैस्त्रिभिः प्रमाणैरेवमुक्तेनप्रकारेण

मानभूवमहंकिंतुभूयासंदेदंत्यसौ आशीः सर्वस्यदृष्टेतिप्रत्यक्षाप्रीतिरात्मनि ३०
इत्यादिभिस्त्रिभिः प्रीतौसिद्धायामेवमात्मनि पुत्रभार्यादिशेषत्वमात्मनः कैश्चिदीरितं ३१
एतद्विवक्षयापुत्रेमुख्यात्मत्वंश्रुतीरितं आत्मावैपुत्रनामेतितत्रोपनिषदिस्फुटं ३२

त्मनिप्रीतौसिद्धायामपिकैश्चित् श्रुत्यादितात्पर्यानभिज्ञैरात्मनः पुत्रभार्यादिशेषत्वं पुत्रादीन् प्रतिस्वस्योपसर्जनत्वमितीरित
मभिहितं ३१ इदंकुतोवगतमित्यतआह एतदिति एतद्विवक्षयाएवंकैश्चिदीर्यते इत्येतदभिव्यक्तिकरणाभिप्रायेणआत्मा
वैपुत्रनामासीत्यादिकयाश्रुत्यापुत्रस्यमुख्यात्मत्वमीरितमित्यर्थः किंचतत् पुत्रस्यमुख्यात्मत्वंउपनिषदिऐतरेयोपनिष
दादौस्फुटंव्यक्तमभिहितमितिशेषः ३२　　॥

265
1938

केन वाक्येनेत्याकांक्षायां तदास्यमर्थतः पठति सोस्येति अस्य पितुः स पुरुषे हवा अयमादितो गर्भो भवतीति प्रकरणादौ पुरुषदे हे गर्भत्वेनोक्तः अयं सोऽयमेव कुमारं जन्मनोग्रेऽधिभावयतिइत्यत्रातिशयेन पालनीयतयोक्तः पुत्ररूप आत्मा पुण्येभ्यः कर्मभ्यः पु ण्यकर्मानुष्ठानाय प्रतिधीयते प्रतिनिधित्वेनावस्थाप्यते पित्रेति शेषः अथानंतरमस्य पितुः अयं प्रत्यक्षेण परिदृश्यमानः इत रः पुत्रादन्यो जरसा ग्रस्तः पितृरूप आत्मा स्वयं कृतकृत्यो नुष्ठितकृत्यजातः सन् प्रमीयते म्रियत इत्यर्थः ३३ उक्तार्थं दृढीक रणाय पुत्ररहितस्य परलोकाभावप्रदर्शनपरस्य नापुत्रस्य लोकोऽस्तीति वाक्यस्यार्थमाह सत्यपीति यतः पुत्रस्य मुख्यमात्म त्वमस्ति अत एवात्मनि स्वस्मिन् सत्यपि स्थितेऽपि अपुत्रस्य पुत्ररहितस्य पितुः लोकः परलोको नास्ति हि इदं पुराणादिषु प्र

सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते अथास्येतर आत्मायं कृतकृत्यः प्रमीयते ३३ सत्यप्यात्मनि
लोकोऽस्ति नापुत्रस्यात एव हि अनुशिष्टं पुत्रमेव लोक्यमाहुर्मनीषिणः ३४ मनुष्यलोको जय्यस्यात् पु
त्रेणैवेतरेण नो मुमूर्षुर्मंत्रयेत्पुत्रं त्वं ब्रह्मेत्यादिमंत्रकैः ३५

सिद्धमित्यर्थः व्यतिरेकमुखेनोक्तस्यार्थस्य अन्वयमुखेन प्रतिपादकस्य अनुशिष्टं पुत्रं लोक्यमाहुरिति वाक्यस्यार्थमाह अनु शिष्टमिति मनीषिणः शास्त्राभिज्ञाः अनुशिष्टं वक्ष्यमाणैस्त्वं ब्रह्मेत्यादिभिर्मंत्रैः शिक्षितमेव पुत्रं लोक्यं लोकाय हितं परलोकसाध नमित्यर्थः ३४ इदानीमैहिकसुखस्यापि पुत्रहेतुत्वप्रतिपादनपरं सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणेति श्रुतिवाक्य मर्थतः पठति मनुष्यलोकसुखं पुत्रेणैव जय्यं स्यात्संपाद्यं स्यादितरेण कर्मादिना साधनांतरेण नो नैव भवति पुत्रशून्यं सुख साधनमपि धनादिकं निर्वेदजनकं भवतीति भावः अनुशिष्टं पुत्रं लोक्यमित्यत्र पुत्रानुशासनमुक्तं इदानीं तस्यावसरं तन्मंत्रां श्च दर्शयति मुमूर्षुरिति आदिशब्देन त्वं यज्ञस्त्वं लोक इति मंत्रौ गृह्येते एभिस्त्वं ब्रह्मेत्यादिभिस्त्रिभिर्मंत्रैः मुमूर्षुः पिता मरणावसरे पुत्रं मंत्रयेत् पुत्रस्यानुशासनं कुर्यादित्यर्थः ३५ ॥ ॥ २३

उक्तमर्थं निगमयति इत्यादीति न केवलमयं श्रुतिसिद्धोऽर्थः किंतु लोकप्रसिद्धोपीत्याह लौकिका इति ३६ तदेवोपपादयति स्वस्मिन्निति एकेनादिशब्देन भार्यादयो गृह्यंते द्वितीयेन तक्षेत्रादयः फलितमाह मुख्या इति यस्मात्स्वप्रयासं सोढ्वापि पुत्रा दिजीवनोपायं संपादयति ततस्तस्मात्पुत्रादयो मुख्याः प्रधानभूता इत्यर्थः ३७ एवं वेदलोकप्रसिद्धाभ्यां प्रदर्शितं पुत्रादिप्रा धान्यमंगीकरोति बाढमिति तर्ह्यात्मनः शेषत्वोपपादनं व्याकुप्येदित्याशंक्याह एतावतापुत्रादेः क्वचित्प्राधान्यमस्तीत्येतावता न हि प्रतिज्ञामात्रेणार्थसिद्धिरित्याशंक्य यत्र यत्र व्यवहारे यस्य यस्यात्मत्वं विवक्ष्यते तस्य तस्यात्मनः तत्र तत्र प्राधान्यप्र दर्शनायापोह्यात्मत्वेनात्मनस्त्रैविध्यमाह गौणेति गौणात्मा मिथ्यात्मा मुख्यात्मा चेत्यात्मा त्रिधा भवति ३८ तत्र पुत्रादेर्गौणा

इत्यादिश्रुतयः प्राहुः पुत्रभार्यादिशेषतां लौकिका अपि पुत्रस्य प्राधान्यमनुमन्वते ३६
स्वस्मिन्मृतेपि पुत्रादि जीवेद्वित्तादिना यथा तथैव यत्नं कुरुते मुख्याः पुत्रादयस्ततः ३७
बाढमेतावतानात्मा शेषी भवति कस्यचित् गौणमुख्यामुख्यभेदैरात्मायं भवति त्रिधा ३८
देवदत्तस्तु सिंहोयं मिथ्येक्यं गौणमेतयोः भेदस्याभासमानत्वात्पुत्रादेरात्मता तथा ३९
भेदोस्ति पंचकोशेषु साक्षिणो न तु भात्यसौ मिथ्यात्मता ततः कोशानां स्थाणोश्चोरात्मता यथा ४०

त्मत्वप्रदर्शनाय लोके गौणप्रयोगमुदाहरति देवदत्त इति अयं देवदत्तः सिंह इति देवदत्तसिंहयोरैक्यं तद्गौणमौपचारिकं तत्र हे तुमाह एतयोर्भेदस्याभासमानत्वादिति दार्ष्टांतिकं योजयति पुत्रादेरिति ३९ अनंतरं मिथ्यात्मानं दर्शयति भेद इति पंचकोशे ष्वानंदमयाद्यन्नमयांतेषु पंचसु कोशेषु साक्षिणः सकाशाद्विद्यमानोपि भेदो नावभासते अतस्तेषां मिथ्यात्मत्वमित्यर्थः मिथ्या त्मत्वे दृष्टांतमाह स्थाणोरिति वस्तुतश्चोराद्भिन्नस्य स्थाणोश्चोररूपत्वं यथा मिथ्या तद्वदित्यर्थः ४० ॥ ॥

219
1938

एवंगौणमिथ्यात्मनावुपपाद्यइदानीं साक्षिणो मुख्यात्मत्वमुपपादयति नभातीति साक्षिणः साक्षिस्वरूपस्यात्मनः गौणात्मनः
पुत्रादेरिव कस्मादपि भेदो नभाति मिथ्यात्मनो देहादेरिव भेदो नास्त्यपि तत्रोभयत्र हेतुः अप्रतियोगिन इति हेतुगर्भितं विशेषणं
अप्रतियोगित्वाद्यथापुत्रादेर्देहादेरपि स्वयं प्रतियोगी वर्तते नैवं स्वस्य वस्तुभूतः कश्चित्प्रतियोग्यस्ति देहादेः सर्वस्यारोपित
त्वादितिभावः ननु भेदाभावे साक्षिणो गौणमिथ्यात्वे माभूतां मुख्यात्मत्वं तु कुत इत्यत आह सर्वेति सर्वस्माद्देहपुत्रादेरांतरत्वा
त्सर्वसाक्षिणः प्रतीचः सर्वांतरत्वेन प्रतीयमानत्वात्तस्यैव साक्षिण एवात्मत्वं मुख्यमनौपचारिकं इष्यते भ्युपगम्यत इत्यं
र्थः अनेदमनुमानं सूचितं विमतः साक्षी मुख्य आत्मा भवितुमर्हति सर्वांतरत्वात् यो मुख्य आत्मा न भवति स सर्वांतरोपि

नभातिभेदो नाप्यस्ति साक्षिणो प्रतियोगिनः सर्वांतरत्वात्तस्यैव मुख्यमात्मत्वमिष्यते ४१
सत्येवं व्यवहारेषु यस्यात्मनो चिता तेषु तस्यैव शेषित्वं सर्वस्यान्यस्य शेषता ॥ ४२
मुमूर्षो गृहरक्षादौ गौणात्मैवोपयुज्यते मुख्यात्मानापि मिथ्यात्मा पुत्रः शेषी भवत्यतः ४३

नभवति यथा हंकारादिरिति केवलव्यतिरेकी ४१ भवत्वात्मत्रैविध्यं पुत्रादेः शेषित्वाभिधाने किमायातमित्यत आह सत्येव
मिति एवमात्मत्रैविध्ये सति ये पुलौकिक वैदिकलक्षणेषु पालनपोषणप्रसन्नतानुसंधानादिषु व्यवहाविशेषे पु यस्य पुत्रा
देर्देहादेः साक्षिणो वात्मत्वमुचितं भवति तेषु तस्य पुत्रादेर्देहादेः साक्षिणो वा शेषित्वं प्रधानत्वं अन्यस्य तद्व्यतिरिक्तस्य सर्वस्य
शेषता उपसर्जनत्वं भवतीति शेषः ४२ तदेव प्रपंचयति मुमूर्षोरित्यादिना श्लोकपंचकेन गृहरक्षादौ कर्मविशेषे गौणात्मै
वपुत्रभार्यादिरूप एवोपयुज्यते उपयुक्तो भवति उत्तरत्रजिजीविषुत्वादित्यर्थः मुख्यात्मा साक्षी नोपयुज्यते अविकारित्वा
त् नापि मिथ्यात्मा तस्य मरणोन्मुखत्वादित्यर्थः फलितमाह पुत्र इति स्पष्टं ४३ ॥ ॥

उक्तेगृहरक्षादिव्यवहारे सत्यपि स्वस्मिन् पुत्रादिस्वीकारे दृष्टांतमाह अध्येतेति अयमध्येता वह्निरित्यस्मिन् प्रयोगे स्वरूपेण विद्यमा
नोपि अग्निर्गाग्निशब्दार्थत्वेन गृह्यते तस्याध्येतृत्वायोगात् किंतु अध्येतृत्वयोग्यो बटुर्माणवक एव अत्रास्मिन् प्रयोगे ग्निशब्दार्थत्वेन
गृह्यते योग्यत्वादित्यर्थः ४४ एवं गौणात्मप्राधान्यस्थलमुदाहृत्य मिथ्यात्मप्राधान्यस्थलमुदाहरति कृशोहमिति अहं कृशो जा
तो न्नभक्षणादिनापुष्टीसंपादयिष्यामीत्यादौ लोकव्यवहारे अन्नभक्षणयोग्यस्य देहस्यैवात्मत्वं गृहीतुमुचितं उक्तमर्थं लोकव्यव
हारप्रदर्शनेन द्रढयति नपुत्रमिति ४५ किंच तपसेति यदा तु तपः कृत्वा स्वर्गं संपादयिष्यामीत्यादिव्यवहारं करोति तदा कर्तृश
ब्दवाच्यविज्ञानमयस्यैवात्मत्वमुचितं न देहादेरित्यर्थः तदेवोपपादयति अनपेक्ष्येति यतो न देहस्यात्मत्वमुचितं ततो देहभोग

अध्येतावह्निरित्यत्र सन्नप्यग्निर्नगृह्यते अयोग्यत्वेन योग्यत्वाद्बटुरेवात्र गृह्यते ४४ कृशोहं पुष्टिमाप्स्यामीत्या
दौ देहात्मतोचिता नपुत्रं विनियुक्तेत्र पुष्टिहेत्वन्नभक्षणे ४५ तपसा स्वर्गमेष्यामीत्यादौ कर्त्रात्मतोचिता अन
पेक्ष्य वपुर्भोगं चरेत्कृच्छ्रादिकं ततः ४६ मोक्ष्येहमित्यत्र युक्तं चित्मत्वं तदा पुमान् तदेति गुरुशास्त्राभ्यां नतु
किंचिच्चिकीर्षति ४७ विप्रक्षत्रादयो यद्वद्बृहस्पतिसवादिषु व्यवस्थितास्तथा गौणमिथ्यामुख्या यथोचितं ४८

परित्यागपूर्वकं कर्तुरुपकारकं कृच्छ्रचांद्रायणादिकं चरतीत्यर्थः ४६ किंच मोक्ष्य इति यदा पुमान् शमादीन्संपाद्य मुक्तिं प्रा
प्स्यामीति मतिं करोति तदा गुरुशास्त्राभ्यां आचार्योपदेशवाक्यार्थविचारजन्यापरोक्षज्ञानेन नाहं कर्तात्मा सच्चिदानंदब्रह्माह
मस्मि इति चिदात्मानमवगच्छति तस्य चिदात्मत्वमेवोचितं न तु कर्त्रात्मत्वमित्यर्थः ४७ उदाहृतानां त्रिविधानां आत्मनां
व्यवहारविशेषेषु व्यवस्थया प्राधान्ये दृष्टांतमाह विप्रेति यथा ब्राह्मणो बृहस्पतिसवेन यजेतेत्यत्र ब्राह्मणस्यैवाधिकारो न क्ष
त्रियवैश्ययोः राजा राजसूयेन यजेतेत्यत्र राज्ञ एवाधिकारो न ब्राह्मणवैश्ययोः वैश्यस्तोमेन यजेतेत्यत्र वैश्यस्यैवाधिकारो
नेतरयोः एवं गौणमिथ्यामुख्यभेदानामात्मनां यथायोग्यं स्वोचितव्यवहारेषु प्राधान्यमिति भावः ४८ ॥ ॥

पं० ८० ग्रं० न०

२५ फलितमाह तत्रतत्रेति यस्मिन्यस्मिन्व्यवहारे योयआत्माउचितोभवति तत्रतत्रतस्मिंस्तस्मिन्व्यवहारेउचितेउपयोगित्वा
प्रधानभूतेआत्मन्येवप्रीतिरतिशायिनी अतिशायवती तच्छेषेतस्यात्मनः शेषभूतेअनात्मनिआत्मव्यतिरिक्तेवस्तुनिप्रीतिः प्री
तिमात्रंनतिरतिशायंप्रेमेत्यर्थः अन्यत्रआत्मतत्शेषाभ्यांअन्यस्मिन्वस्तुनिनोभयंउभयविधमपिप्रेमनास्तीत्यर्थः ४९ अन्य
त्रनोभयमित्यत्राभिहितस्यान्यशब्दार्थस्यावांतरभेदमाह उपेक्ष्यमिति अन्यदन्यदित्युच्यमानंवस्तु उपेक्ष्यं उपेक्षाविषयः
द्वेष्यंद्वेष्यविषयश्चेतिद्विधाद्विप्रकारंभवति तदुभयमुदाहरति मार्गेति मार्गगतंतृणलोष्टादिकं उपेक्ष्यं स्वस्योपद्रवहेतुव्या
घ्रादिकंद्वेष्यमित्यर्थः फलितमाह एवमिति ५० चातुर्विध्यमेवदर्शयति आत्मेति तन्वात्मादीनांचतुर्णामपिप्रियतमत्व

तत्रतत्रचितोप्रीतिरात्मन्येवातिशायिनी अनात्मनितुतच्छेषेप्रीतिरन्यत्रनोभयं ॥ ४९
उपेक्ष्यंद्वेष्यमित्यन्यत्द्वेधामार्गतृणादिकं उपेक्ष्यंव्याघ्रसर्पादिद्वेष्यमेवंचतुर्विधं ॥ ५०
आत्माशेषउपेक्ष्यंचद्वेष्यंचेतिचतुर्ष्वपि नव्यक्तिनियमः किंतुतत्तत्कार्यात्तथातथा ५१
स्वयंव्याघ्रः संमुखोद्वेष्योह्युपेक्ष्यस्तुपराङ्मुखः लालनादनुकूलश्चेद्विनोदायेतिशेषतां ५२

त्वादिकं किंनियतंनेत्याह चतुर्ष्वपीति अयमेवप्रियतमः अयमेवप्रियः इदमेवोपेक्ष्यं इदमेवद्वेष्यंचनान्यदितिनियमो २५
नास्तीत्यर्थः किंतर्हीत्यतआह किंत्विति तस्मात्तस्मात्कार्यविशेषादुपकारापकारादिरूपात्तथातथाप्रियादिरूपतेत्यर्थः
५१ सर्वत्रानियमयोजनायप्रसिद्धेद्वेष्येव्याघ्रेतदभावंदर्शयति स्वयमिति यदाव्याघ्रःस्वभक्षणायसंमुखआगच्छति त
दाद्वेष्योभवति सएवपराङ्मुखोगच्छतिचेदुपेक्ष्योभवति सएवलालनात् स्वानुकूलोभवति तदाविनोदायेति विनोदसा
धनंभवतीति शेषतांस्वस्योपकारकत्वेनप्रियत्वंभजत इत्यभिप्रायः ५२ ॥ ॥

नन्वेकस्यैववस्तुनः प्रियत्वादिधर्मत्रयांगीकारेव्यवहारव्यवस्थानस्यादित्याशंक्याह व्यक्तीनामिति व्यक्तिनियमाभावे
पिलक्षणवशाद्व्यवस्थाभविष्यतीत्यर्थः किंलक्षणमित्याकांक्षायांतल्लक्षणमाह आनुकूल्यमिति अनुकूलत्वंप्रियस्य
लक्षणंव्यावर्तकोधर्मः प्रतिकूलत्वंद्वेष्यस्यलक्षणं उपेक्ष्यस्यआनुकूल्यप्रातिकूल्यद्वयाभावोलक्षणमित्यर्थः ५३ एता
वताग्रंथसंदर्भेणोपपादितमर्थंबुद्धिसौकर्यायसंक्षिप्यकथयति आत्मेति आत्माप्रत्यगानंदः प्रेयानतिशयेन प्रियः शे
षः स्वोपसर्जनभूतःपदार्थः तदन्ययोः ताभ्यामात्मनः तच्छेषाच्चान्ययोः व्याघ्रपथिगततृणादिरूपयोर्द्वेषोपेक्षेयथाक्रमं
भवतइति एवंचातुर्विध्येनलोकोव्यवस्थितः व्यवस्थांप्राप्तः उक्तप्रकारचतुष्टयातिरिक्तंनकिंचिद्विद्यते इत्यभिप्रायः

व्यक्तीनांनियमोमाभूल्लक्षणात्तुव्यवस्थितिः आनुकूल्यंप्रातिकूल्यंद्वयाभावश्चलक्षणं ५३ आत्माप्रेयान्प्रि
यःशेषोद्वेषोपेक्षेतदन्ययोः इतिव्यवस्थितोलोकोयाज्ञवल्क्यमतेचतत् ५४ अन्यत्रापिश्रुतिःप्राहपुत्राद्वित्ता
त्तथान्यतः सर्वस्मादांतरंतत्त्वंतदेतत्प्रेयइष्यतां ५५ श्रोत्याविचारदृष्ट्यायंसाक्ष्येवात्मानचेतरः कोशानपंच
विविच्यांतर्वस्तुदृष्टिर्विचारणा ५६

अयमर्थः श्रुत्यभिमतोपीत्याह याज्ञवल्क्येति आत्मादीनांप्रियतमत्वादिकंयत् तद्याज्ञवल्क्यमतंचयाज्ञवल्क्यस्यापिसं
मतमित्यर्थः ५४ नकेवलंमैत्रेयीब्राह्मणएवात्मनः प्रियत्वमुक्तं किंतुपुरुषविधब्राह्मणेपीत्यभिप्रायेणतद्वाक्यार्थंसंगृह्णा
ति अन्यत्रापीति तदेतत्प्रेयः पुत्रात्प्रेयोवित्तात् प्रेयोन्यस्मात् सर्वस्मादांतरतरंयदयमात्मेत्यनेनवाक्येनपुत्रवित्तादेः सर्व
स्मादांतरस्यात्मतत्त्वस्यप्रियतमत्वमीरितमित्यर्थः ५५ भवत्वेवंश्रुत्याद्यभिधानेप्रकृतेकिमायातमित्यतआह श्रौत्येति
श्रुत्यर्थपर्यालोचनरूपयाविचारदृष्ट्यासाक्षिणएवमुख्यमात्मत्वंनेतरस्यपुत्रादेरित्यर्थः विचारदृष्ट्येत्यभिहितस्यविचारस्य
स्वरूपमाह कोशानिति अन्नमयादीन्पंचकोशांस्तित्तिरीयश्रुत्युक्तप्रकारेणात्मनःपृथक्कृत्यांतःस्थितस्यात्मनोनुभवोविचारणेत्य
र्थः ५६

231
1938

पं॰ द॰ अंतस्थितस्यवस्तुनोदर्शनप्रकारमाह जागरेत्यादिना जाग्रदाद्यवस्थानांमध्येउत्तरोत्तरावस्थागमनस्यपूर्वावस्थानिवृत्ते ग्रं॰ नं॰

२६ श्चावभासनंयतोभिन्नचैतन्यरूपात्साक्षिणोभवतिसस्वप्रकाशचिद्रूपआत्मेत्यर्थः ५७ संग्रहेणोक्तंमर्थंप्रपंचयति शेषा इति साक्षिव्यतिरिक्ताः प्राणादिवित्तांताः वक्ष्यमाणाःपदार्थाः तारतम्येनात्मनआसन्नाःसमीपवर्तिनोभवंति तत्रोपपत्ति माह प्रीतिरिति यथातारतम्येनांतरत्वंतद्वदेवतेषुप्राणादिषुतारतम्यात्प्रीतिर्वीक्ष्यतेसर्वैरपीतिशेषः ५८ प्रीतेस्तारतम्ये नानुभवमेवविशदयति वित्तादिति पिंडोन्नमयोदेहः अयंभावः सर्वैःप्राणिभिःपुत्रादिविपत्परिहारायवित्तव्ययःक्रि यतेस्वदेहरक्षणायकदाचित्पुत्रादिरपिदीयतेइंद्रियनाशपरिहारायताडनादिनादेहपीडाप्यंगीक्रियतेमरणप्रसक्तौत

जागरस्वप्नसुषुप्तीनामागमापायभासनं यतोभवत्यसावात्मास्वप्रकाशचिदात्मकः ५७ शेषाःप्राणादिवि त्तांताआसन्नास्तारतम्यतः प्रीतिस्तथातारतम्यात्तेषुसर्वेषुवीक्ष्यते ५८ वित्तात्पुत्रःप्रियःपुत्रात्पिंडःपिं डात्तथेंद्रियं इंद्रियाच्चप्रियःप्राणःप्राणादात्मापरःप्रियः ५९ एवंस्थितेविवादोत्रप्रतिबुद्धविमूढयोः श्रुत्योदाहारितत्रात्माप्रेयानित्येवनिर्णयः ६० साक्ष्येवदृश्यादन्यस्मात्प्रेयानित्याहतत्त्ववित् प्रेयान् पुत्रादिरेवेमंभोक्तुंसाक्षीतिमूढधीः ६१ २६

त्परिहारायेंद्रियवैकल्यमप्यंगीक्रियतेअतएवोत्तरोत्तरमतिशयेनप्रियत्वंसर्वानुभवसिद्धमात्मनस्तुनिरतिशयप्रेमास्पदत्वं विद्वदनुभवसिद्धमिति ५९ एवमात्मनःप्रियतमत्वेप्रमाणसिद्धेपिज्ञान्यज्ञानिनोर्विप्रतिपत्तेर्निरसनायश्रुत्यातद्विप्रति पत्तिर्दर्शितेत्याह एवमिति तत्रानिर्णयमाह तत्रेति आत्मनःप्रियतमत्वस्योपपादितत्वादितिभावः ६० तामेवविप्रति माह साक्षीति ६१ ॥ ॥ ॥

आत्मातिरिक्तस्यप्रियत्ववादिनोविभज्योत्तराभिधानायतमेववादिनंविभज्यकथयति आत्मनइति उत्तराभिधानप्रकारमा ह तस्योत्तरमिति तयोःशिष्यप्रतिवादिनोःसंबंधिनस्तस्यवचनस्यउत्तरंवचः प्रत्युत्तररूपंवाक्यंक्रमेणबोधशापौबोधरूपं शापरूपंचकुर्यादित्यर्थः ६२ अनयोःप्रतिवचनप्रदानरूपंमप्योन्यमात्मनःप्रियंब्रुवाणंप्रतिब्रूयात्प्रियंरोत्स्यतीतिसमनंतरश्रुति वाक्यमर्थतःपठति प्रियंत्वामिति तत्त्ववित्शिष्यप्रतिवादिनावुभावपिप्रतिहेशिष्यहेप्रतिवादिन् प्रियंत्वदभिमतंपुत्रादिरूपं स्वनाशेनत्वांशिष्यंप्रतिवादिनंवारोत्स्यतिरोदयिष्यतिइत्येवमुक्तेनप्रकारेणउत्तरंप्रतिवचनंवक्तिब्रवीति इदमेकमेववचनंशि ष्यप्रतिवादिनोरुभयोःकथमुत्तरंजातमित्याशंक्यशिष्यंप्रत्युत्तरंतावद्योतयति स्वोक्तप्रियस्येत्यादिनावीक्षतेतमहर्निशम्

आत्मनोन्यंप्रियंब्रूतेशिष्यश्चप्रतिवाद्यपि तस्योत्तरंवचोबोधशापौकुर्यात्तयोःक्रमात् ६२ प्रियंत्वांरोत्स्यतीत्ये वमुत्तरंवक्तितत्त्ववित् स्वोक्तप्रियस्यदुष्टत्वंशिष्योवेत्तिविवेकतः ६३ अलभ्यमानस्तनयःपितरौक्लेशयेच्चिरं ल ब्धोपिगर्भपातेनप्रसवेनचबाधते ६४ जातस्यग्रहरोगादिकुमारस्यचमूर्खता उपनीतेप्यविद्यत्वमनुद्वाहश्चपं डिते ६५ यूनश्चपरदारादिदारिद्र्यंचकुटुंबिनः पित्रोर्दुःखस्यनास्त्यंतोधनीचेन्म्रियतेतदा ६६ एवंविवि च्यपुत्रादौप्रीतिंत्यक्त्वानिजात्मनि निश्चित्यपरमांप्रीतिंवीक्षतेतमहर्निशं ६७

त्यंतेनसार्धचतुष्टयश्लोकेन शिष्यःस्वोक्तप्रियस्यस्वेनाभिहितस्यपुत्रादिरूपस्यप्रीतिविषयस्यविवेकतःवक्ष्यमाणदोषवि चारेणदुष्टत्वंवेत्तिअवगच्छति ६३ दोषविचारप्रकारमेवदर्शयति ६४ अलभ्यमानइत्यादिना ६५ एवंपुत्रगतदोषसंकी र्तनंदारादिसर्वविषयदोषोपलक्षणार्थं ६६ एवंविविच्येति एवमुक्तेनप्रकारेणपुत्रादौविषयजातेविविच्यविद्यमानानदो षानविभज्यज्ञात्वातस्मिन्प्रीतिंपरित्यज्यनिजात्मनिप्रत्यग्रूपेसाक्षिणीपरमांनिरतिशयांप्रीतिंनिश्चित्यतंप्रत्यगात्मान महर्निशंसर्वदावीक्षतेअनुसंधत्तेइत्यर्थः ६७ ॥ ॥ ॥

प्रियं त्वां रोत्स्यतीत्यस्यैव वाक्यस्य प्रतिवादिनं प्रति शापरूपत्वं प्रकटयति आग्रहादिति आग्रहादुक्तं पुत्रादिप्रियत्वं सर्वथा नत्यजामीत्येवंरूपात् ब्रह्मविद्द्वेषादनेनोक्तं विपरीतमिथ्याभीत्येवंरूपाच्च पक्षं पुत्रादीनामेव प्रियत्वाभिधानरूपं अपरित्यजतः प्रतिवादिनो नरकप्राप्तिः तथा बहुयोनिषु नरतिर्यगादिषु संस्थापने के पुनर्जन्मरूपदोषः पुत्रभार्यादिस्नेहवियोगानिष्टप्राप्तिरूपः प्रोक्तः प्रियं त्वां रोत्स्यतीति वदता ज्ञानिनेति शेषः ६८ ननु ज्ञानिनोक्तस्यैकस्यैव वाक्यस्य शिष्यं प्रत्युपदेशरूपत्वं वादिनं प्रति शापरूपत्वं चेति विरुद्धं रूपद्वयं कथं घटते इत्याशंक्यो त्तरप्रदातुरीश्वररूपत्वात्तस्याभिप्रायानुसारेणोभयं भविष्यतीति मत्वा तदुपपादकस्येश्वरोऽहं तथैव स्यादिति समनंतर वाक्यस्य तात्पर्यमाह ब्रह्मविदिति यतो ब्रह्मविदः स्वस्य ब्रह्मत्वानुभवादीश्वरत्वमस्यतः ते

प्रियं त्वां रोत्स्यतीत्युक्तिराग्रहाद्ब्रह्मविद्द्वेषादपि पक्षममुंचतः वादिनो नरकः प्रोक्तो दोषश्च बहुयोनिषु ६८ ब्रह्मविद्ब्रह्मरूपत्वादीश्वरत्वेन वर्णितं यद्यत्तत्तथैव स्यात्तच्छिष्यप्रतिवादिनोः ६९ यस्तु साक्षिणमात्मानं सेवते प्रियमुत्तमं तस्य प्रेयानसावात्मा न नश्यति कदाचन ७०

न यं यं शिष्यादिकं प्रति यद्यदिष्टमनिष्टं वाभिधीयते तत्तच्छिष्यप्रतिवादिनोस्तस्य ज्ञानिनो यः शिष्यः यश्च प्रतिवादी तयोस्तथैव स्यादिष्टमनिष्टं वा अवश्यं भवेदित्यर्थः ६९ व्यतिरेकमुखेनोक्तस्यार्थस्य अन्वयमुखेन प्रतिपादकमात्मानमेव प्रियमुपासीत स य आत्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवतीति समनंतर वाक्यमर्थतः पठति यस्त्विति तुशब्द उक्तवैलक्षण्यद्योतनार्थः अनात्मनि प्रियत्ववादिनोऽन्यो यः शिष्यः आत्मानमेव उत्तमं प्रियं निरतिशयप्रेमगोचरं सेवते सदानुस्मरति तस्य शिष्यादेः प्रेयान् प्रियत्वेनाभिमतोऽसावात्मा प्रतिवाद्यभिमतप्रियमिव न कदाचिद्विनश्यति किं तु सदानंदरूपः सन्नवभासत इत्यर्थः ७० ॥ ॥ ॥ ॥

२८

इत्थमात्मनः परप्रेमास्पदत्वहेतुं प्रसाध्येदानीं फलितमाह परप्रेमेति अत्रायं प्रयोगः आत्मा परमानंदरूपः निरतिशयप्रेमविषयत्वात् यः परमानंदरूपो न भवति स निरतिशयप्रेमविषयोऽपि न भवति यथा घटादिरिति केवलव्यतिरेकी परप्रेमास्पदत्वहेतोः आत्मनः परमानंदरूपतासाधने सामर्थ्यद्योतनाय प्रीतिरूढो स्फुरवद्बहु उदाहरति स्फुरवेति यतः सार्वभौमादिहिरण्यगर्भांतेषु पदविशेषेषु यत्र यत्र प्रीतिर्वर्द्धते तत्र तत्र स्फुरत्वाभिवृद्धिरस्तीति तैत्तिरीयबृहदारण्यकश्रुत्योरभिहितमतः प्रीतेर्निरतिशयत्वे सति आनंदस्यापि निरतिशयत्वमवगंतुं शक्यत इति भावः ७१ नन्वात्मनः परमानंदरूपत्वमनुपपन्नं तथात्वे चैतन्यस्येव तत्स्वरूपभूतस्यानंदस्यापि सर्वासु धीवृत्तिषु अनुवृत्तिः प्रसज्येतेति शंकते चैतन्यवदिति ७२ चिदानंद

परप्रेमास्पदत्वेन परमानंदरूपता स्फुरवद्बृद्धिः प्रीतिवृद्धौ सार्वभौमादिषु श्रुता ७१ चैतन्यवत्सुखं चास्य स्वभावश्चेच्चिदात्मनः धीवृत्तिष्वनुवर्तेत सर्वास्वपि चितिर्यथा ७२ मैवमुष्णप्रकाशात्मा दीपस्तस्य प्रभागृहे व्याप्नोति नोष्णता तद्वच्चितेरेवानुवर्तनं ७३ गंधरूपरसस्पर्शेष्वपि सत्सु यथा पृथक् एकाक्षेणैक एवार्थो गृह्यते नेतरस्तथा ७४ चिदानंदौ नैव भिन्नौ गंधाद्यास्तु विलक्षणाः इति चेत्तदभेदोऽपि साक्षिण्यन्यत्र वा वद ७५

योरुभयोरपि आत्मस्वरूपत्वेपि वृत्तिषु चित एवानुवृत्तिर्नानंदस्येति दृष्टांतावष्टंभेन परिहरति मैवमिति यथोष्णप्रकाशात्मकस्यापि दीपस्य प्रकाश एव गृहादावनुगच्छति नोष्णता एवं चैतन्यस्यानुवृत्तिर्नानंदस्येत्यर्थः ७३ ननु चिदानंदयोरभेदेपि दृष्टिभिव्यंजक धीवृत्तावेवानंदाभिव्यक्तिरपि स्यादित्याशंक्य तथानियमाभावे दृष्टांतमाह गंधेति यथैकद्रव्यवर्त्तिनां गंधादीनां चतुर्णां मध्ये घ्राणादिनाएकेनेंद्रियेण गंधादिरेक एव गुणो गृह्यते नेतरस्तथा चिदानंदयोर्मध्ये चित एवावभासनमित्यर्थः ७४ दृष्टांतदार्ष्टांतिकयोर्वैषम्यं शंकते चिदानंदाविति विलक्षणा भिन्ना इत्यर्थः उक्तं वैषम्यं परिहर्तुं दार्ष्टांतिके चिदानंदयोरभेदः किं स्वाभाविक उत औपाधिक इति विकल्पयति तदभेद इति तदभेदस्तयोः चिदानंदयोः अभेदः एवं साक्षिण्यात्मस्वरू

275
1935

येषामन्यत्र तदुपाधिभूतासु वृत्तिष्वेवेत्यर्थः ७५ प्रथमे पक्षे दृष्टांतदार्ष्टांतिकयोः साम्यमाह आद्य इति आद्ये चिदानंदयोः साक्षिणो भेदाभावपक्षे पुष्पवर्तिनो गंधादयोऽपि एवं चिदानंदवदेवाभिन्नाः परस्परं भेदरहिताः इतरपरिहारेणैकस्यानेतुमशक्यत्वादिति भावः द्वितीयपक्षेऽपि साम्यमाह अक्षेति अक्षाणां गंधादिग्राहकाणां घ्राणादीन्द्रियाणां भेदेन तद्भेदे तेषां गंधादीनां भेदाभ्युपगमे तद्वदेव वृत्तिभेदात् चिदानंदाभिव्यक्तिहेतूनां राजससात्त्विकवृत्तीनां भेदात्तयोश्चिदानंदयोर्भिदा भेदो भविष्यतीत्यर्थः ७६ ननु तर्हि चिदानंदयोरैक्यं कुत्रोपलभ्यत इत्याशंक्याह सत्त्ववृत्ताविति सत्त्ववृत्तौ शुभकर्मोपस्थापितायां सत्त्वगुणपरिणामरूपायां बुद्धिवृत्तौ चित्सुखैक्यं चिदानंदयोरैक्यं भासत इत्यर्थः तत्रोपपत्तिमाह तद्वृत्तेरिति कुत्र तर्हि भेदोऽवभासत इत्यत आह र

> आद्ये गंधादयो यद्वदभिन्नाः पुष्पवर्तिनः अक्षभेदेन तद्भेदे वृत्तिभेदात्तयोर्भिदा ७६ सत्त्ववृत्तौ चित्सुखैक्यं तद्वृत्तेर्निर्मलत्वतः रजोवृत्तेस्तु मालिन्यात्सुखांशोऽत्र तिरस्कृतः ७७ तिन्त्रिणीफलमत्यम्लं लवणेन युतं यदा तदाम्लस्य तिरस्कारादीषदम्लं यथा तथा ७८ ननु प्रियतमत्वेन परमानंदतात्मनि विवेक्तुं शक्यतामेवं विना योगेन किं भवेत् ७९ यद्योगेन तदेवेति वदामो ज्ञानसिद्धये योगः प्रोक्तो विवेकेन ज्ञानं किं नोपजायते ८० ॥

जोवृत्तेरिति विद्यमानस्यापि सुखांशस्य तिरस्कारे दृष्टांतमाह तिन्त्रिणीति यथा तिन्त्रिणीफले लवणयोगादत्यम्लत्वं तिरोहितं तद्वद्रजोवृत्त्यावानंदस्य तिरोभाव इत्यर्थः ७८ गूढाभिसंधिः शंकते नन्विति उक्तेन प्रकारेण आत्मनः परमानंदरूपत्वं परप्रेमास्पदत्वहेतुना गौणमिथ्यात्मरूपेभ्यः प्रियोपेक्ष्यद्वेष्येभ्यो विवेक्तुं विविच्य ज्ञातुं शक्यतां नाम तथापि नायं विवेको ज्ञानसाधनं अपरोक्षज्ञानद्वारा मुक्तिहेतुर्योगस्याभिधानादिति गूढोऽभिसंधिः ७९ गूढाभिसंधिरेवोत्तरमाह यद्योगेनेति यथा योगस्यापरोक्षज्ञानहेतुत्वमस्ति एवं विवेकस्यापि इत्यत्रापि गूढोऽभिसंधिः इदानीं चोद्यपरिहारयोरुभयोरभिसंधिं प्रकटयति ज्ञानेति यथा परोक्षज्ञानसाधनत्वेन योगोऽभिहितः पूर्वस्मिन्नध्याय एवमस्मिन्नध्यायेऽभिहितेन गौणात्मविवेकद्वारा कोशपंचकविवेके २८

नापि ज्ञानमुत्पद्यत एवेत्यर्थः ८० तत्र किं प्रमाणमित्याशंक्याह यत्सांख्यैरिति सांख्यैरात्मानात्मविवेकिभिर्यत्स्थानं मोक्षरूपं प्राप्यते गम्यते तद्योगैर्योगिभिरपि गम्यते प्राप्यते इत्यनेन वचनेन योगिनां विवेकिनां च फलैकत्वं ज्ञानद्वारा मोक्षलक्षणस्य फलस्यैकत्वमुक्तमित्यर्थः ८१ ननु विवेकयोगयोरेकमेव चेत्फलं तर्हि तयोरन्यतरस्यैव मुक्तं शास्त्रेषु प्रतिपादनं नोभयोरित्याशंक्याधिकारिवैचित्र्याद्युक्तमुभयप्रतिपादनमित्यभिप्रायेणाह असाध्य इति ८२ नन्वत्यंतायाससाध्यस्य योगस्य निरायाससकलभाविवेकादतिशयो वक्तव्य इत्याशंक्य सोऽतिशयः किमपरोक्षज्ञानजनकत्वादुच्यते उत रागद्वेषनिवृत्तिहेतुत्वादथवा द्वैतानुपलब्धिकारणत्वादिति विकल्प्य प्रथमे पक्षे फलसाम्यमित्याह योग इति द्वयोर्विवेकयो

> यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते इति स्मृतं फलैकत्वं योगिनां च विवेकिनां ८१ असाध्यः कस्यचिद्योगः कस्यचिज्ज्ञाननिश्चयः इत्थं विचार्य मार्गौ द्वौ जगाद परमेश्वरः ८२ योगे कोऽतिशयस्तस्य ज्ञानमुक्तं समं द्वयोः रागद्वेषाद्यभावश्च तुल्यो योगिविवेकिनोः ८३ न प्रीतिर्विषयेष्वस्ति प्रेयानात्मेति जानतः कुतो रागः कुतो द्वेषः प्रातिकूल्यमपश्यतः ८४ देहादेः प्रतिकूलेषु द्वेषस्तुल्यो द्वयोरपि द्वेषं कुर्वन्न योगी चेदविवेक्यपि तादृशः ८५

गयोरुभयोरपि ज्ञानलक्षणं फलं समम् उक्तं यत्सांख्यैरित्यादिना अतस्तव योगे कोऽतिशयः न कोऽपीत्यर्थः द्वितीयं प्रत्याह रागेति ८३ विवेकिनो रागाद्यभावमुपपादयति न प्रीतिरिति आत्मा प्रेयानिति आत्मा प्रियतम इति जानतः पुरुषस्य न तावद्विषयेषु प्रीतिरस्ति अतो न तेषु रागो जायते रागहेतोरानुकूल्यज्ञानस्याभावात् नापि द्वेषः तद्धेतोः प्रातिकूल्यज्ञानस्याभावादित्यर्थः ८४ ननु विवेकिनो व्यवहारदशायां देहाद्युपद्रवकारिषु द्वेषो दृश्यत इत्याशंक्य तदा योगिविवेकिनोस्तुल्य इति परिहरति देहादेरिति प्रतिकूलेषु वृश्चिकादिषु द्वेषकर्तुस्तदा योगित्वमेव नाभ्युपगम्यते चेद्भवता तर्हि तादृशस्य विवेकित्वमपि नाभ्युपगच्छाम इत्याह द्वेषमिति तादृशो द्वेषकर्ता चेदविवेक्यपि विवेकवानपि न भवतीत्यर्थः ८५

27 / 1938

ननुविवेकिनोद्वैतदर्शनमस्तियोगिनस्तु तन्नास्तीतितृतीयेविकल्पेयोगिनोअतिशयोभविष्यतीत्याशंक्यविवेकिनस्तत्त्वद्वै
तदर्शनंकिंव्यवहारदशायामुच्यते उतान्यदेतिविकल्प्याद्येतयोगिनोसमानमित्याह द्वैतस्येति द्वितीयमाशंकते समा
धाविति योगिनःसमाधिकालेद्वैतदर्शनंनास्तीत्युच्यतेचेदित्यध्याहारः तर्हिविवेकिनोपिविवेकदशायांद्वैतादर्शनं
तुल्यमितिपरिहरति तद्वदिति योगिनःसमाधिदशायामिवाद्वैतत्त्वविवेकिनः अद्वैतत्त्वमिति श्रुतियुक्तिभ्यांविवेचनं
कुर्वतोपितस्मिन्कालेद्वैतदर्शनंनास्तीत्यर्थः ८६ कथंतदभावइत्याशंक्योपरितनेअध्यायेतदुपपादयिष्यतइत्या

द्वैतस्यप्रतिभानंतुव्यवहारेद्वयोःसमं समाधौनेतिचेत्तद्वदद्वैतत्वविवेकिनः ८६
विवक्ष्यतेतदस्माभिरद्वैतानंदनामके अध्यायेहितृतीयेतःसर्वमप्यतिमंगलं ८७
सदापश्यन्निजानंदमपश्यन्नखिलंजगत् अर्थाद्योगीतिचेत्तर्हिसंतुष्टोवर्धतांभवान् ८८
ब्रह्मानंदाभिधेग्रंथेमंदानुग्रहसिद्धये द्वितीयाध्यायएतस्मिन्नात्मानंदोविवेचितः ८९

ह विवक्ष्यतइति उक्तमर्थंनिगमयति सर्वमपीति ८७ ननुद्वैतादर्शनसहितात्मदर्शनवतोयोगित्वमेवभविष्यतीति
शंकते सदापश्यन्निति इष्टापत्त्यापरिहरति तर्हीति ८८ अध्यायतात्पर्यंसंक्षिप्यदर्शयति ब्रह्मानंदेति ८९
इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिकिंकरेणरामकृष्णाख्यविदुषाविरचितेब्रह्मा
नंदेआत्मानंदव्याख्यानंनामद्वितीयोध्यायः॥ ॥ श्रीः ॥ छ ॥ छ ॥

279
1938

इति आत्मानंदः समाप्तः अ० १२

अद्वैतानंद प्रारंभः अ० १३

१३ नन्वानंदस्त्रिविधो ब्रह्मानंदो विद्यानंदस्तथा विषयानंद इति प्रथमाध्याये आनंदत्रयमेव प्रतिज्ञाय द्वितीयाध्याये तदतिरिक्तात्मानंदनिरू
पणात्तद्विरोधो जायत इत्याशंक्याह योगानंद इति यथाप्रतिज्ञातस्यैव ब्रह्मानंदस्य योगजन्यसाक्षात्कारविषयत्वेन योगानंदत्वं नि
रूपाधिकत्वेन निजानंदत्वं च व्यवहृतं न तथा तस्यैव गौणमिथ्यामुख्यात्मविवेचनेनावगम्यत्वविवक्षयात्मानंदत्वमभिहितमिति भावः
ननु सजातीयाद्गौणात्मनः पुत्रभार्यादेः मिथ्यात्मनो देहादेः विजातीयादाकाशादेश्च विभिन्नस्य सद्वयस्यात्मानंदस्य प्रथमाध्यायोक्ता
द्वितीययोगानंदरूपता न संभवतीति शंकते कथमिति सजातीयत्वेनाभिमतस्य गौणात्मनः पुत्रादेर्मिथ्यात्मनो देहादेश्च तैत्तिरीय
श्रुत्यभिहितजगदंतःपातित्वादाकाशादेश्च जगत आनंदातिरेकेणासत्त्वाच्चाद्वितीयब्रह्मरूपताघटत इति सबहुमानमुत्तरमाह

योगानंदः पुरोक्तो यः स आत्मानंद इष्यतां कथं ब्रह्मत्वमेतस्य सद्वयस्येति चेच्छृणु १ आकाशादिस्वदेहांतं तैत्तिरीय
श्रुतीरितं जगन्नास्त्यन्यदानंदादद्वैतब्रह्मता ततः २ आनंदादेव तज्जातं तिष्ठत्यानंद एव तत् आनंद एव लीनं चे
त्युक्तानंदात्कथं पृथक् ३ कुलालाद्घट उत्पन्नो भिन्न श्चेति न शंक्यतां मृद्वदेष उपादानं न निमित्तं कुलालवत् ४

शृणु इति १ तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिकया तैत्तिरीयकश्रुत्याभिहितं जगत्स्वकारणभूतादानंदाद्यतः पृथ
क् नास्ति अतः कारणात्तस्यात्मानंदस्य अद्वितीयत्वमित्यनन्तरोक्त श्रुतिवाक्ये आत्मनः कारणत्वं श्रूयते नानंदस्येत्याशंक्य तत्प्र
तिपादकं तदीयमेवानंदाद्ध्येव खल्विमानि भूतानि जायंत इत्यादि वाक्यमर्थतः पठति आनंदादेवेति व्याख्यातं फलितमाह इत्युक्ते
ति अत्रेदमनुमानं सूचितं विमतं जगत् आनंदान्न भिद्यते तत्कार्यत्वात् यद्यत्कार्यं तत्तेनो न भिद्यते यथा मृत्कार्यं घटादि मृदो न भिद्यत
इति ३ कुलालादुत्पन्नस्य घटस्य ततो भेददर्शनादनैकांतिकता हेतोरित्याशंक्य कुलालस्य निमित्तकारणत्वादिह त्वानंदस्योपादानत्वसमर्थनाभेद
मित्याह कुलालादिति एष आत्मानंदः मृद्वन्मृद्घटस्येव उपादानकारणं कुलालवत् कुलाल इव न निमित्तं निमित्तकारणं न भवति ४

281
1938

ननुकुतोनोपादानत्वंकुलालस्यापीत्याशंक्यस्थितिलयाधारत्वरूपोपादानलक्षणाभावादित्याह स्थितिरिति इयस्मात्कारणात् घटस्य स्थितिलयौकुलालाधारौनभवतः अतोनोपादानत्वमितिशेषः कुत्रतर्हितावित्यत आह दृशाविति तौघटस्यस्थितिलयौतदुपादानभूतायांमृद्येवदृशेप्रत्यक्षेणोपलब्धौभवत्वेवं तत्रप्रकृतेकिमायातमित्यत आह तद्वदिति यद्वद्घटस्यमृदुपादानंतद्वज्जगतोप्यानंदउपादानंस्यात् तत्रहेतुः तयोरिति तयोःजगत्स्थितिलययोःश्रुतेरानंदाध्येवेतिवाक्यंआनंदहेतुकत्वश्रवणादित्यर्थः ५ आनंदस्याभिमतंजगदुपादानत्वंवक्तुंतदवांतरभेदमाह उपादानमिति तत्रविवर्तपरिशेषयितुंइतरौपक्षौदूषयति तत्रेति अंत्यौआरंभपरिणामपक्षौनिरंशेनिरवयवेवस्तुन्यनवकाशिनौ अवकाशवंतौनभवतः ६ तयोरनवकाशित्वमेवदर्शयितुंतावदारंभ

स्थितिर्लयश्चकुंभस्यकुलालेस्तोनहिक्वचित् दृशौतौमृदितद्वत्स्यादुपादानंतयोःश्रुतेः ५ उपादानंत्रिधाभिन्नं
विवर्तिपरिणामिच आरंभकंचतत्रांत्यौनिरंशेनावकाशिनौ ६ आरंभवादिनोन्यस्मादन्यस्योत्पत्तिमूचिरे तंतोःपटस्यनिष्पत्तेर्भिन्नौतंतुपटौखलु ७ अवस्थांतरतापत्तिरेकस्यपरिणामिता स्यात्क्षीरंदधिमृत्कुंभःसुवर्णंकुंडलंयथा ८

वादिनोमतमनुवदति आरंभेति आरंभवादिनोवैशेषिकादयः अन्यस्मात्कार्यापेक्षयान्यस्मात्कारणादन्यकारणापेक्षयान्यस्य कार्यस्यउत्पत्तिमूचिरेउक्तवंतः कुतएवंवदंतीत्यत आह तंतोरिति निष्पत्तेरुत्पत्तेर्दर्शनादितिशेषः एतावताकथंकार्यकारणभेदसिद्धिरित्यत आह भिन्नाविति विरुद्धपरिणामित्वाद्विरुद्धार्थक्रियावत्वाच्चेतिभावः ७ इदानींपरिणामस्वरूपमाह अवस्थेति एकस्यैववस्तुनःपूर्वावस्थात्यागपुरःसरं अवस्थांतरप्राप्तिःपरिणामइत्यर्थः तमुदाहरति स्यादिति यथाक्षीरमृत्सुवर्णादीनांक्षीरादिव्यवहारयोग्यतांपरित्यज्यदध्यादिव्यवहारयोग्यतापत्तिः ८ ॐ ॐ

विवर्तलक्षणमाह अवस्थेति तुशब्दोस्यपूर्वस्मात्पक्षद्वयाद्वैलक्षण्यद्योतनार्थः पूर्वावस्थामपरित्यज्यैवावस्थांतरभानंविवर्तः उदाहरति रज्जिति यथारज्ज्वात्मनावस्थितस्यैवद्रव्यस्यसर्पात्मनावभासनंननुविवर्तमानस्यरज्ज्वादेःसांशत्वदर्शनात् निरंशेसोपिनघटते इत्याशंक्यनिरवयवेगगनादावपितद्दर्शनान्मैवमित्याह निरंशेपीति असौविवर्तः व्योम्नितलत्वमधोमुखेंद्रनीलकटाहतुल्यत्वं मालिन्यंनीलवर्णतातयोःकल्पनात् आकाशस्वरूपानभिज्ञैःआरोप्यमाणत्वादित्यर्थः ९ फलितमाह तत इति ततोनिरंशेपि विवर्तसंभवाज्जगन्निरंशेआनंदेविवर्तःकल्पितमित्यंगीकार्यमित्यर्थः नन्वद्वितीये आनंदे जगत्कल्पनमनुपपन्नंकल्पनाहेतोरभावादित्याशंक्याह मायाःशक्तेः गंधर्वनगरादिकल्पकत्वंतथेत्यर्थः १० नन्वानंदात्मातिरिक्तमायाया अभ्युपगमेद्वैतापत्ति

अवस्थांतरभानंतुविवर्तोरज्जुसर्पवत् निरंशेप्यस्त्यसौव्योम्नितलमालिन्यकल्पनात् ९ ततोनिरंशआनंदेविवर्तोजगदिष्यतां मायाशक्तिःकल्पिकास्यादैंद्रजालिकशक्तिवत् १० शक्तिःशक्तात्पृथङ्नास्तितद्वद्दृष्टेर्नचाभिदा प्रतिबंधस्यदृष्टत्वात्शक्त्यभावेतुकस्यसः ११ ॐ ॐ

रित्याशंक्यतस्याअनिर्वचनीयत्वेनाद्वितत्वभुत्तरत्रवक्तुंवक्ष्यमाणायालौकिक्याअग्न्यादिशक्तेस्तावद्भेदेनवाऽभेदेनवानिर्वक्तुमशक्यत्वंदर्शयति शक्तिरिति शक्तिरग्न्यादिनिष्ठास्फोटादिजनिकाशक्तादग्न्यादिस्वरूपात् पृथक्भेदेननास्ति कुतइत्यत आह तद्वदिति तद्वत्तथात्वस्यभेदेनासत्वस्यदृष्टेर्दर्शनादग्न्यादिस्वरूपातिरेकेणानुपलभ्यमानत्वादित्यर्थः नाप्यग्न्यादिस्वरूपमेवशक्तिरित्याह नचेति अभिदाअभेदोपिनचनैव तत्रापिहेतुमाह प्रतीति मणिमंत्रादिभिः शक्तिकार्यस्यस्फोटादेः प्रतिबंधदर्शनात् स्वरूपातिरिक्ताशक्तिर्दृष्टव्येत्यभिप्रायः भवतुप्रतिबंधदर्शनं शक्तेर्भेदोपिभासत्कोदोषस्तत्राह शक्तेति प्रत्यक्षसिद्धस्याग्न्यादिस्वरूपस्यप्रतिबंधासंभवात्तद्व्यतिरिक्तशक्त्यनभ्युपगमेप्रतिबंधोनिर्विषयःस्यादित्यभिप्रायः ११ ॐ ॐ

नन्वतींद्रियायाः शक्तेः कथंप्रतिबंधोवगंतुंशक्यतइत्याशंक्याह शक्तेरिति अतींद्रियापिशक्तिः यतःकार्यलिंगगम्याऽतः अंकोर्येस
त्यपिकारणेकार्यानुत्पत्त्यैवास्याःप्रतिबंधनंप्रतिबंधः अवगम्यतइतिशेषः उक्तमर्थंदृष्टांतप्रदर्शनेनस्पष्टयति ज्वलनइति लोकेस्व
रूपेण ज्वलतोग्नेः सकाशाद्दाहादिलक्षणकार्यानुत्पद्यमानेसतिमंत्रादिप्रतिबंधतामंत्रादीनांशक्तिप्रतिबंधकत्वंस्यादित्यर्थः १२
इत्थंलौकिकशक्तिंस्वरूपतः प्रमाणतश्चोपन्यस्येदानींमायाशक्तिसद्भावेध्यानयोगानुगताअपश्यन् देवात्मशक्तिंस्वगुणैर्निगू
ढामिति श्वेताश्वतरोपनिषद्वाक्यमर्थतः पठति देवात्मेति मुनयः कालस्वभावादिकारणवादेषुदोषदर्शिनवंतः जगत्कारणजि
ज्ञासयाध्यानयोगमास्थिताः अधिकारिणः देवात्मशक्तिं देवस्यद्योतमानस्यस्वप्रकाशचिद्रूपस्यात्मनः प्रत्यगभिन्नस्यब्रह्मणः

शक्तेः कार्यानुमेयत्वादकार्येप्रतिबंधनं ज्वलतोग्नेरदाहेस्यान्मंत्रादिप्रतिबंधता १२
देवात्मशक्तिंस्वगुणैर्निगूढांमुनयोविदन् परास्यशक्तिर्विविधाक्रियाज्ञानबलात्मिका १३
इतिवेदवचःप्राहवसिष्ठश्चतथाब्रवीत् सर्वशक्तिपरंब्रह्मनित्यमापूर्णमद्वयं १४

शक्तिंमायारूपांस्वगुणैःस्वकार्यभूतैःस्थूलसूक्ष्मशरीरैःनिगूढांनितरांगूढांआवृतां अविदन्साक्षात्कृतवंतइत्यर्थः तस्यामेवो
पनिषदिस्थितंपरास्यशक्तिर्विविधैवश्रूयतस्वाभाविकीज्ञानबलक्रियाचेतिवाक्यांतरमर्थतःपठति परास्येति अस्यब्रह्मणः
पराउत्कृष्टाजगत्कारणभूताशक्तिर्विविधाश्रूयते इतिवाक्यशेषः विविधत्वमेवाह क्रियेति क्रियाज्ञानेप्रसिद्धेबलमिच्छाशक्तिः
ज्ञानक्रियाशक्तिमाहचर्यात् क्रियादिशक्तयःआत्मास्वरूपंयस्याःसाक्रियाज्ञानबलात्मिका १३ इदंवाक्यद्वयंकुत्रत्यमित्यत आह
इतीति नकेवलंमायाशक्तिः श्रुतिसिद्धाकिंतुस्मृतिसिद्धापीत्याह वसिष्ठइति यथाश्रुतिर्विचित्रांमायाशक्तिमुक्तवतीवसिष्ठोपितांतथो
क्तवानाभिधामिधेग्रंथइतिशेषः मायाप्रतिपादकान्वासिष्ठश्लोकानेवपठतिसर्वेति नित्यमापूर्णमद्वयमिति ब्रह्मणःपारमार्थिकंरूपमुक्तंसर्वशक्ती
तिनस्यैवसोपाधिकंरूपं १४

तस्मिन्ब्रह्मणियदायदायथायथाशक्तयोल्लसतिविकसतिविवर्ततइत्यर्थः तदातदा असावसौ शक्तिःप्रकाशमधिगच्छति अभिव्य
क्तिंप्राप्नोति इदानींतामेवाभिव्यक्तिंप्रपंचयति चिच्छक्तिरित्यादिना शरीरेषुदेवतिर्यङ्मनुष्यादिलक्षणेषुचिच्छक्तिश्चेतनत्वव्यवहार
हेतुभूतोपलभ्यतेदृश्यते १५ स्पंदशक्तिरिति स्पंदनशक्तिश्चलनहेतुभूताप्रकाशमधिगच्छतीत्युक्त्वा अनभिव्यक्तदशायामपि
ब्रह्मणिजगत्सत्तादर्शिना १६ अनभिव्यक्तस्यापिसत्वेदृष्टांतमाह यथांडइति १७ विचित्रस्यापितस्यसत्वेदृष्टांतमाह फ
लेति १८ ननुसर्वासामपिशक्तीनांयुगपदेवाभिव्यक्तिः कुतोनस्यादित्याशंक्याह क्वचिदिति क्वचिद्देशविशेषेकदाचित्का

यथोल्लसतिशक्त्यासौप्रकाशमधिगच्छति चिच्छक्तिर्ब्रह्मणोरामशरीरेषूपलभ्यते १५ स्पंदशक्तिश्चवातेषु
दार्ढ्यशक्तिस्तथोपलस्यते द्रवशक्तिस्तथांभस्सुदाहशक्तिस्तथानले १६ शून्यशक्तिस्तथाकाशेनाशशक्ति
र्विनाशिनि यथांडेंतर्महासर्पोजगदस्तितथात्मनि १७ फलपत्रलतापुष्पशाखाविटपमूलवान् वृक्षबी
जेयथावृक्षस्तथेदंब्रह्मणिस्थितं १८ क्वचित्कदाचित्काश्चिच्चतस्मादुद्यंतिशक्तयः देशकालविचित्रत्वा
त्क्ष्मातलादिवशालयः १९ सआत्मासर्वगोराममनित्योदितमहावपुः यन्मनाक्मननींशक्तिंधत्तेतन्मनउच्यते २०

लविशेषेकाश्चिच्छक्तयः नासामयुगपदभिव्यक्तौदृष्टांतमाह क्ष्मातलादिति यथाभूमिगतानांसर्वेषांबीजानांमध्येदेशविशेषेका
लविशेषेचकेषांचिदेवबीजानां अंकुरोत्पत्तिर्नान्येषांतद्वदित्यर्थः १९ इदानींजगतः कल्पनामात्ररूपंतांदर्शयितुंतत्क
ल्पकस्यमनसोरूपंतावद्दर्शयति सइति नित्योदितमहावपुः नित्यंसदाउदितंप्रकाशमानंमहत् देशकालादिपरिच्छे
दरहितंवपुःस्वरूपंयस्यसतथायद्यस्मिन्कालेमनाक्ईषत्मननींस्वपरावबोधरूपांशक्तिंमायापरिणामरूपांधत्तेधा
रयति-तदामनइतिउच्यते २० ॥ ७ ॥ ॥ ७ ॥ ॥

पं·८·

इदानींकल्पनाप्रकारमाह आदाविति आदौप्रथमंमननशक्त्युल्लासेमनोभवति तदनुतदनंतरंबंधविमोक्षदृष्टीबंधमोक्षकल्पनेप्र वतः पश्चात्तदनंतरंबंधदृशेवप्रभुवनाभिधानाभुवनमित्यभिधानंयस्याःसाभुवनाभिधानाप्रपंचरचनाप्रपंचस्यरचनागिरिन दीसरःसमुद्रादिकल्पनंरचनाभवति इत्यादिकाएवंप्रकाराइयंजगतःस्थितिःप्रतिष्ठांस्थैर्यंगताप्राप्ता कल्पितस्यापिवास्तव

आदौमनस्तदनुबंधविमोक्षदृष्टीपश्चात्प्रपंचरचनाभुवनाभिधाना इत्यादिकास्थितिरियंहिगताप्रतिष्ठामा
ख्यायिकास्मभगबालजनोदितेव २१ बालस्यहिविनोदायधात्रीवक्तिशुभांकथां क्वचित्संतिमहाबाहोरा
पुत्राःस्त्रयःशुभाः २२ द्वावजातौतथैकस्तुगर्भएवहिनस्थितः वसंतितेधर्मयुक्ताअत्यंतासतिपत्तने २३
स्वकीयाच्छून्यनगरान्निर्गत्यविमलाशयाः गच्छंतोगगनेवृक्षान्ददृशुःफलशालिनः २४ भविष्यन्नगरेतत्र
राजपुत्रास्त्रयोपिते सुखमद्यस्थिताःपुत्रामृगयाव्यवहारिणः २५ धात्र्येतिकथितातारामबलाख्यायि
काशुभा निश्चयंसययौबालोनिर्विचारणयाधिया २६ इयंसंसाररचनाविचारोज्झितचेतसां बालका
ख्यायिकेवेत्थमवस्थितिमुपागता इत्यादिभिरुपाख्यानैर्मायाशक्तेस्तुविस्तरं वसिष्ठःकथयामाससैवश
क्तिर्निरूप्यते २८

त्वप्रतीतौदृष्टांतमाह आख्यायिकेतिबालजनायउदिताउक्ताआख्यायिकाकथावास्तवत्वबुद्धिंगतातथेदंजगदपीत्यर्थः २१
तामेवकथांकथयति बालस्येत्यादिना २२ २३ २४ दृष्टांतसिद्धमर्थंदार्ष्टांतिकेयोजयति इयमिति २५ २६ २७
वसिष्ठोक्तमुपसंहरति इत्यादिभिरिति एवमायासद्भावेप्रमाणमुपन्यस्यतस्याअनिर्वचनीयत्वंवक्तुंप्रतिजानीते सैवेति २८

एषामायाशक्तिःकार्यात्स्वकार्यभूताज्जगतःआश्रयतःस्वाश्रयाद्ब्रह्मणश्चविलक्षणाविपरीतस्वभावाभवेत् मायाशक्तेः कार्याश्रयतोवैलक्षण्यंदृष्टांतेनस्पष्टयति स्फोटेति वह्निगतशक्तेःकार्यरूपःस्फोटःआश्रयरूपोंगारस्त्वप्रत्यक्षगम्योशक्तिस्तु कार्यानुमेयातस्माभ्यांसाविलक्षणेत्यर्थः २९ उक्तन्यायंमृच्छक्तावपियोजयति पृथुबुध्नेति यःपृथुबुध्नोदराकारःपृथुस्थूलं बुध्नंवर्तुलंउदरंयस्यसःपृथुबुध्नोदरः तथाविधआकारोयस्यसःपृथुबुध्नोदराकारः तादृक्घटकार्यःशब्दस्पर्शरसरूपगंधा ख्यपंचगुणोपेतामृत्तिकाश्रयःशक्तिस्तुतद्द्विधाउभयविलक्षणेत्यर्थः ३० वैलक्षण्यमेवाह नपृथ्वादिरिति शक्तेःपृथुत्वा दिःकार्यधर्मोनास्तिशब्दादिकआश्रयधर्मोपिनविद्यतेऽतोविलक्षणेत्यर्थः तर्हिसाकीदृशीत्यतआह अस्तीति यथातथे

कार्यादाश्रयतश्चैषाभवेच्छक्तिर्विलक्षणा स्फोटांगारौदृश्यमानौशक्तिस्तत्रानुमी
यते २९ पृथुबुध्नोदराकारोघटःकार्यात्रमृत्तिका शब्दादिभिःपंचगुणैर्युक्ताशक्तिस्त
तद्द्विधा ३० नपृथ्वादिनशब्दादिःशक्तावस्तुयथातथा अतएवह्यचिंत्येषानिर्वचनमर्हति ३१
कार्योत्पत्तेःपुराशक्तिर्निगूढाम्रद्यवस्थिता कुलालादिसहायेनविकाराकारतांव्रजेत् ३२

त्युक्तमेवार्थंस्पष्टयति अतएवेति यतःकार्यादाश्रयतश्चविलक्षणा अतएवएषाअचिंत्याचिंतितुमशक्या ननुतर्हि अचिंत्यत्व मेवतस्यारूपंस्यादित्याशंक्याह ननिर्वचनमिति भेदेन अभेदेन अचिंत्यत्वादिनावाकेनापिरूपेणनिर्वचनंनार्हतीत्यर्थः ३१ ननुकारणस्वरूपातिरिक्ताशक्तिर्यद्यस्तितर्हिकारणस्वरूपमिवनसाकुतोभासतइत्याशंक्याह कार्योत्पत्तेरिति मृच्छक्तिर्घटादिका र्योत्पत्तेःपूर्वंमृदिनिगूढावतिष्ठतेअतोनावभासतइत्यर्थः निगूढत्वेउपरिष्टादपिनतस्याअभिव्यक्तिःस्यादित्याशंक्यानभिव्यक्त स्यापिनवनीतादेःमंथनादिनेवकुलालादिव्यापारेणतस्याभिव्यक्तिःस्यादित्याह कुलालादीति आदिपदेनदंडचक्रादयोगृह्यंते ३२

१६ ननुकारणातिरिक्तस्यशक्तिकार्यस्यसत्वेकार्यकारणयोर्भेदेनकुतोवोभासतेइत्याशंक्यप्रतीतिर्हनोविचारस्याभावादित्याह एथुत्वा
दिति अविवेकिनोजनाः एथुबुध्नत्वादिकंरूपंकार्यंशब्दस्पर्शादिगुणरूपांकारणभूतांमृत्तिकांचाविचार्यतदेकीकृत्यघटइत्याचक्षते
३३ उक्तस्यघटव्यवहारस्याविचारमूलत्वंकुतइत्याशंक्याह कुलालेति कुलालव्यापारात् पूर्वभाविनोमृदंशस्याघटस्यघटत्वेनव्य
वहाराद्यविचारमूलत्वंतस्येतिभावः कस्यतर्हिघटत्वमित्याह पाश्चात्येति कुलालव्यापारानंतरभाविनः एथुबुध्नोदराकारस्यैव
घटशब्दवाच्यत्वमुचितंतदुत्पत्त्यनंतरमेवघटशब्दप्रयोगदर्शनादितिभावः ३४ ननुपारमार्थिकस्यघटस्यानिर्वचनीयशक्ति
कार्यत्वमयुक्तमित्याशंक्यघटस्यापिपारमार्थिकत्वमसिद्धमित्याह सघटइति घटोमृदः एथकृत्यद्रष्टुमशक्यत्वादनमृदो

एथुत्वादिविकारांतंस्पर्शादिंचापिमृत्तिकां एकीकृत्यघटंप्राहुर्विचारविकलाजनाः ३३ कुलालव्यापृतेः
पूर्वंयावानंशःसनोघटः पाश्चात्यएथुबुध्नादिमत्वेयुक्तातिकुंभता ३४ सघटोनमृदोभिन्नोवियोगेसत्य
नीक्षणात् नाप्यभिन्नःपुरापिंडदशायामनवेक्षणात् ३५ अतोनिर्वचनीयोयंशक्तिवत्तेनशक्तिजः
अव्यक्तत्वेशक्तिरुक्ताव्यक्तत्वेघटनामधृक् ३६ ऐंद्रजालिकनिष्ठापिमायानव्यज्यतेपुरा पश्चाद्गंधर्वसे
नादिरूपेणव्यक्तिमाप्नुयात् ३७ एवंमायामयत्वेनविकारस्यानृतात्मता विकाराधारमृद्वस्तुसत्यत्वंचाब्रवीच्छ्रुतिः ३८

भिन्नत्वेनापिमृदेवपिंडावस्थायांअनुपलभ्यमानत्वात् ३५ अतःशक्तिवदनिर्वचनीयएवघटःफलितमाह तेनेति ननुशक्तिकार्य
योरुभयोरप्यनिर्वचनीयत्वेशक्तिःकार्यंचेतिव्यवहारःकुतइत्याशंक्याह अव्यक्तत्वइति ३६ पूर्वमनभिव्यक्तामायाशक्तिःपश्चाद
भिव्यज्यतेइत्येतत्प्रसिद्धमायारूपत्वस्यतदृष्टांतमाह ऐंद्रजालिकेति पुरामणिमंत्रादिप्रयोगात्पूर्वं ३७ शक्तिकार्यस्यघटा
देःअनृतत्वंशक्त्याधारस्यमृदादेःसत्यत्वमित्येतच्छांदोग्यश्रुतावप्यभिहितमित्याहएवमिति मायामयत्वेनमायाकार्यत्वेनवि
कारस्यकार्यरूपस्यघटादेःअनृतात्मतांमिथ्यात्वं विकाराणांघटादीनांआधारभूतायाःमृदःसत्यत्वंचवाचारंभणंविकारो
नामधेयंमृत्तिकेत्येवसत्यमित्यादिश्रुतिरुक्तवतीत्यर्थः ३८ ८ ८ ८

इदानींवाचारंभणमित्याद्युदाहृतंवाक्यमर्थतःपठति वाड्निष्पाद्यमिति विकारोमृत्कार्योघटादिः वाङ् निष्पाद्यंवागिंद्रियेणो
च्चार्यंनाममात्रंनामैवास्यघटादेःनसत्यतानामातिरेकेणनपरमार्थिकंरूपमस्ति किंतुतदाधारभूतामृदेवसत्येत्यर्थः ३९ शक्ति
तत्कार्ययोःअनृतत्वेतदाधारस्यसत्यत्वेचकारणमाह व्यक्तेति व्यक्तोघटादिलक्षणःकार्यःअव्यक्तातत्कारणभूताशक्तिःते
व्यक्ताव्यक्तेतदाधारःतयोराधारभूतामृत्तिकेत्येतेषुत्रिषुमध्येआद्ययोःप्रथमोद्दिष्टयोर्द्वयोःकार्यशक्त्योःसंबंधिनौयौकालौ
तयोर्भेदेनभेदस्यविद्यमानत्वात्पर्यायःक्रमेणभवनंतृतीयस्तुउभयाधारःमृदादिरनुगच्छतिउभयत्रानुवर्त्तते अयंभा

वाङ्निष्पाद्यंनाममात्रंविकारोनास्यसत्वता स्पर्शादिगुणयुक्तातुसत्यावेव
मृत्तिका ३९ व्यक्ताव्यक्ततदाधारइतित्रिष्वाद्ययोर्द्वयोः पर्यायःकालभेदेनतृ
तीयस्त्वनुगच्छति ४० निस्तत्वंभासमानंचव्यक्तमुत्पत्तिनाशभाक् तदुत्पत्तौतस्य
नामवाचानिष्पाद्यतेनृभिः ४१ व्यक्तेनष्टेपिनामैतन्नृवक्त्रेष्वनुवर्त्तते ते
ननाम्नानिरूप्यत्वाद्व्यक्तंतद्रूपमुच्यते ४२ ॥ ॥

वःशक्तिकार्ययोःकदाचित्कत्वात्अनृतत्वंआधारस्यंतुकालत्रयानुगामित्वात्सत्यत्वमिति ४० इदानींविकारस्यैवासत्य
त्वेहेतुत्रयमाह निस्तत्वमिति व्यक्तशब्दवाच्यंघटादिकंकार्यंस्वरूपेणासदेवावभासतेतथोत्पत्तिविनाशवदुपलभ्यतेउत्पत्त्यनंत
रंवागिंद्रियजन्यनामात्मकत्वेनव्यवह्रियतेच ४१ किंच व्यक्तेकार्येस्वरूपेणनष्टेपि एतत्कार्यादभिन्नंनामनृवक्त्रेषुनृणांशब्दप्रयोक्तॄणांमनु
ष्याणांवदनेषुअनुवर्त्तते ततःकिंतत्राह तेनेति व्यक्तंकार्यंतेनवाचाव्यवह्रियमाणेननाम्नाशब्देननिरूप्यत्वाद्व्यवह्रियमाणत्वात्तद्रूपंतस्यनाम्नो
रूपमेवरूपंयस्यतत्तथानामात्मकमुच्यतइत्यर्थः अयंभावः विमतोघटोघटशब्दात्मकोभवितुमर्हतिघटशब्देनव्यवह्रियमाणत्वात्घटशब्दवदि ४२

एवंहेतुत्रयंप्रसाध्येदानीं अनुमानरचनाप्रकारंसूचयति निस्तत्त्वादिति व्यक्तस्यघटादिरूपस्यकार्यस्ययत्पृथुबुध्नोदराकारं रूपमस्तितन्न किंचित्किमपिसत्यंनभवति निस्तत्त्वात् तन्निर्गतंतत्त्वंवास्तवंरूपंयस्मात्तन्निस्तत्त्वंतस्यभावोनिस्तत्त्वंतस्मात्तथाविनाशित्वातमृदिसत्यामेवनाशप्रतियोगित्वात् वाचारंभणनामतः वागिंद्रियजन्यशब्दमात्रात्मकत्वात् त्रिष्वपिहेतुषुमृद्वदिति विधर्मदृष्टांतः अत्रैवंप्रयोगः घटादिरूपः कार्योअसत्योभवितुमर्हतिनिस्तत्त्वत्वाद्यदसत्यंनभवतितन्ननिस्तत्त्वंयथाघटाद्युपादानंमृदितिकेवलव्यतिरेकी एवामितरहेतुद्वयेपियोजनीयं ४३ एवंविकारस्यासत्यत्वंउपपाद्येदानींतदधिष्ठानभूतायाःमृदः

निस्तत्त्वाद्विनाशित्वाद्वाचारंभणनामतः व्यक्तस्यनतुतद्रूपंसत्यंकिंचिन्मृदादिवत् ४३
व्यक्तकालेततःपूर्वमूर्ध्वमप्येकरूपभाक् सतत्त्वमविनाशंचसत्यंमृद्वस्तुकथ्यते ४४
व्यक्तंघटोविकारश्चेत्येतैर्नामभिरीरितः अर्थश्चेदनृतःकस्मान्नमृद्बोधेनिवर्त्तते ४५

सत्यत्वमुपपादयति व्यक्तेति व्यक्तकालेस्थितिकालेततःपूर्वंव्यक्तोत्पत्तेःपूर्वस्मिन्कालेऊर्ध्वमपिव्यक्तविनाशोत्तरकालेपि एकरूपभाक् एकाकारंसतत्त्वंतत्त्वेनवास्तवरूपेणसद्वर्त्तमानमितिसतत्त्वं अविनाशंविकारेणसहनाशरहितंचयन्मृद्वस्तुतत्सत्यमितिकथ्यते विमतंमृद्वस्तुसत्यंभवितुमर्हतिसतत्त्वादात्मवदित्यादियोज्यं ४४ ननुघटादेःकार्यजातस्यासत्यत्वेतस्यारोपितरजतादेरिवाधिष्ठानज्ञाननिवर्त्यतास्यादितिशंकते व्यक्तमिति व्यक्तमित्यादिभिस्त्रिभिःशब्दैरभिधीयमानोयोर्थःकार्यरूपः तस्यकारणातिरेकेणासत्यत्वेंऽगीक्रियमाणेमृल्लक्षणकारणस्यज्ञानेकिंनतन्निवृत्तिःस्यादित्यर्थः ४५ श्रीरामजयराम॥

इष्टापत्तिरितिपरिहरति निवृत्तइति तत्रोपपत्तिमाह यस्मादिति यस्मात्कारणात्तवघटादिविषयासत्यत्वबुद्धिर्नष्टातःसनिवृत्तएवेत्यर्थः नन्वारोपितरजतादिस्वरूपस्यैवाप्रतीतिरुपलभ्यतेनसत्यत्वबुद्ध्यपगमइत्याशंक्यतस्यनिरुपाधिकभ्रमत्वादस्तुनथात्वं इहतुसोपाधिकभ्रमसत्यत्वबुद्ध्यपगमएवनिवृत्तिःस्यादित्यभिप्रायेणाह ईदृगिति अत्रसोपाधिकभ्रमस्थलेईदृगेवसत्यत्वबुद्ध्यपगमरूपैवबोधजाऽधिष्ठानयाथात्म्यज्ञानजन्यानिवृत्तिरभ्युपेयानत्ववभासनंनस्वरूपाप्रतीतिरूपेत्यर्थः ४६ एवंक्वदृष्टमित्यत आह पुमानिति जलेअधोमुखत्वेनप्रतिभासमानोपिपुमान्परमार्थतोनास्ति तत्रोपपत्तिमाह तटस्थेति कस्यचिद्विवेकिनोऽविवेकिनोवातस्मिन्नधोमुखेपुरुषेनीरस्थपुरुषइवसत्यत्वाभिमानःकदाचिदेककालेवानैवास्तीति ४७ नन्वारोपितस्यासत्यत्वज्ञानमात्रात्पुरुषार्थसि

निवृत्तएवयस्मात्तेतत्सत्यत्वमनिर्गता ईदृङ्निवृत्तिरेवात्रबोधजानत्वभासनं ४६
पुमानधोमुखोनीरेभातोप्यस्तिनवस्तुतः तटस्थमर्त्यवत्तस्मिन्नैवास्थाकस्यचित्क्वचित् ४७
ईदृग्बोधेपुमर्थंचमतमद्वैतवादिनां मद्रूपस्यापरित्यागाद्विवर्त्तत्वंघटेस्थितं ४८
परिणामेपूर्वरूपंत्यजेत्तत्क्षीररूपवत् मृत्सुवर्णेनिवर्त्तेतेघटकुंडलयोर्नहि ४९

द्धिरित्याशंक्याह ईदृग्बोधइति अद्वैतवादे आत्मानंदातिरिक्तस्यसर्वस्यमिथ्यात्वनिश्चयेसत्यद्वितीयानंदाभिव्यक्तिलक्षणःपुरुषार्थःसिद्ध्यतीत्यभिप्रायः ननुघटस्यमृद्विवर्त्तत्वंसिद्धंतत्त्वज्ञानात्घटसत्यत्वबुद्धिर्निवर्त्ततेनचैतदिदानींसिद्धमित्याशंक्याह मद्रूपस्येति ४८ घटेमद्रूपपरित्यागाभावेपिमत्परिणामतापघटस्यकिंनस्यादित्याशंक्याह परिणामइति यत्रक्षीरादौपरिणामोभ्युपगम्यतेक्षीरादिभावस्यपूर्वरूपस्यत्यागउपलभ्यतेइत्यर्थः ननुविवर्त्तपूर्वरूपापरित्यागःक्वदृष्टइत्याशंक्यमृत्सुवर्णयोर्दर्शयतइत्याह मृत्सुवर्णेइति मृत्सुवर्णविवर्तयोर्घटकुंडलयोर्निष्पन्नयोरपितत्कारणभूतमृत्सुवर्णरूपेननिवर्त्ततेइतिद्विप्रसिद्धमित्यर्थः ४९

291 / 193

पं·८·

ननुघटस्यमृद्विवर्त्तत्वमनुपपन्नंघटनाशेपुनर्मृद्भावादर्शनादितिशंकते घटइति मृद्भावाभावेकारणमाह कपालानामिति कपालानामपि नाशेमृद्भावोपलब्धिःस्यादितिपरिहरति मैवमिति रुक्मवर्णत्वनत्रचोद्यमेवानवकाशमित्याह स्वर्णेति ५० ननुपरिणामदृष्टांतत्वेनाभि हितानांक्षीरमृद्रुक्मवर्णानांमध्येयदिमृद्रुक्मवर्णयोविवर्त्तदृष्टांतत्वमंगीक्रियेततर्हितद्वदेवक्षीरस्यापितथात्वंस्यादितिप्राशंक्यमाह क्षीरा दाविति नर्हिक्षीरवद्देवावस्थांतरमापद्यमानयोस्तयोर्विवर्त्तदृष्टांतताऽनभवेदित्याशंक्याह एतावतेति एतावताक्षीरादेःपरिणामि त्वेनमृदादीनांरुक्मवर्णादीनांदृष्टांतत्वंविवर्त्तदृष्टांतभावःनहीयतेननश्यति अयमभिप्रायः क्षीरस्यपूर्वरूपत्यागपुरःसरमव स्थांतरापत्तिसद्भावात्परिणामित्वमेवमृद्रुक्मवर्णयोस्तुअवस्थांतरापत्तिसद्भावेपिपूर्वरूपत्यागाभावत्वाद्विवर्त्ततापीति ५१

घटेभग्नेनमृद्भावःकपालानामवेक्षणात् मैवंचूर्णेस्तिमृद्रूपंस्वर्णरूपंत्वतिस्फुटं ५० क्षीरादौपरिणामोस्तु
पुनर्मृद्भाववर्जनात् एतावतामृदादीनांदृष्टांतत्वंनहीयते ५१ आरंभवादिनःकार्येमृदाद्वैगुण्यमापतेन्न रूपस्पर्शा
दयःप्रोक्ताःकार्यकारणयोःपृथक् ५२ मृत्स्वर्णमयश्चेतिदृष्टांतत्रयमारुणिः प्राहातोवासयेत्कार्यान्तत्वंसर्ववस्तुषु ५३

ननुमृद्रुक्मवर्णयोःपरिणामविवर्त्तौइवआरंभकत्वमपिकिंनांगीक्रियतइत्याशंक्याह आरंभेति आरंभवादिमतेकार्येघटादि रूपमृदाम्रत्निकादेर्द्रव्यस्यद्वैगुण्यंकार्याकारेणकारणाकारेणचद्विगुणत्वमापद्येततथाचमतिगुरुत्वादिद्वैगुण्यमापद्येतेतिभावः कु तएतदित्याशंक्याह रूपेति रूपादीनांगुणानांकार्यकारणयोस्तैरेवभेदस्यांगीकृतत्वादितिभावः ५२ ननुमृद्रुक्मवर्णयोःकिद्वयोरेवविवर्त्तदृष्टांतत्वेतनेत्याह मृदिति अरुणस्यपुत्रउद्दालकाख्यःकश्चिदृषिःयथासोम्यैकेनमृत्पिंडेनेत्यारभ्यकार्ष्णायसमित्येवसत्यमित्यंते नवाक्यसंदर्भेणकार्यस्यान्ततत्वंमृद्रुक्मवर्णायोरूपंदृष्टांतत्रयमुक्तवानित्यर्थः किमर्थमेवंदृष्टांतत्रयमुक्तवानित्याशंक्याह अतइति यतएवंबहुषुमृदादिषुकार्यानृतत्वमुपलब्धंअतोभृतभौतिकरूपेषुवस्तुषुकार्यानृतत्वंवासितंकुर्यादित्यर्थः ५३ ७

ननुकार्यानृतत्वानुसंधानमपिकिमर्थमुक्तमित्याशंक्यकारणज्ञानात्कार्यज्ञानसिद्धयेइत्यभिप्रायेणाह कारणेति कारणस्यमृदादेर्ज्ञानात्कार्यज्ञातस्यघटादेर्ज्ञानस्यापियथासोम्यैकेनमृत्पिंडेनसर्वंमृन्मयंविज्ञातंस्यात् इत्यादिवाक्यजातेनोक्तवानित्यर्थः ननुमृद्रुक्मवर्णादिरूपस्यपारमार्थिकस्यकारणस्यविज्ञानात्तद्विलक्षणस्यघटरुचकादेर्विज्ञानमनुपपन्नमितिशंकते सत्यज्ञान इति ५४ कार्यस्यसत्यानृतांशद्वयरूपत्वात्कारणज्ञानात्कार्यगतसत्यांशज्ञानंभवतीत्यभिप्रायेणाह मृत्कस्येति मृत्कस्याधिष्ठानभूतमृत्कद्धितस्यविकारस्यारोपितस्यघटादिरूपस्यकार्यताकार्यशब्दार्थत्वंलोकप्रसिद्धमित्यर्थः भवत्वेवमेताव ताकारणज्ञानात्कार्यज्ञानंनसंभवतीतिचोद्यस्यकःपरिहारोजातःइत्याशंक्यकार्यगतानृतांशज्ञानाभावेपितद्गतसत्यांशज्ञा

कारणज्ञानतःकार्यविज्ञानंचापिमेवदत् सत्यज्ञानेनृतज्ञानंकथमत्रोपपद्यते ५४ मृत्कस्यविकारस्य
कार्यतालोकदृष्टितः वास्तवोत्रमृदंशस्यबोधःकारणबोधतः ५५ अनृतांशोनबोद्धव्यस्तद्बोधानुपयोगतः
तत्वज्ञानंपुमर्थंस्याच्चानृतार्थावबोधनं ५६ तर्हिकारणविज्ञानात्कार्यज्ञानमितीरिते मृद्बोधान्मृत्तिकाबुद्धेत्युक्तंस्यात्कोत्रविस्मयः ५७

नंभवत्येवानपरिहरतिवास्तवइति अत्रकार्येयोवास्तवोमृदंशोस्ति अस्यवास्तवांशस्यबोधोज्ञानंकारणबोधनःकारणज्ञानाद्भवतीत्यर्थः ५५ ननुकार्यगतस्यानृतांशवदनृतांशोपिवोद्धव्यइत्याशंक्यप्रयोजनाभावान्नैवमित्याह अनृतांशइति प्रयोजनाभावमेवप्रकटयति तत्व ज्ञानमिति तत्वस्याबाध्यवस्तुनोज्ञानंपुमर्थंपुंसोज्ञातुःपुरुषस्यअर्थःप्रयोजनंयस्मिन्तत्पुमर्थमितिबहुव्रीहिः अनृतांश स्यविकारांशस्यावबोधनंप्रयोजनवन्नभवतीत्यर्थः ५६ ननुकारणज्ञानात्कार्यज्ञानंभवतीत्येतच्छ्रोतृबुद्धौचमत्कारहेतुर्भ विष्यतीत्यभिप्रायेणोक्तंनत्संभवतीतिशंकते तर्हीति कारणस्यमृदादेर्ज्ञानात् कार्यगतमृदादिसत्यांशज्ञानंभवतीत्युक्ते मृज्ज्ञानान्मृदोज्ञानमित्युक्तंभवति एवंचसतितावृतएवचमत्कारोनार्थतइत्यर्थः ५७ ..

293
1938

पं.८. ईदृग्विवेकवतांविस्मयाभावेपितद्रहितानांविस्मयःस्यादेवेतिपरिहरति सत्यमितिकार्येषुघटादिषुविद्यमानेवास्तवांशःकारण
स्वरूपमेवेतियेजानंतितेषामाश्चर्यंमाभूदितरेषांतज्ज्ञानशून्यानांजायमानोविस्मयोननिवारयितुंशक्यतइत्यर्थः ५८ अज्ञस्यवि
स्मयोभवेदित्युक्तमेवार्थंप्रपंचयति आरंभीति आरंभोनामसमवाय्यसमवायिनिमित्तकारणेभ्योभिन्नस्यकार्यस्योत्पत्तिस्तांयो
वक्तिसोयमारंभीत्युच्यतेपूर्वरूपपरित्यागेनरूपांतरप्राप्तिलक्षणंपरिणामंयोवक्तिसपरिणामीत्युच्यते प्रक्रियाद्वयमजानानो
लोकव्यवहारमात्रपरोलौकिकइत्युच्यते एषांत्रयाणामपिकारणस्यैकस्यज्ञानादनेकेषांकार्याणांविज्ञानंभवतीतिवाक्यश्रवणा
द्विस्मयोभवेदेवेत्यर्थः ५९ ननुयथाश्रुतमर्थंपरित्यज्यैवंव्याख्यानेकिंकारणमित्याशंक्यश्रुतेस्तत्रतात्पर्याभावादित्याह अद्वै

सत्यंकार्येषुवस्त्वंशःकारणात्मेतिजानतः विस्मयोमास्त्विहाज्ञस्यविस्मयःकेनवार्यते ५८
आरंभीपरिणामीचलौकिकश्चैककारणे ज्ञातेसर्वमतिंश्रुत्वाप्राप्नुवंत्येवविस्मयं ५९
अद्वैतेभिमुखीकर्तुमेवात्रैकस्यबोधतः सर्वबोधःश्रुतोनैवनानात्वस्यविवक्षया ६०
एकमृत्पिंडविज्ञानात्सर्वमृन्मयधीर्यथा तथैकब्रह्मबोधेनजगद्बुद्धिर्विभाव्यतां ६१

तइति अद्वैतज्ञानेशिष्यमभिमुखीकर्तुमेवछांदोग्यश्रुतावेकस्यकारणस्यविज्ञानात्सर्वेषांकार्याणांविज्ञानमुक्तंनतुकार्या
णामनेकेषांविज्ञानमित्यर्थमित्यभिप्रायः ६० इदानीमेकविज्ञानेनसर्वविज्ञानेदृष्टांतपरस्ययथासोम्यैकेनमृत्पिंडेनसर्वंमृ
न्मयंविज्ञातंस्यादितिवाक्यार्थनिरूपणपुरःसरंदार्ष्टांतिप्रदर्शनपरस्यउततमादेशमप्राक्ष्योयेनाश्रुतंश्रुतंभवत्यमतंमतमवि
ज्ञातंविज्ञातमितिवाक्यस्यार्थंप्रदर्शयन्प्रकृतेफलितमाह एकेति यथाघटशरावाद्युपादानस्यैकस्यमृत्पिंडस्यावबोधात्त
द्विकाराणांसर्वेषांघटादीनांबोधोभवति एवंसर्वोपादानस्यैकस्यब्रह्मणोबोधात्कार्यस्यकृत्स्नस्यजगतोबोधोभवतीतिअवगंतव्यमित्यर्थः ६१

ननुब्रह्मजगतोःस्वरूपापरिज्ञानेब्रह्मज्ञानेज्जगतोज्ञानंभवतीत्येवंनावगंतुंशक्यतेइत्याशंक्यतदवगमायतदुभयस्वरूपंदर्शय
ति सच्चिदिति ब्रह्मणःसच्चिदानंदस्वरूपत्वेकिंप्रमाणमित्याशंक्यतापनीयादिश्रुतयःप्रमाणमित्यभिप्रायेणाह तापनीयेइ
इति उत्तरस्मिन्तापनीयेअथर्वणिकेसावद्ब्रह्मैवेदंसर्वंसच्चिदानंदमात्रमित्यादिप्रदेशेषुब्रह्मणःसच्चिदानंदरूपत्वमुक्तमि
त्यर्थः ६२ आदिशब्देनविवक्षितानिश्रुत्यंतराणिदर्शयति सद्रूपमिति अरुणपुत्रेणोद्दालकेनछांदोग्यश्रुतौसदेवसोम्येदम
ग्रआसीदित्यादिनासद्रूपंब्रह्मनिरूपितंतथाबह्वृचाःकुशारवाध्यायिनःऐतरेयोपनिषदिप्रज्ञाप्रतिष्ठाप्रज्ञानंब्रह्मेतिप्रज्ञा

सच्चित्सुखात्मकंब्रह्मनामरूपात्मकंजगत् तापनीयेश्रुतंब्रह्मसच्चिदानंदलक्षणं ६२
सद्रूपमारुणिःप्राहप्रज्ञानंब्रह्मबह्वृचाः सनत्कुमारआनंदमेवमन्यत्रगम्यतां ६३
विचिंत्यसर्वरूपाणिकृत्वानामानितिष्ठति अहंव्याकरवाणीमेनामरूपेइतिश्रुतेः ६४

नरूपत्वंब्रह्मणोदर्शयंति एवंपूर्वोदाहृतायांछांदोग्यश्रुतावेवसनत्कुमाराख्योगुरुःनारदाख्यशिष्यायभूमात्वेवविजिज्ञा
सितव्यःइत्युपक्रम्ययोवैभूमातत्सुखमितिभूमशब्दाभिधेयस्यब्रह्मणआनंदरूपत्वमुक्तवानित्यर्थः उक्तन्यायमन्यत्राप्यति
दिशति एवमिति अन्यत्रतैत्तिरीयकादिश्रुतिषुआनंदोब्रह्मेतिव्यजानादित्यादिवाक्यैरानंदरूपत्वादिकमुक्तमितिद्रष्टव्य
मितिभावः ६३ सच्चिदानंदवन्नामरूपयोरपिश्रुतिंदर्शयति विचिंत्येति सर्वाणिरूपाणिविचिंत्यधीरोनामानिकृत्वाभिव
दन्यदास्तेइति अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीतिचस्रष्टव्यजगन्निष्ठेनामरूपेश्रुत्यादर्शितेइत्यर्थः ६४

2915/1938

पं॰ ८॰ तत्रैव श्रुत्यंतरमुदाहरति अव्याकृतमिति बृहदारण्यकश्रुतौ तद्धेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतेसौनामा
यमिदंरूपमिति सृष्टस्य जगतो नामरूपात्मकत्वंदर्शितमित्यर्थः सृष्टेः पूर्वमिदंजगदव्याकृतमव्यक्तनामरूपात्मकमभूदूर्ध्वं
सृष्ट्यवसरेद्विधावाच्यवाचकभावेन व्याक्रियते व्यक्तीकृतमित्यर्थः इदानीं तद्धेदंतर्ह्यव्याकृतमासीदित्यत्राव्याकृतशब्दस्या
र्थमाह अचिंत्येति येयंब्रह्मणि अचिंत्याशक्तिर्मायास्ति एषा अव्याकृताभिधा अस्मिन्वाक्येऽव्याकृतशब्देनाभिधीयतइत्य
र्थः ६५ तन्नामरूपाभ्यामेव व्याक्रियतेत्यस्यार्थमाह अविक्रियेति अविकारिणि ब्रह्मणि वर्तमाना सानेकधाभूतभौतिकप्र
पंचरूपेण बहुधाविकारंपरिणामंप्राप्नोति मायाब्रह्मणि वर्तत इत्यत्र प्रमाणमाह मायांत्विति मायांपूर्वोक्तांप्रकृतिंप्रक्रियते

अव्याकृतंपुरासृष्टेरूर्ध्वंव्याक्रियतेद्विधा अचिंत्यशक्तिर्मायैषाब्रह्मण्यव्याकृताभिधा ६५ अविक्रियब्र
ह्मनिष्ठाविकारंयात्यनेकधा मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरं ६६ आद्योविकार आकाशः सोस्तिभा
त्यपिचप्रियः अवकाशस्तस्यरूपंतन्मिथ्यानतुतत्त्रयं ६७ नव्यक्तेः पूर्वमस्त्येवंनपश्चाच्चविनाशतः आदावंते
चयन्नास्ति वर्तमानेपि तत्तथा ६८ अव्यक्तादीनिभूतानिव्यक्तमध्यानिभारत अव्यक्तनिधनान्येवेत्याहकृष्णोर्जुनंप्रति ६९

नयेति प्रकृतिः उपादानकारणंविद्यात् जानीयात् मायिनंतस्याः आश्रयत्वेन तद्वंतंमहेश्वरंमायानियामकंविद्यादित्यनुवर्तते उभय
त्रतुशब्दः परस्परंवैलक्षण्यद्योतनार्थः ६६ इदानींमायोपहितस्य ब्रह्मणः प्रथमंकार्यमाह आद्यइति तस्य कारणादागतंरूपत्रय
माह सोस्तीति सच्चिदानंदरूपइत्यर्थः तस्य प्रातिभासिकस्वरूपमाह अवकाशइति तस्य पूर्वस्माद्रूपत्रयाद्वैलक्षण्यमाह तन्मिथ्ये
ति सदादिरूपत्रयंवास्तवमित्यर्थः ६७ तस्य चतुर्थरूपस्य मिथ्यात्वे हेतुमाह नव्यक्तेरिति ननूत्पत्तिविनाशयोर्मध्ये प्रतीयमा
नस्याकाशस्य कथमसत्वमित्याशंक्याह आदाविति ६८ उक्तार्थेकृष्णवाक्यंप्रमाणयति अव्यक्तादीनिइति ६९

सदादित्रयस्यावकाशेसत्वेकिंप्रमाणमित्याशंक्यानुभूतिरेवप्रमाणमित्याह मृद्वत्इति मृद्वदिति दृष्टांतप्रदर्शनार्थः घटादिषुय
थाकालत्रयेपि मृदनुवर्ततेतथासदादिरूपत्रयंसर्वदा अनुगतमित्यर्थः नन्ववकाशंविहाय सदादिरूपत्रयंकथमनुभूतमित्याशं
क्याह निराकाशइति ७० तदेवोपपादयति अवकाशेति पूर्ववादिनश्चोद्यमनुवदति शून्यमिति अंगीकृत्यपरिहारमाह अ
स्त्विति शब्दतः शून्यमर्थतस्त्ववकाशाभावविशेषणस्य विशेष्यत्वेन प्रतीयमानंकिंचिदस्तीत्यभ्युपगंतव्यमित्याह तादृगिति
हिशब्दो लोकप्रसिद्धिद्योतनार्थः ७१ भवत्वेवंप्रकृते किमायातमित्याशंक्य विशेष्यत्वेन प्रतीयमानस्य स्वरूपमभ्युपेयमित्याह
तादृक्त्वादिति तस्य सुखरूपत्वमाह औदासीन्येनेति औदासिन्यविषयत्वात्तस्य सुखरूपत्वमित्यर्थः नन्वनुकूलरहितस्य कथं

मृद्वत्सच्चिदानंदा अनुगच्छंति सर्वदा निराकाशेसदादीनामनुभूतिर्निजात्मनि ७० अवकाशेविस्मृतेथ तत्र किंभातितेव
द शून्यमेवेतिचेदस्तु नामतादृग्विभातिहि ७१ तादृक्त्वादेवतत्सत्वमौदासीन्येन तत्सुखं आनुकूल्यप्रातिकूल्यहीनंय
त्तन्निजंसुखं ७२ आनुकूल्येहर्षधीः स्यात् प्रातिकूल्येतुदुःखधीः द्वयाभावेनिजानंदोनिजदुःखंतुनक्वचित् ७३ निजा
नंदेस्थिरेहर्षशोकयोर्व्यत्ययः क्षणात् मनसः क्षणिकत्वेन तयोर्मानसतेष्यतां ७४ आकाशेप्येवमानंदः सत्ताभानेतुसंम
ते वाय्वादिदेहपर्यंतं वस्तुष्वेवंविभाव्यतां ७५ गतिस्पर्शौवायुरूपंवह्नेर्दाहप्रकाशने जलस्यद्रवताभूमेः काठिन्यंचेतिनिर्णयः ७६

सुखत्वमित्याशंक्याह आनुकूल्येति ७२ तदेवोपपादयति आनुकूल्येति ननुनिजानंदवन्निजदुःखमपि किंनस्यादित्याशंक्य दुः
खनिजरूपमिथ्याभावात् भेवमित्याह निजदुःखेति ७३ ननुनिजानंदस्य सदानंदत्वात् सर्वदा हर्ष एवस्यात् नतुशोकइत्याशंक्य
तस्य नित्यत्वेपि तद्व्यादिर्णो मनसः क्षणिकत्वेन मानसयोस्तयोरपि क्षणिकत्वमित्याह निजानंदइति ७४ दृष्टांते सिद्धमर्थंदार्ष्टा
तिके योजयति आकाशेपीति एवंनिजात्मन्युक्तप्रकारेणेत्यर्थः सत्ताभानेपि भवताप्यभ्युपगम्येते अतापनोपादनीयइत्यर्थः आकाशे
प्रतिपादितमर्थं वाय्वादिशरीरांतेष्वभ्युपगम्यतेत्याह वाय्वादीति ७५ तत्रवाय्वादीनामसाधारणान्धर्मान्दर्शयति गतिस्पर्शावित्यादिना ७६

2917
1938

पं·ट·

असाधारणेति ७७ फलितमाह अनेकधेति ७८ नहिंप्रतीयमानयोर्नामरूपयोः कागतिरित्याशंक्यकल्पितत्वमेवगतिरित्याह नि
त्स्वेति कल्पितत्वेहेतुः जन्मनाशेति ७९ ततःकिमित्यतआह सच्चिदानंदेति ८० ब्रह्मज्ञानदार्ढ्यस्यद्वैतावज्ञापूर्वकत्वात्श्रवणा
दिवद्द्वैतावज्ञापिकर्तव्येत्याह यावदिति ८१ उभयाभ्यासस्यफलमाह तदभ्यासेनेति ८२ इदानींब्रह्माभ्यासस्वरूपमाह त
च्चिंतनमिति ८३ नन्वनादिकालमारभ्यप्रतिभासमानस्यद्वैतस्यकादाचित्कज्ञानाभ्यासेनकथंनिवृत्तिरित्याशंक्यदीर्घकाल

असाधारणआकाशेओषध्यन्नवपुष्यपि एवंविभाव्यंमनसातत्तद्रूपंयथोचितं ७७ अनेकधाविभिन्नेषुनामरूपेषुचैक
धा तिष्ठतिसच्चिदानंदाविसंवादानकस्यचित् ७८ निस्तत्वनामरूपेद्वेजन्मनाशयुतेचते बुध्याब्रह्मणिवीक्षस्वसमुद्रबुद्बुदादिवत्
७९सच्चिदानंदरूपेस्मिन्पूर्णब्रह्मणिवीक्षिते स्वयमेवावजानातिनामरूपेशनैःशनैः ८० यावद्यावदवज्ञास्यात्तावत्ताव
त्तदीक्षणं यावद्यावद्वीक्ष्येततत्तावदुभयंत्यजेत् ८१ तदभ्यासेनविद्यायांसुस्थितायामयंपुमान् जीवन्नेवभवेन्मुक्तोव
पुरस्तुयथातथा ८२ तच्चिंतनंतत्कथनमन्योन्यंतत्प्रबोधनं एतदेकपरत्वंचब्रह्माभ्यासंविदुर्बुधाः ८३ वासनानेककाली
नादीर्घकालंनिरंतरं सादरंचाभ्यस्यमानेसर्वथैवनिवर्तते ८४ मृच्छक्तिवद्ब्रह्मशक्तिरनेकाननंतान्सृजेत् यद्वाजीवग
तानिद्रास्वप्नस्यात्रनिदर्शनं ८५ निद्राशक्तिर्यथाजीवेदुर्घटस्वप्नकारिणी ब्रह्मण्येषातथामायासृष्टिस्थित्यंतकारिणी ८६
स्वप्नेवियद्गतिंपश्येत्स्वमूर्धच्छेदनंयथा मुहूर्तेवत्सरौघंचमृतंपुत्रादिकंपुनः ८७

नैरंतर्यसत्कारसेवितेनाभ्यासेननिवर्तनएवेत्याह वासनेति ८४ ननुब्रह्मणएकस्यानेकाकारजगद्धेतुत्वमनुपपन्नमित्या
शंक्यमायासहितस्योपपद्यतइत्याह मृच्छक्तिवदिति अनंतान्कार्याणीत्यर्थः ननुमृच्छक्तेःसत्यत्वादनेकहेतुत्वाद्विषमो
दृष्टांतइत्याशंक्यपक्षांतरमाह यद्वेति ८५ दृष्टांतंविशदयति निद्रेति दार्ष्टांतिकमाह ब्रह्मणीति ८६ दुर्घटकारित्व
मेवस्पष्टयति स्वप्नेति ८७

स्वप्नस्यदुर्घटत्वेहेतुमाह इदंयुक्तमिति ८८ उक्तमर्थंकैमुतिकन्यायेनाह ईदृशइति ८९ अप्रयतमानब्रह्मनिष्ठायमायायाजगद्धेतुत्व
त्वेदृष्टांतमाह शयानइति ९० माययासृष्टान्पदार्थान्दर्शयति खानिलेति ननुपांचभौतिकत्वेनसाम्येपिकेषांचिच्चेतनत्वंकेषांचि
ज्जडत्वंकुतइत्याशंक्याह प्राणीति प्राणिशरीरेष्वंतःकरणेषुचैतन्यप्रतिबिंबनाच्चेतनत्वंइतरत्रतदभावाज्जडत्वमित्यर्थः ९१
ननुचेतनाचेतनविभागश्चेद्रूपब्रह्मकृतएवकिंनस्यादित्याशंक्यब्रह्मणःसर्वोपादानत्वेनसर्वत्रसमत्वान्नैवमित्याह चेतनेति ९२

इदंयुक्तमिदंनेतिव्यवस्थातत्रदुर्लभा यथायथेक्ष्यतेयद्यत्तत्तद्युक्तंतथातथा ८८ ईदृशोमहिमादृष्टोनिद्राशक्ते
र्यदातदा मायाशक्तेरचिंत्योयंमहिमेतिकिमद्भुतं ८९ शयानेपुरुषेनिद्रास्वप्नंबहुविधंसृजेत् ब्रह्मण्येवंनिर्विका
रेविकारान्कल्पयत्यसौ ९० खानिलाग्निजलोर्व्यंडलोकप्राणिशिलादिकाः विकाराःप्राणिधीष्वंतश्चिच्छायाप्र
तिबिंबिताः ९१ चेतनाचेतनेष्वेषुसच्चिदानंदलक्षणं समानंब्रह्मविद्येतेनामरूपपृथक्पृथक् ९२ ब्रह्मण्येते
नामरूपेपटेचित्रमिवस्थिते उपेक्ष्यनामरूपेद्वेसच्चिदानंदधीर्भवेत् ९३ जलस्थेयोमुखेस्वस्यदेहेदृष्ट्युपेक्ष्यतंती
रस्थएवदेहेस्वेतात्पर्यंस्याद्यथातथा ९४ सहस्रशोमनोराज्येवर्तमानेसदेवतत् सर्वैरुपेक्ष्यतेयद्वदुपेक्षानामरूपयोः ९५
क्षणेक्षणेमनोराज्यंभवत्येवान्यथान्यथा गतंगतंपुनर्नास्तिव्यवहारोबहिस्तथा ९६ नबाल्यंयौवनेबाल्ययौवनेस्थविरेतथा
मृतःपितापुनर्नास्तिनायात्येवगतंदिनं ९७ मनोराज्याद्विशेषःकःक्षणध्वंसिनिलौकिके अतोस्मिन्भासमानेपितत्सत्यत्वधियंत्यजेत् ९८

ब्रह्मणश्चिज्जडसाधारणत्वेहेतुमाह ब्रह्मणीति ब्रह्मणःसर्वकल्पनाधारत्वात्सर्वगतत्वमित्यर्थः तत्कथमवगम्यतइत्याशंकायांक
ल्पितनामरूपत्यागेधिष्ठानंब्रह्मावगम्यतइत्याह उपेक्ष्येति ९३ उक्तार्थेदृष्टांतमाह जलस्थइति नीरेधोमुखेदेहेपरिदृश्यमानेपि
तत्रादरंपरित्यज्यतीरस्थेस्वदेहेतद्विपरीतेममबुद्धिर्यथेत्यर्थः ९४ इदानींसर्वजनप्रसिद्धंदृष्टांतांतरमाह सहस्रशइति उपेक्षाकर्तव्य
इतिशेषः ९५ प्रपंचवैचित्र्यदृष्टांतमाह क्षणेक्षणइति दार्ष्टांतिकमाह व्यवहारइति ९६ तदेवविवृणोति नबाल्यमिति ९७ दृ
ष्टक्षणिकत्वमुपसंहारति मनोराज्यादिति क्षणिकत्वसाधनेप्रयोजनमाह अतोस्मिन्निति ९८

299
1938

ननुलौकिकोपेक्षायांकोलाभइत्याशंक्यब्रह्मधीः स्थिराभवतीत्याह उपेक्षितइति तर्हिज्ञानिनोव्यवहारः कथमित्याशंक्याह नटवदि
ति ९९ ननुज्ञानिनोव्यवहाराभ्युपगमेविकारित्वंप्रसज्येतेत्याशंक्यबुद्धौव्यवहारवत्त्यामपितत्साक्ष्यात्मानिर्विकारइतिसदृष्टांतमा
ह प्रवहतीति उदकेउपरिप्रवहत्यपि अधःस्थिताप्रौढशिलायथानचलति तथाएवंबुद्धौसंसरंत्यामपिनज्ञानीसंसरतीत्यर्थः १००
नन्वखंडेब्रह्मणितद्विलक्षणस्यजगतः कथमवभानमित्याशंक्यनिश्छिद्रेदर्पणेभावकाशवस्तुनोयथाभानंतद्वदित्याहनिश्छि

उपेक्षितेलौकिकेधीर्निर्विघ्नाब्रह्मचिंतने नटवत्कृतिमास्थायनिर्वहत्येवलौकिकं ९९
प्रवहत्यपिनीरेधःस्थिराप्रौढशिलायथा नामरूपान्यथात्वेपिकूटस्थंब्रह्मनान्यथा १००
निश्छिद्रदर्पणेभातिवस्तुगर्भंबृहद्वियत् सच्चिद्घनेतथानानाजगद्गर्भमिदंवियत् १
अदृष्ट्वादर्पणंनैवतदंतस्थेक्षणंतथा अमत्वासच्चिदानंदंनामरूपमतिःकुतः २
प्रथमंसच्चिदानंदेभासमानेथतावता बुद्धिंनियम्यनैवोर्ध्वंधारयेन्नामरूपयोः ३
एवंचनिर्जगद्ब्रह्मसच्चिदानंदलक्षणं अद्वैतानंदएतस्मिन्विश्राम्यंतुजनाश्चिरं ४
ब्रह्मानंदाभिधेग्रंथेतृतीयाध्यायईरितः अद्वैतानंदएवस्याज्जगन्मिथ्यात्वचिंतया ५

द्रइति १ नन्वद्वयेब्रह्मणिकथंजगत्प्रतीतिरित्याशंक्यसच्चिदानंदप्रतीतिपुरःसरमेवजगत्प्रतीतिरितिसदृष्टांतमाह अदृष्ट्वे
ति २ ननुनामरूपयोरपिभासमानत्वात्कथंनिर्विषयब्रह्मप्रतीतिरित्याशंक्यतद्बुध्युपायमाह प्रथममिति सच्चिदानंदब्रह्म
णिकल्पितनामरूपात्मकेप्रपंचेसच्चिदानंदमात्रंबुध्यागृहीत्वानामरूपयोर्बुद्धिंनधारयेत् ३ एवंचसतिनिर्जगत्ब्रह्मसच्चिदानं
दलक्षणंभवतीत्यर्थः ४ इदानीमध्यायार्थमुपसंहरति ब्रह्मानंदाभिधइति ५ इतिश्रीवि० ब्रह्मानंदपंचकांतर्गतअ० तृ० ध्यायः

अथविद्यानंदः इदानींवक्ष्यमाणयोः ग्रंथयोःसंबंधमाह योगेनेति १ विद्यानंदस्वरूपमाह विषयेति तस्यावांतरभेदमाह दुः
खाभावेति २ चातुर्विध्यमेवदर्शयति दुःखाभावश्चेति ३ निवर्तनीयंदुःखंविभजते ऐहिकमिति ऐहिकस्यनिवृत्तिर्बृहदारण्यक
वाक्येनाच्यते इत्याह निवृत्तिमिति ४ तच्छ्रुतिवाक्यंपठति आत्मानंचेति ५ आत्मनिशोकसंबंधंदर्शयितुंतद्भेदमाह जीवात्मेति
आत्मनोजीवत्वनिमित्तमाह चिदाभासेत्यादिति चैतन्यस्यस्थूलसूक्ष्मकारणरूपैःत्रिभिःशरीरैःतादात्म्यभ्रमसतिचिदाभोक्तृ

योगेनात्मविवेकेनद्वैतमिथ्यात्वचिंतया ब्रह्मानंदंपश्यतोथविद्यानंदोनिरूप्यते १ विषयानंदवद्विद्यानंदोधीवृत्ति
रूपकः दुःखाभावादिरूपेणप्रोक्तएषचतुर्विधः २ दुःखाभावश्चकामाप्तिःकृतकृत्योहमित्यसौ प्राप्तप्राप्योहमित्ये
वंचातुर्विध्यमुदाहृतं ३ ऐहिकंचामुष्मिकंचेत्येवंदुःखंद्विधेरितं निवृत्तिमैहिकस्याहबार्हदारण्यकंवचः ४ आत्मा
नंचेद्विजानीयादयमस्मीतिपूरुषः किमिच्छन्कस्यकामायशरीरमनुसंज्वरेत् ५ जीवात्मापरमात्माचेत्यात्माद्विवि
धईरितः चिदाभासत्रिभिर्देहैर्जीवःसन्भोक्ततांव्रजेत् ६ परात्मासच्चिदानंदस्तादात्म्यंनामरूपयोः ग
त्वाभोग्यत्वमापन्नस्तद्विवेकेतुनोभयं ७ भोग्यमिच्छन्भोक्तुरर्थेशरीरमनुसंज्वरेत् ज्वरास्त्रिषुशरीरेषुस्थितान
त्वात्मनोज्वराः ८ व्याधयोधातुवैषम्येस्थूलदेहेस्थिताज्वराः कामक्रोधादयःसूक्ष्मेद्वयोर्बीजंतुकारणे ९

त्वंभवतिसभोक्ताजीवइत्युच्यते ६ इदानींपरमात्मनःस्वरूपमाह परमात्मेति तस्यभोग्यरूपत्वापत्तिप्रकारमाह तादात्म्यमि
ति नामरूपकल्पनाधिष्ठानत्वेनतादात्म्यंप्राप्यभोग्यमित्युच्यतइत्यर्थः भोक्तृत्वाद्यभावकारणमाह तद्विवेकइति ताभ्यांशरीरत्रय
जगद्भ्यांविवेकेभेदज्ञानेसतिनोभयंभोक्तृभोग्यस्वरूपंनास्तीत्यर्थः ७ उक्तमर्थंविवृणोति भोग्यमिति कस्यतद्ज्वराभिसं
बंधइत्याशंक्याह ज्वराइति ८ कस्मिन्शरीरेकोवाज्वरइत्याशंक्यस्थूलदेहेविद्यमानान्ज्वरान्दर्शयति व्याधयइति लिंगदेहग
तान्ज्वरानाह कामेति ९

301
1938

इदानीमुदाहृतश्रुतितात्पर्यकथनव्याजेन पूर्वोक्तमेवार्थं विशदयति अद्वैतेति तृतीयाध्यायोक्तप्रकारेण मायाकार्यनामरूपाभ्यां सच्चिदानंदपरमात्मनि विविक्ते भेदेन ज्ञाते सति सर्वप्रपंचं मिथ्येति जानन् किन्नाम भोग्यमिच्छति १० ततः पूर्वाध्यायोक्तरीत्या जीवात्मस्वरूपे संगकूटस्थचैतन्यरूपे निश्चिते सति कामयितुरभावाज्ज्वरादिसंबंधो नास्तीत्याह आत्मानंदेति ११ इदानीमामुष्मिकं ज्वरं दर्शयति पुण्येति तस्याभावः प्रथमेध्याये निरूपित इत्याह प्रथमेति १२ ननु ज्ञानिनः प्रारब्धकर्मविषया चिंता मा भूदागामिकर्मविषया चिंता भवत्येवेत्याशंक्य तद्यथा पुष्करपर्ण इत्यादिश्रुत्या ज्ञानिन आगामिकर्मसंबंधनिराकरणान्न तद्विषया चिंतास्तीत्याह

अद्वैतानंदमार्गेण परात्मनि विवेचिते अपश्यन्वास्तवं भोग्यं किन्नामेच्छेत्परात्मवित् १० आत्मानंदोक्तरीत्यास्मिन् जीवात्मन्यवधारिते भोक्तैव नास्ति कोप्यत्र शरीरानुज्वरः कुतः ११ पुण्यपापद्वये चिंता दुःखमामुष्मिकं भवेत् प्रथमाध्याय एवोक्तश्चिंता नैव न तपेदिति १२ यथा पुष्करपर्णस्मिन्नपामश्लेषणं तथा वेदनादूर्ध्वमागामिकर्मणोश्लेषणं बुधे १३ इषीकातूणतूलस्य वह्निदाहः क्षणाद्यथा तथा संचितकर्मास्य दग्धं भवति वेदनात् १४ यथैधांसि समिद्धोग्निर्भस्मसात्कुरुतेर्जुन ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा १५ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते हत्वापि स इमाँल्लोकान्न हंति न निबध्यते १६ मातापित्रोर्वधस्तेयभ्रूणहत्यान्यदीदृशं न मुक्तिं नाशयेत्पापं मुखकांतिर्न नश्यति १७ दुःखाभाववदेवास्य सर्वकामाप्तिरीरिता सर्वान्कामानसावाप्त्वा ह्यमृतो भवदित्यतः १८

यथेति १३ तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंत इति श्रुत्यर्थवर्णनेन संचितकर्मविषयापि चिंता ज्ञानिनो नास्तीत्याह ईषीकेति १४ उक्तार्थे भगवद्वाक्यमपि प्रमाणयति यथैधांसीत्यादिना १५ १६ अस्मिन्नेवार्थे मातृवधेन न पितृवधेन न स्तेयेन न भ्रूणहत्यया नास्य पापं चन च क्रुधो मुखान्नीलं वेत्तीति श्छांदोग्यश्रुतिवाक्यमर्थतः पठति मातापित्रोरिति न चास्य कं पदं नील मितिकांतिरित्यर्थः १७ उक्त चातुर्विध्यमध्ये द्वितीयं प्रकारमाह दुःखेति ईरिता श्रुत्येति शेषः अस्मिन्नर्थे ऐतरेयश्रुतिवाक्यं पठति सर्वानिति १८

जक्षन्क्रीडन्रममाणः स्त्रीभिर्यानैर्वा ज्ञातिभिर्वा वयस्यैर्वा नोपजनं स्मरन्निदं शरीरमिति छांदोग्यश्रुतिवाक्यमर्थतः पठति जक्षन्निति १९ तैत्तिरीयश्रुतिवाक्यं पठति सर्वानिति ननु कर्मफलभोगार्थी कारे जन्मापि प्रसज्येतेत्याशंक्याह नान्यवदिति ज्ञानेन संचितकर्मणां दग्धत्वाद्न तद्वज्जन्मनास्तीत्यर्थः २० इदानीं तैत्तिरीयबृहदारण्यकवाक्यं संक्षिप्यार्थतः पठति युवेति २१ ननु सार्वभौमादिहिरण्यगर्भांतानां जीवनिष्ठानामानंदानां कथं ज्ञानिनि संभव इत्याशंक्य सर्वेषामानंदानां ज्ञानिनावगतब्रह्मांशत्वात्संभव इत्याह यमानं

जक्षन्क्रीडन्रतिं प्राप्तः स्त्रीभिर्यानैस्तथान्यैः शरीरं न स्मरेत्प्राणः कर्मणा जीवयेदसुं १९ सर्वान्कामान्सहाप्नोति नान्यवज्जन्मकर्मभिः वर्तंते श्रोत्रिये भोगा युगपत्क्रमवर्जिताः २० युवारूपी च विद्यावान्नीरोगो दृढचित्तवान् सैन्योपेतः सर्वपृथ्वीं वित्तपूर्णां प्रपालयन् २१ सर्वैर्मानुष्यकैर्भोगैः संपन्नः तृप्तभूमिपः यमानंदमवाप्नोति ब्रह्मविच्च तमश्नुते २२ मर्त्यभोगद्वये नास्ति कामस्तृप्तिरतः समा भोगान्निष्कामतैकस्य परस्यापि विवेकतः २३ श्रोत्रियत्वाद्वेदशास्त्रैर्भोग्यदोषानवेक्षते राजा बृहद्रथो दोषांस्तांस्तांस्तांस्तांगाथाभिरुदाहरत् २४ देहदोषाश्चित्तदोषा भोग्यदोषा अनेकशः शुना वांते पायसे नो कामस्तद्वद्विवेकिनः २५ निःकामत्वसमेप्यत्र राज्ञः साधनसंचये दुःखमासीद्भाविनाशादतिभीरनुवर्तते २६ नोभयं श्रोत्रियस्यातस्तदानंदोधिकोन्यतः गंधर्वानंद आशास्ति राज्ञो नास्ति विवेकिनः २७

दमिति २२ ननु सार्वभौमश्रोत्रिययोर्विषयप्राप्तिसाम्याभावात् कथमानंदसाम्यमित्याशंक्य वैराग्यस्य साम्यात्तृप्तिसाम्यमित्याह मर्त्येति तृप्तिसाम्ये हेतुमाह भोगादिति २३ विवेकत इत्युक्तमर्थं विवृणोति श्रोत्रियेति विषयदोषाः कस्याः शाखायां केन निरूपिता इत्याशंक्य बृहद्रथेन मैत्रायणीयाख्यशाखायां गाथाभिरुक्ता इत्याह राजेति २४ विवेकिनः कामानुदये दृष्टांतमाह शुनेति २५ सार्वभौमाच्छ्रोत्रियस्याधिक्यमाह निष्कामत्व इति सार्वभौमस्य साधनसाध्यं पश्चात्तन्नाश इति श्रोत्रियदोषद्वयवत्त्वात् २६ श्रोत्रियस्तु तदुभयाभावादाधिक्यमित्यर्थः श्रोत्रियस्याधिक्यांतरमाह गंधर्वेति

303
1938

पं॰ द॰ इदानींगंधर्वानंदद्वैविध्यंदर्शयितुंश्लोकद्वयेनगंधर्वभेदमाह अस्मिन्नित्यादिना २८ पूर्वेति २९ चिरलोकपित्रानंदप्रदर्शनायचिरलोक
पितृनाह अग्निष्वात्तादयइति देवानंदद्वैविध्यज्ञानायदेवभेदमाह कल्पादाविति त्यादिना ३० अस्मिन्निति ३१ यमाग्निमुख्याति
इंद्रबृहस्पतीप्रसिद्धावित्यर्थः ३२ सार्वभौमादिसूत्रांतानांश्रोत्रियान्युनत्वद्योतनायाह सार्वभौमादीति एभ्यः सर्वेभ्योधिकइत्यर्थः
इदानीमेषांसर्वेषामानंदाः श्रोत्रियेविद्वत्तत्स्यैवेतेषुनिस्पृहत्वादित्याह तेरिति ३४ उपपादितमर्थमुपसंहरति सर्वकामाप्तिरिति इदा

अस्मिन्कल्पेमनुष्यःसन्पुण्यपाकविशेषतः गंधर्वत्वंसमापन्नोमर्त्यगंधर्वउच्यते २८ पूर्वकल्पेकृतात्पुण्यात्कल्पादावेवचेद्
येन गंधर्वत्वंनाहृश्रोत्रदेवगंधर्वउच्यते २९ अग्निष्वात्तादयोलोकेपितरश्चिरवासिनः कल्पादावेवदेवत्वंगताआजानदेवताः ३०
अस्मिन्कल्पेश्वमेधादिकर्मकृत्वामहत्पदं अवाप्याजानदेवैर्याः पूज्यास्ताः कर्मदेवताः ३१ यमाग्निमुख्यादेवास्युर्ज्ञाताविं
इंद्रबृहस्पती प्रजापतिविराट्प्रोक्तोब्रह्मासूत्रात्मनामकः ३२ सार्वभौमादिसूत्रांताउत्तरोत्तरकामिनः अवाङ्मनसगम्यो
यमात्मानंदस्ततःपरः ३३ तैस्तैःकाम्येषुसर्वेषुसुखेषुश्रोत्रियोयतः निस्पृहस्तेनसर्वेषामानंदाःसंतितस्यते ३४
सर्वकामाप्तिरेषोक्तायद्वासाक्षिचिदात्मना स्वदेहवत्सर्वदेहेष्वपिभोगानवेक्षते ३५ अज्ञस्याप्येतदस्त्येवनतुतत्त्वेन
बोधनः योवेदसोश्नुतेसर्वान्कामानित्यब्रवीच्छ्रुतिः ३६ यद्वासर्वात्मतांस्वस्यसाम्नागायतिसर्वदा अहमन्नंतथा
न्नादश्चेतिसामह्यधीयते ३७ दुःखाभावश्चकामाप्तिरुभेह्येवंनिरूपिते कृतकृत्यत्वमन्यच्चप्राप्तप्राप्यत्वमीक्ष्यतां ३८

नींपक्षांतरमाह यद्वेति यथास्वदेहे आनंदाकारबुद्धिसाक्षित्वेनानंदित्वमितरेष्वपिदेहेषुतद्वदित्यर्थः ३५ ननूक्तप्रकारेणाज्ञस्यापिसर्वानं
दप्राप्तिरस्तीत्याशंक्यसर्वेषुसर्वबुद्धिसाक्ष्यहमितिविज्ञानाभावान्नैवमित्याह अज्ञस्यापीति उक्तार्थेतैत्तिरीयकश्रुतिंप्रमाणयति योवे
देति गुहायांनिहितंब्रह्मयोवेदसोश्नुतइतियोजना ३६ इदानींतृतीयप्रकारमाह यद्वेति इमाल्लोकान्कामान्नीकामरूप्यनुसंचरन्नि
त्यादिनेत्यर्थः ३७ अतीतग्रंथेनसिद्धमर्थंसंक्षिप्याह दुःखाभावश्चेति अवशिष्टंकृतकृत्यत्वंप्राप्तप्राप्यत्वमुभयंतृप्तिदीपेद्रष्टव्यमित्यर्थः ३८

उभयंतृप्तिदीपेद्रष्टव्यमित्याप्तिरितिं नत्वाज्ञानुसंधेहायाः श्लोकाबुद्धिविविक्तयै ३९ ऐहिकामुष्मिकव्रातसिध्यैमुक्तेश्वसिद्धये बहुकृत्यंपुरा
स्यात्तत्सर्वमधुनाकृतं ४० तदेतत्कृतकृत्यत्वंप्रतियोगिपुरःसरं अनुसंदधदेवायमेवंतृप्यतिनित्यशः ४१ दुःखिनोज्ञाःसंसरंतुकामंपुत्राद्य
पेक्षया परमानंदपूर्णोहंसंसरामिकिमिच्छया ४२ अनुतिष्ठंतुकर्माणिपरलोकयियासवः सर्वलोकात्मकःकस्मादनुतिष्ठामिकिंकथं ४३ व्या
चक्षतांतेशास्त्राणिवेदानध्यापयंतुवा येत्राधिकारिणोमेतुनाधिकारोक्रियत्वतः ४४ निद्राभिक्षेस्नानशौचे नेच्छामिनकरोमिच द्रष्टारश्चेत्क
ल्पयंतिकिंमेस्यादन्यकल्पनात् ४५ गुंजापुंजादिदह्येतनान्यारोपितवह्निना नान्यारोपितसंसारधर्मानेवमहंभजे ४६ शृण्वंत्वज्ञाततत्त्वास्तेजान
न्कस्माच्छृणोम्यहं मन्यंतांसंशयापन्नानमन्येहमसंशयः ४७ विपर्यस्तोनिदिध्यासेत्किंध्यानमविपर्यये देहात्मत्वविपर्यासंनकदाचिद्भजाम्य
हं ४८ अहंमनुष्यइत्यादिव्यवहारोविनाप्यमुं विपर्यासंचिराभ्यस्तवासनातोवकल्पते ४९ प्रारब्धकर्मणिक्षीणेव्यवहारोनिवर्तते कर्माक्षये
त्वसौनवशाम्येद्ध्यानसहस्रतः ५० विरलत्वंव्यवहृतेरिष्टंचेद्ध्यानमस्तुते अबाधिकांव्यवहृतिंपश्यन्ध्यायाम्यहंकुतः ५१ विक्षेपोनास्तियस्मा
न्मेनसमाधिस्ततोमम विक्षेपोवासमाधिर्वामनसःस्याद्विकारिणः ५२ नित्यानुभवरूपस्यकोमेत्रानुभवःपृथक् कृतंकृत्यंप्रापणीयंप्राप्तमित्ये
वनिश्चयः ५३ व्यवहारोलौकिकोवाशास्त्रीयोवान्यथापिवा ममाकर्तुरलेपस्ययथारब्धंप्रवर्ततां ५४ अथवाकृतकृत्योपिलोकानुग्रहकाम्यया
शास्त्रीयेणैवमार्गेणवर्तेहंकाममक्षितिः ५५ देवार्चनस्नानशौचभिक्षादौवर्ततांवपुः तारंजपतुवाक्तद्वत्पठत्वाम्नायमस्तकं ५६ विष्णुं
ध्यायतुधीर्यद्वाब्रह्मानंदेविलीयतां साक्ष्यहंकिंचिदप्यत्रनकुर्वेनापिकारये ५७ कृतकृत्यतयातृप्तःप्राप्तप्राप्यतयापुनः तृप्यन्नेवंस्वमनसा
मन्यतेसौनिरंतरं ५८ धन्योहंधन्योहंनित्यंस्वात्मानमंजसावेद्मि धन्योहंधन्योहंब्रह्मानंदोविभातिमेस्पष्टं ५९ धन्योहंधन्योहंदुःखंसांसा
रिकंनवीक्षेद्य धन्योहंधन्योहंस्वस्याज्ञानंपलायितंक्वापि ६० धन्योहंधन्योहंकर्तव्यंमेनविद्यतेकिंचित् धन्योहंधन्योहंप्राप्तव्यंसर्वमद्यसंपन्नं ६१
धन्योहंधन्योहंतृप्तेर्मेकोपमाभवेल्लोके धन्योहंधन्योहंधन्योधन्यःपुनःपुनर्धन्यः ६२ अहोपुण्यमहोपुण्यंफलितंफलितंदृढं अस्यपुण्यस्यसं
पत्तेरहोवयमहोवयं ६३ अहोशास्त्रमहोशास्त्रमहोगुरुरहोगुरुः अहोज्ञानमहोज्ञानमहोसुखमहोसुखं ६४ ब्रह्मानंदाभिधेग्रंथेचतुर्थोध्या
यईरितः विद्यानंदस्तदुत्पत्तिपर्यंतोभ्यासइष्यतां ६५ इतिआनंदपंचकेविद्यानंदोनामचतुर्थोध्यायः ४ ॥ः ७ ७

303
1938

पं.द.

पंचमाध्यायस्य प्रतिपाद्यमर्थमाह अथात्रेति ननु विषयानंदस्य लौकिकत्वात्मोक्षशास्त्रे निरूपणमनुपपन्नं इत्याशंक्य तस्य लौकिकप्र
सिद्धत्वेपि ब्रह्मानंदैकदेशत्वेन ब्रह्मज्ञानोपयोगित्वादुक्तमित्याह द्वारेति ब्रह्मानंदैकदेशत्वे किंप्रमाणमित्याशंक्याह तदंशत्वमिति १
तामेव श्रुतिमर्थतः पठति एष इति २ इदानीं विषयानंदस्य ब्रह्मानंदलेशत्वप्रदर्शनाय तदुपाधिभूतांतःकरणवृत्तीर्विभजते शांता इति शां
ताः सात्विक्यो वृत्तयः घोराः राजस्यः मूढास्तामस्यः ताश्च शांतादिवृत्तीर्दर्शयति वैराग्यमित्यादिना ३ तृष्णेति उदाहृतासु त्रिविधास्व

अथात्र विषयानंदो ब्रह्मानंदांशरूपभाक् निरूप्यते द्वारभूतस्तदंशत्वं श्रुतिर्जगौ १ एषोस्य परमानंदो योऽखंडैकरसात्मकः
अन्यानि भूतान्येतस्य मात्रामेवोपभुंजते २ शांता घोरास्तथा मूढा मनसो वृत्तयस्त्रिधा वैराग्यं क्षांतिरौदार्यमित्याद्याः शां
तवृत्तयः ३ तृष्णा स्नेहो रागलोभावित्याद्या घोरवृत्तयः संमोहो भयमित्याद्याः कथिता मूढवृत्तयः ४ वृत्तिष्वेतासु सर्वा
सु ब्रह्मणश्चित्स्वभावता प्रतिबिंबति शांतासु सुखं च प्रतिबिंबति ५ रूपंरूपं बभूवासौ प्रतिरूप इति श्रुतिः उपमा सूर्य
केत्यादि सूत्रयामास सूत्रकृत् ६ एक एव तु भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचंद्रवत् ७ जले
प्रविष्टश्चंद्रोयमस्पष्टः कलुषे जले विस्पष्टो निर्मले तद्वद्द्वेधा ब्रह्मापि वृत्तिषु ८ घोरमूढासु मालिन्यात्सुखांशोस्य तिरोहितः
ईषन्नैर्मल्यतस्तत्र चिदंशप्रतिबिंबनं ९ यद्वापि निर्मले नीरे वह्नेरौष्ण्यस्य संक्रमः न प्रकाशस्य तद्वत्स्याच्चिन्मात्रोद्भूतिरत्र च १०

पि वृत्तिषु ब्रह्मणश्चिद्रूपत्वं प्रतिभाति इत्याह वृत्तिष्विति शांतासु विशेषमाह शांतास्विति चशब्दः उक्तद्वयसमुच्चयार्थः ५ उक्तार्थे श्रुतिमर्थ
तः पठति रूपमिति तत्रैव व्याससूत्रैकदेशं पठति उपमेति अत एव चेति सूत्रस्य पूर्वभागः ६ स्वरूपेणैकस्योपाधिसंपर्कान्नानात्वे श्रुतिं पठति
एकस्त्वेति ननु निरवयवस्य ब्रह्मणः क्वचिच्चिन्मात्रभानमितरत्र चिदानंदयोर्भानमित्येवं विभागकरणमनुपपन्नमित्याशंक्य चंद्रदृष्टांतेन क्व
चिच्चिदंशभानमुपपन्नमित्याह जले इति ८ तदेवोपपादयति घोरेति ९ ननु चंद्रोपाधेरुदकस्यैव द्वैविध्यादंशभानमुपपन्नं प्रकृते तदुपाधि
भूतस्यांतःकरणस्यैकत्वादेकांशभानमनुपपन्नमित्याशंक्य दृष्टांतांतरमाह यद्वेति १०

इदानीं शांतासु वृत्तिषु चिदानंदयोः प्रतीतौ दृष्टांतांतरमाह काष्ठेति ११ नन्वेवं व्यवस्था कुतः कृतेत्याशंक्याह वस्त्विति तत्र किं नियामकमि
त्याशंक्याह अनुभूतीति १२ अनुभूतिमेव दर्शयति न घोरास्विति शांतास्वपि आनंदप्रकाशोस्ति सोपि क्वचित्कस्यचित्सुखातिशयो भवतीत्याह
शांतास्वपीति १३ पूर्वोक्तघोरमूढवृत्तिषु सुखाभावमेवाभिनीय दर्शयति गृहेत्यादिना १४ शांतास्वप्यानंदप्रकाशोस्ति सोपि क्वचिन्न भवति
तत्र प्रतिकूलः दुःखस्य सत्वादित्यर्थः सुखासिद्धौ दुःखं वर्धते सुखस्य प्रतिबंधे तु क्रोधो भवति सुखाभावे कारणांतरमाह द्वेषो वेति १५

काष्ठे त्वौष्ण्यप्रकाशौ द्वावुद्भवं गच्छतो यथा शांतासु सुखचैतन्ये तथैवोद्भूतिमाप्नुतः ११ वस्तुस्वभावमाश्रित्य व्यवस्था तूभ
योः समा अनुभूत्यनुसारेण कल्प्यते हि नियामकं १२ न घोरासु न मूढासु सुखानुभव ईक्ष्यते शांतास्वपि क्वचित्कश्चित्सुखा
तिशय ईक्ष्यतां १३ गृहक्षेत्रादिविषये यदा कामो भवेत्तदा राजसस्यास्य कामस्य घोरत्वात्तत्र नो सुखं १४ सिध्येन्नवेत्यस्ति
दुःखमसिद्धौ तद्विवर्धते प्रतिबंधे भवेत्क्रोधो द्वेषो वा प्रतिबंधकः १५ अशक्यश्चेत्प्रतीकारो विषादः स्यात्स तामसः क्रोधा
दिषु महद्दुःखं सुखशंकापि दूरतः १६ काम्यलाभे हर्षवृत्तिः शांता तत्र महत्सुखं भोगे महत्तरं लाभप्रसक्तावीषदेव हि १७
महत्तमं विरक्तौ तु विद्यानंदे तदीरितं एवं क्षांतौ तथौदार्ये क्रोधलोभनिवारणात् १८ यद्यत्सुखं भवेत्तत्तद्ब्रह्मैव प्रतिबिंबनात्
वृत्तिष्वंतर्मुखास्वस्य निर्विघ्नं प्रतिबिंबनं १९ सत्ता चितिः सुखं चेति स्वभावा ब्रह्मणस्त्रयः मृच्छिलादिषु सत्तैव व्यज्यते नेत
रद्वयं २० सत्ता चितिर्द्वयं व्यक्तं धीवृत्त्योर्घोरमूढयोः शांतवृत्तौ त्रयं व्यक्तं मिश्रं ब्रह्मेत्थमीरितं २१

परिहारस्याशक्यत्वेपि विषादो भवति तस्यापि तामसत्वान्न तत्र सुखमित्याह अशक्य इति क्रोधादिष्वित्यादयः स्पष्टार्थाः १६ काम्येति
१७ महत्तममिति १८ यद्यदिति एवं शांत्यादीनां सिद्धमित्याह वृत्तिष्विति १९ इदानीं सर्वत्र ब्रह्मस्वरूपानुगतिप्रदर्शनाय तत्स्वरूपं दर्श
यति सत्तेति मृच्छिलादिषु सन्मात्रमित्यर्थः घोरमूढयोर्द्वयोः सत्ताचिती द्वे शांतवृत्तौ सच्चिदानंदास्त्रयोभिव्यक्ताः २० एवं सप्रपंचब्र
ह्माभिहितमित्याह मिश्रमिति २१

पं॰ द॰ अमिश्रंब्रह्मकुतोज्ञायते इत्याशंक्याह अमिश्रमिति तौचज्ञानयोगौपूर्वमेवोक्तावित्यर्थः कुत्रोक्तावित्याशंक्ययोगः प्रथमाध्यायउक्त इत्याह आद्येति समनंतराध्याययोर्ज्ञानमुक्तमित्याह ज्ञानमिति २२ ननुसच्चिदानंदानांब्रह्मरूपत्वेमायायाः किंरूपमित्याशंक्या ह असत्तेति नरशृंगादावसत्वंशिलादिषुजाड्यमितिविवेकः २३ दुःखंकुत्रेत्याशंक्याह घोरमूढेति एवंसर्वत्रमायाप्रतिभासतइ त्याह एवमिति शांत्यादिषुवृत्तिषुब्रह्मणोमिश्रत्वेकिंकारणमित्यत आह शांतास्विति २४ एतदभिधानंकिमर्थमित्याशंक्यब्रह्म

अमिश्रंज्ञानयोगाभ्यांतौचपूर्वमुदीरितौ आद्येऽध्याययोगचिंताज्ञानमध्याययोर्द्वयोः २२ असत्ताजाड्यदुःखेद्वेमा मारूपंत्रयंत्विदं असत्तानरशृंगादौजाड्यंकाष्ठशिलादिषु २३ घोरमूढधियोर्दुःखमेवंमायाविजृंभिता शांतासुजड बुध्यैक्यामिश्रंब्रह्मेतिकीर्तितं २४ एवंस्थितेत्रयोब्रह्मध्यातुमिच्छेत्समानसौ नरशृंगादिमुपेक्षेतशिष्टंध्यायेद्यथायथं २५ शिलादौनामरूपेद्वेत्यक्त्वासन्मात्रचिंतनं त्यक्त्वादुःखंघोरमूढधियोःसच्चिद्विचिंतनं २६ शांतासुसच्चिदानंदांस्त्रीन प्येवंविचिंतयेत् कनिष्ठमध्यमोत्कृष्टास्तिस्रश्चिंताःक्रमादिमाः २७ मंदस्यव्यवहारेपिमिश्रब्रह्मणिचिंतनं उत्कृष्टंवक्तु मेवात्रविषयानंदईरितः २८ औदासिन्येतुधीवृत्तेःशैथिल्यादुत्तमोत्तमं चिंतनंवासनानंदेध्यानमुक्तंचतुर्विधं २९

ध्यानार्थमित्याह एवमिति नरशृंगादिं उपेक्ष्यान्यत्रब्रह्मध्यानंकार्यमित्याह नरशृंगादिमिति २५ अन्यत्रेत्युक्तंकुत्रकथंध्येयमि त्यत आह शिलादाविति घोरमूढबुद्धिषुदुःखंपरित्यज्यसच्चिद्रूपयोश्चिंतनंकर्तव्यमित्याह त्यक्त्वेति २६ सात्विकवृत्तिषुसच्चिदा नंदास्त्रयोपिध्येयाइत्याह शांतास्विति एषांध्यानानांकिंसाम्यंनेत्याह कनिष्ठेति २७ इदानींनिर्गुणब्रह्मध्यानेनधिकारिणानुग्र हायमिश्रब्रह्मध्यानेधिकारइत्यभिप्रायेणाह मंदस्येति २८ एवंसवृत्तिकंध्यानत्रयमुक्त्वाऽवृत्तिकंध्यानमाह औदासिन्यत्विति एभ्योध्यानेभ्योधिकमित्यर्थः उक्तंनिगमयति ध्यानमिति २९

अयंध्यानावांतरभेदः किंन्नेत्याह नध्यानमिति तर्हिकिमेतदित्याशंक्याह ब्रह्मविद्येति इयंब्रह्मविद्याकथमुत्पन्नेत्याह ध्यानेनेति ३० अस्याःविद्यायाहेतुमाह विद्यायामिति ३१ भेदकोपाधिवर्जनादित्युक्तान्तानेवभेदकोपाधीनाह शांतेति एतेषांपरिहा रः केनोपायेनेत्याशंक्याह योगादिति ३२ श्रीः श्रीः श्रीः श्रीः श्रीः

नध्यानज्ञानयोगाभ्यांब्रह्मविद्यैवसाखलु ध्यानेनैकाग्र्यमापन्नेचित्तेविद्यास्थिराभवेत् ३०
विद्यायांसच्चिदानंदाअखंडैकरसात्मतां प्राप्यभांतिनभेदेनभेदकोपाधिवर्जनात् ३१
शांतघोराःशिलाद्याश्चभेदकोपाधयोमताः योगाद्विवेकतोवैषामुपाधीनामपाकृतिः ३२
निरुपाधिब्रह्मतत्वेभासमानेस्वयंप्रभे अद्वैतेत्रिपुटीनास्तिभूमानंदोतउच्यते ३३
ब्रह्मानंदाभिधेग्रंथेपंचमोध्यायईरितः विषयानंदएतेनद्वारेणांतःप्रविश्यतां ३४
प्रीयाद्धरिर्हरोनेनब्रह्मानंदेनसर्वदा पायाच्चप्राणिनःसर्वान्स्वाश्रितान्शुद्धमानसान् ३५

फलितमाह निरुपाधीति त्रिपुटीभानाभावाद्भूमानंदइत्युच्यतेइत्यर्थः ३३ ग्रंथमुपसंहरति ब्रह्मानंदेत्यादिना ३४ प्रिया दिति ३५ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिकिंकरेणरामकृष्णाख्यविदुषाविरचितायां पंचदशीप्रकाशिकासमाप्तः ॥ श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः

307
1538

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

विषयानंदः समाप्तः ग्र०१५